नं० ६८७-घ
श्रौतप्रायश्चित्तप्रयोग
रत्नमाला
सूत्रपद्धतिः (अपूर्ण)
पत्राणि १५१

प्रयोगरत्नमालावेदोक्त

अं ९८

ग्रं० ६८०० श्लो
श्रौतप्रायश्चित्त प्रयोग रत्नमाला (सं०)
पत्राणि ११८
[illegible] (अपूर्ण)
कर्त्ता- विश्वनाथ दीक्षित

१ श्रीमन्महागणपतये नमः ॥ श्रीकृष्णप्रमुखेभ्यः सकलदेवताभ्यो नमः विश्वेशं माधवं सर्पं गणेशं जगदंबिकां ॥ अग्निं च भैरवं ध्यात्वा नत्वा चापित
ऐणहरन् आश्वलायनसूत्रं च तद्भाष्याणि तथैव च ॥ तद्वृत्तिं च प्रयोगांश्च ग्रंथानन्यान्यथोदितान् ॥ यानि बौधायनोक्तानि सूत्राणि विविधा
नि च ॥ तद्भाष्याणि प्रयोगांश्च प्रदीपादीन्यथामति ॥ सूत्रांतराणि चालोच्य यत्नतः संहितायवै ॥ प्रयोगरत्नमालेयं प्रायश्चित्तस्य ग्रथ्यते ॥
बौधायनीयकल्पस्य कृतो येन परिग्रहः ॥ ऋक्शाखीयः स यष्टा चेत्तदैतस्याः परिग्रहः ॥ अयं तदुपयोगित्वेन किंचिल्लिख्यते ॥ तत्रादौ परिभा
षाप्रकरणमुच्यते ॥ तत्राश्वलायनसूत्रकारः ॥ विध्यपराधप्रायश्चित्तिरिति ॥ विधिशब्देन श्रुतिविहितमुच्यते ॥ अपराधोऽन्यथाभावः ॥
अभावो वा ॥ विहितस्याकरणेऽन्यथाकरणे च प्रायश्चित्तिः कर्तव्या ॥ प्रायो विनाशः ॥ चित्तिः संधानं विनष्टसंधानं प्रायश्चित्तिरित्युक्तं भ
वतीति वृत्तिः ॥ तत्संधानं द्विविधं ॥ सेंद्रियरूपं ॥ अतींद्रियरूपं च ॥ तत्राद्यस्योदाहरणं ॥ आहवनीयमवदीप्यमानमवेक्ष्याप्यपरा सा
दिदं तएकं पर ऊतएकमिति संवपेदित्यादि ॥ द्वितीयस्य अग्निहोत्रहोमे वेत्यादि ॥ अत्र किंचिदुच्यते ॥ केषुचिन्निमित्तेषु द्विविधं संधान
मुक्तं तत्र द्विविधमपि कर्तव्यं ॥ केषुचिन्निमित्तेषु अतींद्रियसंधानमेवोक्तं तत्र तदेव कर्तव्यं ॥ येषु निमित्तेषु सेंद्रियमेवोक्तं तत्रातींद्रिय
संधानार्थं ~~यागो होमो जपासनंद~~ व्याहृति होमः कर्तव्यः ॥ एवं च सर्वत्रातींद्रियसंधानमवश्यं कर्तव्यं ॥ यत्रातींद्रियसंधानार्थं यागो होमो
जपो दानं दक्षिणारूपं वा विहितमस्ति तत्र तेनैवातींद्रियसंधानं सिध्यति ॥ न तत्र व्याहृति होमः इति वृत्तिकृत् न च हविषि दुःस्थे चतुःशराव ए मः
मोदनं ब्राह्मणान्भोजयेदिति ब्राह्मणभोजनस्य ॥ अभिवक्षोमित्रो जनान्यातयति ब्रुवाणेति समिदाधानमिति समिदाधानस्य च यागादि १

पंचकव्यतिरिक्तत्वात्तत्र व्याहृतिहोमः कर्तव्य इति वाच्यं तयोरीने अंतर्भावात् ॥ तत्रापि स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनत्व सत्त्वात् ॥ अने
न वृत्युक्तयागादिपरिगणनस्य न विरोधः ॥ अनुक्तस्य लेतु तस्मादेषैव पसे प्रायश्चित्तिः कर्तव्येत्येतत्परब्राह्मणवचनात् ॥ आख्याते वोपलक्ष्य
वाजान्वाच्याहुतिं जुहुयादित्याश्वलायनसूत्रात् व्याहृतिहोमः ॥ एवं च वृत्तिकृन्मते स्वसूत्रेणोक्तसर्वत्र निर्वाहः ॥ खेत्रात माष्यकारस्तु स्वशा
स्त्रोपविशेषप्रायश्चित्तानामभावेन्यत्र विद्यमाने चेत्तदेव कर्तव्यं ॥ तदभावे सर्वप्रायश्चित्तमित्याह ॥ सर्वप्रायश्चित्तमिति भूर्भुवः स्वः स्वाहेति समस्त
मंत्राहुतेः संज्ञा ॥ विध्यपराधे इति वचनाद्विधिसंपादने प्रायश्चित्ते नोक्ते ॥ यथा पादिवासाग्निहोत्र उपसन्नरूपाधेनत्रागमने निषेधाव
यजमानस्यातरागमने विहितं तस्मिन्गमने इत्यर्थ इति वृत्तिकृत् ॥ एवं चोदाहरणं देवान्मानुषाहुआ असंनिहिते यजमाने स्वयमेवाध्वर्युणा
ति स्वज्योतीयोपसारवांते कृते तस्मिन्नवसरे यदि प्रवासादागतो यजमानस्तर्हि प्रधानहोमार्थमाहितानिरात्मयापोण वेदिमतिक्रम्येत
दिविधिना दक्षिणाग्निक्रमणं करोति तदा संभवति ॥ इष्टिषु त्वग्रेणाहवनीयं ब्रह्मयजमानौ प्रपद्येते जघनेनाहवनीयमित्येके इति धर्मसू
त्रे बौधायनवचनात् जघनपक्षाश्रयणानुरोधेन ॥ अथ प्रायश्चित्तकालाग्निनिर्णय उच्यते ॥ प्रायश्चित्तानां नैमित्तिकत्वान्निमित्तानं
तरं कर्तव्यानीत्युत्सर्गः ॥ यस्य कस्य चित्कर्मणो यो यो विहृतेष्वग्निषु पाल्के विराग्निसाध्यं नैमित्तिकं मुख्यस्तत्र तस्यानतरे वा यथा भवेयुः ॥ न पुनः पु
नर्विहर्तव्या इति वृत्तिकृत् ॥ अत्रेयं व्यवस्था ॥ प्रायश्चित्तं बल्लवतानप्रमाणेन तत्काले कर्तुं न संभवति तस्यापवृत्तं संभवमुत्कर्षो नास्त्यंत मिति ॥ य
था आश्वायनप्रमत्ति होमांतं यदनंबालंपरि इति बौधायनवचनात् धोमे कृत्वा तस्मिन्नेवाग्नौ तन्नैमित्तिकं कर्तव्यमित्यादि ॥ तस्मिन्ने यज

२ पहोमादिरूपं नैमित्तिकं तत्कस्मिंश्चित्कर्मण्यपि निमित्तानंतरमेव कर्तव्यं दर्विहोममध्ये इष्टिरूपं प्राप्तं चेत्तं समाप्य तस्मिन्नेवाग्नौ कर्तव्यं ॥ इष्टिय
२ ज्ञादिमध्ये इष्टिपश्वादिरूपं प्राप्तं चेदुपक्रांतं तंत्रमेवोपजीव्य कर्तव्यमिति वृत्तिकारः ॥ सर्वत्रेष्टिरूपं प्राप्तं चेदुपक्रांतं तंत्रं समाप्यैव तस्मिन्नेवा
ग्नौ कर्तव्यमिति सिद्धांतदेवत्रातभाष्यकारौ ॥ जपहोमादिषु काल्लांतरं स्मार्ते सत्रे बोधायनः ॥ प्रवर्ते कर्मणि प्रधानादौ जरूपादिति बोधाय
नः प्रधानांतरमिति शालीकिः प्रोक्ता ॥ स्विष्टकृतः स्योपमन्यव इति ॥ समिष्टयजुषः प्रागपीति कुतहलादयः ॥ इष्टं तु निमित्तानांतरमेवेष्ट
कारणपक्षे तत्पूर्वत्र पात्र वेति ॥ बर्हिर्मंतमपीष्वादिरूपं नैमित्तिकं न पर्वाद्यपेक्षा ॥ तपापायश्चित्ताधानमपि कृतुनक्षत्राद्यनपेक्ष
मेवेत्यापस्तंबसूत्रानुसारी वाजपेयीशतद्दीकारः ॥ पदा आधानपुनराधानयोर्निमित्तं संज्ञातं तदनंतरमेव तपः प्रवृत्तिः ॥ नष्टेष्वग्नि
षु पुत्रविनाशो निमित्ते संजाते निमित्तानंतरमग्नीनुत्पाद्य पुत्रनाशनिमित्तमग्न्युत्सर्गं कृत्वा पुनराद्धीतेति केशवी शतद्दीकारः ॥ एवं वि
चार्य यथाविहितं प्रायश्चित्तं कृत्वा सर्वत्र कर्मशेषः समापनीयः ॥ यत्र गाणगारिमते न पुनर्होमो विधीयते तत्र पुनर्विहारणादि सर्वं कर्त
व्यमिति वृत्तिकृत् ॥ इत्थं सति निमित्ते नैमित्तिकांगसहितमनुष्ठितं कर्म यजमानस्य फलप्रदान समर्थं भवति ॥ न केवलं दोषप
रिहारमात्रक्षममिति ॥ अथाग्निप्रणयनपात्रविचारः ॥ तत्र प्रयोगपारिजातकारः ॥ पात्रांतरेणापिहिते ताम्रपात्रादिके शुभे ॥ अग्नि
प्रणयनं कुर्याच्छरावे तादृशेपि चेति ॥ यजुः स्मृतिसारः ॥ शरावे भिन्नपात्रे वा कपाले चोल्मुकेपि वा ॥ नाग्निप्रणयनं कुर्याद्व्याधिहानिभया ए म:
वहमिति ॥ तस्य मुख्यपात्रसंभवे शरावो न ग्राह्य इति तात्पर्यं न तु सर्वथा न ग्राह्य इति । शरावे तादृशेपि चेत्स्त्रिस्मारपादिति ॥ अथा २

ग्निजननविचारः ॥ तत्र कुतूहलकारः ॥ अंसाभ्यां शिरसा वह्निं नाहरेत्तु जलं तथा गन्धांश्च पुष्पाणि न वहेद्देहे द्विज इति वचनात् ताम्रपात्रादियुक्तहस्ते
न नयेत् ॥ अथाग्निधारणे तुषनिषेधः ॥ तत्र कुतूहलकारः ॥ न तुषैर्धारयेदग्निमिति पारिजाते देवलस्य वचनादिति ॥ अथाग्निधमनसाधनं ॥ त
त्र पारिजातकारः ॥ वस्त्रेण वाथ पर्णेन पाणिशूर्पादिदारुभिः ॥ न कुर्यादग्निधमनं न कुर्याद्व्यजनादिभिः ॥ पर्णेनैव भवेद्व्याधिः शूर्पेण ध
न नाशनं ॥ पाणिना मृत्युमाप्नोति आयुः क्षीणं मुखाद्धमे ॥ धमनी मतरा कृत्वा तृणं वा काष्ठमेव वा ॥ मुखेनाग्निं समिन्धीत मुखादग्निरजाय
त ॥ वेणोरग्निः समुत्पन्नो वैणवेनैव पावनः ॥ तस्माद्वेणुधमन्येव धमेदग्निं विचक्षण इति इदं च धमनं अशुचिना न कर्तव्यं तथा चापस्तंबधर्म
सूत्रे न चैनमुपधमेत् इति अत्रोज्वलाकारेण प्रपन्न इत्येवानुवर्तत इति व्याख्यातत्वात् ॥ अथाहुतिप्रदानयोग्योऽग्निविचारः ॥ तत्र कुतूहल
समन्वर्थसारः ॥ बहुशुष्केंधने चाग्नौ सुसमिद्धे विधूमके ॥ अंगारे लेलिहाने च होतव्यं नान्यथा क्वचिदिति ॥ अथ स्रुक्स्रुवधारणविचारः ॥
तत्र प्रयोगपारिजातकारः ॥ कठिनद्रव्यहोमे तु मुष्टिना धारणं स्रुवः ॥ द्रवद्रव्यस्य होमे तु उत्तानांगुलिभिः स्मृतं ॥ स्रुवस्याप्युत्तानांगुलिभिरेव धा
रणमिति ॥ अत्र विशेषो विधानमालाकारः ॥ अग्रे धृते विनाशः स्यान्मध्ये धृते प्रजाक्षयः ॥ मूले धृते होमकर्तुर्मृतिः स्यात्स्रुवो ध्रुवं ॥ अ
ग्रान्मध्यात्त्वमध्ये तु मूलान्मध्याच्च मध्यतः ॥ स्रुवः प्रधार्यो विद्वद्भिः सर्वकार्यार्थसिद्धये इति ॥ अथातिक्रान्तकर्मविचारः ॥ तत्रादौ कर्मस्व
रूपं ॥ तद्द्विविधं ॥ प्रधानरूपमंगरूपं च ॥ तत्र यदधिकृत्य तंत्रं प्रवर्तते तत्प्रधानं ॥ तदन्यदंगं ॥ तत्र प्रधानलोपे तु तत्प्रायश्चित्तपूर्विका आ
वृत्तिरेव ॥ अंगं द्विविधं ॥ आरादुपकारकं ॥ सन्निपत्योपकारकं च ॥ आरादुपकारकं नाम अदृष्टोपकारकं प्रयाजानूयाजाज्यभागादि

३ रूपं॥ सन्निपत्योपकारकं नाम दृष्टोपकारकं द्रव्यादिसंस्काररूपं॥ तत्राद्यस्यांगस्य लोपे ज्ञाते आकर्मसमाप्तेः प्रायश्चित्तमावृत्तिश्च॥ द्वितीयस्य यदुप
3 कारकतया विहितस्य तस्मिन् कर्मणि निवृत्ते प्रायश्चित्तमेव नावृत्तिः॥ पूर्वं ज्ञाते प्रायश्चित्तमावृत्तिश्च॥ अत्र बोधायनोप्याह॥ अतिक्रांतं कर्मणा द्वि
पेतयद्यर्थलुप्तं भवतीति॥ पूर्वमंगमकृत्वोत्तरस्मिन्नंगे कृतेऽर्थलुप्तं पूर्वमंगं न कर्तव्यं तत्र प्रायश्चित्तमेव॥ यथा अहतं स्कृतया शाखया वत्सापाकरणे
कृतेऽनंतरं संस्कारेण कर्तव्यः॥ प्रयोजनाभावात्॥ एवं लूनस्य लवनं खातस्य खननं अवहतस्यावहननं पिष्टस्य पेषणं दग्धस्य दहनमित्यादि।
क्वचिदर्थलोपाभावेपि वचनान्न भवति॥ यथा लरमाणा रवो यसम्भिः प्रचोदयनीकृतमा द्विपेरन्निति॥ केचिदर्थलुप्तेप्यापि मंत्रोच्चारणमिच्छं
ति॥ यथा छिन्नेपि पिष्टे तथा लूनेस्तान्त्राप्येमार्तिकेतथा॥ पश्चान्मंत्राः प्रयोक्तव्या मंत्रा वै यज्ञस्य साधका इति यज्ञपार्श्ववचनात्॥ कात्यायनोपि
॥ खातलूनछिन्नावहतपिष्टदुग्धदग्धेषु यजुः क्रियासंभवादिति॥ अथ नियमाः॥ सर्वत्र यज्ञोपवीतिना बद्धशिखेन पवित्रपाणिनाकछ
नियुक्तेनाचांतेन स्नातेन शुचिना प्राग्दक्षिणपवीतं तज्जोनुहस्तेनेत्यादयः॥ एतन्न्यूनयुक्त नियमयुक्तेन विहितं कर्म कर्तव्यं॥ तत्र सर्वत्र क्रमो दोह्याण
चामः॥ अंते स्मृत॥ सर्वत्र कर्मांते विष्णुस्मरणं शिवस्मरणं वा॥ सर्वत्र कर्ममध्ये पतितानि प्रायश्चित्तानि प्रकृतकर्मसंस्कृतान्यस्थाल्याज्ये
न तत्तं कृतपात्रेश्च कर्तव्यानि॥ तदभावे स्थाल्यंतरे स्रुतान्येन पात्रेश्च॥ तत्राद्यावाश्वलायनीयान्यसंस्कारे उच्यते॥ गार्हपत्यस्योत्तरतो दर्भा
नास्तीर्य तेषु प्रोक्षणीमान्यस्थाली स्रुवं दर्भांश्चासादयस्तु ग्राम यद्देतु चंवना न्यथा॥ पवित्रे कृत्वा प्रोक्षणीः संस्कृत्योत्तानानि पात्राणि एम:
प्रोक्ष्य गार्हपत्य आज्यं विलाप्यनिः पवित्रमान्यस्थाल्यामाज्यं निरुप्योत्तरतादर्भोल्मुकेनावज्वल्यांगुष्ठपर्वमात्रं प्रक्षालितं दर्भाग्रद्वय ३

माज्येप्रक्षिप्यपुनर्ज्वलतातेनैवोल्मुकेनाज्यंत्रिः पर्यग्निकृत्वा तदुल्मुकमपास्याप ः स्पृष्ट्वांगुष्ठोपकनिष्ठिकाभ्यां उदगग्रे पवित्रे धृत्वाज्यं प्रागपव
र्गेतूष्णीं त्रिरुत्पूय पवित्रे। अग्निः प्रोक्षणागार्हपत्येनु प्रहरत्स दक्षिणहस्तेन स्रुक्स्रुवौ गृहीत्वा सव्येन कां ग्निद्दर्भानादाय संहेवाग्नौ प्रताप्य स्रुक्स्रुवौ
संमृज्य संमार्गदर्भानाहपनीये प्रहरतीति ।। सर्वत्र जपहोमादौ कर्तृविशेषानुक्तौ ब्रह्मा।। तदभावे स्वकृतकर्मकर्ता ।। दाने यजमानः ।। तदभावे प
त्नी ।। पात्रविशेषानुक्तौ स्रुवः ।। द्रव्यविशेषानुक्तौ अन्यस्थाल्याज्यं।। अग्निविशेषानुक्तौ आहवनीयः ।। स्थितिविशेषानुक्तौ तिष्ठन् ।। देशविशे
षानुक्तौ आहवनीयवायव्यदेशः ।। सर्वत्र प्रायश्चित्तेष्टीनां पौर्णमासं तंत्रम् उपांशुत्वं सद्यस्कालता च ।। असमाम्नातास्विष्टिषु तु असमाम्नाता
स्पर्यन्तं तत्र विकारस्याश्वलायनसूत्राद् द्रव्यदेवतादेश्चोदनासामान्यात् स्थितादिस्वरूपसामान्याच्च ज्ञापनस्तत्र कल्पना कर्तव्या।। अथवा अध्वर्युवेदोप
पात्समेरदित्याश्वलायनसूत्रस्य देवत्रातभाष्योक्ता व्याख्या।। सा चेत्थं यथाध्वर्युः स्वशास्त्रे तंत्रं किंकारमाम्नातं स्मरति तथा प्रयोक्तव्याः।। यथापवि
त्रेष्टिः जातेष्टिश्च एवमादिषु तेषां च ये आम्नाते धाय्ये आज्यभागौ च संयाज्ये च याज्यानुवाक्या अपि ता एव कर्तव्याः ।। यथा देवतलिंगत्वादिति ।।
अथ पूर्णाहुतिविधिः ।। तत्राश्वलायनः ।। अपि वा प्रायश्चित्तेष्टीनां स्थाने तस्यै तस्यै देवतायै पूर्णाहुतिं जुहुयादिति विज्ञापनमिति सूत्रं ।। प्रायश्चि
त्तप्रकरणे पाठादिष्टिशब्देनैव चोद्यंते।। यथाश्च ब्राह्मणोक्तास्तासामयं वैकल्पिको विधिरुच्यते।। याश्चासामिष्टीनां देवतास्तासामेकैकस्यै दे
वतायै एकैकां पूर्णाहुतिं जुहुयात् ।। द्वादशगृहीतेन स्रुचं पूरयित्वा यद्धूयते सा पूर्णाहुतिरित्युच्यते।। अयं पुनरनुपक्रांतदर्शपूर्णमासस्य भवति
।। दर्विहोमसमध्ये च नान्यत्र भवतीति वृत्तिः ।। सर्वत्र शक्तस्यैष पक्षः ।। अशक्तस्य पूर्णाहुतयः इति आपस्तंबसूत्रानुसारी केशवी शांतरूपीकारः ।।

४ अथ प्रयोगः ॥ प्रायश्चित्ते येषां यादेवतास्तासामेकैकस्यै देवतायै स्रुवेण गृहीतेन स्रुचं पूरयित्वा चतुर्थ्यन्तेन देवतानाम्ना एकैकां पूर्णाहुतिं जुहुया-
दिति वृत्तिकृत् ॥ पूर्णाहुतिमिति वचनाच्चतुर्गृहीतेन स्रुचं पूरयित्वा जुहुयादिति देवत्रातः ॥ स्रुवपूर्णाज्याहुतिः पूर्णाहुतिरिति केशवीशतद्वयी-
काराः ॥ ऋत्विगाद्यभावे न दर्शपूर्णमासादिष्वपि पूर्णाहुतयः कर्त्तव्याः ॥ तत्र कात्यायनसूत्रानुसारी देवयाज्ञिकः ॥ स्वस्वकाले ऋत्विक् द्रव्य-
कालादिनां सकलेष्वसंभवे जाबालिः ॥ इष्टिपर्वादिकं तत्र कालात्ययात्तदसंभवे ॥ देवतानां प्रधानानामेकैकस्य पृथक् पृथक् ॥ पूर्णानुवाक्या-
याज्याभ्यां चतुर्गृहीतघृताहुतीः ॥ जुहुयादेवमन्यत्र सर्वत्रापि दिहृपतदिति ॥ तत्रैव स्वं रोगपरिशिष्टवचनं ॥ सर्वेषां तु पराक्ऋत्विक् द्रव्यकाला-
दिनां सकलेष्वसंभवे जाबालिः ॥ इष्टिपर्वादिकं तत्र कालात्ययात्तदसंभवे ॥ देवतानां प्रधानानामेकैकस्य पृथक् पृथक् ॥ पूर्णानुवाक्यायाज्याभ्यां
चतुर्गृहीतघृताहुतीः ॥ जुहुयादेवमन्यत्र सर्वत्रापि दिहृपतदिति ॥ तत्रैव स्वं रोगपरिशिष्टवचनं ॥ सर्वेषां तु पराक्ऋत्विक् द्रव्यकालाद्यसंभवे ॥ सं-
स्कृत्याज्यं प्रधानानां चतुर्थ्यन्तैर्घृताहुतीः । स्वाहान्तैर्जुहुयादेवं संकटेषु विधीयत इति ॥ इष्टिकरणाशक्तौ सत्यां पूर्णाहुतिहोमो न कार्यः तदुक्तं त-
त्रैव कारिकायां ॥ इष्ट्याद्युत्पोविकल्पोऽत्र शक्ताशक्तव्यवस्थया ॥ मन्वादिभिर्यतः प्रोक्तमेव तद्बुध्यतां वचः ॥ प्रभुः प्रथमकल्पस्य योऽनुकल्पे-
न वर्तते ॥ न सांपरायिकं तस्य दुर्मतेर्विद्यते फलमिति पूर्णाहुतिविधिः ॥ अन्यदपि प्राघुवोपहोपवीत्याचम्य त्यादि आश्वलायनसूत्रो-
क्तं परिभाषासिद्धं यथाख्यातेनानुसंधेयं यगौरवभयादत्र न लिखितं ॥ अथ सत्रान्तपर्यायद्रविचारः ॥ अत्र क्रमन्यूनताग्रात्स्वमिति वचना- राम:
त् ॥ यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् ॥ विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति दानमयूखोक्तं रोगपरिशिष्टवचनात् ॥ ४

सर्वशाखाप्रत्ययमेकं कर्मेति न्यायात् ॥ इष्टापूर्त्तादिकं कर्म स्वशाखोक्तं न विद्यते ॥ तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् ॥ तथा ॥ आध्वर्यवं या-
जमानमाग्नीध्रं पत्नीनोरितं ॥ तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरादित्यादिवचनेभ्यः स्वसूत्रानुक्तौ प्रायश्चित्तादि कर्माप्याश्वलायनेन य-
जमानेन बौधायनमेव ग्राह्यं ॥ तत्राप्यनुक्तौ सूत्रांतरात् ॥ ये ये विशेषा लघवो यत्र पत्रोपलक्षिताः ॥ कर्म तेन प्रसंगेन कुर्यादापत्सु तत्क्षणं
विशेषात्सर्ववेदेभ्यः प्रयत्नेनोपधारयेत् ॥ कर्मणां प्रविचारार्थमापत्सु च समाप्नुयादिति बौधायनवचनात् ॥ स्वसूत्रोक्तकरणाशक्तावनुक्त-
ल्पवत्प्रायश्चित्तादिकमपि सूत्रांतराद्ग्राह्यमिति भाति ॥ इदानीमाध्वर्यवाद्युपयोगित्वेन बौधायनीयस्मार्त्ताज्यसंस्कार उच्यते ॥ गार्हपत्यस्यो-
त्तरतो दर्भेष्वाज्यस्थालीं स्रुवं जुहूं प्रोक्षणीं चासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्य तिरः पवित्रमाज्यस्थाल्यामाज्यं निरुप्योदी-
चींगारान्निरूह्य स्वध्यं तान्कृत्वा तेष्वाज्यमधिश्रित्याभिद्योतनेनाभिद्योत्य दर्भाग्रे प्रच्छिद्य प्रक्षाल्य प्रत्यस्य पुनरभिद्योत्य पर्यग्नि कृत्वा वर्त्म कु-
र्वन्नुदगुद्वास्य प्रत्यूह्यांगारानुदीचीनाग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय पवित्रे अद्भिः संस्पृश्याग्नावनुप्रहृत्य स्रुवं जुहूं च निष्-
ट्वा दर्भैः संमृज्याद्भिः संस्पृश्य पुनर्निष्टप्य दर्भानग्नौ प्रहरेदिति ॥ पात्रासादनाद्येतदंतं सर्वं तूष्णीमिति ॥ कर्तृविशेषानुक्तावध्वर्युः ॥ पा-
त्रविशेषानुक्तौ जुहूः ॥ ग्रहणविशेषानुक्तौ सकृत् ॥ अग्निविशेषानुक्तौ आहवनीयः ॥ सर्वेषु स्वतंत्रेषु दर्विहोमेष्वाज्यसंस्कारः पात्रसं-
स्कारः स्रुपसमिधयनपरिसमूहनपर्युक्षणपरिस्तरणालंकरणसमिदाधानानि भवंति ॥ अन्यतंत्रेषु प्राप्तेषु तु तेनैवान्यसंस्कारादि-
ना प्रसंगात्सिद्धिर्भवति ॥ उपसमिंधनं नाम काष्ठादिभिरग्नेर्दीप्तिकरणमित्यर्थः सर्वत्रेंधनादि प्रोक्ष्यैवाग्नावादध्यादिति ॥ तत्रापस्त

५ बीयधर्मे सत्रं • नाग्नो । क्षितमिंधनमग्नावादध्यादिति • परिसमूहन पर्युक्षण पोल्लेक्षणमुच्यते ॥ तत्रारोपरिसमूहनस्य • परितः सर्वतो ग्न्यागारे विद्य
मानानां तृणपांस्वादीनां समूहनं संमार्जनेन निरसनमिति • पर्युक्षणस्य तु सोदकेन पाणिना परितो ग्न्यागारस्योक्षणमिति तीति सर्वत्रालंक
रणे शुक्लपुष्पाणि ग्राह्याणि ॥ तरमावेजपापुष्पाद्यार्कानि वर्जयित्वा सर्वाणि ग्राह्याणि ॥ पत्र तूष्णीं समिदाधानं तत्र स्वाहेत्युक्त्वा समिदा
धानमिति कल्पसारः ॥ पंचदशसामिधेनिकास्तु वौत्रे ग्रावुज्ञे देवता इतीषि. कल्पे हैधेन बोधायनवचनात्सर्वत्रानादिष्ट तंत्राणां प्रायश्चित्ते
ष्टीनां योर्णमासं तंत्रं ॥ सर्वत्र प्रायश्चित्तेष्टीनां सद्यस्कालता ॥ सर्वत्राज्याहार्यपेणादिष्ट दक्षिणायाः समुच्चयः ॥ सर्वत्रानादिष्ट दक्षिणा
सु प्रायश्चित्तेष्टिषु हिरण्यं दक्षिणा ॥ तच्छतमानं ॥ यद्यायवाध त्रुटिरित्युक्त्वा द्वेत्रुटी शकलः स्मृतः ॥ शकलद्वितयं गुंजा द्वे गुंजे मानमु
च्यते ॥ अत्र सन्याषाढपद्धतौ गोपीनाथः ॥ शतमानानि यत्र तच्छतमानं ॥ मानस्वरूपं तु सन्मतौ ॥ द्विगुंजं कृष्णलं मानमेकगुंजम थापि
वेति ॥ शक्ताशक्तत्वेनानयोर्व्यवस्था ॥ मीयतेनेनेति मानमिति व्युत्पत्त्या यवसर्षपवट बीजादिष्वपि मान शब्दः ॥ रुद्रदत्तभाष्यका
रोप्येवमेव ॥ अपंपश्चोन्यतानाष्यस्येति ॥ सति द्रव्ये हीनकल्पं न कुर्यात् ॥ सर्वत्र प्रायश्चित्तेष्टीनां न पुनराधेयं भ. पार्वण होमश्च ॥ स्वतं
त्र प्रायश्चित्तेष्टीनां अन्वारंभणीयाप्यारंभधर्मा ब्राह्मणभोजनं च भवति ॥ अस्वतंत्र प्रायश्चित्ते तु न भवतीति केशवः ॥ इष्ट्यशक्तौ पू
र्णाहुत्यादिविधिः ॥ तत्र अथ ज्योतिष्मतीमिष्टिं निर्वपेद् यपि वाज्योतिष्मत्या स्वग्न्यापूर्णाहुतिं जुहुयाद् पि वा ज्योतिष्मतीं स्रुवाहु
तिं जुहुयाद् यत्र ये ज्योतिष्मते स्वाहेतीष्टि पूर्णाहुति स्रुवाहुतीनां पूर्वपूर्व विधिं बलीयाः समाचार्या ब्रुवते तत्रोदाहरंति ये पविशेषाल

घवोपत्रपत्रोपलक्षिताः ॥ कर्मतेन प्रसंगेन कुर्यादापत्सु तद्धनं ॥ विशेषात्सर्ववेदेभ्यः प्रयत्नेनोपधारयेत् ॥ कर्मणां प्रविचारार्थमापृत्सु च
समाप्नुयादिति बोधायनवचनादिष्टशक्त्योपदेवत्ये याज्यापुरोनुवाक्ये उक्ते ताभ्यामगन्यां चतुर्गृहीतेन पूर्णाहुतिः ॥ अपि वा चतुर्थ्यन्ते स्वा
हाकारेण तेन देवतानाम्ना स्रुवाहुतिरिति ॥ आधानादिषु प्रायश्चित्तानि ॥ तत्र बोधायनः ॥ अथातः प्रायश्चित्तसमुच्चयं व्याख्यास्यामः स
र्वत्रानादिष्टेषु मनस्वतीमिंद्राहुतीर्व्याहृतयो होतारइति जुहुयात्सर्वेषु व्रतेषु मिंद्राहुतीपि तपत्लोपे सप्तहोतारमितीति तत्र क्रमे
षु सर्वत्रानुक्तचिन्तिषु व्याहृतीर्जुहुयात्सर्वप्रायश्चित्तमिति ॥ स्थितिः ॥ मनस्वत्यग्निहोत्रेस्यात्सोमेमिंद्राहुतीर्न यातिः सर्वेष्ववत्मेषु मिंद्राहुती
पि तपस्त्रलोपे सप्तहोतारमितीति व्यवस्थेति अथ प्रतिनिधिप्रकरणं ॥ तत्राश्वलायनः ॥ शिष्टाभावे प्रतिनिधिरिति ॥ अत्र वृत्तिकारः ॥
शिष्टं विहितमित्यर्थः ॥ तस्याभावे प्रतिनिधिरुपादातव्यः ॥ अभाव इत्येतावते व सिद्धे शिष्टग्रहणं यत्कार्यार्थं तया यदुपदिष्टं तस्य प्रत्य
क्षतया विद्यमानत्वेपि तत्कार्यो शक्तो प्रतिनिधिरुपादातव्य एवेत्येवमर्थं ॥ अर्थद्रव्ययोर्विरोधेर्थो बलीयानित्ययमपि न्यायोर्थादत्र
व्युत्पादितो भवति ॥ इदं चापरं ॥ कार्यसामर्थ्ये सति न गुणसंपादनार्थमुपादातव्यमिति व्यतिरेका लभ्यते ॥ अत्रापि न्यायांतरं व्युत्पादितं भ
वति ॥ द्रव्यगुणविरोधे द्रव्यं बलीय इति ॥ प्रतिनिधीयत इति प्रतिनिधिः ॥ एतदुक्तं भवति ॥ यत्कार्यार्थं तया यदुपदिष्टं तस्य तत्कार्याश
क्तौ तस्य यत्प्रतिरूपं तेन तत्कार्यं करणायोपादातव्यमिति ॥ अनेन प्रकारेण सदृशः प्रतिनिधिरुक्तो भवति ॥ न्यायाद्देवायमर्थो लभ्यते
॥ शिष्टाभावे प्रतिनिधिरितिवचनस्येदं प्रयोजनं ॥ प्रतिनिधिप्रयोगेपि विहितस्वरूपापचारे हिप्रयपराध शंकानिवृत्यर्थं ॥ अतस्तत्रमा

५ पश्चितिर्न कर्त्तव्या ॥ विधिशक्तिरेव तत्रैवं ह्यपि विपरीणमते ॥ नात्र विध्यपराधो ऽस्तीत्येवमर्थं सूत्रप्रणयनमिति ॥ अत्र कालानुकल्पविषये बौधा
6 यनः ॥ अथातो ऽनुग्रहान्व्याख्यास्यामः सायंहोमं वोपोदयं जुहुयात्प्रातर्होमं वोपास्तमयं कालेनकालमनतिक्रम्य कालो दर्शपूर्णमासयोरग्नि
होत्रस्य च न स्कंदते न व्यपैत इति च विज्ञायते आ प्रातराहुतिकालात्सायमाहुतिकालो नातीयादा सायमाहुतिकालात्प्रातराहुतिकालो ऽथ य
दि सायं सायंदोषावस्तोर्नमः स्वाहेत्याहुतिं हुत्वा ऽग्निहोत्रं जुहुयाद्यदि प्रातः प्रातर्दोषावस्तोर्नमः स्वाहेत्याहुतिं हुत्वा ऽग्निहोत्रं जुहुयात् का
लातिक्रमे प्रायश्चित्तहोम आमावास्यस्य कालात्पौर्णमासस्य कालो नातीयादा पौर्णमासादामावास्यस्य व्रीह्याग्रयणकालात् श्यामाकाग्रयण
स्य कालो नातीयादा यवाग्रयणात् व्रीह्याग्रयणस्य श्यामाकाग्रयणाद्यवाग्रयणस्य वरुणप्रघासानां कालाद्वैश्वदेवस्य कालो नातीया
दा साकमेधानां वरुणप्रघासानामाशुनासीरीयात्साकमेधानामा वैश्वदेवाच्छुनासीरीयस्य दक्षिणायनपशोः कालादुत्तरायणपशोः कालो
नातीयादोत्तरायणपशोर्दक्षिणायनपशोरथ यदि षण्मासान्हुते ऽग्निहोत्रे दर्शपूर्णमासाभ्यामनिष्ट्वाग्रयणेष्ट्वा तुर्मास्यैः पशुबंधेन
चाग्नये पवमानायाग्नये पावकायाग्नये शुचये ऽग्नये तंतुमते ऽग्नये वैश्वानराय पाग्नये पवमानायाग्नये पावकायाग्नये शुचये ऽग्नये पथिकृते ऽग्नये तंतुमते ।
ऽग्नये वैश्वानरायाग्नये व्रतपतय इति पुरोडाशान्निरूप्याग्निहोत्रं हुत्वा दर्शपूर्णमासाभ्यामिष्ट्वाग्रयणेष्ट्वा तुर्मास्यैः पशुबंधेन चेति ॥ अथ सोम
विषये ऽग्निहोत्रसमासप्रकरणे तंतुमतेष्टिप्रसंगे बौधायनः ॥ एवं विध्यपराधे चेति ॥ अथ प्रोषिते यजमाने वह्निषु दीप्तेषु सत्सु होमाकरणविष एमः
ये बौधायनः ॥ सर्वास्वेवाग्निहोत्रस्यार्तिषु मनस्वत्या प्रायश्चित्तिः क्रियत इष्टवत्सी पाप्मवतीति ब्राह्मणमिति ॥ तथाग्निहोत्रसमासप्रकरणे तं

तुमतेपि प्रसंगे बोधायनः॥ एवमकृतइति॥ समाहृत्य विषये बोधायनः॥ अतिक्रांतेषु होमेषु पर्वस्वाग्रयणेषु च॥ अरण्योर्ध्रियमाणेषु कथं तंत्रं न लु
प्यते॥ शुचिश्च पवमानश्च तंतुमान पथायिकृत्॥ एताइष्टयः प्रयोक्तव्याः ततस्तंत्रं नलुप्यते॥ शुचिः शोधयते पापं तंतुस्तंत्रं न लोपयेत्॥ पथि
कृत्पंथानमारोहयेत्पवमानस्तु पावयेदिति॥ अत्र बोधायनमापस्तंबीयगोपालविवरणोक्तं किंचिल्लिख्यते॥ अनुग्रहो नुकल्पः॥ मुख्यस्यापचा
रे पश्चाद्गृह्यत इति॥ प्रथमं कालानुकल्पमाख्यानं तस्य मुख्यत्वख्यापनार्थं॥ ततश्च कालद्रव्ययोर्विरोधे कालो न ग्राह्यः॥ एवं सति मुख्यद्रव्यलाभयोगो
पाकाले कर्म न कर्त्तव्यं॥ मुख्यकाले मुख्यद्रव्यलाभे द्रव्यप्रतिनिधिरेव कर्त्तव्य इति॥ तत्र कालप्रतिनिधेर्वचनावगम्यत्वात् हविर्वचनं पक्षे तेषां पंदं स्तोमे बो
पोदृष्टं तु हूयादित्यादिगौणकाले हुते सत्यपि स्वकाल एव कृतं भवति तत्र कालातिपति प्रायश्चित्तिर्नास्ति॥ किंतु मुख्यकालसंभवे अनुकल्पो न ग्राह्यः
॥ तथा च मनुः॥ प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्त्तते। न सांपरायिकं तस्य दुर्मतेर्विद्यते फलमिति॥ तथामावास्याकालात्पौर्णमासस्य कालो ना
तीयादित्यादि॥ अयमेव न्यायो दर्शपूर्णमासविकृतीनामजस्राणामित्याह॥ आव्रीह्याग्रयणस्य कालात् श्यामाकाग्रयणस्य कालो नातीयात्॥
यत्रानुग्रहकालमप्यतीयात्तत्र प्रायश्चित्तिश्चोदकप्राप्ताग्नये पथिकृत इत्यादि॥ पथ्यं तर्ह्येव वक्तव्यमोत्तरवसंतज्योतिष्टोमस्य कालात् पूर्ववसं
तज्योतिष्टोमस्य कालो नातीयादिति॥ यथाहि निदानकारः॥ अथातो यत्स्थानानीत्याद्यस्य समस्तस्य संवत्सरस्य दीक्षा मुख्यो न्यतरस्यानियतो
प्रायश्चित्तं तं तु मन्तीति॥ तथा सोमविषयेऽग्निहोत्र समासप्रकरणे तं तु मतेपि प्रसंगे विवरणं॥ कृष्णस्य सोमस्याकरणं मंगच्छीनां वाच्यत्रापि गृह
स्य यद्याधेयमिति॥ अथ प्रोषिते यजमाने वाद्रि षडीप्रेषु समस्तहोमाकरणविषये विवरणं॥ उक्तव्यतिरिक्तासु सर्वास्वेवाग्निहोत्रिकीष्वापत्तिषु मन

७ स्वल्पा प्रायश्चित्तिरिति ॥ तथाग्निहोत्रसमासप्रकरणे तंत्रमतेपि प्रसंगे विवरणे ॥ एवमहुतेग्निहोत्रे तंत्रमतीति ॥ अथ समारूढविषये विषये वि
7 वरणे ॥ अग्निहोमत्रहोमेष्वतिक्रांतेषु समारूढेष्वग्निषु इष्टपश्वन्तरेः प्रयोक्तव्याः ॥ एवं दर्शपूर्णमासेष्वाग्रयणेष्वेवेति ॥ अथ क्लृप्तानां कर्मणां
कारणासंभवे किंचिल्लिख्यते ॥ तत्र बौधायनः ॥ अथ यदि पशुबंधः सोमो वा लुप्यते वैश्वानरीमिष्ट्वा पुनर्यजेत ॥ अत्र विवरणे मनुः ॥ क्लृप्तानां
पशुसोमानां निष्कृत्यर्थमसंभवे ॥ इष्टिं वैश्वानरीं नित्यां निर्वपेदब्दपर्यये इति ॥ यदि त्वसामर्थ्यात्पशुसोमानां क्लृप्तानां शास्त्रचोदितानामनुष्ठा
नं न शक्नुयात्तत इष्टिं वैश्वानरीं कुर्यान्निष्कृत्यर्थं नित्यानां कर्मणामनुष्ठानाशक्तौ ॥ अत्र कात्यायनसूत्रानुसारी देवयाज्ञिकोपि ॥ क्लृप्तानां पशु
सो० इब्दपर्यये इति ॥ अस्यार्थः ॥ क्लृप्तानामारब्धानां नित्यानां पशुसोमानामसंभवे द्रव्याद्यभावात्कारणासंभवे तेषां निष्कृत्यर्थं तत्प्रत्याम्नाये
न अब्दपर्यये वर्षांते वैश्वानरीमिष्टिं निर्वपेदित्यर्थः ॥ तत्र सोमादीनामंतरायेप्रतिनिमित्तं वैश्वानरी चेन्न कृता तदाब्दसमाप्तौ सकृदपि तां कु
र्यादित्यभिप्रायः इति दीक्षितगदाधरः इति ॥ याज्ञवल्क्योपि ॥ प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा ॥ कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव
हि ॥ एषामसंभवे कुर्यादिष्टिं वैश्वानरीं तथा ॥ एषां द्रव्याद्यसंपत्त्याऽसंभवे स्वस्वकाले तत्प्रत्याम्नायेन वैश्वानरीं कुर्यादिति ॥ त्रिकांडमंडनकारोपि
॥ आग्रयणे पशौ सोमे चातुर्मास्येष्वसंभवे ॥ इष्टिं वैश्वानरीं कुर्यात्तत्कार्यं प्रसिद्ध्य इति ॥ एवं च सति नित्यकर्मातिपत्तौ अविरोधाच्छ्रौतस्य
प्रतिनिधेस्तंत्रमते वैश्वानर्याश्च समुच्चयः ॥ नन्वेकार्थत्वाद्विकल्पः प्राप्नोति ॥ नह्येकार्थता साक्षादुपलभ्यते ॥ किं तर्ह्येकं श्रौतमन्यत्स्मार्तं ॥ ए एमः
वं च सति भिन्नप्रमाणयोर्विकल्पः ॥ एकप्रमाणत्वे हि विकल्पो न्याय्यः ॥ अपरे तु विकल्पमेव मन्यंत इति विवरणकारः ॥ अत्र विवरणक

कारेणेष्टिद्वयस्य समुच्चय उक्तः स तु सोम एव भवति । अनात्र वैश्वानरेयैवेति ॥ अथ द्रव्यप्रतिनिधिः ॥ तत्र बौधायनः ॥ अथ हविषामर्थे व्रीहिर्यवो तयो
रभावे प्रियंगवः कोद्रवो दारकवर्ज्ये श्यामाका नीवारा एवेणुयवास्तु । सर्वाकंदमूलफलान्यापः सक्तुमिति ॥ घृतमाज्यार्थे गव्यमिति प्रत्ययस्तस्यालाभे
माहिषमाजं वाज्यार्थे प्रयुंजीत भोजनेष्वविरुद्धं मन्यत इत्येके तयोरलाभे तैलं प्रतिनिधिस्तस्यालाभे जातिलतैलमतसीकुसुंभसर्षपवार्क्षो वा स्ने
हा इति शिष्टप्रामाण्यादत ऊर्ध्वमलाभे यवपिष्टानि व्रीहिपिष्टानि श्यामाकपिष्टानि वाद्भिः संस्पृश्य आज्यार्थे प्रयुंजीत ॥ कुशास्तरणार्थे तेषामला
भे ~~कुशमिष्ट~~नि शरमय्यः कुतपाश्ववालमुंजसुगंधितेजनार्जुनादारदूर्वाः श्यामाकाः क्षीरवृक्षा रक्षवर्ज्यास्तेतेभ्यः प्रस्तरबर्हिर्विधृतिपवित्रप्र
याशनाशालाकपरिस्तरणां तद्भावासनशयनस्तोत्रोपाकरणार्थाः कार्याः । सर्वे तयोभ्यो वा शुक्कशुक्तिनाबल्बजकुश्मतृणतया वर्ज्यं पालाशः
खादिरो वेध्मस्तयोरलाभे पात्रिकानां वा वृक्षाणामन्यतमस्तेषामलाभे नीयनिंबतिल्वकबाधकविभीतकराजवृक्षशाल्मल्यकारककपित्थ
करंजकोविदारश्लेष्मातकपलांडुवर्जं सर्ववनस्पतीनामिध्मो भवतीत्येके यथा दक्षिणानां काले गोहिरण्यवासस्तेषामलाभे फलानां मूला
नां भक्ष्याणां दध्ना वलेव न यजेत नित्यं नित्येषु युक्तः स्यान्न यैवाजस्त्रिकेषु च ॥ यस्य नित्यानि लुप्तानि तथैवाजस्त्रिकाणि च ॥ विपथस्थो न हि स्व
र्गं गच्छेन्नुपतितो हि सः ॥ तस्मान्मूलैः फलैर्वापि मधुना तरसेन वा ॥ नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेदिति ॥ अत्र किंचिल्लिख्यते ॥ त
त्रादौ विवरणोक्तं ॥ वैकल्पिकेषु पलाशवत्तं तत्सदृशमेवोपादेयं ॥ यथा ॥ वैल्वो वा खादिरो वा पालाशो वा यूपः ॥ तत्र खदिरगुणके प्रयोग आ
रब्धे यदि खादिरो विनष्टस्तत्रोपात्तखदिरसदृशो ग्राह्यः ॥ न बैल्वः ॥ पालाशोपि ॥ अथ श्रुतद्रव्य उपात्ते अपचारे ते प्रतिनिधिमुपादाय प्रयो

८ गोप्राप्ते यदि सोऽपि विनष्टस्तत्र मुख्यसदृशमेवोपादेयं नोपात्तविनष्टस्य॥ अथ श्रुतप्रतिनिधावपचरिते तस्मिन्नपि मुख्यसदृश एव ग्राह्यः॥ अथ श्रुते
४ विनष्टे प्रतिनिधिमुपादातुं प्रवृत्तो यदि मुख्यमेव लभते तदा मुख्य एव ग्राह्यः॥ अथ मुख्यद्रव्यापचारोऽप्रतिनिधौ चोपात्ते तत्र केषुचित्संस्का
रेषु कृतेषु यदि मुख्यमेव द्रव्यं लभते तत्र नैवोपादेयं मुख्यं॥ द्रव्यसंस्कारानर्थक्यात्॥ अथ द्रव्यसंस्कारविरोधे द्रव्यमेवोपादेयं॥ यथा हविषि पतिते प्र
वृत्ते व्रीहियवयोस्तंदुला एव लभ्यंते संति सतुषाः प्रियंगवस्तथावघातसंस्कारत्यागेऽपि मुख्यतंदुला एव ग्राह्याः॥ न प्रतिनिधिः॥ अर्थद्रव्यवि
रोधेऽर्थ आदर्तव्यो यथा यूपकार्ये खदिरे सत्यपि पशुनियोजनेनसमर्थः॥ अस्ति महत्कदरद्रव्यं पशुनिवारणसमर्थं तत्र पशुनिवारणसमर्थं
कदरद्रव्यमुपादेयं॥ किंच नांगानुरोधेन प्रधानगुणो बाधितव्यः॥ यथा संति व्रीहयो यावंतो यवदानमात्रं निर्वर्तयंति॥ प्रियंगवः शेषकार्येऽपि य
र्याप्ताः॥ तत्र प्रधाननिर्वर्तका व्रीहय एवोपादेया इति॥ अत्र धूर्तस्वामिभाष्यामपि॥ यत्र प्रतिनिध्युपादानार्थं प्रवृत्तस्य मुख्यमेव द्रव्यं लभ्य
ते तत्र मुख्यमेव द्रव्यमुपादेयं॥ यत्र प्रतिनिधिमुपादाय केषुचित्संस्कारेष्वनुष्ठितेषु मुख्यमेव लभ्यते तत्र प्रतिनिहितेनैव समापनीयं॥ यत्र
सदृशस्य प्रतिनिहितस्य नाशस्तत्र मुख्याभावे मुख्यसदृशमेवोपादद्यान्न प्रतिनिहितसदृशं॥ विनष्टेषु प्रतिनिहितेषु मुख्यं यत्र लभ्यते तत्रा
पि मुख्येनैव कार्यं॥ सोमापचारोपात्तेषु पूतिकेष्वपि नष्टेषु सोमसंभवे सोम एवोपादेयस्तदसंभवे सोमसदृश एवेति॥ साम्यं च जातितो रू
पतो रसतः क्रियातोऽन्यस्माद्वा सदृशधर्मो यत्र सदृशबुद्धिरुपजायजायते तस्यैव प्रतिनिधित्वेनोपादानं॥ यद्धर्मे मुख्यं द्रव्यं प्रतिनिहितेषु तद राम:
पि तद्धर्मकमिति॥ अतः प्रोक्षणादयः प्रतिनिहितेषु नीवारेषु क्रियंते॥ व्रीहीणां मेधेति चाऽविकारेण प्रयुज्यते॥ यथा सान्नाय्यप्रतिनिधित्वे

नैन्द्रो वा माहेन्द्रो वा पुरोडाशो निरुप्यते तदापि मुख्यधर्मत्वस्त्रुवेणावदानं पुरोडाशस्य न हस्तेन ॥ प्रतिनिधौ मुख्यधर्मप्राप्तेः ॥ मात्रापचारे तच्छेषेणैव स-
माप्नुयात् ॥ मात्रा परिमाणं ॥ तदपचारः ॥ परिमाणासंभवः ॥ मात्राया अपचारे मात्रापचारे ॥ स्कन्नावशिष्टेषु व्रीहिषु स्वशफमात्रस्यापर्या-
प्तेषु स्कन्नशेषेणैव समाप्नुयादित्यर्थः ॥ यदा चावदानमात्रस्यापर्याप्तास्तदा लौकिका व्रीहयः स्कन्नाशिष्टेषु प्रक्षेप्तव्याः ॥ व्रीह्युपादानकाले यस्या-
श्वशफमात्रा व्रीहयो न लभ्यन्ते तस्यापि मात्रापचारे पोवपरिसमाप्तिः ॥ यस्य तु नीवारा अश्वशफमात्रपर्याप्ताः सन्ति व्रीहयो द्विरवदानापर्याप्तास्त-
त्र व्रीहिभिर्नीवारैस्संसृज्य निर्वापः कर्तव्यः ॥ यावत्संभवं मुख्यं ग्राह्यं तत्परित्यागे कारणाभावात् ॥ मुख्यावयवालाभकृत्तत्साम्यसदृशप्रतिनिधेः ॥
अत्र प्रदीपकारः ॥ अदृष्टविषामर्थे व्रीहियवौ मुख्यौ ॥ तयोरलाभे प्रियंगवः ॥ तेषामभावे कोद्रवोद्दारकमाषवर्ज्जं सर्वा ग्राम्या ओषधयो भोजने प्रविह-
रूढग्राह्याः ॥ यद्वा यवव्रीहिप्रियंगूनामभावे श्यामाकनीवारवेणुयवादय आरण्या ओषधयो ग्राह्याः ॥ तेषामभावे तरसंकंदमूलफलानि ग्राह्या-
णि ॥ आज्यार्थे गवां घृतं मुख्यं ॥ तस्यालाभे माहिषमाजं वा घृतं ॥ तयोरलाभे तैलं प्रतिनिधिः ॥ तस्यालाभे जर्तिलतैलं ॥ अतसीकुसुंभसर्षपस्ने-
हा ग्राह्याः ॥ तेषामलाभे पुन्नागमधुकादीनां बीजोद्भवस्नेहा ग्राह्याः ॥ तेषामलाभे भोजने प्रविरूढनारिकेरादिसंभवस्नेहा ग्राह्याः ॥ लोकशा-
स्त्रविरुद्धानि निंबादीनि वर्ज्जयेत् ॥ सर्वालाभे व्रीहिपिष्टानि यवपिष्टानि श्यामाकपिष्टानि वा मिश्रैः संसृज्याज्यार्थे प्रयुंजीत ॥ जैमिनिराज्यस्य
चतुरः प्रतिनिधीनाह ॥ ऊधस्यं वासयं दधिपयो वेत्याज्यस्य प्रतिनिधयः इति ॥ ऊधस्यं ईषद्विलीनं नवनीतं ॥ शकृत्पादिनोह्यमाने दधिपत्फेनवस्र-
वतित द्वासं ॥ दधिपयसी प्रसिद्धे ॥ आज्यपयसोः परस्परं प्रतिनिधित्वं ॥ यथाह कौंडिन्यः ॥ आज्याभावे पयः ॥ पयसो भावे आज्यं तावत् ॥

६ दर्भकार्ये कुशा मुख्याः ॥ कुशाभावे आश्वबालाः तदभावे शाकुश्याः तृणविशेषाः ॥ काशाः काशमूलानि उशिराटीनि ॥ इक्षवः ॥ सुगंधितृणानि दूर्वा अर्जुन
१ आदाएश्यामाक तृणमुंजाग्राद्याः ॥ शूकशुंबनलदबल्वजकृष्ण तथा वर्ज्ये सर्वे तृणं दर्भार्थे गृह्णीयात् ॥ पालाशः खदिरो वैध्मो मुख्यः ॥ पालाशस्त्रिविधः ॥
श्वेत कृष्णको लोमशोत्रतितिरिति ॥ पालाशेषु श्वेत कृष्णको मुख्यः ॥ तदभावे कृतरोग्राह्यो ॥ खादिरो द्विविधः ॥ रक्तः श्वेतश्चेति ॥ पालाशखादिराभावे यज्ञिया
नां वावृक्षाणामन्यतमस्येध्मः कार्यः ॥ तेषामप्यभावे नीपनिंबतिलकबाधकबैभीतकराजवृक्षशाल्मलतहकपित्थकोंजकोविदारश्लेष्मातकपलां
डु इति त्रयोदशवृक्षान्वर्जयित्वा सर्वेवृक्षेभ्य इध्मं गृह्णीयात् ॥ दक्षिणां कालेगोहिरण्यं वासो वा दद्यात् ॥ यत्र यत्र पद्युक्तं तत्र तत्र तद्दक्षिणां दद्यात् ॥
पो आदिष्टदक्षिणा तृष्यपक्षे त्र तत्रोक्तां दक्षिणां दद्यात् ॥ काम्येष्टिषु वासो दक्षिणा ॥ या अनादिष्टदक्षिणाः प्रायश्चित्तेष्टयः तासु सर्वत्र हिरण्यं द
द्यात् ॥ नित्येष्टिषु उक्तानां दक्षिणानामभावे फलानि मूलानि भक्ष्याणि वा दक्षिणां दद्यात् ॥ यथा कथंचिंनित्यानि कर्त्तव्यानि ॥ मित्यं नित्यानि कुर्वीत न
च नित्यानत्योपयेदित्याचार्योक्तत्वात् ॥ काम्येष्टिषु नैमित्तिकेष्टिषु च यथोक्तदक्षिणां दद्यात् ॥ तदभावे प्रत्याम्नायत्वेन यथाशक्त्यनुसारेण हिरण्यं दद्यात्
॥ सति द्रव्ये हीनकल्पं न कुर्यात् ॥ यथाह मनुः ॥ हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदं ॥ प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्त्तते ॥ न सांपरायिकं तस्य दुर्मतेर्वि
द्यते फलमिति ॥ इति प्रदीपः ॥ एष प्रतिनिधिर्नित्येषु नैमित्तिकेषु च भवति ॥ न काम्येषु ॥ काम्येषु तु उपक्रमादूर्ध्वमेव भवति ॥ द्रिदेशकालस्वाम्यग्नि
देवमंत्रकर्मप्रतिषिद्धानां प्रतिनिधिविषये अपवादवचनान्याह ॥ तत्रापस्तंबः ॥ स्वामिनोग्ने देवतायाः शब्दात्कर्मणः प्रतिषेधाच्च प्रतिनिधिर्निव रामः
र्तते ॥ सत्याषाढोपि नस्वामित्वस्य भार्यायाः पुत्रस्य देशस्य कालस्येत्यादि ॥ मंत्रनश्च ॥ नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु ॥ नच प्रतिनि

धिर्देशकालयोरित्यापायो इति ॥ एतैरुत्पद्यमानस्यादृष्टस्य अन्यैरुत्पत्तौ प्रमाणाभावात् ॥ एतेषामपि कश्चिद्वाचनीकः प्रतिनिधिः स्मर्यते ॥ तानीमानि
वचनानि ॥ तत्र दिग्देशेषु वचनान्यन्वेषणीयानि ॥ कालस्य ॥ प्रदोषांतो होमकालः संगवांतः प्रातः ॥ आप्रातराहुतिकालात्सायमाहुतिकालो नाती
यादित्यादि ॥ स्वामिनः ॥ स्वामी फलभोक्ता यजमानः पत्नी च ॥ तत्र यजमाने सत्रिणि प्रमीते नेदिष्ठिनं वा दीक्षयेदिति ॥ भार्यायाः कुशपत्न्या
दिः ॥ पत्न्यां रजस्वलायां तत्कर्म पुत्रो ब्रह्मचारी वा कुर्यादित्यादि च ॥ अग्नेः ॥ हिरण्ये अग्नौ जुहुयात् ॥ लौकिकोऽग्निर्ब्राह्मणपाण्यादि च ॥ देवतायाः
॥ देवपवित्रमाग्नेय्यो याज्यापुरोनुवाक्या देवपवित्रमैंद्र्यो देवपवित्रं प्राजापत्या देवपवित्रं व्याहृतय इत्यपदिहोता याज्यापुरोनुवाक्यासु मुख्यतस
र्वाभिराग्नेयीभिर्यजेतेति विज्ञायतेऽग्निः सर्वा देवता इत्यैंद्रीभिर्विज्ञायते इंद्रो वै सर्वा देवता इति प्राजापत्याभिर्वा विज्ञायते प्रजापतिः सर्वा देवता
इति व्याहृतिभिर्वा सर्वा वा ऋचः सर्वाणि सामानि सर्वाणि यजूंषि यद्व्याहृतय इत्यथ यदि यजमानो याजमानेषु मुह्येत्तांतरेणावेक्षुत्क ऐव्याहृतिभि
रेवानुमंत्रणं च विज्ञायते वा सर्वा वा ऋचः सर्वाणि सामानि सर्वाणि यजूंषि यद्व्याहृतय इति बोधायनसूत्रादग्निरिंद्रः प्रजापतिश्च देवताः ॥ मंत्र
स्य ॥ देवपवित्रमित्यादिनैव होत्राध्वर्युयजमानमंत्राणामाम्नेयत्वं यः प्राजापत्यो व्याहृतयो वा ॥ तत्र यजमानमंत्राणां व्याहृतय एव ॥ कर्मणः
॥ पशुसोमयोः स्थाने वैश्वानरेष्टिः ॥ प्रायश्चित्तेष्टिस्थाने पूर्णाहुतिरित्यादि च ॥ नोषधीः क्षीरेण जुहुयात् ॥ अयज्ञिया वै माषाः कोद्रवा वरको
इत्यादिश्रुतिप्रतिषिद्धानां न क्वापि प्रतिनिधिः ॥ निषेधापवादवचने च ॥ निषिद्धस्य प्रतिनिधित्वेनापि न ग्रहणं ॥ एवं च दिग्देशकालादीनां व
चनादृते प्रतिनिधिर्नास्ति ॥ सादृश्याभावादिति ॥ अथ प्रसंगादृत्विक्प्रतिनिधिः ॥ तत्र बौधायनः ॥ अथ दर्शपूर्णमासयोश्चत्वार ऋत्विजस्स

१० षामेकस्मिन्नविद्यमानेऽत्रयः प्रचारोऽपुर्द्धौ वाऽथ यद्येक एव स्यात् एप्रयाजेभ्य आज्यस्थाल्याः स्रुवेणोपघातमेकाध्वर्युरेव प्रायश्चित्तानि जुहोति॥ जु-
ष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक्॥ यद्वाचो मधुमत्तस्मिन्माधाः स्वाहा सरस्वत्यै स्वाहा॥ इममे वाश्विना यज्ञस्य यद्वाचो यद्वरिष्ठं॥ तदा-
श्विनो भेषजेन संदधाया॑ स्वाहा॥ त्रातारमिंद्रमवितारमिंद्रं हवे हवे सुहवं शूरमिंद्रं॥ हुवे नु शक्रं पुरुहूतमिंद्रं स्वस्ति नो मघवा धात्विं-
द्रः स्वाहा। यन्मे मनसा छिद्रं यद्वाचाय ज्ञमे हृदः॥ देवास्तच्छमयं तु सर्वं सो मोबृहस्पतिश्च स्वाहा॥ यदिद्वां सोपदविद्वां सो मुग्धाः कुर्वतऋ-
त्विजः॥ अग्निर्मा तस्मादेनसः प्रश्रद्धा देवी च मुंचतां स्वाहा॥ यदंतरिक्षं यत्पृथिवी मृत०मामनेनसं स्वाहा॥ ब्रह्मत्वे होत्र आध्वर्यव आग्नीध्रे चै-
क एव यजेत यत्पर्वणि॥ तन्मे देवा रक्षंतां मा णान्मे माहिंसिषुः स्वाहा॥ अहं ब्रह्माऽहं होताहमध्वर्युरहमाग्नीध्रोऽहं यजमानः॥ एक एव यज्ञे
यत्पर्वणि तन्मे देवा रक्षंतां प्राणान्मे माहिंसिषुः स्वाहेत्येकाध्वर्युरेव प्रायश्चित्तानि हुत्वांतर्वेद्यासीनः सर्वा देवता यजतीति विज्ञायते इति।
अत्र गोपालवीवरणं॥ दर्शपूर्णमासयोश्चत्वार ऋत्विजस्तथा हि चत्वार एते हविर्यज्ञस्यर्त्विजो ब्रह्मा होताध्वर्युरग्नीदिति॥ तेषामेकस्मिन्नविद्यमा-
नेत्रयः प्रचारोऽपुद्धौ वा॥ तत्र सर्वं प्रायश्चित्तमेव॥ अथ यद्येक एवाध्वर्युरेवेत्यर्थः॥ मंत्रे हं यजमान इत्यत्विक् वचनं कथं अहं यजमानो यागकर्ता-
हमित्यर्थः॥ केचिदध्वर्युरेव यजमानक एतीति वदंति यजमानश्चासंनिहितोऽसमर्थो वा अहं यजमान इति मंत्रलिंगात॥ न तु यत्र यजमा-
न एव कएति तत्रापि युज्यते॥ तत्रैकाध्वर्युरेव प्रायश्चित्तानीति समाख्याविरोधात्॥ परायजमान एव कर्त्ता तदापि सर्वं मायश्चित्तमेव॥ अंतर्वे- एमः
द्यासीन इत्यादि तत्रक्रमः॥ इडा देवहूरित्यादि जपस्यावृत्तिः॥ चतुर्धा त्विज्यभेदात॥ प्रवरं प्रविष्यमाणमनुमंत्रयत इति प्रवरस्य माप्रा

वनुमंत्रणं कुर्याद्योपविश्य स्रुवेणाघारमाघार्य मनोसीत्युल्कां निविश्य हानिर्देवता आवाह्य प्रादेशं कृत्वोपविशति ॥ अग्निं संमार्गं गत्वा जुहूपभृतावाद्रा
प आघारमाघार्यानुमंत्र्यास्य यत्तस्य प्राविताऽ इत्यं ते देवसवितऽ तं त्वा वणते इति प्रतिपद्यानुसंधय मित्यनंतरं स्वनाममयोस्यासौ मानुष इत्या
दि अपरेणाहवनीयं तृणनिरसनमंते वेद्यासीनः सर्वा देवता यजति ॥ पुरएम पाजेभ्य इत्याद्येकाध्वर्युर्व प्रायश्चित्तं हुत्वा स्रुगादापनादि प्राशि
त्रमितं वावदाप स्रुहुपवर्षए हीती ता मा मंत्र्यं जनो यमानिसव्यहस्तेन दामुप हूपत्र तु धी कूरणा सन्नेत्वा शार्य प्रजापते भागोसीति ॥
ततो ब्रह्मन् ब्रह्मासीत्यादि कृत्विग्भ्यः प्रदाय यदा यजमान एव कर्तातदा दक्षिणानि वत्विः सत्रिणामिवेति ॥ अत्र प्रदीपकारः ॥ दर्शपूर्णमासयो
श्चित्वा कृत्विजस्तेषामेकस्मिन्नविद्यमाने सर्वप्रायश्चित्तं हुत्वा त्रयः प्रचरेयुः ॥ द्वयोरभावे द्विवाः सर्वप्रायश्चित्तं हुत्वा द्वौ प्रचरेतः ॥ यदाध्वर्यु
यजमानौ तदा सर्वप्रायश्चित्तं त्रिवारं सर्वप्रायश्चित्तं हुत्वा द्वौ प्रचरेतः ॥ यदाध्वर्युयजमानौ तदा सर्वप्रायश्चित्तं त्रिवारं हुत्वा कर्म कुर्यात् । य
दा यजमान एक एव कुर्यात्तदा चतुर्वारं सर्वप्रायश्चित्तं हुत्वा यजमानोंतर्वेद्यासीनो वक्ष्यमाणा देवताः सर्वे कुर्यात् यदा यजमान एकैव कुर्यात्
तदा सत्रिणामिव दक्षिणा न लभ्यते ॥ यदाध्वर्युरेक एव यजमानोऽसंनिहितोऽसमर्थो वा तदाहं यजमान इति लिंगादेकाध्वर्युर्येव प्रायश्चि
त्तं कुर्यात् ॥ सर्वदा कृत्विक्समासविषयं प्रायश्चित्तं पुरएम पाजेभ्यो जुहुयात् ॥ तत्र प्रयोगक्रमः ॥ अध्वर्युरिडादेव हूरिति चतुः कृत्वो ज
प्त्वा चतुर्णामपि कर्माण्यध्वर्युरेक एव करोति । पुरएमपात्रणी पानि क्रमेण कुर्यात् । हवींष्यंतर्वेद्यासाद्य हविषां पश्चात्सयं वेद्यामासीनः सर्वा
देवता यजति ॥ अग्न्यपेक्षमिध्यमानायानुब्रूहीत्युक्ताज यपूर्वं सामिधेनीर्ब्रुवन् समिधोभ्याधाय वेदोपवाजनं कृत्वाग्ने महाँ असि ब्राह्मण

११ माते त्यंतमुक्त्वोद्बुध्यो अग्न इति वदेत्॥ तिष्ठन्नवाग्मीक्षेत॥ उपविश्यामर्त्यस्यत इत्युक्त्वा स्रुवेणाघारमाघारयेमनो सीत्युक्त्वा तिष्ठन् देवेद्ध इत्यादि आ
वह जातवेदः सुयजायजेत्यंतं वदेत्॥ उपविश्यायरिति मंत्रेत्यादितं हुत्वा मीत्यंतमुक्त्वा प्रेषपूर्वकमग्निसंमार्जनं कृत्वा भुवनमसीत्यादि स्रुचमाघारमाघा
यानुमंत्रणं कृत्वाश्रावयपपत्नी देवैष्वित्यादि ब्रह्मन्वरं चेत्याप त्यंतमुक्त्वा तिष्ठन्नाश्रावणादि कृत्वा सोमानुष इत्यत्र स्वनामोक्त्वा उपविश्य देव सवितरेतं त्वा
वृणत इत्यादिमानुष इत्यंतमुक्त्वा तिष्ठेत्॥ उदायुषेत्यादि विवदन्नमुत्थाय मार्जनं कृत्वा वेद्या दर्भमपास्य ने हृदे धिषण्येत्यादिनोपविश्य भूपत इत्यादिना
ममहोत्रं ऋषध्वमित्यंतमुक्त्वा ज्येष्ठात्स्रुक्स्रुवेणोपहत्यैकाध्वर्यव आपश्चिननमध्या वाहुती जुहुयात्॥ ऋषभो वा चोभूयास॰॥ इमेमेवाश्विनाय
तस्य॰॥ त्वावताग्मिदम॰॥ यन्मेमनसाच्छिद्रं॰॥ यच्छिद्रं सोमपदवि द्वं म:॰॥ परं तारिष्टं य॰॥ ब्रह्मन्त्वे होत्र आध्वर्यवे॰॥ अहं ब्रह्मा हं होतेति॥ ए
वमष्टाभिराहुतीभिर्हुत्वा स्रुग्दायनमुक्त्वा वेद्यामासीन एवाश्रावणादिकं कृत्वायथोक्तदेवताः क्रमेणायजेत्॥ प्राशित्रमिडां वदानं स्रुहत्याभिमंत्र
णं कृत्वा पर्वाजनमवांतरे ज्ञां चसख्येन हस्तेन कृत्वेडामुपहूय चतुर्धा कृत्वा वांतरेडां प्राश्य इडाभक्षणं कृत्वा मेदेन मार्जयित्वा होत्रमार्जनं च कृत्वा प्रे
षपूर्वकं प्राशित्रं प्राश्य ब्रह्मपिनस्त्वेत्यादि अन्वाहार्यस्य पंगत्ली पात्॥ संप्रेषपूर्वकमनुयाजादिकर्मतर्पणांतं कुर्यादिति॥ सोमविषये त्रिकांडमं
डनकाः॥ अत एव च सोमादौ योऽयं शल्लिंगसंभवे॥ अग्नीषोमापि तत्सर्वक्रमेकं पुरोतीदृशमिति प्रतिनिधिप्रकरणं॥ अथ द्रव्यशुद्धिः॥ तत्र ध
र्मसूत्रे बौधायनः॥ शुचि मध्वं देवा ऋषयेन शुचिकामा हिदेवाः शुचयश्च तदेषगोभिर्वदंति शुचीवो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं राम:
शुचिभ्यः॥ ऋतेन सत्यमृतसाप आयन्छुचिजन्मानः शुचयः पावका इति अहतं वाससां शुचिस्तस्माद्यत्किंचेन्यासं प्रक्रम्य सर्वं तदहतेवा

सोमिः कुर्यात् प्रक्षालितान्यहतान्यक्लिष्टानि वासांसि पत्नीयजमानावृत्विजश्च परिदधीरन्नेवं प्रक्रमादूर्ध्वं दीर्घे सोमे सत्रेषु चैव यथासमाम्नातं च य-
थेतरस्मिन् वरणीये पिष्टिपशुसोमेषु लोहितोष्णीषा लोहितवाससश्चर्त्विजः प्रचरेयुः श्वित्रवाससश्चित्रासंगो वृषाकपाविति चाधीने सौमाणि वासांसि
तेषामलाभे कार्पासिकान्यौर्णानि वा भवंति मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां मृदाद्भिरिति प्रक्षालनं वाससोवत्तार्थ्यं वल्कलानां वल्कलवत्कृष्णा-
जिनानां न परिहितस्यैवमनिरूढमप्रक्षालितं अप्रावरणं नापल्पूलितं मनुष्यसंपुक्तं देवत्रा नियुंज्यात् घनाया भूमेरुपघात उपलेपनं सुषिरायाः कर्ष-
णं क्लिन्नायाममेध्यमाहृत्य प्रच्छादनं चतुर्भिः शुध्यते भूमिर्गोभिराक्रमणात् खननाद्दहनादभिवर्षणात् पंचमाच्चोपलेपनात् षष्ठात्कालात् संस्कृ-
तापं भूमौ न्यस्तानां तृणानां प्रक्षालनं परोक्षोपहतानामभ्युक्षणमेवं स्थूलसमिधामहतां काष्ठानामुपघाते प्रक्षाल्यावशोषणं बहूनां तु प्रो-
क्षणं चंडालादिस्पर्शे पुरुषवाह्यादर्वागूर्ध्वं त्वेनकपुरुषोद्धृपे दाहः शिलेभूमिसमे दूषिकाश्च संकुलीकृता दारुमयाणां पात्राणामुच्छिष्टे सम-
न्वारब्धानामवलेखनमुच्छिष्टलेपोपहतानामवतक्षणं मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गस्तदेतदन्यत्रानिर्देशाद्यथेतदग्निहो-
त्रे घर्मो। उच्छिष्टे च दधिघर्मे च कुंडपायिनामयने चोत्सर्गिणामयने च दाक्षायणयज्ञे चेडादधे च चतुश्चक्रे च ब्रह्मौदने च तेषु सर्वेषु दर्भैरद्भिः प्र-
क्षालनं सर्वेष्वेव सोमभक्षेष्वद्भिरेव मार्जालीये प्रक्षालनं मूत्रपुरीषलोहितरेतःप्रभृतिभिरुपहतानामुत्सर्गः॥ मृन्मयानां पात्राणामुच्छि-
ष्टसमन्वारब्धानामवज्वलनमुच्छिष्टलेपोपहतानां पुनर्दहनं मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गस्तैजसानां पात्राणां पूर्ववत्परिमृ-
ष्टानां पुनर्दहनं परिमार्जनं द्रव्याणि गोशकृद्भस्मेति मूत्रपुरीषलोहितरेतउपहतानां पुनःकरणं गोमूत्रे वा सप्तरात्रं परिशायनं महानद्यां वे

१२ वमश्ममयेषु फलमयानामलांबुबिल्वकपित्थानां विद्राक्षाणां गोवालैः परिमार्जनं नलवेणुशरकुशमुतानां गोमयेनाऽद्भिरिति प्रक्षालनं व्रीहीणा
मुपघाते प्रक्षाल्यावशोषणं बहूनां तु मोक्षणं तं दुल्लानामुत्सर्ग एवं स्निद्रुहविषां महतां श्वनाय सप्रमत्तोपहतानां तद्देशं युद्धृत्यान्यमुत्सृज्य पवमानः
सुवर्णेन दत्ते तेनानुवाकेनाभ्युक्षणं मधूदके पयोविकारे च पात्रात्पात्रांतर एवं नयने शौचमेवं तैलसर्पिषी उच्छिष्टसमन्वारब्धे तूदकेऽवधायोपयोग
पेदमेध्याधाने समाप्याग्निमथिलापवमानेष्टिः शौचदेशमंत्रावदर्थद्रव्यसंस्कारकालभेदेषु पूर्वप्राधान्यं पूर्वं पूर्वं प्राधान्यमिति ॥ अत्र प्रदीप
कारः ॥ मूत्रपुरीषलोहितरेतोभिरुपहतं वस्त्रं मृदाद्भिः प्रक्षालनाच्छुध्येत ॥ अशुचिनास्पृष्टं वस्त्रं प्रोक्षणाच्छुध्येत् ॥ अजिनं वासः सूत्रं वाप्रक्षा
लितमुत्तरीयं कुर्यात् नाप्रक्षालितं ॥ अप्रक्षालितं नवं वस्त्रमाधानदीक्षासु न परिदध्यात् ॥ अप्रक्षालितं नवं वस्त्रं कर्मसु नोपयुंज्यात् ॥ परोप
पूतं कृष्णाजिनं वस्त्रं वा नोपयुंज्यात् ॥ येषां मूत्रादिभिरुपहतायामुपहतप्रदेशभूमिर्दृष्टा चेद्गोमयाद्भिरुपलेपनाच्छुध्येत् ॥ आर्द्रायां येषां मूत्राद्युपहता
यामुपहतप्रदेशात्पुरीषमुद्धृत्य मेध्यां मृदं न्यस्य तत आहृत्य पृथिव्या उपलेपनाच्छुध्येत् ॥ अत्यंतोपहतायां कर्षणादि कृत्वा गोभिराक्रमणाद्वा दहना
भिवर्षणादिभिर्व्यस्तैः समस्तैर्वा शुध्येत् ॥ अल्पोपहते चेदुपलेपनं भौमस्यां शुभाहृते स्वशुध्येत् ॥ उपहतायां भूमौ उपलेपनादिभिः संस्कृतायां
निहितानां कुशधान्यादीनां प्रक्षालनाच्छुद्धिः ॥ वस्त्रार्थशूद्रादिभिराहृतानां काष्ठयूपादीनामभ्युक्षणाच्छुद्धिः ॥ अंगुलिप्रमाणस्थूलानां समिधाम
ल्पोपहतौ प्रक्षाल्यावशोषणाच्छुद्धिः ॥ मूत्राद्युपहतानां त्याग एव ॥ आर्द्राणां सत्वकानामुपघाते तक्षणप्रोक्षणाच्छुद्धिः जुह्वादीनां दारुमयपा
त्राणां बुद्धिपूर्वमुच्छिष्टपुरीषस्पृष्टानामवलेखनप्रोक्षणाच्छुद्धिः ॥ उच्छिष्टपुरीषेणाबुद्धिपूर्वं स्पृष्टानां प्रक्षालनाच्छुद्धिः ॥ उच्छिष्टलेपोपह

तानां शालग्राणां न क्षणाच्छुद्धिः ॥ अत्यंतोपहतानां तत्क्षणात्समर्थानां मंत्रेण पात्रांतरं गृहीत्वा मृत्पुनर्मैत्यभिमंत्र्योपहतमस्कृप्रक्षिपेत् ॥ भूमिर्भूमि
मगादिति ॥ खादितानां पात्राणामिध्माबर्हिःप्रभृतीनामपि मूत्राद्युपहतानां त्याग एव ॥ अग्निहोत्रे घर्मोच्छिष्टे दधिघर्मे कुंडपायिनामयने उत्सर्गि
णामयने क्षापणपक्षे चातुर्मास्ये ब्रह्मौदने चाग्निहोत्रहवण्यादीनामुच्छिष्टसमन्वारब्धानामुच्छिष्टलेपोपहतानां चाग्निर्माजो लीयेदर्भैः प्रक्षालना
च्छुद्धिः ॥ मूत्राद्युपहतानां त्याग एव ॥ पात्रांतरस्वीकारश्च ॥ मृन्मयपानामाज्यस्थाल्यादीनामत्योपहतानामुच्छिष्टसमन्वारब्धानां च कुशाग्निना दहना
च्छुद्धिः ॥ उच्छिष्टलेपोपहतानां मूत्राद्युपहतानां त्यागः ॥ पात्रांतरपरिग्रहश्च ॥ तैजसानां हस्तपुरुषादीनामुच्छिष्टोपहतानां शकृन्मृद्भस्मोदकैः प्रक्षाल
नाच्छुद्धिः ॥ ताम्रमयानामुच्छिष्टोपहतानामाम्लोदकैः प्रक्षालनाच्छुद्धिः ॥ कांस्यानामुच्छिष्टोपहतानां भस्मोदकैः प्रक्षालनाच्छुद्धिः ॥ अयोमयाना
मुच्छिष्टोपहतानां शकृन्मृद्भस्मोदकैः शुद्धिः ॥ रजतकांचनयोरद्भिरेव प्रक्षालनाच्छुद्धिरिति ॥ विशिष्टमूत्राद्युपहतानामग्नौ प्रतपनाच्छुद्धिः ॥ अश्म
मयानां तैजसादिवच्छुद्धिः ॥ काष्ठभाजनानां बिल्वकपित्थमयानामलाबुपात्राणां वेणुवेत्रकृतानां कुशादिभिर्निर्मितानां गोमयाद्भिः प्रक्षाल
नाच्छुद्धिः ॥ क्षीरादीनां सक्तुपट्टव्याणां चांडालादिभिः स्पर्शोपहतानां द्रोणन्यूनपरिमाणानां प्रक्षाल्यावशोषणाच्छुद्धिः द्रोणाधिकपरिमाणानां
प्रोक्षणाच्छुद्धिः ॥ तंडुलादीनामुदक्यादिभिः स्पृष्टानां द्रोणन्यूनानामुत्सर्गः ॥ द्रोणाधिकानां स्पृष्टदेशे तावन्मात्रत्यागात्प्रोक्षणाच्छुद्धिः ॥ बहुपु
रोडाशानामुदक्यादिभिर्दृष्टानां त्यागः ॥ पयोदधिमधुघृतादीनामुच्छिष्टसमन्वारब्धपात्रमात्रोपहतानां शुद्धपात्रावनयनाच्छुद्धिः ॥ पयोदधि
मधुघृतादीनामुच्छिष्टोपहतानां त्यागः ॥ शूद्रभांडस्थितानां पयोदधिमध्वाज्यादीनां शुद्धपात्रांतरावनयनाच्छुद्धिः ॥ आपणस्थद्रव्याणां विक्रय

२३ णाछुचिः अग्निहोत्रद्रव्ये तैलसर्पिः पयोदध्यादावुच्छिष्टसमन्नाद्ये पात्रांतरे वनीयोदके निधाय अग्निहोत्रार्थमुपयुंज्यात् ॥ शौचदेशद्रव्यमंत्रावदर्थसं
13 स्कारकालानामष्टानां द्वयोर्द्वयोर्विरोधे पूर्वस्य प्राबल्यं परस्य दौर्बल्यादिति ॥ अत्र शौचादिविषये किंचिदुच्यते ॥ शौचं शुद्धिः ॥ स्नानाचमनादिना पुरुष
स्य कर्मार्हता ॥ द्रव्याणां च प्रक्षालनादिना ॥ देशः पुण्यदेशः प्राचीनप्रवणादिश्च ॥ द्रव्यं व्रीहियवादि ॥ मंत्रा ऋगादयः ॥ आवाल्किया ॥ अर्थः प्रयोजनं
॥ संस्काराः अवघातप्रोक्षणादयः ॥ कालः सायंप्रातरादिर्देशादिश्च ॥ पूर्वस्य पूर्वस्योत्तरोत्तरेण विरोधे पूर्वस्य प्राबल्यं ॥ परस्य दौर्बल्यं ॥ एतेषां क्रमेणो
दाहरणानि ॥ तत्रादौ शुद्धेः ॥ अस्नातस्य सूतकिनो वामापाश्रितार्हस्य वा देशादिषु सत्स्वपि नाधिकारः ॥ देशस्य ॥ सौराष्ट्रादिप्रतिषिद्धदेशे द्रव्या
दिषु सत्स्वपि नाधिकारः ॥ द्रव्यस्य ॥ श्यामाकादिद्रव्यासंभवे मंत्रादिषु सत्स्वपि आग्रयणादौ नाधिकारः ॥ मंत्रस्य ॥ अनधीतमंत्रकस्य विस्मृतमं
त्रकस्य वा आदरादिमात्रेण नाधिकारः ॥ क्रियायाः ॥ क्रियायामशक्तस्य प्रयोजनादिषु सत्स्वपि नाधिकारः ॥ अर्थस्य ॥ निष्कामस्य संस्कारादिसत्वे
पि काम्ये कर्मणि नाधिकारः ॥ संस्कारस्य ॥ दीक्षणीयादिरहितस्य प्राप्तेपि काले सुत्यादौ नाधिकारः ॥ इति शुद्धिप्रकरणं ॥ अथ शुद्धिप्रसंगादन्यदपि
किंचिदुच्यते ॥ तत्रादावाश्वलायनः ॥ ऋत्विजो वृणीते न्यूनानतिरिक्तांगान्यमानतः पितृतश्चेति पुनः ऋत्विजो वृणीत इत्येक इति ॥ तथा आर्षेयं वृ
णीते यः स्वानृषीन् जानाति एतेनापहृतानां बांधवानां निवृत्तिः अतएव बौधायनः अथर्त्विजां वरणं विज्ञायते ब्राह्मणा ऋत्विजो योनिगोत्रश्रुतवृत्तसं
पन्ना अविगुणांगा नावकीर्णिनो न परिव्राजकानां नात्यगानां नात्यजानां नानूचानानां हालेपपुत्रिकापुत्रपरस्त्रैणसहोढानां नानुज्जावरेन ह्रियवरः ॥ आंगि रमः
रसोध्वर्युर्वासिष्ठो ब्रह्मा वैश्वामित्रो होता पास्य उद्गाता कौषीतकः सदस्यो वासिष्ठमगबंगिरः सोमायोनिवत विख्याः प्रमाणमित्येके ताश्च द्वणीताया

पञ्चांगानि वरणीताकुर्नत्विनमध्वर्युमक्लिप्तानि नं ब्रह्माणं अर्धं होतारं अकरालमुद्गातारं अशिपिविष्टं सदस्यमिति ॥ब्राह्मणग्रहणमापद्यपि क्षत्रि
यादिनिवृत्त्यर्थं ॥ उक्तं च छन्दोगदशांते मिश्रैः द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः ॥ब्राह्मणार्त्विज्यनियमात् कृत्यर्थेनापि हि स्मृत इति ॥एमाप
णेपि क्षत्रियोपानकोपस्य चंडालः स विशेषतः ॥कथं सदस्ति भोक्तारो हविस्तस्य सुरर्षय इति ॥एते न क्षत्रियादिवत्सुपत्नीविनोपि निराकृताः ॥अ
त्र ब्रह्मादीनां कुनखत्वादिभ्यनुज्ञानं अलंतापद्विषयं ॥योन्यादिग्रहणं न गोत्रनियमः इत्यर्थः ॥संग्रहे ॥तैलंगकर्णाटकलिंगवंगसंबंधिनो माथु
रियाश्च विप्राः ॥ श्राद्धे विवाहे खलु पत्तपाके न पूजनीया अपि शंभतुल्या इति ॥ यत्तु हेमाद्रौ कौर्मे ॥नैकगोत्रे हविर्दद्यात् पाकस्यातथा हविरिति ॥ त
च्छूद्रप्रकरणपठितत्वात्तद्विषयमेव ॥ श्राद्धविवाहे इत्यादिना ये श्राद्धीयपक्षयोः तत्प्रकरणे निषिद्धास्तेपि प्रायो निषिद्धकोटौ संगृहीता भवंति
इति निषिद्धैर्निमित्तैः कृतं कर्म मंत्रसर्गप्रायश्चित्तपूर्वकं पुनरेव तेन त्याज्यं ॥ एवं निषिद्धद्रव्यदेशकालेषु च पुनरावृत्तिरिति अत्र त्रिकांडमंडनकारः ॥अ
ग्निहोत्रादिकं तस्मात्कालशौचविधीयते ॥ आवृत्तानादमुच्छिः कर्मकृत्वाशुचिर्धनेन वा ॥ नावर्तयेत्पुनः कर्म प्रायश्चित्तेन शुध्यति ॥अयोग्यशुचि
द्रव्यकर्त्रादिकृतकर्मणः ॥ आवृत्तिः सर्वपाकार्येष्वेवमाहुर्विपश्चित इति ॥अयोग्याशुचिद्रव्यकर्त्राद्यैः कृतकर्मणः ॥आवृत्तिः सर्वपाकार्येष्वेव
माहुर्विपश्चित इति ॥ अथ कार्यविशेषे केषांचित्तात्कालिकीं शुद्धिं सुबोधिन्यां व्याघ्रपात्त्रिशङ्कुकौ टीकापाकमलाकरमहात्मजानेतमदृआ ह
॥ ततत्कार्यप्रशस्तत्रिवृतिनयनं प्रवृत्तदीक्षितत्विक् स्वदेशभ्रंशापत्त्यपनेकृच्छ्रतिपट्टनमिषकृत्कारुशिल्पानुराणां ॥ संग्रामे व्येषु दानोपयनम
यजनश्राद्धयुद्धप्रतिष्ठानुत्पातीर्थयेयपात्राजपप्रपूरणयन्त्राशुचित्वं वैयर्थत इत्यर्थे इति ॥ आशौचं नोभवतीति पूर्वेण संबंधः ॥ सत्रिअत्रसत्र

१४ वान्॥ मुख्यस्तत्र सर्वदीक्षितपदेनैव सिद्धः॥ व्रती॥ कृच्छ्रचान्द्रायणादिव्रतवान्॥ अनंतव्रतादिनियमवांश्च॥ न व्रतिं नाव्रते इति विधमुक्तेः॥ नृपः॥ प्रजापालना-
14 धिकृतो यः कश्चित्॥ नृपवानमात्यादिः॥ दीक्षितो यजमानः॥ तस्य चावभृथात्पूर्वमेवाशौचाभावः॥ तथा च माधवीये ब्राह्मे॥ तद्गृहीतदीक्षस्य त्रै-
विद्यस्य महात्मनः॥ स्नानं त्ववभृथे यावत्तावत्तस्य न सूतकमिति॥ ऋत्विग् अध्वर्य्वादिः॥ तस्य च मधुपर्कोत्तरमाशौचाभावः॥ गृहीतमधुपर्कस्य
यजमानाच्च ऋत्विजः॥ अत एव व्याघ्रः॥ चतुर्णां वरणपक्षे अन्येषामाशौचे ऽन्यआगमपि तथा इत्याहेति॥ एवं स्मार्ते तुलाकोटिहोमादावपि मधु-
पर्के सति दोषाभावः॥ यत्तु॥ प्रारंभो वरणं यज्ञ इति तत्रापि मधुपर्कोत्तरं ज्ञेयमिति पितृचरणाः॥ वस्तुतस्तु॥ कर्माण्यपि द्विविधानि वरणवंत्यवरणवं-
ति च॥ एवं च वरणवत्से प्रारंभो वरणं यज्ञ इति॥ वरणं प्रारंभः॥ तत्रैव मधुपर्कोत्तरा अवरणवत्सु तु स्त्रीपाद्यपदार्थकरणमेवारंभः॥ अत एव
व ऋत्विजां दीक्षितानां च यस्ति यत्कर्म कुर्वतामिति॥ स्त्रीपाद्यपदार्थकरणानंतरमेवाशौचाभाव उक्तः॥ तथा च दर्शपूर्णमासप्रारंभ तस्य हो-
तुः सामिधेनीषु प्रवृत्तस्याशौचाभाव उपपद्यते॥ अन्यथा तस्यापि स्यात्॥ मनुरपि॥ न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेदिति॥ तेना-
धानेष्टिपशुबंधादौ मंत्रवद्वरणाभावादन्ये भवंतीति निर्णयसिंधौ यदुक्तं वचनं॥ यच्च तत्रैव स्मार्ते तुलाकोटिहोमादौ मधुपर्काभावेऽन्यआ-
गमपि तथा इति लिखितं तदपि तेषां लौकिके वरणे कृते आद्यपदार्थारंभाभावे वेदितव्यं॥ यदपि सोमयागादौ चतुर्णां वरणपक्षे ऽन्येषामा-
शौचेऽन्यआगमपि तथा इति भाष्यं॥ तदपि तेषां स्त्रीपाद्यपदार्थारंभाभावविषयमित्येवं सर्वेषां यथा नामविरोधः इति वयं॥ अत्र विशेषः ष-
ट्त्रिंशतो शंखः। ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वतां। नैवाशौचं भवेत्तेषां पित्रोस्तु मरणं विनेति। देवयाज्ञिकोप्येवमेवेति। तथा स्वे

देशस्य विस्फोटाद्युपसर्गे राजैभयाद्भ्रंशे ॥ तथा आपद्यन्नाभावेन कुटुंबिपीडायां सत्यां तं निवृत्यर्थं प्रतिग्रहादौ आशौचं नेत्यर्थः ॥ वाप्यर्थो ॥ अ
नेकाश्रुतीः वेदान्पठंतीत्यनेकश्रुतिपठनः ॥ तथाभिषज्जो वैद्यस्य नाडीस्पर्शादौ ॥ तथाकारूणां सूपकारादीनां शिल्पिनां चैलनिर्णेजकानां च
तत्रकर्मणि आशौचं न ॥ तथा आतुराणां मुमूर्षूणां रोगिणां तदुपशमनार्थं दानहोमादौ नाशौचं ॥ तथा च प्रचेताः ॥ कारवः शिल्पिनो वैद्या
दासीदासास्तथैव च ॥ राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः ॥ तथा दाने च तुलादानादौ प्रारब्धे नाशौचं ॥ तस्य चारंभो नांदीश्राद्धं सं
कल्पो वा ॥ तथा उपनयने यजने च तडागोत्सर्गकोटिहोमादौ श्राद्धे च प्रारब्धे आशौचं न ॥ तथा च लघुविष्णुः ॥ व्रतयज्ञविवाहेषु श्राद्धे होमार्चे
ने जपे ॥ आरब्धे सूतकं न स्यादनारब्धे तु सूतकमिति ॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः ॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया इति ॥
॥ तथा ॥ युद्धे च संप्रारब्धे उपस्थिते तदुपयोगिनि संग्रामे समुपोढे राज्ञां नीराजने संनाहपदिन्यादिके प्रास्थानिके शांतिके होमादौ नाशौचं ॥ प्रतिष्ठा
विद्यादेः चूडाचौलकर्म तीर्थयात्रार्थयात्रा च ॥ तीर्थार्थयात्रा आशौचे आकस्मिकतीर्थप्राप्तौ तु या ॥ विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि ॥
न तत्र सूतकं तद्वत्कर्म यज्ञादिकारयेदिति पैठीनसिस्मृतेः ॥ जपः पुरश्चरणादि स्तोत्रपाठः ॥ अविच्छेदेन संकल्पितहरिवंशश्रवणादिश्च ॥ तथा
च ब्राह्मे ॥ जपः पुरश्चरणादि स्तोत्रपाठः ॥ अविच्छेदेन संकल्प गृहीतनियमस्यापि न स्यादन्यस्य कस्यचिदिति ॥ कालनियमाभावेन तु हेयमेवेति पि
तृचरणाः ॥ परिणयनं विवाहः ॥ उत्सवो रथयात्रादिः सीमंतादिश्च ॥ एतेषु संप्रारब्धेषु आशौचं नेत्यर्थः ॥ याज्ञवल्क्यः ॥ ऋत्विजां दीक्षिता
नां च यज्ञियं कर्म कुर्वतां ॥ सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥ दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ॥ आपद्यपि च कष्टायां सद्यः

१५ शौचं विधीयते ॥ दक्षः ॥ स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितं ॥ आपद्गतस्य सर्वस्य सूतकेपि न सूतकमित्यादि ज्ञेयं ॥ तथा ॥ प्रारब्धं श्रौतं स्मार्तं
१५
च सपिंडेनापि कार्यं ॥ न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेदिति मनुवचनात् ॥ तथा ॥ वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनादितिया
ज्ञवल्क्यवचनाद् अग्निहोत्रहोमोपासनहोमादयः सूतके कार्या एव ॥ औपासनहोमस्य श्रौतत्वं तत्र राहः स्वाहाकुर्याद्द्रव्याभावे केनचिदाकाष्ठानु
हुयादिति श्रुत्यैवोक्तेमिताक्षरायां ॥ तत्र श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति स्मृतेस्त्यागमात्रं स्वस्य कर्तृत्वात्तदिति केचित्तु श्रौतेस्मा
र्तेवा अन्यस्यैव कर्तृत्वं ॥ सूतके मृतके चैव अशक्तौ श्राद्धभोजने ॥ प्रवासादिनिमित्ते तु हावयेन्नतु हापयेदिति बृहस्पतिवचनादिति विज्ञानेश्वरः
॥ अन्ये तु नित्यानि निवर्तेरन्वैतानवर्जं शालाग्नौ चैके न्य एतानि कुर्युरिति पैठीनसिवाक्यादौपासनहोमः पक्षे नैव कर्तव्यः ॥ तत्रेयं व्यवस्था ॥
येषां वह्वृचानां दूरदशरात्रम् होमेपि नाग्निविच्छेदस्तैर्न कार्यो होमः ॥ तैत्तिरीयादिभिस्त्वन्यद्वारा कार्य एव ॥ त्रिचतुरात्रम् अहूयमानोग्निर्लौकिकः सं
पद्यत इति तु दर्शनमाप्याज्ञामेवान्य एतानि कुर्युरिति प्रागुक्तं वचनमित्याहुः ॥ श्रौतं सर्वं स्वयमेव कार्यं ॥ कर्म वैतानिके कार्यं स्नानोपस्पर्शना
त्स्वयमिति ॥ हारीतीये स्वयमिति विशेषणोपादानात् ॥ स्मार्तं तु त्यागातिरिक्तमन्यद्वारैव कार्यं ॥ कश्चित्तु वासौरौलध्वर्प्वादेरेव होमकर्तुः सा
गहोमोन्यत्रासगोत्रेण ॥ तथा चान्यस्मिन्नर्थेन्य एतानि कुर्युरित्युदाहृतपैठीनसिवाक्यात् कण्वोपि ॥ सूतके तु समुत्पन्ने स्मार्तं कर्म कथं भ
वेत् ॥ पिंडयज्ञं चरुं होमम् असगोत्रेण कारयेदिति चरुः पत्न्यादिः ॥ जाबालोपि ॥ जन्महान्योर्वितानस्य कर्मत्यागो न विद्यते ॥ शालाग्नौ केव
लो होमः कार्य एवान्यगोत्रजैरिति ॥ छंदोगपरिशिष्टे तु ॥ होमं श्रौते तु कर्तव्यः शुष्कान्नेन फलेन वा ॥ अकृतं हावयेत्स्मार्ते तदभावे कृताकृत

मित्यनध्याये वहोम उक्तः॥ अकृतं व्रीह्यादि। कृताकृतं तंडुलादि॥ एवं चरुरूपेऽन्नतुहोमापाये इति प्रागुक्तं ब्रह्मस्य निवचनमपि स्मार्तहोमपरमेव न तु श्रौतहो
मपरमित्युक्तं तेन स्मार्तेऽपि पिंडपस्य श्रवणाकर्माश्वयुजीकर्मादीनि सर्वमन्यद्वारा कार्यमेव॥ मनुरपि॥ प्रत्यूहेन्नाग्निषु क्रिया इति॥ अग्निषु क्रिया इ
त्यभिधानादनग्निसाध्यानां दानादीनां निवृत्तिः॥ अत एवोक्तं॥ स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके इति॥ पतु देवयाज्ञिकादयः स्मार्तहोमे स्वस्य कृते
त्वमित्याहुः॥ तच्चिंत्यमिति दिक्॥ एवं पंचयज्ञविधानं च न कुर्यान्मृतजन्मयोर्नोः॥ तथा॥ विप्रो दशाहमासीत वैश्वदेवविवर्जित इति पुलस्त्यादि
वचनाच्च वैश्वदेवादेर्निवृत्तिः॥ यद्यपि पंचयज्ञविधानं चेति पूर्वोक्तनिषेधादेव पंचमहायज्ञांतर्गतत्वाद्वैश्वदेवस्य निषेधप्राप्तस्तथापि येषामाप
स्तंबादीनां पंचमहायज्ञातिरिक्तो वैश्वदेवस्तत्परोऽयं निषेध इति न्यायविदः॥ हारीतेन तु तस्य द्रावणव्यापोपदात्माऽशुचिर्यदेश इति सूत्रकृता
पंचमहायज्ञस्य मध्ये ब्रह्मयज्ञस्यैवाशौचे विशिष्य निषेधेनान्येषामनिषेधाद्वृद्धेश्च तस्य वैश्वदेवः आशौचमध्येऽपि भवत्येवेत्युक्तं॥ निर्णयसिं
धावप्येवं॥ वस्तुतस्तु॥ यद्यपि विशेषनिषेधः शेषाभ्यनुज्ञानार्थस्तथापि पंचयज्ञविधानं च न कुर्यादिति सामान्यनिषेधादेव वृद्धवचनामपि
वैश्वदेवनिषेधः॥ नित्यानि निवर्तेरन् वैतानवर्ज्यमिति निषेधांतराच्चेति युक्तं प्रतीमः॥ एवं संध्यावंदनमिष्टिं च सूतके कुर्यात्॥ तथा च पुलस्त्यः॥
संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत्सूतके वापि त्यजेद्गच्छेदधो द्विजः॥ सूतके मृतके चैव संध्याकर्म समाचरेत्। मनसोच्चारयेन्मंत्रा
न्प्राणायाममृते द्विजः॥ यत्तु॥ सूतके कर्मणां त्यागः संध्यादीनां विधीयत इति विष्णुपुराणवाक्यं तत्पूर्णसंध्यापरं॥ अत एव भरद्वाजेन॥ सूतके मृ
तके कुर्यात्प्राणायाममंत्रकं॥ तथा मार्जनमंत्रांस्तु मनसोच्चार्य मार्जयेत्॥ गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत्॥ मार्जनं तु न कार्यं वा

१६ 16 पेमुपस्थानं नचैव हि ॥ तेन सूतकेप्यमंत्रकमाणापाममुक्त्वा मर्घ्यांतां कुर्यात् ॥ मरणपारिजाते योगीश्वरः ॥ संध्यां स्नानं त्यजेन्विप्रः स्वप्नाहाच्छूद्रतां
व्रजेत् ॥ तस्मात्संध्यां च स्नानं च सूतकेपि न संत्यजेदिति ॥ अथ श्राद्धभोजनेपि होमे स्वयंकर्तृकत्वं ॥ तत्र कात्यायनसूत्रानुसारी देवयाज्ञिकः ॥ श्रा
द्धभोजनेपि होमे स्वयंकर्तृकत्वमाह ॥ दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ॥ ततः संध्यामुपासीत जपेच्च जुहुयादपि ॥ अत्र सकृन्मंत्रः ॥ दशकृ
त्व आचमनं ॥ दशकृत्व इत्यस्य पिबेदित्यनेनान्वयात्तेन संबंधान्न तु गायत्र्येत्यनेनेति ॥ अथ विध्यंतविचारः ॥ स च विकृतौ प्रकृत्यतिदेशार्थः ॥ तत्र बौ
धायनः ॥ अथातश्छंदसामाम्नातानि हुतानुमंत्रणानि व्याख्यास्यामो वैमृधमिष्ट्वा मनुमंत्रयते ॥ इंद्रस्य वैमृधस्याहं देवयज्ययेंद्रियाव्यसपत्नो वीर्य
वान्छ्रीमान्भूयासमित्यसपत्नो वीर्यवान्भूयासमिति वा ॥ पर्जन्यमिष्ट्वा मनुमंत्रयते ॥ पर्जन्यस्याहं दे० स्रपवसोन्नादो भूयासमिति ॥ सोममिष्ट्वा मनुमंत्र
यते ॥ सोमस्याहं दे० प्रप्रजया च पशुभिश्च जनिषीय सुरेतारेतोधिषीयेति वा ॥ सवितारमिष्ट्वा मनुमंत्रयते ॥ सवितुरहं दे० स्वस्तिमान्पशुमान्भू
यासं ॥ सरस्वतीमिष्ट्वा मनुमंत्रयते ॥ सरस्वत्या अहं दे० वाचमन्नाद्यं पुषेयमिति ॥ सरस्वंतमिष्ट्वा मनुमंत्रयते ॥ सरस्वतोहं दे० श्रद्धामनाम्भूयास
मिति ॥ पूषणमिष्ट्वा मनु० ते ॥ पूष्णोहं दे० पुष्टिमान्पशुमान्भूयासमिति ॥ मरुत इष्ट्वा ननुमंत्रयते ॥ मरुतामहं दे० प्राणैर्ऋध्यासमिति ॥ वि
श्वान्देवानिष्ट्वा ननुमंत्रयते ॥ विश्वेषां देवानामहं दे० प्राणैः सायुज्यं गमेयमिति ॥ द्यावापृथिवी इष्ट्वा अनुमंत्रयते ॥ द्यावापृथिव्योरहं दे० ज्यायो
मयोर्लोकयोर्ऋध्यासमभूमानं प्रतिष्ठां गमेयमिति वा ॥ वाजिन इष्ट्वा ननुमंत्रयते ॥ वाजिनामहं दे० रेतस्वी भूयासमिति ॥ वरुणमिष्ट्वा म० ते ॥ व
रुणस्याहं दे० धर्मभाग्भूयासमिति ॥ कमिष्ट्वा मनु० ते ॥ कस्याहं दे० शविष्ठो भूयासमिति ॥ विश्वकर्माणमिष्ट्वा म० ते ॥ विश्वकर्मणोहं दे० ।

पाविष्यानि कर्माण्यपवहं धीयेति ॥ अदितिमिष्ट्वमनु०ते ॥ अदित्या अहं देव्याऽं हसोमुच्चेपमिति ॥ वायुमिष्ट्वम०ते ॥ वायोरहं दे० रत्नभाग्भूयास
मिति ॥ सूर्यमिष्ट्वम०ते ॥ सूर्यस्याहं दे० सुदृशीकोभूयासमिति ॥ अग्नाविष्णू इष्ट्वा एवमनुमंत्रयते ॥ अग्नाविष्ण्वोरहं दे० वीर्यवान्भूयासमिति ॥
विष्णुमिष्ट्वम०ते ॥ विष्णोरहं दे० शिपिविष्टोभूयासमिति ॥ अर्यमणमिष्ट्वमनुमंत्रयते ॥ अर्यम्णोहं देव० स्वर्गस्य लोकं गमेयमिति यथादेवतमि
ष्ट्वमनुमंत्रयत एवमनादिष्टान्यष्टाकपालान्याग्नेयविकारेनाचक्षत एकादशकपालान्यग्नीषोमीयविकारान्द्वादशकपालान्वैश्वदेवविकारानेक
कपालं भूमिकपालं च द्यावापृथिव्यविकारान्ततोऽन्यामैन्द्राग्नेयविकारेनाचक्षते चरून्सौम्यविकारान्दधिपयआमिक्षापशून्सान्नाय्यविकारा
न्वनस्पतिं स्विष्टकृद्विकारमुपांशुयाजानुपांशुयाजविकारान्नित्याण्यादाहरन्ति हविः सामान्यं देवतासामान्यं कपालसामान्यमिति हविर्दे
वताकपालसामान्ये हविःसामान्यं बलीयः त्वपि वास्यपत्तस्यागुर उषद्दच्चमशीयेति सावित्रिकमिति ॥ अत्र प्रदीपकारः ॥ अथातश्छंदस
नाम्नातानि हुतानुमंत्रणानि व्याख्यास्यामः ॥ इह प्रायश्चित्तप्रकरणे हुतानुमंत्रणकथनं प्रकृतिविकृत्योर्नानार्थं विकल्पार्थं च ॥ अत्रोक्तैर्मंत्रै
रनुमंत्रयेत ॥ याजमानप्रकरणाम्नातैर्वेति ॥ छंदस्यनाम्नातानि शास्त्रांतरनाम्नातानीति यावत् ॥ इतरथा नियत शब्दो ब्राह्मणे प्रमाणं नास्ति ॥
इह विकृत्युपदेशप्रयोजनं विकृतिष्वपि प्रायश्चित्तानिदेशार्थं ततश्च विकृतीनां दध्यामिक्षापशूनामाम्नातो सान्नाय्यप्रायश्चित्तातिदेशः ॥ एवमन्ये
षामपि कर्मांते सामान्येन प्रकृतिविकृतिभाव उक्तः ॥ दर्शपूर्णमासाविष्टीनां पूर्वांतमितिरिति ॥ तत्र विशेषनिर्णयार्थमिदमारभ्यते ॥ दर्श
पूर्णमासश्च द्वंद्वं प्रकृतिरिष्टीनां ॥ पश्चादपस्तरदर्थभाजः ॥ यथादेवतमिष्ट्वमनुमंत्रयते ॥ यासामग्न्यादिदेवतानां याजमानकांडे हुतानुमं

१७ त्रणामुक्तानि तान्यपि वानुमंत्रयेत् ॥ तत्र विशेषो वक्ष्यते ॥ एवमनादिष्टानष्टाकपालानाग्नेयविकारानाचक्षते ॥ यथाग्नयेनीकवते पुरोडाशमष्टाक
17 पालं निर्वपेदित्यादिषु विकृत्याग्नेयेषु हविर्देवताकपालसामान्यादाग्नेयविध्यंतः ॥ ततश्चाग्नेरनीकवतोहं देवयज्ययान्नादो भूयासमिति ॥ उपल
क्षणं चैतत् ॥ एकादशकपालानग्नीषोमीयविकारानाचक्षते ॥ यथाग्नावैष्णवमेकादशकपालं निर्वपेदाग्निवारुणमेकादशकपालमित्यादिष्व
ग्नीषोमीयविध्यंतः ॥ अग्नाविष्ण्वोरहं देवयज्यया वृत्रहा भूयासमित्यादि ॥ अस्यापवादः ॥ अन्यत्र प्रकृतिदेवताप्रकृतिमंत्रकाल्पनात् ॥ ऐंद्राग्नमे
कादशकपालं निर्वपेत्प्रजाकाम इत्यत्रैंद्राग्नविध्यंत एव ॥ द्वादशकपालान्वैश्वदेवविकारानाचक्षते ॥ यथा चातुर्मास्येषु वैश्वदेवपर्वणि सावित्रं
द्वादशकपालं निर्वपेदित्यादिषु वैश्वदेवविध्यंतः ॥ एककपालमूमिकपालौ द्यावापृथिव्यविकारौ ॥ एककपालमूमिकपालयोर्द्यावापृथिव्यावि
ध्यंतः ॥ ननु कापमेककपालं वैश्वकर्मणमेककपालमित्यादिष्वाग्नेयविध्यंतः ॥ एकदेवतासामान्यात् ॥ सत्यं यदि वचनं न भवेत् ॥ वचने सति कि
मिव वचनं कुर्यात् ॥ अतोन्यानाग्नेयविकारानाचक्षते ॥ यथा सोमाय पितृमते पुरोडाशं षट्कपालं आग्नेयं पंचकपालं चंद्रमसे पंचदशकपा
लं त्रयस्त्रिंशत्कपालं आश्विनं द्विकपालं माहतं सप्तकपालं वैश्वानरं नवकपालं मरुत्वते त्रयोदशकपालमित्यादिषु आग्नेयविध्यंतः ॥ चरून्सौम्यवि
कारानाचक्षते ॥ कृष्णलश्रपणागावीधुकनैवारादिचरुषु हविःसामान्यात्सौम्यविध्यंतः ॥ दधिपय आमिक्षा पशून्सान्नाय्यविकारानाचक्षते ॥ दधि
पय आमिक्षा पशुषु सान्नाय्यविध्यंतः ॥ आमिक्षायां उपांशुयाजविध्यंतो वा ॥ उपांशुयाजमुपांशुयाजविकारानिति ॥ आज्यहविष्केरूपसदादि
षु उपांशुयाजविध्यंतः ॥ मधूदकादिष्वप्युपांशुयाजविध्यंतः ॥ अपामुदाहार्यं तीत्यादिपक्षांतरं ॥ हविःसामान्ये देवतासामान्यं कपालसा

मान्यमिति ॥ इदमपि विध्यंतातिदेशे हेतुः ॥ देवतासामान्यात् प्रकृतिभूये आग्नेयाग्नीषोमीयैंद्राग्नादपत्नेषामेव विध्यंतः ॥ विकृतिष्वाग्नेयाग्नीषोमी
यैंद्राग्नादपत्नेषामेव विध्यंतः ॥ विकृतिष्वाग्नेयाग्नीषोमीयैंद्राग्नादिषु भवति ॥ सौर्यवैश्वदेवादिष्वेकदेवतेषु देवतासामान्यादाग्नेयविध्यंतः ॥ द्वि
देवतेष्वाग्निनादिषु शब्दसामान्यात् द्वित्वात् ऐंद्राग्नविध्यंतः ॥ वैश्वदेवादिषु तथैवाग्नीषोमीयविध्यंतः ॥ चरुधर्मत्वात् सौम्यविध्यंतो वा ॥ देवतासा
मान्याद्वैंद्रविध्यंतो वा ॥ आग्नेयसौर्यबार्हस्पत्यमैत्रावरुणवैश्वदेवादिदेवतेष्वामिक्षापयः पशुषु हविःसामान्यस्यबलीयस्त्वात् सान्नाय्यविध्यं
तः ॥ इंद्राय वैमृधाय पंचदशाय बार्हताय अग्नये वैश्वानराय पैकादशकपाल इत्यत्र कपालसामान्यादग्नीषोमीयविध्यंतः ॥ आग्नावैष्णवमष्टाकपालं अ
ग्नीषोमीयमष्टाकपालं आग्नावैष्णवं द्वादशकपालं निर्वपेदित्यादिषु हविःसामान्याद्देवतासामान्याच्चाग्नीषोमीयविध्यंतः ॥ सर्वत्रैककपालेषु
द्यावापृथिवीयविध्यंतः ॥ सर्वेषां पशूनामग्नीषोमीयपशुप्रकृतित्वात् सर्वेषु पशुपुरोडाशेषु वत्रहेत्यनुमंत्रणं ॥ वनस्पतिस्विष्टकृद्विकारः ॥ ए
कस्मिन्हविषि द्विबहुहविष्कविकारसन्निपाते नियमः क्रियते ॥ क्वचिद्भूयस्त्वेन ॥ क्वचित्प्राधान्यं ॥ क्वचिद्विरोधेन ॥ क्वचिद्विभागेन ॥ क्वचित्स्थ
नात् ॥ क्वचिदंगोपदेशेन ॥ क्वचित्प्रधानगुणदर्शनात् ॥ अथवा नाम्नातेषु सर्वेषु अस्य यस्त्वा गृह उदवमशीयेत्यनुमंत्रणं कुर्यादिति विध्यं
तविचारः ॥ ॥ इति श्रीमद्भविडणमचंद्रदीक्षितप्रसादाद्देणत्क्षेत्रापरनामवांपि क्षेत्रवासिथिदेरन्तुपनामपुरुषोत्तमजविश्वंभरदी
क्षितग्रथितापाश्रोतप्रायश्चित्तप्रयोगरत्नमालापामुपोद्घातप्रकरणं समाप्तं ॥ १ ॥ श्रीमंगलमूर्त्तये नमः ॥ अथ प्रायश्चित्तान्युच्यंते
॥ अत्रेदमनुसंधेयं ॥ प्रथमाधानादिक्रमेणाग्न्यनुगमनबाहिष्यातहेमगोपघातापहारप्रवासाघग्निवैगुण्यविषयाण्युपरणयोरुपघा

१८ तविषयाणि ॥ ततो देशकालनचप्रायश्चित्तानि ॥ ततो हविःस्कन्दनशोषणापक्वत्वादिदोषभेदनानाशायहारादिहविर्वैगुण्यविषयाणि ॥ ततो देशकालक
18 त वैगुण्यपञ्चोपवेशनाक्रन्दनरुधिरस्रवणश्वखरबहिःसान्नाय्याधःपतनप्रणीताद्यंबुस्कन्दनशोषणपात्रभेदनपशुसंबन्धिकूटादिदोषोक्तव
र्णाभावपशुगर्भप्रपञ्चषालौदुम्बरीग्रावभेदनप्राग्वंशादिदहनपतनाद्यवशिष्टसाधनवैगुण्यविषयाणि ॥ ततोऽग्न्यातिप्रमादाभ्यां लोपवियर्पीसा
दिवैगुण्यविषयाणि ॥ ततः प्रकीर्णविषयाणि ॥ तथा बहुषु विकल्पेषु येनानुष्ठानसौकर्यं तदेवात्र गृह्यते । तथाश्वलायनसूत्रानुक्तोत्तसूत्रोक्तकृष्णा
शक्तो नप्राये यो बोधायनोक्ता निगृह्यंते ॥ यत्राहत्य दृष्टेधकर्मोतौ पानुवाकस्मार्तसूत्रादियाहृ यांतत्र तत्तदन्वेषणीयं ॥ ततोन्यत्र बौधायनप्रायश्चि
त्तसूत्रं ॥ तत्राप्यनुक्तावशकौच सूत्रांतरादि इति ॥ इदानीमाधानाग्निवैगुण्यानि ॥ तत्र गोपितृपत्नीयाग्न्यनुगतौ तदुल्मुकाग्न्यनुगतौ च प्रायश्चित्तं वक्ष्य
माण धेनुमय्यशामित्राधसंस्कृताग्न्यनुगतप्रायश्चित्तावसरे वक्ष्यते ॥ अथ ब्रह्मौदनाग्निवैगुण्यानि ॥ तत्र ब्रह्मौदनार्थमाबएषोत्तपनो यासनानाम
ग्नीनां मध्ये औपासनयहणाक्षमान्मित्योच्यते ॥ तत्रादावपूर्वोधानविषयाणि ॥ तत्राप्यादौ प्रयोगसौकर्यार्थमौपासनाग्न्यनुगतप्रायश्चित्तं ॥
तत्राश्वलायनगृह्यपरिशिष्टकारः ॥ अथ पुनराधानमनुगतेग्नौ विशिष्टागारराज्ञी योक्तवदुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्याज्यमुत्पू
यापाश्चास्य इत्येकामाहुतिं हुत्वा यथापूर्वं पश्चिनोरेवमाद्भूरसखात्रादिति ॥ अनुगतव्यवहारः प्रत्यक्षाग्निगोचर इति आपस्तंबसूत्रानुसाराद्वाज
पेयीशतदूपीकारः ॥ अत्र प्रयोगः ॥ यजमान आचम्य प्राणानायम्य देशकालौ संकीर्त्य ममानुगतमौपासनाग्निं पुनरुत्पादयिष्ये इति संकल्प्या
यतनात् भस्मापोह्योपलिप्याभ्युक्ष्यायतने खाः कृत्वा शकलेन निरस्यायउपस्पृश्य श्रोत्रियागारादन्यतो वाग्निमाहृत्य ऋषष्ठोदमूनोऽएह्य इति द्वा

ध्यां भूर्भुवः स्वरोमिति त्र्यमतिष्ठाप्योपसमिध्य च त्वां ह्यग्ने इति ध्यात्वा त्रिः परिसमुह्य परिस्तीर्य त्रिः पर्युक्ष्याज्यं कृत्वाज्यं संस्कृत्य स्रुक्स्रुवं संमृज्य स्रुचा स्रुवाः स्रु
वेणोपहत्य जुहोति ॥ अयाश्चेति विमदो अयाअग्निः पंक्तिः ॥ समानुगतस्यायासनाग्नेः पुनरुत्पादनहोमे विनियोगः ॥ अयाश्चाग्नेस्यनभिश० मे
षजं स्वाहा ॥ अयासेन्नपरदं० ॥ सांगतासिध्यर्थं सर्वप्रायश्चित्तं हुत्वा प्रजापतयरदं० ॥ ततः परिस्तरणानि विसृज्य परिसमूहनपर्युक्षणे कुर्यादिति
॥ अथ सर्वौषधिहोमार्थं कल्पितेग्नौ होमात्पूर्वमनुगते प्राय० ॥ तत्र प्रयोगः ॥ देशकालकथनांते अस्मिन्सर्वौषधिहोमकर्मण्यनुगताग्नेः पुनरुत्पत्तिं
करिष्ये इति संकल्प्य भस्मायोहनादि पूर्ववत्प्रायश्चित्तं कृत्वा सर्वौषधिहोमं कुर्यात् ॥ अथ सर्वौषधिहोमादूर्ध्वं ब्रह्मौदनपाकात्पूर्वमनुगतेग्नौ प्राय० ॥
तत्र प्रयोगः ॥ देशकालकथनांते ब्रह्मौदनपाकात्पूर्वमनुगतस्याग्नेः पुनरुत्पत्तिं करिष्ये इति संकल्प्य पूर्ववत्प्रायश्चित्तं कृत्वा सर्वौषधिहोमादि कुर्या
दिति ॥ अथ ब्रह्मौदनपाकादूर्ध्वं समारोपणात्पूर्वमनुगतेग्नौ प्रा० ॥ तत्र बौधायनः ॥ अथ यदि ब्रह्मौदनिको धारितः स्या रौयासनवत्स्यात्तथोद्धातेया
कादूर्ध्वं जपादीश्चक्रुः पादिति ॥ अत्र प्रयोगः ॥ देशकालकथनांते नुगतब्रह्मौदनाग्नेः पुनरुत्पत्तिं करिष्ये इति संकल्प्य पूर्ववत्प्रायश्चित्तपूर्वकमुत्पा
द्य सर्वौषधिहोमादि कृत्वा चित्रियाश्वत्थसमिधः समंत्राः संभृत्य ब्रह्मौदनपाकादि वरदानांतं कृत्वा समारोपणादि कुर्यात् ॥ संवत्सरादि धारणपक्षे
पुनः पुनरनुगतेपि पूर्ववदुत्पत्तिं कृत्वा सर्वौषधिहोमादि ब्रह्मौदनपाकं औपासनसाध्यकर्माणि च तत्रैव कुर्यात् ॥ तस्यौपासनत्वान्नयगम
बोधनात् ॥ इदं सर्वं सद्योधानविषयं ॥ अर्द्धाधानपक्षे तु पुनः पुनरार्द्धवशिष्ठादेवाहृत्य सर्वप्रायश्चित्तं हुत्वा सर्वौषधिहोमादि कुर्यात् ॥ नायाश्चेति
विशेषइति ॥ अथ पुनराधानविषयाणि ॥ पुनराधाने तु सद्योधानिन औपासनाग्न्यभावात् ब्रह्मौदनार्थमग्न्युत्पत्तिरुच्यते ॥ तत्र बौधायनः

१९
19

अथ पद्यस्याधेये सर्वमौपासनमभिव्रजेत् पुः पुनस्त्वादित्या रुद्रा वसवः समिंधतामित्येतया स्रुवाहुतिं हुत्वा लौकिके योगस्थानि कर्माणि प्रयुंजीतेति ॥
अत्र बौधायनसूत्रानुसारिप्रयोगः ॥ देशकालकथनांते ब्रह्मौदनार्थमग्न्युत्पत्तिं करिष्य इति संकल्प्य शुचौ समे देशे स्थापनं देशं शकलेन ब्रह्म जज्ञानं ना
के सु. पर्णमाप्यायस्वेति त्रिभिर्मंत्रैः स्थिरः प्राचीनमुल्लिखेद्योऽहद्रौ अग्ना विदं विष्णुरिदं विश्वा अवीवृधंनिति त्रिभिर्मंत्रैः स्थिरहरीचीनमपादिरभ्युक्ष्य श
कलं निरस्याप उपस्पृश्य पत्निपाल्का द्वादग्निं मथित्वा श्रोत्रियागारादाहृत्य व्याहृतिभिर्निरुप्योपसमाधायोपतिष्ठते कृष्णोऽस्यमूना अतिथिर्दुरोण॰
जनानीत्यथैनं प्रदक्षिणमग्निं परिसमुह्य पर्युक्ष्य देवस्य त्वा भूर्भुवः स्वः रुद्र पमग्न आ याहीति चतुर्भिर्मंत्रैः परिस्तीर्यालंकृत्याज्यं संस्कृत्य स्रुवेण
मज्यमग्नौ समिधमाधाय पुनस्त्वादित्या रुद्रा॰ स्वाहेति स्रुवाहुतिं जुहुयादिति ॥ एवं सिद्धेऽग्नौ सर्वौषधिहोमाद्यागनुगते अपाश्चाग्ने ऽभिशस्तीश्च॰
असि ॥ अयासा मनसा धृतो यमा हव्यमूहिषे॰ जं स्वाहेति पाकृषेणे व जुहुयात् ॥ अयासे ग्नयरूदं॰ ॥ सर्वौषधिहोमादूर्ध्वं ब्रह्मौदनपाकात्पूर्वं
ब्रह्मौदनपाकादूर्ध्वं समारोपणात्पूर्वं वानुगतेऽप्येवमेवोत्पत्तिं कृत्वा सर्वौषधिहोमादि कुर्यात् ॥ अधोधानिनस्त्वौपासनेन सत्वात्त्वीपमेव माप्य
तं कृत्वा सर्वौषधादि कुर्यात् ॥ प्रथमाधाने सर्वाधानपक्षे पि रजस्वलादिनिमित्तेन पूर्वप्रक्रांतप्रयोगमुत्सृज्य कालांतरे पुनरारंभपक्षे पि नैव शाखी
प्रायश्चित्तेनैवाग्निसिद्धिः ॥ एवमार्त्यादिना पुनराधेयेपि बोध्यमिति ॥ अथमेपनानंतरं जाते ग्नावनुगते मा॰ ॥ तत्र बौधायनः ॥ मध्ये चेदग्निवि
नाश एतदेवेति ॥ एतच्छब्देन पूर्वपरामर्शः ॥ पूर्वं तु आदित आरम्भ्यास्मिन्काल आरध्यादिति उक्ते अत्र प्रदीपकारः ॥ प्रक्रांतप्रयोगमुत्सृज्यादि
त आरम्भकालांतरे आदधीतेति ॥ आपस्तंबसूत्रानुसारि वाजपेयी शतद्धपीकारस्तु ॥ मंथनेन जातस्याग्नेर्वरदानात्पूर्वमनुगते पुनर्मंथनमेव ॥

वाद्दानोक्तं संभारनिधानात्पूर्वमनुगतेप्यनाहितं पराज्ञातं०॥ पुरुषसंमितो०॥ पत्याकत्राम०॥ इति ऋक्त्रयं जपित्वा पुनर्मथनमेव कार्यं न प्रयोगोत्सर्ग
इत्याह॥ अथ गार्हपत्याधानात्पूर्वं सूर्योदये प्रा० ॥तत्र बौधायनः॥ अथ यदि गार्हपत्यमनाहितमादित्योऽभ्युदियादादित आरभ्यान्यस्मिन्काल आदध्या
दिति ॥ अत्र प्रदीपः॥ गार्हपत्याधानात्पूर्वं सूर्योदये सति प्रक्रांतं प्रयोगमुत्सृज्यादित आरभ्य कालांतर आदधीतेति॥ अत्र वाजपेयीशतदूपीकारः॥
कालस्यांगत्वादंगलोपप्रायश्चित्तं कृत्वाधानं कर्तव्यं न तु प्रयोगोत्सर्ग इति॥ अथ संभारनिधानात्पूर्वं दक्षिणाग्न्यावनुगते प्रायश्चित्तं॥ तत्र वाजपेयीका
रः॥ दक्षिणाग्न्यर्थं मुख्यं तस्य दक्षिणाग्नेः संभारनिधानात्पूर्वमनुगतेः नाहृतात्र यं जपित्वा गार्हपत्यात्पुनरुद्धरणं कार्यमिति॥ अथ संभारनिधा
नात्पूर्वमाहवनीयानुगते प्रा०॥ तत्र वाजपेयीकारः॥ आहवनीयार्थमुख्यं तस्याहवनीयस्य संभारनिधानात्पूर्वमनुगते दक्षिणाग्नौ भुवः स्वाहेति हु
त्वा पुनरुद्धरणं कार्यमिति ॥ अथाधीरपात्पूर्वमाहवनीयाधाने कृते प्रा०॥ तत्र वाजपेयीकारः॥ अधीरपात्पूर्वमाहवनीयाधाने कृते तं पुनर्गार्हपत्या
यतने निधाय सर्वं प्रायश्चित्तं कृत्वा काले प्रणयेदिति॥ अथ गार्हपत्याधानोत्तरं तनुहविषां समाप्तेः पूर्वमेकयोर्नियस्समाहवनीये सभ्यावसथ्ययोः
ऽंतर्मा वपक्षेन्वाग्नित्याम्यनुगते प्रा०॥ तत्र बौधायनः॥ मध्ये चेदग्निविनाश एतदेवेति पूर्वमुक्तं॥ अत्र प्रयोगः॥ तनुहविषां समाप्तेः पूर्वं गार्हप
त्येनुगते पूर्णाहुतेः पूर्वं दक्षिणाहवनीययोः पृथक्पृथगपद्धनुगतयोर्वा प्रयोगमुत्सृज्य कालांतर आदधीत॥ पूर्णाहुतेरूर्ध्वं तनुहविषामन्वाधा
नात्पूर्वं दक्षिणाहवनीययोरनुगतयोस्तु गार्हपत्यात्क्रमेण पूर्ववदाधानविधिना व्याप व्याहृतिभिः सर्वौषधिहोमादि विहरणक्रमोपस्थानां
तं कुर्यात्॥ तत्र संभारे त्वनिर्णीतास्ति ॥ आहवनीय एव पूर्णाहुतिपक्षे तूष्णीमग्निहोत्रं कुर्यात्॥ तनुहविषामन्वाधानादूर्ध्वं तेषां समाप्तेः पूर्वं

२० दक्षिणावहवनीययोरनुगतयोर्गार्हपत्यात्तौक्रमेणपूर्ववदाधानविधिनाआधायेत्यादिपूर्णाहुत्यंतंकृत्वापुनरन्वाधायव्याहृतिभिरुपस्थायततनु
हविषामुपक्रांतप्रयोगंसमापयेदिति॥ अत्रवाजपेयीशतद्रूपीकारः॥ अन्वाधानानंतरंदक्षिणाहवनीययोरनुगतयोर्गार्हपत्येनुगतेपिपुनरन्वा
हितमापाश्चित्तमेवनप्रयोगोत्सर्गइति॥ केशवीशतद्रूपीकारयोरप्येवमेवेति॥ अग्निहोत्रोपक्रमात्पूर्वंसर्वाग्निनाशेगार्हपत्यमात्रनाशेवातथापौर्ण
मासोपक्रमात्पूर्वमपिसर्वाग्निनाशेगार्हपत्यमात्रनाशेवाअग्न्याधानंकर्तव्यमितिचंद्रिकाकारेणोक्तंतस्यमूलमन्वेषणीयं॥ अथपुनराधेयपु
नराधाननिमित्तकप्रायश्चित्तानि॥ तत्रत्रिकांडमंडनकारः॥ कामेनिमित्तयोगेवापुनराधेयमिष्यते॥ निमित्तेषुयथायोगमाधानमपिवाम
वेत्॥ तत्रयेषुनिमित्तेषुपृथंगग्राह्निकपाविधिः॥ तत्रैवपुनराधेयमन्यत्राधानमिष्यते॥ अन्यत्राप्य~~मेषुनिमित्ते~~षुपरेप्राहुःपुनराधिंविकल्पतः
अन्येतत्तीयेनिपतमग्न्याधेयंवितन्वते॥ आधानवत्सरेयस्मिन्नृध्वीछोःपुनराहितिः॥ प्रजापशुस्तथापुष्टिमिच्छतामन्यदापिवा॥ आधानव
त्सरेज्ञातोपघाताधातुरुपद्रवः॥ अवृद्धिर्नामसाप्रोक्तातत्रस्यात्पुनराहितिः पत्नभागागवेधुर्योघघाधानसकारणं॥ आद्येसंवत्सरेतद्वत्तत्रैवपु
नराहितिः॥ तत्रैतानिनिमित्तानिसूत्रकारैरशेषतः॥ निरूपितानिवक्ष्यामिपुनराधेयकर्मणि॥ पद्धितंजीवनापायेकुटुंबस्यैकवत्सरे॥ तन्नाशेपु
त्रमर्त्यपौत्रज्ञातीनामवरोधने॥ अंगनाशेगमानाशेपुनराधानमिष्यते॥ ज्यानिःसर्वस्वहानिःसर्वस्वहानिःस्यात्तस्यषष्ठमाध्यंदिनश्रुतौअतो
ल्पद्रव्यनाशेतुपुनराधिर्नतन्मतात्॥ अग्न्यावपहृतेग्न्याधिःसत्याषाढादिदर्शनात्॥ प्रमीतेपुनराधानमृत्विक्स्यात्तत्पुरोहिते॥ बौधायनमु
निःप्राहनेष्टंसत्रांतेष्विदं॥ आधानादामपावित्वेबद्धचाःपुनराहितिः॥ कथयंतिप्रतिज्ञातंअंशेतामेववाजिनः॥ उद्वातेयोविहारात्स्यादुम

मथ्यमानेप्यजन्मनि ॥ लौकाग्न्यादावनिक्षिप्ते म्युदये स्तमयेपि वा ॥ विशिष्टहेतुनानेन जातवेदा विनश्यति ॥ विहारोत्तरकालेवा नष्टो पूर्वोप एन लौ ॥ शे
षं पूर्वोदितं सर्वं तत्राप्यग्निर्विनश्यति ॥ वैधं काष्ठमनिर्मथ्य प्रागेवाग्न्युद्धृतादिके ॥ विन्यस्तेप्यग्निनाशः स्यादुदये स्तमये सति ॥ कालात्यत्वेत्वनिर्मथ्य
लौकाग्न्यादिक्षिपेद्यदि ॥ उदयास्तमयात्पूर्वं कर्कोऽग्निनाशमिच्छति ॥ लौकाग्न्यादावलब्धेपि पुण्यार्कास्तमयो भवेत् ॥ मंथनारंभमात्रेण नाशो वह्ने
र्निवारितः ॥ उभयोर्नाशवित्तानादूर्ध्वमर्कास्तमेति चेत् ॥ कर्कोग्निनाशमाचष्टेपश्चात्स्नातेपि नेच्छति ॥ एकयोनित्वपक्षे तु सर्वाग्न्यनुगमो यदा ॥ उदया
स्तमये तत्र नाशमेकेन तूभयोः ॥ अत्रस्त उभयोर्द्वाते म्युदयास्तमयात्पुरा ॥ पयोग्निरेकजातश्चेत्तावतापि न नश्यति ॥ तदनुत्पत्तिमात्रेण स्यादग्न्याधि
र्न पूर्वयोः ॥ केचित्त्वविहृतावस्थे पर्यायावनुगच्छति ॥ नाधाने मन्त्रतेतत्र नोभयानुगमो हि सः ॥ अन्वाहितोभयध्वंसेप्यग्निनाशो न विद्यते ॥ अन्वाहि
तविधिः कार्यो हव्यवाहद्वये पृथक् ॥ नाशमग्न्यां त्यामथित्वाग्निं पूर्वाग्निं यदि पश्यति ॥ मथिताग्निसमारोप्यपूर्वाग्नौ वर्तयेल्लौकिकाः ॥ उद्धृतो दयनिम्लोकाद्याव
दग्निविनाशनं ॥ अग्न्याधिपुनराधेयस्यातां तत्र विकल्पतः ॥ मंत्रविनासमारूढो ऽरण्योरात्मनि वा यदि ॥ तत्रान्वलनशांतो स्यादसमारूढशांतिवत् ॥
आरूढोपि यथाशास्त्रमवरूढो न शाम्यतः ॥ तृतीये होमकाले तु संप्राप्ते पुनराहितिः ॥ यदा तु लौकिकाग्न्यादिनिधाय हवनं तदा ॥ हुतेपि लौकिका
ग्न्यादौ मथ्यमानोप्यनंतरं ॥ द्वितीयाद्वा तृतीयाद्वा होमकालात्पुरा यदि ॥ अग्निर्नश्यते तत्र पुनराधेयमाचरेत् ॥ जातोपि वा विना भस्मस्पर्शं जातोज
पं विना ॥ प्रायश्चित्तं विना काष्ठमंथनेचोदितं विना ॥ लौकिकस्यादतो लुप्ता दारण्या वर्त्तयेत्पुनः ॥ यदि नावर्त्तयेद्धोता हश्येवन्नहोतिच ॥ हूयमा
नोपि लुप्येत होमकालाष्टकात्परं ॥ भस्मस्पर्शं विनोप्याके लौकिकत्वं नमन्यते ॥ होमाष्टकाधिके लुप्ते ध्रुतोप्याग्निर्विनश्यति ॥ ततोन्यहोमलो

पेयिपद्युद्वापादिनश्यति ॥ आधानपुनराधाने विकल्पेनात्र चोदिते ॥ लुप्तहोमद्वयेप्याहुर्लौगाक्षिरनलादिति ॥ ज्वलत्स्वग्निषु कर्तव्यातंतुमत्येव केवला
॥ आपद्यग्निषु दीप्यत्सु मासार्धे चेन्न हूयते ॥ सर्वहोमानतिक्रांतान्पक्षांते पक्षहोमवत् ॥ समस्यन्जुहुयात्पश्चादिष्टिस्तंतुमती भवेत् ॥ नतत्र पुनरा
धेयमिति कौषीतकी श्रुतिः वत्सरं वत्सरार्धं वा होमलोपे मतांतरं ॥ आपत्कालेननश्यंति दीप्यंते चेत्क्षुताशनाः ॥ पंचकार्पाः पुरोडाशा होमे लुप्तेर्धव
त्सरं ॥ पथिकृत्प्रथमोत्र्येपः पावकः शुचिरेव च ॥ व्रातपतिस्तंतुमांश्च देवताग्नेर्गुणाः क्रमात् ॥ सप्तकार्पाः पुरोडाशा होमे लुप्ते तु वत्सरं ॥ पावकश्च शु
चिः पथिकृदित्यपि ॥ वैश्वानरो व्रातपतिस्तंतुमानिति सप्तमः ॥ विशेषितोग्निरेवस्याद्देवतात्र यथाक्रमं ॥ एकादिमपराधं तु विच्छेदेषु विशेषतः ॥ म
नस्वतीं व्रतपतीं नाधानमनलेसति ॥ इयमापत्सुघोरासु मिलितास्वपि पोष्यति ॥ द्वादशाहुति विच्छेदे कुर्युरन्ये मनस्वतीं ॥ आश्वलायनसूत्रोक्त
मनोज्योतिश्च जुह्वति ॥ भार्यायां प्रोषितायां चेद्दुर्दैवात्क्रोशमेति वा ॥ तत्र स्यात्पुनराधेयमन्ये त्वाहुर्गृहान्यथा ॥ ज्येष्ठा चेदग्निसंयुक्ता गंतुं त्वन्या यथाहुचि
॥ पजमानेन सहिता पद्धता एव केवलाः ॥ प्रोषितः स्याद्धः शायीलस्त्र्युपायी त्वमेपुनः ॥ वदन्बोधायनस्त्रिस्यमेका चेदग्निसंनिधौ ॥ इतरासोप
पाकामं प्रवासमनुमन्यते ॥ इत्युक्तभवभाष्येपि प्रेतश्लोकेष्वपीरितं ॥ एकस्यामप्यतिष्ठंत्यामग्निहोत्रसमीपतः ॥ पतिस्तिष्ठति चेदग्निनाशो नेत्य
परे विदुः ॥ संध्यावदन्यथाप्यग्नीन्हित्वा चेद्दंपती गतौ ॥ ग्रामांतवाथ सीमांतं तत्रैकेग्निशमं विदुः ॥ अन्ये ग्रामांतरं गत्वानलतिक्रममात्रतः ॥ सीमां
तातिक्रमादेव केवले शनाशमब्रुवन् ॥ परार्ष्णभावतिक्रम्य सीमां प्रत्यागतोपुनः ॥ उदयास्तमयात्पूर्वं न नाशोत्रेति केचन ॥ छंदोगपरिशिष्टोक्त हो
मकालात्यये पुनः ॥ सीमातिक्रमणान्नश्येदोदयास्तमयादिति ॥ विनाग्निभिर्यदा पत्नी नदीमंबुधिगामिनीं ॥ अतिक्रामेत दाग्नीनां विनाशस्यादि

ति स्मृतिः ॥ पत्न्यंतरे यदा पत्न्यौ हुताशनसमीपगे ॥ तदा पत्नी यथाकाममतिक्रामेन्नदीमपि ॥ न कुर्याद्यद्युपस्थानं प्रवसन्नपि योषितः ॥ त्यागं च प्रोषिताः कुर्यु
रश्नं त्वेव सधर्मकं ॥ आगतो यस्त्विति चापि स्त्रीयां नेच्छंति सूरयः ॥ यदा सीमामतिक्रामेद्विना मंत्रोग्निभिः सह ॥ तत्र नाशं प्रयात्याहुर्मथाधानेन दुष्यति ॥ किं
तु साग्निर्विना मंत्रं गत्वा संस्कृत सर्पिषा ॥ हावयेद्यत्तु राते नप्राप्ते देशमनस्ततीं ॥ सायंप्रातस्तनो होमावेवं स्याद्गमनेन्वहं ॥ वाह्लो ष्यती यहोमेन्या मवत्यत्राप्य
शेषतः ॥ आपद्यप्यतिकृच्छ्रायां विनायत्नीं न रोगतः ॥ सीमातिक्रमणेग्नीनां नकंपं चित्स्नुग्रहः ॥ प्रत्यक्षेण न यन्नेग्निर्मुच्छूसेन्नेद्विनश्यति ॥ यदि चानुच्छू
सन् गत्वा निधाय पोच्छ्रुस्यते पुनः ॥ होदनुच्छूसनेवं न श्येत्रिहेरणेन च ॥ शकटेनातिदूरं तु हरेद्देशं यथाविधि ॥ स्वांगेन वा थ वा शम्या परहरेत्वाश्रये
च्छू सन् ॥ कर्मार्थं हरणे ग्नीनां नानुच्छ्रासादि चोद्यते ॥ नदीसंतरणेग्नीनां सीमातिक्रमणे तथा ॥ सर्वत्राधानतः सीम्नो वीक्ष्य मिस्यच्छास्य रेणयः ॥ तथैव पत्नीस
र्वत्र अन्यथाग्निर्विनश्यति ॥ ज्येष्ठा न्वारमते वन्हिं बहुभार्यस्य नेतराः ॥ प्रत्यक्षमारणिस्थं चान्यथाग्निविनाशनं ॥ आत्मारोपण पक्षे तु नान्वारंभण
मिष्यते ॥ नकार्याप्यारंभणं केचिल्लोगाक्ष्यर्थनिबंधनात् ॥ उदक्या चेन्मृदेवेत्पत्नीप्रसूता प्रवसत्यपि ॥ अन्वारंभविकल्पः स्यात्तु न राधिर्नतन्मतात् ॥
कूलद्वयांतराले तु नदीशब्देन नोच्यते ॥ किंतु तद्देशवर्तैव जलसंघो नदी भवेत् ॥ अष्टौ धनुः सहस्राणि न यस्य वतिय ज्जलं ॥ नदीशब्दाभिधे
यत्वं न तस्येच्छंति सूरयः ॥ एकेन नामधेयेन शतयोजनगामि यत् ॥ उदकं तन्नदीशब्दवाच्यमित्यपरे विदुः ॥ कर्तव्यं पुनराधानं पुनः परिणये सति
॥ अग्न्याधेयमुशंतीह केचिद्दृद्वाहकर्मणि ॥ लौगाक्षिणाः निबद्धत्वाद्दभयं नेति केचन ॥ तत्रोपासननीं पत्नीं परा प्रर्वग्निहोत्रिणी ॥ पुनः परिणये
ग्नीनामुत्पत्ता वीदृशो विधिः ॥ आहिताग्निः प्रमाद्ग्नीनां यो यापत्यां मतयज्ञं ॥ दशमे द्वादशे यं च देशसंवत्सरे त्रियं ॥ त्यक्त्वान्यामुद्वहेत्कन्यां सद्यस्त्वग्नि

२२ पभाषिणीं ॥ आरोप्याग्नीनरण्योस्तानुद्वयेत्सहाग्निभिः ॥ उद्वासने च्छिंकृत्वाथ समारोप्य हविर्भुजां ॥ कृत्वा ब्रह्मौदनाग्निं च ततो याप्स्न पावकं ॥ ब्रह्मौदना
दिकं सिद्धं कृत्वा गृह्याधिं विधानतः ॥ पवित्रेष्टिं ततु मतीं यजेत्रै धातवीं क्रमात् ॥ ऐन्द्राग्नेनाथ पशुना पश्व्येकेवलेनवा ॥ अथवा पुनराधानमेवात्रेष्टं न
चेतरत् ॥ शिष्याणां गुरूणां गर्भहंत्रीं त्यक्त्वैतदाचरेत् ॥ धर्मप्रज्ञाहम द्रुषदारे सुपादिलोमतः ॥ अन्यान्समुद्वहेद्दारान् सदा पूर्वोदितं विधिं ॥ अनुष्ठा
यमगारेष्टापजेतैवात्मशुद्धये ॥ नाद्याद्धामगारेष्टिं पूर्वयत्नात्समाचरेत् ॥ नित्याग्निहोत्रं प्रेतायै न ह्यपि यैदातुमर्हति ॥ नाद्याद्धीतपूर्वोग्नोग्न्याग्निहो
त्रं समाचरेत् ॥ ज्येष्ठायां विद्यमानायां द्वितीयायै स्वयोषिते ॥ काम्यं नित्याग्निहोत्रं वा न कथंचित्प्रयच्छति ॥ स्त्रीमात्रमविशेषेण दग्ध्वान्यैर्वैदिकाग्नि
भिः ॥ विवाहादथ तेयद्वा धानमेवास्ति चेद्वधूः ॥ एकाकी वा दधीताग्नीन् विवाहश्चेन्न सिध्यति ॥ नित्ययस्याग्न्यपर्णं वाग्निहोत्रकर्मोस्य नेतरत् ॥ एका
क्याधानपक्षस्य कर्मदीपे निराकृतः ॥ जुहूं त्यन्ये मतस्त्रीकाः कुशपत्नी समन्विताः ॥ क्रहोति नमतस्त्रीक एकाकी पूर्ववन्निषु ॥ भरद्वाजमतं चैतत्क
र्मदीपे निरूपितं ॥ आहिताग्निर्मृतस्त्रीक आदधानोन्यया सह ॥ कृतारंभादिधर्मोपि कृतसोमममखोपि वा ॥ अकृतारंभसोमेन्या भार्यामेवानु
वर्तते ॥ नास्ति माहेंद्रसान्नाय्यं संति सारस्वताद्यपः ॥ केचित्पत्नुः प्रधानत्वान्नाद्रियंते तु मोषितं ॥ तेनेष्टेस्यान्महेंद्रेज्यानस्यः सारस्वताद्यपः
केचित्पत्नुः प्रधानत्वान्नाद्रियंते तु पोषितं ॥ तेनेष्टेस्यान्महेंद्रेज्यानस्युः सारस्वताद्यपः ॥ आहिताग्नेर्मृतस्त्रीकस्याधानं सन्यासिष्यतः ॥ स
न्यासं वारपं त्वन्ये पावन्त्नी वाग्निहोत्रिणां ॥ हुते सुपस्त होमेषु यस्तत्र प्रमनंतरं ॥ कर्तव्यं पुनराधेयं मथ्यमाने हुताशने ॥ दृष्टमात्रोनुगच्छेच्चेत्तत्र
तस्य विनाशने ॥ शतशोनुगमैर्वान्यैः पुनर्निर्मथ्य जप्यतनष्टमथितमात्रे वा समारोपयजुर्जपेत् ॥ पुनर्निर्मथ्यजत्रव्यंयजुस्तूयावरोहणो ॥ ज

लेनहेतुनावह्निरूपशांतोपशमभवेत्॥ कर्मत्वंपुनराधेयंपक्षपार्श्वेनिरूपितं॥ तदेवपुनराधेयमग्न्यावनुगतेसति॥ असमाधापवेत्स्वामीसीमान्
स्त्वंघ्यगच्छति॥ श्वसृकरासभकाकसृगालैः कुक्कुटमर्कटशूद्रैः॥ अंत्यजपातकिकुणपैर्वासूतिकपापिरजस्वलपावा॥ एतोमूत्रपुरीषैर्वापूय
श्लेष्मशोणितैः॥ दुष्टास्थिमांसमज्जाभिरन्यैर्वापिजुगुप्सितैः॥ आरोपितारणीस्पर्शेकृतेग्निस्पर्शनेपिवा॥ आत्माहुतिषुमज्जेद्भावसेक्षा
पतितादिभिः॥ अथवापोषितंगच्छेदनंतौकाममोहितः॥ वदंत्येषुनिमित्तेषुकेचिदग्निविनाशनं॥ तत्रारणिगतेवह्नौनष्टेस्यात्पुनराहितिः
इतरेषुनिमित्तेषुअग्न्याधेयंप्रचक्षते॥ यद्वासर्वोपघातेषुपुनस्त्वेतिसमिंधनं॥ द्रव्यस्थाग्न्युपघातेतुद्रव्यशुद्धिसमिंधनं॥ अस्यार्थेदेवयाज्ञिकः
समिंधनंपुनस्त्वादित्यारुद्राइतिमंत्रेणसमिद्धस्याग्नेःपुनरिंधनप्रक्षेपेणप्रदीप्ततरकरणमिति॥ आरोपितारणीचोभेएकावापदिनश्यति॥
तत्रास्याधेयमिच्छंतिपुनराधेयमेववा॥ एकारण्यांविनष्टायामस्तिचेदितरारणिः॥ तांछित्वामथनेप्रोक्तंभाष्येबौधायनीयके॥ एतदंगीक
रोतीवमवनागोपिवद्धत्वः॥ नष्टायाःप्रतिपत्तिःस्याद्भयारणिनाशवत्॥ अरणीमंथनाशक्तेजंतुभिर्मथनेनवा॥ स्यातांचेद्दारणीनूलेस्वा
घेशास्त्रोक्तलक्षणे॥ श्वोभूतेनुष्ठितेदर्शेतस्मिन्स्वीयारणिद्वयं॥ शकलीकृत्यपाश्चात्यवह्नौनिक्षिप्यदीपयेत्॥ ततोदक्षिणहस्तेननूतना
मुत्तरारणिं॥ गृहीत्वासव्यहस्तेनगृह्णीयादधरारणिं॥ तेउभेअरणीतत्रदीप्तेग्नौधारयन्जपेत्॥ उद्बुध्यस्वाग्नइत्येतदंपतेयोनिरित्यपि॥ उद्बुध्य
स्वाग्नेप्रविशस्वयोनिमन्यांदेवयज्यायैवोढवेजातवेदः॥ अरण्योरारणिमनुसंक्रमस्वजीर्यंतिनुमजीर्णयानिर्णुदस्वेतिप्रथममंत्रपाठः
॥ मंथनस्यावतास्मप्रद्रूमपिताग्निंविदूतपच॥ विल्वाप्योन्युपदर्भाग्न्यांस्रुच्यादापचतुर्घृतं॥ जुहोत्यादूवनीयाग्नौमनस्वत्याघृतंततः॥ २॥

२३ षिं तं तु मतीकुर्यात्छागं वं दक्षिणां ददेत् ॥ द्रव्यनाशेपि नारण्यो: क्षेपयेत् आज्येनैव पुनः ॥ तदलाभे पर्णदग्धे यतेत दग्धास्थानं यन आहिति: शूद्रोदक्यांत्यक्ताकृश्च पतितामे
ध्याणसमै: ॥ अनारूढाणि स्पर्शे ते विहायान्ययोग्रहः ॥ मवतन्त्र: सहैत्य शुक्लमज्जयेद्दूषितानि ॥ एकारण्येव दृष्टा चेत्तामेवाशु निमज्जयेत् ॥ तत्रा
ण्यारणि लाभात् गृह्णातेपुनराहिति: ॥ काष्ठशुद्ध्या विशोध्यैवात्यजेद्दूषेतिसंतते ॥ अल्पदोषे शुद्धिरेवात्सजेद्दोषे पिवारणी ॥ नाशदाहावरण्योश्चे
दग्निपत्नेनपात्नयेत् ॥ नष्टा तेपुनराधानं छंदोगपरिशिष्यत: ॥ आत्मारोपेशरीरस्य नाशेन श्यंति पावका: ॥ शवदेहे विनष्टेपि दक्षिण: पाणिरन्ति
चेत् ॥ लोके स्रोस्थापयित्वा स्पपाणिमुत्राणेयजु: ॥ उपावरोहजातेति तूष्णीमग्निं नयेत्तत: ॥ ह्यूदशोपात्ते नान्येन तूष्णीकं जुहुयात्स्रुचा ॥ देहसं
तं प्रपद्येते प्रेतेमीत्याकृति क्रिया ॥ सकलेकृणपेलब्धे प्येष एव विधिर्भवेत् ॥ अग्नावरण्योरहिते प्रमीयेत पतिर्यदि ॥ प्रेतं स्पृष्ट्वा मथित्वाग्निं ज्ञा
त्वा चोपावरोहणं ॥ घृतेन दूरशोपात्तं तूष्णीं हुत्वा शवक्रिया ॥ उपावरोहजातवेद: संप्रेतं स्वर्गाय लोकायपनयप्रजानन् ॥ आयु:प्रजां रयिम
स्मासु धेहिमेताद्दृति चास्य जुष्टस्वाहेत्यवरोहणामंत्रपाठ: ॥ विच्छिन्नवह्निमुत्सृष्टपावकं विधुरानलं ॥ आहिताग्निमृतं दग्धं प्रेताग्न्युत्पत्ति
सिद्धये ॥ मरहद्धज्ञादपः प्राहु: प्रेताधानविधिं पृथक् ॥ प्राचीनावीतवानध्वत्यावोप्यायतनान्यथा ॥ प्रेतं स्नाप्यानुलेप्य स्रग्वासा मथित्वाग्न्यालेपरणी
॥ संनिधायानलं मंथेद्धेस्वेति पञ्जषा तत: ये स्मान्नयोजुह्वतोमांसकामा: संकल्पयंतेयजमानमांसं ॥ जानंतु ते हविषे सादितापास्वर्गे लोक
मिमं प्रेतं नयंतु ॥ इतिमंथनमंत्र: ॥ प्रणीय यावकं तूष्णीं द्वादशोपात्तसर्पिषा ॥ तूष्णीं हुत्वा तत: कुर्यात्प्रेतेमात्याकृति क्रियां ॥ नष्टाग्निष्वपा
रण्योर्नाशे स्तामीम्रियेत चेत् ॥ आहरेदरणीं द्रुमाधानोक्तं च तथापा ॥ तद्देवाभिमंत्र्यायतनं मंत्राभ्यां विनिक्षिपेत ॥ निर्मथ्य पावके पक्षे पास

नार्थेतदस्तिचेत्॥ ततोऽग्निभूम्यमेनोक्तमंथनादिसंपद्यते॥ यत्तु पैस्याग्नयो जुहुयादिमंत्रकमीप्सितं॥ प्रागादित्योदयाद्धोमं संकल्प्य न जुहोति चेत्॥
अग्न्याधिः पुनराधिर्वा नो भयं स्यात्प्रसंनिधौ॥ अस्तं गते तमाकर्ण्य कृतं यस्यौर्ध्वदेहिकं॥ प्राप्यश्चित्तमसौ स्मार्तं कृत्वाग्नीनादधाति च॥ नाशाप
हारा वह्नीनां पद्धाहृत्याऽण्येपदा॥ तदात्मारोपमार्गेणात्मोक्ताग्न्यावरोहणं॥ कुर्यात्तत्पुनराधेयमिति बोधायनोऽब्रवीत्॥ अत्यंतसंकटे क्वापि
पक्षोऽयमुपयोक्ष्यते॥ अत्रैतेषु निमित्तेषु नष्टानां पुनराहितिः॥ स्थितानुत्सृज्य चान्येषु पुनराधानमिष्यते॥ तत्रोत्सर्गनिमित्तेषु सर्वनाशो वि
धीयते॥ नष्ट एव भवेत्तत्र येषु नाशो विधीयते॥ तत्र किंतु भवेत्तावद्विकल्प्यो न हि संभवेत्॥ विनाशस्याविधेयत्वादत एव विचेतनं॥ आरणस्य समा
णस्य सर्वथैव नाशनं॥ न विनश्यतीति रूपैश्चापायां विनीतेरपि नाशनं॥ पद्धाग्न्यारक्षणे मार्गो यादृशोंगीकृतः पुरा॥ तदत्यये विनाशः स्यात्त्वात्म्येऽपाक्षिक
हेतुभिः॥ पद्धाग्न्यर्जनशक्तस्य पाक्षिकेऽपि दृश्यते॥ निमित्ते नेदृशे दृष्टस्य पाक्षिकेऽग्निनाशितं॥ पद्धाग्नीन्जनयेदेवं निमित्तैः सर्वसंमतैः॥ पाक्षि
केऽर्जनने ऽयोपायेनेनस्तेष्वपि जुहूतः॥ अनेकाचार्यसिद्धान्ताः सौकर्यात्तु निरूपिताः॥ देशकालवयोवस्थाशक्तिभेदाद्यवस्थिताः॥ पुनराधिप्र
संगेन किंचिदत्र निरूपितं॥ अग्निहोत्रेणारहितः यं यथानं शतयोजनं॥ आहिताग्निः प्रयायाच्चेदग्निहोत्रं विनश्यति॥ अर्धं स्वयमनुक्रम्य नो हा
वयेदृत्विगादिना॥ तस्यैषा पुनराधेयं पवित्रेष्टिरथापि वेति त्रिकांडमंडनोक्तानि॥ अथ यत्र समपार्श्वोक्तानि॥ अग्न्यावनुगते यस्य होमकालद्व
यं व्रजेत्॥ उभयोर्विप्रवासो वा लौकिकाग्निर्विधीयते॥ सीमांतेनुपदायम्लो एकत्रैव व्यवस्थिता॥ वीरहत्या भवेत्तस्या पुनराधानमर्हति॥ ज्यो
दोषे समुत्पन्ने सूतके मृतकेऽपि वा॥ प्रवसन्नग्निमान्विप्रः पुनराधानमर्हति॥ अग्निं त्यक्त्वा तु यो लोभात्स्वयं संकर्तुमिच्छति॥ क्रोति पुनराधानंप्रा

२४ पश्चिन्नमतावृतो ॥ नाग्निकार्यस्य वेलायां प्रवसेन्न च पर्वणि ॥ न विना च निमित्तेन क्रीडार्थं न तु व्रजेत् ॥ विनाग्न्यन्नेपि तं पुत्रः प्रत्नासो ह्यग्निहोत्रिणः ॥
विनापितुं व्रजेन्नित्यं तीर्थार्थं तु न व्रजेत् ॥ होमद्वयात्यये चैव वर्णमासात्यये तथा ॥ कर्तव्यं पुनराधानमिति भार्गवसंमतिः ॥ अरण्योः स्वल्पमप्यंगं याव
त्तिष्ठति तिष्ठति पूर्वयोः ॥ न तावत्पुनराधानमन्यारण्योर्विधीयते ॥ पत्नी च यजमानो वाजमानो वा यद्येकोपि न वेश्मनि ॥ ज्वलंतमग्निमुत्सृज्य पुनराधा
नमर्हति ॥ भार्यायै पूर्वमारण्ये रत्नाग्नीनंत्यकर्मणि ॥ पुनर्दारक्रियां कुर्यात्पुनराधानमर्हति ॥ उदयास्तमयात्पूर्वं गार्हपत्यो गतो यदि ॥ मस्मनारणि
मात्रस्य तूर्णं कुर्यात्तु मंथनं ॥ मध्यमानो न जायेत लौकिकान्यादिकं क्षिपेत् ॥ ततो विहरणं कृत्वा होमं कुर्याद्यथाविधि ॥ होमांते मंथनं कृत्वा सर्वं यक्षे
ष्यपे विधिः ॥ यद्यग्न्यादावनिक्षिप्ते उदयास्तमयो भवेत् ॥ स्वारण्ड्रा नं तदा शून्यं तत्र स्यात्पुनराहितिः ॥ प्रोषिते यजमाने च संवत्सरमतिक्रमेत् ॥ अ
ग्निहोत्रप्रनाशेपि पुनराधानमर्हति ॥ उपघातः क्रियालोप उपेक्षा च प्रमादतः ॥ चतुर्विधमिदं धर्मि दं प्रोक्तं पुनराधानकारणं ॥ प्रसिद्धः कर्मणां
लोप उपघातां त्यजारिना ॥ उपेक्षा च प्रवासादिः प्रमादोऽग्न्यधारणं ॥ स्पृष्टोग्निर्यदि चंडालैः रुदक्यादिभिरेव च ॥ उपघातेषु सर्वेषु पुनरस्त्वेति
समिंधनं ॥ अशक्ते यजमाने च ह्यत्यंतापद्यपं विधिः ॥ परोमावव्यतिक्रम्य सोमां प्रत्यागतो पुनः ॥ होमकालमतिक्रम्य तदा न श्यंति वरूपः ॥ प
त्नीसीमामतिक्रामे यजमानो गतेयदि ॥ आहोमाद्यदि नागच्छेत्पुनराधानमर्हति ॥ इति पत्नपार्श्वीकानि ॥ अथदेवयाज्ञिकोक्तानि ॥ ज्येष्ठा चे
द्वहुमार्यस्य ह्यतिचारेण गच्छति ॥ पुनराधानमन्नैकरुच्छंति न तु सत्रारपः ॥ बह्वीनामपि चैकस्यामुद्वायां तु न व्रजेत् ॥ एकादशे चतुर्थे च्छिंग
तु मिच्छोन्निमित्ततः ॥ त्रयीं मुक्त्वा तपोलोभात्प्रवसेत्पर्वसंधिषु ॥ कुर्णेति पुनराधानं प्रापश्चित्तगणादृते ॥ दीपकोधूपकश्चैव नापार्य यश्चनीप

पते ॥ सर्वे ते लौकिका ज्ञेयास्तावन्मात्रापवर्गतः ॥ अत्र पुनराधानं ॥ एकाकिनी यदा पत्नी कदाचिद्ग्राममाव्रजेत् ॥ होमकालेभिसंप्राप्ते न सा दोषेण यु
ज्यते ॥ अथ तत्रैव निवसेद्ग्रामं गत्वा प्रमादतः ॥ लौकिकोग्निः स विज्ञेयः परस्त्वेषा नैगमी श्रुतिः ॥ भार्यायां प्रोषितायां चेद्दूरे त्वर्कोस्तमेति वा ॥ तत्रस्यात्पुन
नराधेयमन्ये त्वाहुर्हिरण्यदा ॥ पत्न्याः प्रवासविषये पुनराधिहृदा हता ॥ कात्यायनीऋषिभिः प्रोक्ते एकभार्यस्य सेष्यते ॥ बहुभार्यस्य ज्येष्ठा चेत्प्रवसेत्पुन
राहितिः ॥ ग्रामांतरे नगर्यां वा पत्न्यां वान्यत्र वा क्वचित् ॥ सीमामतीत्य चेद्रात्रौ वासः प्रवसनं स्मृतं ॥ प्रवसेत्स्वनसंपत्त्येन तीर्थयकदाचन ॥ इति कूर्मपुरा
णोक्तं तथा बौधायनेन च ॥ सहाग्निर्वा सपत्नीको गच्छेत्तीर्थानि मानवः ॥ पुराणवचनात्साग्नेः प्रवासोस्तीति केचन ॥ सगृहस्य पयाणेपतत्तत्स्य
ग्निसमान्वितं ॥ पुण्यान्यन्यानि कुर्वीत श्रद्धानो विमत्सरः ॥ नत्वल्पदक्षिणैर्यज्ञैर्यजेत कथंचन ॥ इंद्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजां पशून् ॥
हंत्यल्पेन धनेनैव विप्रो नाल्पधनो यजेत् ॥ इति देवयाज्ञिकोक्तानि ॥ अथ कात्यायनीपरिशिष्टाग्निमार्गप्रोक्तानि ॥ अत्रोदिनपाकेन कृते नोद्धरणे
न वा ॥ लौकिकोग्निः स विज्ञेयः पुनराधानमर्हति ॥ शवानुगमनेनैव शवसंस्पर्शने तथा ॥ पुनरेवाग्निमादध्यादिति शातातपोब्रवीत् ॥ आहिता
ग्नेः प्रमादाद्विच्छेदानुगमनं यदि ॥ अग्निनाशं विजानीयात्स पिंडेपुनरादोषभाक् ॥ अथ त्रिकांडमंडनटीकोक्तं ॥ ग्रामात्सीमांतरं गच्छेत्स्यत्सक्षो
पस्नवाहनः ॥ शिक्यनोद्वाहयेद्यन्नी न पुनराधानमर्हति ॥ अथ कुतूहलोक्तानि ॥ खरोष्ट्रवृषभं नारीं समारुह्याथवा पुमान् ॥ योजने योजने कृच्छ्र
मग्निश्चापि विनश्यति ॥ तत्रैव पत्नपार्श्वे येठीनसिः ॥ गजोष्ट्रवृषभं नारीं समारुह्याथवा पुमान् ॥ योजने योजने कृच्छ्रं माग्निश्चापि विनश्यति ॥
अत्र गजारोहणनिषेधो ब्राह्मणस्यैव ॥ एतां गजारोहणस्य बहुषु पुराणेषु दर्शनात् ॥ पयस्व छत्रं रथे वकुंजरे हमक्षिमत् ॥ ऐंद्रस्थान

२५ मुपासीनं तस्मात्तं न विच्छापयेदिति ॥ ॥ इति पुनराधेयपुनराधानप्रयोगनिर्मितानि ॥ ॥ अथ प्रसंगाद्दाराऽन्तरपरिग्रहप्रकारः ॥ तत्र बौधायनः ॥ यथा
हिताग्नेः प्रजा नोत्पद्येत कथं तत्र कुर्यादिति ॥ पुनर्नवकुमारीं संस्कृत्य दशमे हन्येकादशाहे वारण्योरग्नीन्समारोप्याद्रवसाय मथित्वाग्नीन्विहृत्यो
द्वासनेष्टेष्ट्वा तदानीमेवारण्योरग्नीन्समारोप्योपासने ब्रह्मौदनं श्रपयित्वोपवसथप्रभृति प्रसिद्धमग्न्याधेयं कुर्वीत तस्मिन्संस्थिते पवित्रे॥
ष्ट्यापजेत तस्यां संस्थितायां तंतुमतीं निर्वपेत्तस्यां संस्थितायां त्रैधातव्यां निर्वपेदपि वैश्वानरेण पशुनापजेत पुनराधेयं वा कुर्यात् ॥ अथ यद्येको ब
ह्वीर्जायाः प्रयुंजान एवमेवैतत्कुर्यात्तस्मादेको बह्वीर्जाया विंदत इति ब्राह्मणमिति ॥ अत्र कुतूहलं बौधायनः ॥ जायमानो वै ब्राह्मणस्त्रिभिरृ
णवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति प्रजातंतुं मा व्यवच्छेत्सीरित्यादिश्रुतिभ्यः प्रजोत्पत्त्यै कृतदाराऽन्तरपरिग्रहस्य
सर्वाधानिन आहिताग्नेः अग्निद्वयसंसर्गविधिरुच्यते ॥ जायामवाप्य दशमे हन्येकादशे वा आहिताग्निरारण्योरग्नीन्समारोप्योद्रवसायमथित्वाग्नी
न्विहृत्याग्नेयमष्टाकपालं वैश्वानरं द्वादशकपालमिति द्विहविष्कामिष्टिं कृत्वा वितानाग्नौ औपासनाग्निसंसृष्टः ॥ वितानाग्नौ औपासनाग्नि
संसर्गनिमित्तं वा अग्नीनाधास्य इति संकल्प्य ज्येष्ठभार्यान्वारब्धोऽरण्योर्वह्नीन्समारोप्य संभारस्पर्शादि सर्वौषधिहोमांतं कुर्यात् ॥ कनिष्ठोपास
नाग्नौ सर्वौषधिहोमः ॥ ततस्तस्मिन्नेवाग्नौ ब्रह्मौदनं श्रपयित्वा पत्नीद्वयेनान्वारब्धः अधरोत्तरारणीनिष्टपनं कुर्यात् ॥ ततः पवमानेष्ट्यंतं कुर्या
त् एवमविकृतमाधानप्रयोगसमाप्य पवित्रेष्टिं कुर्यात् ॥ ततस्तंतुमतिं कृत्वा त्रैधातव्यां कुर्यात् अथवा वैश्वानरेण पशुनापजेत पुनराधानं पुनराधे
यं कुर्यादिति अर्धाधाने तु श्रौतकौकमप्रकारेण स्मार्ताग्निद्वयसंसर्गं कृत्वा पूर्ववत्सर्वं कार्यमिति दाराऽन्तरपरिग्रहप्रकारः ॥ अथ पुनराधानप्रसंगात्किं

चिदुच्यते ॥ तत्र प्रदीपकारः ॥ विच्छिन्नाग्नेरपहृताग्नेः समारूढेष्वनष्टारणीकस्य च कालो नावेक्ष्यः ॥ निमित्तानन्तरमेव गोपितपत्नवर्ज्जं संकल्प्य कलि
गवर्णाद्यविकृतमग्न्याधानं कर्तव्यं ॥ सर्वेमापश्चित्ताधानानन्तरमतिपन्नान् सायमग्निहोत्रहोमान् सर्वान् पक्षहोमविधानेन समस्य हुत्वा त
दानीमेव नेत्रसंमीलनादिना अवधानं कृत्वा पुनर्विहृत्य सर्वान् प्रातर्होमान् समस्य जुहुयात् ॥ अतिपन्नहोमात्पूर्वं मनस्वतीहोमं तन्तुमतीछिं
च कृत्वातिपन्नाग्निहोत्रं च कृत्वा कालेऽग्निहोत्रं जुहुयात् ॥ बहुपर्वातिक्रमे मापश्चित्तार्थमन्वारंभणीयां कृत्वातिपन्नमार्गार्थं पथिकृद्वैश्वानर्यौ
समानतंत्रेण प्रतीच्छिवा सर्वार्थं सकृद्वा कृत्वानंतरमतिपन्नं दर्शपौर्णमासं वा कुर्यादिति ॥ ॥ अथाग्निहोत्रेऽग्निवैगुण्यपापानि ॥ तत्राश्वलायन
सूत्रवृत्तिकृताऽऽहवनीयो तए हुत्पनंतरमग्निहोत्रद्रव्यनाशे तथायए ग्निरुपगते च किं कर्त्तव्यमिति नोक्तं तस्य वाए तस्याग्निहोत्रस्य सप्त च शतानि
विंशतिश्च संवत्सरे सायमाहुतयः सप्त चोएव शतानि विंशतिश्च संवत्सरे प्रातए हुतय इत्येतरेयब्राह्मणात् कुतूहलकारे या पत्नीबीय शतद्रव्या
दिप्रायश्चित्तग्रंथकारेश्वा हवनीयहोमस्य प्राधान्यात्तदनंतरं द्रव्यनाशेऽपए ग्निरुपगते च तयोर्हीमलोपः कर्त्तव्य इत्युक्तं अतः तदनुसारेणोक्रपो
नियक्ष्मा हवनीये सम्यावसथ्ययोः एतवीवपक्षं चाश्रित्य विहरणपक्षे ग्न्यनुगतप्रायश्चित्तानि ॥ तत्रादौ दक्षिणाहवनीययोर्विद्यमानयोर्गा
र्हपत्यानुगतप्रा० ॥ तत्राश्वलायनः ॥ आहवनीये वेक्षियमाणे गार्हपत्योऽनुगच्छेत्स्वेभ्य एनमवक्षामेभ्यो मंथेयुरनुगमयेत्वितर ॥ १ ॥ क्षा
माभावे मस्मनारणी संस्पृश्य मंथयेदितो जज्ञे प्रथममेभ्यो योनिभ्यो अधिजातवेदाः ॥ समीगायत्र्या त्रिष्टुभा जगत्यानुष्टुभा च देवेभ्यो ह
व्यं वहतु नः प्रजानन्निति ॥ २ ॥ मथित्वा प्रणीयाहवनीयमुपतिष्ठेताग्ने संम्राडिषे राये रमस्व सहसे द्युम्नायोर्जे पत्याय ॥ सम्राल सि स्वराल

२६ सिद्धाएवासि सा(स्वतो लोत्सोमावतामत्वारं त्वान्त्रपत्यापादध इति ॥ ३ ॥ अत्रैव कल्पांतरमाहाश्वत्थापनः ॥ अत एव वैके प्रणयंत्यन्वाहार्यपचनं दक्षिणं
२० ॥ ४ ॥ स ह भस्मानं वा गार्हपत्यायतने निधायाथ प्राचमाहवनीयमुद्धरेत् ॥ ५ ॥ तत इष्टिरग्निस्तपस्वान् जनद्वान् पावकवान् ॥ ६ ॥ आयाहि तप
सा जनेष्वग्ने पावको अर्चिषा ॥ उपेमां सुष्टुतिं मम ॥ आ नो याहि तपसा जनेष्वग्ने पावक दीद्यत् ॥ हव्या देवेषु नो दधदिति सप्त सूत्राणि ॥ ७ ॥ वि
ध्रियमाण आहवनीये गार्हपत्यो यद्यनुगच्छेत् तदा स्वभ्यो वक्षामेभ्य एवं गार्हपत्यं मंथेयुः ॥ तत इतरमनुगमयेत् ॥ आहवनीयमित्यर्थः ॥ गार्हप
त्यशब्दादेव गार्हपत्यप्रत्यये सिद्धे तत्पत्यपार्थमेनमिति वचनं सर्वावस्थस्य गार्हपत्यस्यानुगमने मंथनेनैवोत्पत्तिः ॥ एवं हृपाच सेतिस्था
पनार्थं ॥ तुशब्दादप्ययमर्थो द्योत्यते ॥ गार्हपत्यमनुगतं मंथनेनैवोत्पादयेत् ॥ ध्रियमाण आहवनीयेऽयं विशेषः ॥ तं चानुगमयेदिति अव
क्षामाणि मंथनसमर्थानि काष्ठानीति प्रथमसूत्रस्य वृत्तिः ॥ मंथनसमर्थक्षामाभावे भस्मनारणी संस्पृश्य लेपयित्वा ततो मंथयेत् ॥ इतो जज्ञ
इति मंत्रेण ॥ मंथयेदिति णिचः प्रयोगात्स्वकर्तृकर्मणि यः कर्ता स एव मंत्रं ब्रूयात् ॥ ये केचन समर्थाः मंथेयुरित्येवमवगम्यते ॥ अरणीमंथ
न एवायं मंत्रो नावक्षाममंथने ॥ यद्युभयोरभिप्रेतः स्यात्पूर्वत्रैव मंत्रं ब्रूयात् ॥ अनुगमयेत्वितरमिति वत् ॥ तथा च न कृतं ॥ तेन पूर्वस्मिन्मं
थने मंत्रो नास्तीति सिद्धं ॥ अवरोहणमंत्रस्तूभयोरपि भवति ॥ अरणीगतावरोहणस्यापि तस्मिन्नेव सूत्रे विधातुमिष्टत्वादिति द्वितीयस्य
॥ मथित्वेति वचनं इतो जज्ञ इत्यस्य प्रणयनमंत्रत्वशंकानिवृत्त्यर्थमिति तृतीयस्य ॥ अत्रैव विषये अयं द्वितीयः कल्पः ॥ ध्रियमाण आहवनी
ये गार्हपत्यानुगमने सति अत एवाहवनीयाद्गार्हपत्यमुद्धृत्य तदन्यमाहवनीयं प्रणयंत्येके ॥ तथा सति दक्षिणाग्निरप्यनुहर्तव्य इति चतुर्थस्य ॥

इदमपि कल्पितं आहवनीयमुद्धरेदित्येतावतैव सिद्धे यां च मिति वचनं आहवनीयात्मत्वं च गार्हपत्यं प्रणीयापि विहारसिद्धिरिति इदमपि कल्पितामि
तितापनार्थं ॥ एते चत्वारः पक्षाः ब्राह्मणे समुद्दिष्टाः ॥ तत्र निर्दाविष्यंतरस्कत्पर्थो ॥ अतः सर्वेषां कश्चिच्छास्त्रोक्तो विधानमस्तीति तान्सर्वान्कर्त्तव्य
तया सूचितवानाचार्यः ॥ सहमस्मानमित्यस्मिन्पक्षे दक्षिणेन विहारं नीत्वा गार्हपत्यायतने निधानमिति पंचमस्य ॥ एकात्र देवता सा चाग्निस्त्रिभिर्गु
णैर्युक्त इति षष्ठस्य ॥ अत्र कल्पितं त्रिविषय एतोये ब्राह्मणे ॥ नराहुर्यस्माहवनीये ह्यग्निर्विधेताथ गार्हपत्य उपशाम्येत्का तत्र प्रायश्चित्तिरिति स
परियां च मुद्धरेत्मायतनाच्यवेतपत्मत्वं च मसुरवयज्ञं तन्वीत पन्नं थेम्स्यात त्वंयजमानस्य जनयेघरदनुगमयेव्याणोयन्नमानं जस्यात्सर्वमेवैनं
सहमस्मानं समोप्य गार्हपत्यायतने निधायाथ प्रांचमाहवनीयमुद्धरेत्स्मात त्रमायश्चित्तिरिति ॥ अत्र तास्राष्यं ॥ प्रतिदिनमाहवनीयाग्निहोमानं
तामध्वर्युरुपशाम्यति ॥ गार्हपत्याग्निस्तु सर्वदा धार्यते तस्माद्गार्हपत्यात्तत्तद्धोमकाले आहवनीयार्थमग्निं विहरेदित्येषोनुष्ठानक्रमः ॥ एवं
सति यदा कदाचिदाहवनीयस्य स्थानेऽग्निर्विधेत तदानीं गार्हपत्यश्चोपशाम्येत् ॥ तत्र तस्यैव कल्पस्य परिहाराय पक्षाः पंचविधाः संभवंति
॥ विद्यमानमाहवनीयं गार्हपत्यतया संभाव्य ततोपि पूर्वदेशे आहवनीयं कर्तुं तस्मात्पूर्वसिध्याहवनीयात्त्वां च मग्निमुद्धरेदिति प्रथमः पक्षः ॥ तस्मि
न्पक्षे यजमान आयतनात्स्वकीयस्थानात्प्रच्यवेताहवनीयस्थानात्प्रच्युतत्वात् ॥ अथ गार्हपत्यायेपूर्वसिद्धाहवनीयात्मत्वं च मग्निमुद्धरेदि
ति द्वितीयः पक्षः ॥ अस्मिन्द्वितीयपक्षे यज्ञपुरुषो मुख्यज्ञसमानं स्यात् ॥ असुरायतश्चशान्तं तत्तोनसुरा न मकृत्येवमायापतेत आहवनीय
मन्य आदधत ॥ अयगार्हपत्यमन्वाहार्यपचनमिति ॥ नदीयदोषोपितत्रैवास्मातः भद्राभूत्वायएभविष्यतीति गार्हपत्यार्यमग्निं मंथनं कर्त्तव्य

२१ मिति तृतीयः पक्षः तदानीं विद्यमान आहवनीये तद्विरोधिनोऽग्नेरन्तरस्य मंथनाद्यजमानस्य शत्रुमुत्पादयेत् ॥ पुनराधानं कर्तुं विद्यमानमाहवनीयमनु
गमयेत् ॥ उपशमयेदिति चतुर्थः पक्षः ॥ तस्मिन्पक्षे विद्यमानस्य विनाशनात् प्राणोपजमानं परित्यजेत् ॥ आहवनीयगतं भस्मसहितं सर्वम
प्यग्निं कस्मिंश्चित्पात्रे प्रक्षिप्यानीयागार्हपत्यस्थाने प्रक्षिप्यानंतरं ततो गार्हपत्यात् प्रांचमाहवनीयमुद्धरेदिति पंचमः पक्षः ॥ अस्मिन्पक्षे दोषा
भावात्सैव प्रायश्चित्तिर्भवतीति ॥ अत्र देवत्रातभाष्यकारः ॥ एषानुगमने विधिरुत्क्रमप्रयोगनाम स्मार्त्तक्रमप्रयुक्तं ततद्विधिरिति तस्मात्सर्वेष्वस्य
प्यनुगतेषु एषैव विधिरिति ॥ अत्र किंचिदुच्यते ॥ अनुगमनेनाम स्वापतनात् बहिर्निष्कासनेन मकृत्वैवाग्नेरुपशमनं यथा भवेत्तथा कुर्यात् तदेवानुग
मनं ॥ नाग्नेरपतनाद्बहिस्त्यागः ॥ यत्र यत्राग्नेरनुगमनविधानं तत्र तत्रैवमेव कुर्यादिति ॥ संस्पर्शनं नाम समारोपणं ॥ अदृष्टरूपोऽग्निरारण्यां
विशतीति बुध्या भस्मस्पर्शनं समारोपणमिति ॥ मथ्यमानेऽसौ यद्युत्पादनसमर्थः प्रयत्नो निष्फलः स्यात्तदा पुनरारंभावेशो मंत्र आवर्तयित
व्यः ॥ एवं व्यपेव्यर्थे पुनः पुनरावर्तयेदित्यन्वाधानोक्तं प्रपाणावसरे वृत्तिकारः ॥ अथ प्रयोगः ॥ विहरणोत्तरं दक्षिणाहवनीययोर्विद्यमान
योर्गार्हपत्येऽनुगते गार्हपत्यानुगतजन्यदोषपरिहारार्थं प्रायश्चित्तं करिष्य इति संकल्प्य तदीयावक्षामे भस्म तूष्णीं मंथयेत् ॥ क्षामाभावे भस्मनार
णी संस्पृश्य ततो जात इत्यनेन मंथयेत् ॥ एवं मथित्वा विद्यमानमाहवनीयमनुगमयित्वायतनद्वयशुद्धिं कृत्वा मथितमग्निं गार्हपत्यायतने नि
धाय तस्मादाहवनीयं प्रणीयतमेवोपतिष्ठते ॥ अग्ने सम्राळिति० इत्यादि ॥ ततोऽग्निहोत्रं समाप्य तेष्वग्निषु तपस्वतीं पूर्णाहुतिं वा कुर्या
त् दृष्टिपक्षे गार्हपत्यानुगतजन्यदोषपरिहारार्थं तपस्वत्येष्ट्या यक्ष्य इत्यादि पंचदश सामिधेन्यः ॥ पंचप्रयाजाः ॥ वार्त्रघ्नावाज्यभागौ

अग्निस्तपस्वान्जनद्वान्पावकवानिति प्रधानदेवता ॥ अग्निः स्विष्टकृत् ॥ त्रयोनूयाजाः ॥ सूक्तवाकशंयुवाकावित्यादि प्रधानमुपांशु ॥ एवमात्म
केनेत्यादि पक्षे ॥ अष्टौ कपालानि ॥ आयाहि तपसा जनेष्वानो पाहि तपसा जनेष्विति याज्यानुवाक्ये ॥ अग्ने तपस्वतो जनद्वतः पावकवतो हम
व्याद्ः ॥ न पार्वणहोमश्चतुर्धाकरणं च ॥ अन्वाहार्यो हिरण्यं च दक्षिणा ॥ पुनराधेयवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे गार्हपत्यानुगतज
न्यदोषपरिहाराय तपस्वतीष्टिस्थाने पूर्णाहुतिं होष्यामीति संकल्प्याग्नये तपस्वते जनद्वते पावकवते स्वाहा ॥ अग्नये तपस्वते जनद्वते पावकव
त इदं० ॥ ततो विशेषमस्त्येदिति ॥ अत्र कल्पांतराणि ॥ विद्यमानमाहवनीयं गार्हपत्यानयासंभाव्य तस्मात्त्वां च माहवनीयमुद्धृत्य दक्षिणामपि स्व
स्थानादुद्धृत्य दक्षिणातो निधायाग्निहोत्रं समाप्य तत्रैव तपस्वतीं कृत्वा पूर्वं गार्हपत्यनयासंभावितमग्निं गार्हपत्यायतने निदध्यादित्येकः पक्षः ॥
अथवा गार्हपत्यार्थमाहवनीयैकदेशं प्रत्यंचं नीत्वा गार्हपत्यायतने निधायाग्निहोत्रं समाप्य तपस्वतीष्टिरिति द्वितीयः ॥ दक्षिणाग्निः स एव
॥ अथवाहवनीयानुगमनप्रणयनोपस्थानवर्जं पूर्वोक्तविधमंथनेन गार्हपत्यमुत्पाद्याग्निहोत्रं समाप्येष्टिः ॥ दक्षिणाहवनीयौ तावेवेति तृती
यः ॥ अथवा सहभस्मानमाहवनीयं दक्षिणेन विहारात्पश्चान्नीत्वा गार्हपत्यायतने निधाय तस्मादाहवनीयं प्रणीयाग्निहोत्रं समाप्य तपस्वतीष्टिरि
ति चतुर्थः ॥ दक्षिणाः स एव ॥ एषु पक्षेषु सहैव भस्मानमिति कल्पांतरा श्रपणं सम्यगिति कल्पांतराणि ॥ इदमाहवनीयाहुतिद्रव्यपर्यंतं भव
ति ॥ तदनंतरं गार्हपत्येनुगते तदाहुत्यालोपः ॥ अग्निहोत्रशेषं समाप्य भस्मनारणी संस्पृश्येत्यादिविधिना तपस्वत्यंतं कृत्वा विध्यपराधार्थया
हुति होमं कुर्यादिति ॥ एवं पूर्वाहुत्यनंतरमनुगते तूत्तराहुतिमहुत्वैव यथासंभवमग्निहोत्रं समाप्य भस्मनारणी संस्पृश्येत्यादिविधिनात

२८ पस्वस्थं तं कृत्वा पर्याधार्ये व्याहृति होमं कुर्यादिति ॥ अथ प्रसंगात् सर्वावस्थायां गार्हपत्यानुगतप्रा० ॥ तत्र वृत्तिकारेणाहवनीये चेत् क्षिप्यमाणस्त्वग्नि
न्सूत्रेण नमिति पुनर्गार्हपत्यो यादानानुशब्दात् सर्वावस्थस्य गार्हपत्यस्य मंथनेनैवोत्पत्तिरित्युक्तं ॥ तत्र प्रयोगः । गार्हपत्येनुगते गार्हपत्यानुगतप्रा
यश्चित्तं करिष्य इति संकल्प्य गार्हपत्यावसानं भस्म स्तूपीं मंथयेत् ॥ स्तामाभावे भस्मनारणी संस्पृश्य तो जत्त इत्यनेन मथित्वाग्निं गार्हपत्यायतने नि
धाय तस्मादाहवनीयं प्रणीय तत्पयस्वतीं पूर्णाहुतिं वा कुर्यादिति ॥ अथ मंथनेन जातात्वग्न्यनुगतप्रा० ॥ तत्र बौधायनः ॥ अयं जात एवाहूयेत् समारो
पणमंत्रं जपित्वा पुनरेवं मंथयेदिति ॥ अत्र चंद्रिकाकारः ॥ जातमात्र एवाग्निहृद्रूपे तदा समारोपणमंत्रं जपित्वा पुनर्मंथनस्यावृत्ता मंथयेदि
ति ॥ अनेन न्यायेन यत्र यत्र योयो मंथन विधिरुक्तस्तस्य तस्यावृत्त्वतीति भाति ॥ तत्राधाने तु पूर्वमुक्तं ॥ पश्चादेहोतुर्मंथनीयानां न पुनः पाठ इ
ति सिद्धांत भाष्यकारः ॥ अत्राश्वलायनानुसारी प्रयोगः ॥ यदि मंथनेन जातोग्निरनुगतस्तदारणिस्थभस्मनारणी संस्पृश्य तो जत्त इत्यनेन नमं
थयेत् ॥ पुरुषदौर्बल्यादिना मंथनेनैष्फल्येपि पुनरारंभ इतो जत्त इत्यनेन मंथयेदिति ॥ पश्चात्तु मोस्यादो मंथनेन अजायमाने विशेषः ॥ मंथ
ने नाजायमाने त्वधरारण्यां निधायाहवनीयप्रहरणकाले तत्प्रहरतीति त्रिकांडमंडनादयः ॥ अयोत्थापनकाले समारूढमथ्यमानाग्नेरनुत्पत्तौ प्रा०
॥ तत्राऽश्वलायनः ॥ अग्निहोत्रापकाले यावज्जायमाने प्याऽन्यमानीय जुहुयुः ॥१॥ पूर्वालाभ उत्तरोत्तरं ॥२॥ ब्राह्मणपाण्यजकर्णदर्भस्तंबाप्सु का
ष्ठेषु पृथिव्यां ॥३॥ हुत्वा त्वपि मंथनं ॥४॥ पाणौ चेद्धुतेन वरोधः ॥५॥ कर्णे चेन्नोपसर्जनं ॥६॥ स्तंबे चेन्नाधिशयीत ॥७॥ अप्सु चेद्विवेकः ॥८॥ ए
तत्सांवत्सरं व्रतं यावज्जीविकं वा ॥९॥ इति नवसूत्राणि ॥ अग्निहोत्रहोमार्थे प्रणयनकाले समारूढोग्निर्मथ्यमानो यदि न जायेत तदाऽन्यं लौकिकम

ग्निमानीयमप्रणीयत त्रैव होमः कार्यः ॥ एतदनुगतेन भवति ॥ अनुगते तु मंथनादितपस्वती ष्वंतं तत्र प्रायश्चितं ॥ तत्राग्निसंधानमेव मंथनप्रवर्त्तो निमित्तं
नाग्निहोत्रहोमः ॥ समारूढे तु नैमित्तिकस्याभावात् ॥ अग्निहोत्राद्येव मंथनस्य निमित्तं नान्यत् ॥ अतः समारूढ एवेति युक्तमुक्तं ॥ तेनानुगतावुत्पायमा
ने पि यावज्जन्मतावत् मथितव्यमेवेति ॥ ततस्तपस्वती ष्टिः ॥ तत्राग्निहोमोऽनुष्ठितप्रायश्चित्तेन सहृ पदिहोमकालोतिपन्नस्तदा मनस्वती होमश्च
कार्यः ॥ अप्यन्यमिति अन्यशब्दाल्लौकिकमग्निमानीयजुहुयुः ॥ अपिशब्दात् ब्राह्मणपाण्यादिवक्ष्यमाणमपि गम्यते इति प्रथमसूत्रस्य वृत्तिः
॥ अग्न्यादीनां यथि व्यंतानां पूर्वे पूर्वालाभे उत्तरे उत्तरं गृह्णीयुः ॥ पूर्वालाभ इत्यलाभवचनादलाभे वचनांतरे विधिरयं न प्रतिनिधिनियम इति ॥ अध्य
वसीयते ॥ तेन दक्षिणाग्न्यानामंगानां मध्ये यस्य कार्यमस्ति तदेव कार्यं नान्यदिति द्वितीयस्य ॥ अग्नौ सर्वधर्मसंभवात्तस्य पृथग्योगभावः ॥ पाण्यादी
नां त्वनुष्ठो इंधनादिश्रयणादिवर्जयित्वाऽन्यत्सर्वं संभवतीति पृथक्भावः ॥ काष्ठानामवभावे विधानादुदककार्याण्यपि न स्युरिति तेषां पृथक्
भावः ॥ पाण्यादिषु पंचसु आहुतिधारणार्थो समिन्नवति ॥ इंधनार्थो स्कंनभवं त्येव समिधः ॥ पृथिव्यां तु धारणार्थोपि समिन्न भवति ॥ काष्ठा
भावेतस्याः विधानात् ॥ एवमन्यदपि विचार्य कर्त्तव्यमिति तृतीयस्य ॥ होमं कृत्वानंतरमेवे मथनमपि भवति ॥ अपिशब्दात्कालांतरेपि मंथनंभ
वति ॥ अत्र निवेशः ॥ पराप्रपाणाकाले प्रपाणं यदि समाप्तं तदा होमानंतरमेव मंथनं भवति ॥ पराल्पयदि समाप्तं प्रपाणं तदा पुनरपि होमका
ले एवमंथनमिति ॥ तु शब्दोवधारणार्थः ॥ हुत्वा मंथनमेव भवति ॥ न पुनर्होमं इति चतुर्थस्य ॥ पादिपाणो जुहुयात्तदा ब्राह्मणस्य वासार्थिनः
नावरोधः कार्य इति पंचमस्य ॥ अन्नमांसवर्जनं भवतीति षष्ठस्य ॥ अन्नदर्भाणामनधिशयनमिति सप्तमस्य ॥ अत्राविवेको यां इमामो जनीया

२९ मा अभोजनीयारत्येवं रूपरत्यष्टमस्य ॥ पूर्ववद्विकल्पप्रतिमासहे तु द्वैष्टव्य इतिनवमस्येति ॥ अनुगतोग्निर्मथ्यमानो यदि न जायेत तदापि लौकिकेग्नौ होम
29 इति सिध्धांतदेवत्रातभाष्यकारौ ॥ प्रदीपकारस्तु लौकिकाग्नौ होमे त्रयोधिकारिणः ॥ नष्टसर्वाग्निरेकः ॥ सर्वदा प्रयाणशीलो परः ॥ अग्नीनां रक्षणे समर्थने
चासमर्थोन्य इति ॥ लौकिकाग्नावप्यलभमाने ब्राह्मणपाण्यादिषु होमः ॥ लौकिकोग्निः प्रतिनिधिः सर्वेषामग्नीनां ॥ ब्राह्मणपाण्यादयस्त्वाहवनीयस्यै
व ॥ अजाब्राह्मणो यश्चान्मुखो ॥ दक्षिणकर्णहस्तयोर्होम इति कुतूहलेधूर्त्तः ॥ लौकिकाग्न्यादिषु होमस्त्वेकहोमपर्यवसायीति केचित् ॥ उभयोरेकक
मेत्वात् सायंप्रातश्च लौकिकाग्न्यादिषु होमः ॥ ततो मंथनमिति सिध्धांतभाष्यकृत् ॥ अग्निहोत्रं चतुर्भिर्लुप्येत होमोपस्थान व्रते दर्शपूर्णमासाभ्यामि
ति तं तु मत्यष्टेष्ट्वा दर्शपूर्णमासाभ्यां यजेतेति बौधायनवचनात् ॥ लौकिकाग्न्यादावग्निहोत्रहोम एवं वचनाद्भवति नाऽन्यत् दर्शपूर्णमासादीनि ॥ अ
ग्निमन्त्रे अग्निहोत्रशब्दोग्निपरः ॥ यो लौकिकोग्निः स चतुर्भिर्लुप्येतेत्यर्थ इति विवरणकारो गोपालः ॥ उपस्थानं उपप्रयंत इति बौधायनहोमे प्रसिद्धं तन्न
कर्तव्यं ॥ व्रतानि तस्मादाहिताग्निनो नृतं वदेदित्यादीनि ॥ तानि लौकिकाग्निहोत्रहोमदिनेन कर्त्तव्यानि ॥ लौकिके दर्शपूर्णमासौ कुर्याच्चेत्तं तु मत्यष्टेष्ट्वा
पुनर्यजेतेति ॥ अथ प्रयोगः ॥ प्रयाणादौ समारूढः प्रणयनात्पूर्वमनुगतो वा गार्हपत्यो मथ्यमानो यदि विहरणकालेन जायेत तदा लौकिकाग्निमाहृत्य
प्रागस्तमयादुदयाद्वा गार्हपत्यायतने निधाय तस्माद्दक्षिणं प्रणीयोक्तमंत्रैराहवनीयं प्रणीयतेष्टविकृतमग्निहोत्रं हुत्वा तानग्नीनुत्सृज्यानंतरमेवमं
थनेनाग्निमुत्पादयेत् ॥ यदि लौकिकाग्नावप्यायतने निहिते प्रणयनात्पूर्वमुदयास्तमयोर्चेदनुत्सरणमापद्येत पूर्ववत्कोहोम इति कुतूहलकारः ॥ लौ
किकाग्नावप्यलभमाने ब्राह्मणपाण्यादिष्वग्निहोत्रकरणे उक्षु स्वरूपं धारणं गार्हपत्यावेक्षणमपायो होमादीनि स्वाहेत्यादिभिः स

मिहाधानं षष्ठी जलेन पूर्णाहुतिः प्रतितपनं चेत्येतेषां लोपः ॥ नपरिसमूहनादयोऽस्याः ॥ अत्रतः कुशेषूपसाद्य होमं नयानीत्युक्त्वीयाभिमर्शपलमिधं स्तु
चं चेत्यादिविधिसमीत्यंते भवक्षणं वेद्यभावात् परिक्रमिणो स्तुचं प्रपद्येदिति ॥ अंगाराभावादंगारसंबंधिहविःसंस्कारः स्तुगादिप्रतितपनं समिधः प्रदी
प्तिश्चेत्येतेषां लोपः ॥ पथि यां होमे तु धारणार्थापि समित्र भवति ॥ पाणिहोमे वा सार्थं बाह्लपाण्यानवरोधः ॥ कर्णे चेदज्ञमासन्नमुपेत ॥ संब
चेन्नोपरिशपीत ॥ अपक्वे चेन्नश्रद्धाशुद्धविवेकः ॥ एतदुक्तं भवत्यरपर्यंतं यावज्जीवं वाचरेदिति ॥ एवं लौकिकाग्न्यादिहोमे कृतेपि मध्यमानोग्निर्द्विती
यहोमकालात्प्राग्यदिन जायेत तदा पुनराधानमिति कुतूहले भाष्यकृत ॥ द्वितीयमपि लौकिकाग्न्यादिषु कृत्वा ततीयहोमात्पूर्वममनुत्पत्तौ पुनराधा
नमिति कुतूहले भाष्यकृत ॥ द्वितीयमपि लौकिकाग्न्यादिषु कृत्वा तृतीयहोमात्पूर्वममनुत्पत्तौ पुनराधानमिति केचिदिति केशवो शतदूपीकारः ॥ पद्याल
स्यादिना बहुकृत्वो लौकिकाग्नावग्निहोत्रे हुते मनस्वतीं तं तु मती षिश्च मापश्चितमिति प्रदीपकारः ॥ अथ दक्षिणानुगतप्रा० ॥ तत्र प्रयोगः ॥ गार्ह
पत्याहवनीययोर्विद्यमानयोर्दक्षिणेनुगते दक्षिणानुगतप्रायश्चित्तं करिष्य इति संकल्प्य गार्हपत्यात्प्रणीयाग्निहोत्रं समाप्यते षेवाग्निषुतपस्वतीं
कुर्यात् ॥ इदमाहवनीयाहुतिद्वयपर्यंतं ॥ तदनंतरमनुगते तदाहुत्योर्लोपः अग्निहोत्रे समाप्य विधपराधार्थमाहवनीये व्याहृतिहोमं कुर्यादिति
॥ स्त्रीयपूर्वाहुत्यनंतरमनुगते तूत्तराहुतिमहुत्वैव यथाहं मवमग्निहोत्रं समाप्य विध्यपराधार्थमाहवनीये व्याहृतिं जुहुयादिति ॥ अथाहव
नीयानुगतप्रा० ॥ तत्राश्वलायनः ॥ प्रणीतेनुगते प्राग्घोमादिति ॥ १ ॥ अग्निर्ज्योतिष्मान्वरुणाः ॥ २ ॥ उदग्नेशुचयस्तवाऽयेबहन्नुपसामूर्ध्वो
अस्यादितीति सत्रत्रयं ॥ अग्निहोत्रार्थप्रणीत आहवनीयेऽनुगते प्रायश्चित्तत्वेन यमिषिः कर्तव्या ॥ प्राक्पूर्वाहुतिमक्षेपादेषैवेषिः प्राय।

३०
30
श्रितिर्भवति ॥ उत्पत्तिस्तु ब्राह्मणोक्ता भवति ॥ तदाहुर्यस्याग्निमनुद्धृतमादित्योऽभ्युदियाद्वाभ्यस्तमियाद्वा प्रणीतो वा प्राग्घोमादुपशाम्येदित्यादि हिर
ण्यं पुरस्कृत्य सायमुद्धरेत् । रजतमन्तर्धाय प्रातरुद्धरेदित्यत्रोक्ता ॥ इयमेवोत्पत्तिरस्मिन्नवसरे प्रणीतो वा प्राग्घोमादुपशाम्येदिति वचनात् ॥ अत्राव
नुगतेन तदाहुतीरिति वक्ष्यति ॥ उत्तराहुत्यां तु तापां अभ्युत्पतेः प्रयोजनं नास्ति ॥ एवमग्निहोत्रिणो वा ह इत्यस्मत्सूत्रानुसारेणामन्यामहे इति प्रथमसूत्र
स्य वृत्तिः ॥ इह देवते ज्योतिष्मानित्यग्रेगेण इति द्वितीयस्य ॥ अत्रैतरेयं ब्राह्मणं ॥ तदाहुर्यस्याग्निमनुद्धृतमादित्योऽभ्युदियाद्वाभ्यस्तमियाद्वा प्र
णीतो वा प्राग्घोमादुपशाम्येत्का तत्र प्रायश्चित्तिरिति ॥ सायंकाल आदित्यस्यास्तमयात्पुरा अग्निहोत्रार्थं गार्हपत्यादग्निमुद्धरेत् ॥ प्रातःकाले तु
सूर्योदयात्पुरोद्धरेदित्याम्नातं ॥ एवं सति यस्याग्निहोत्रिणोऽनुद्धृतमभिलक्ष्यादित्य उदियाद्वा अस्तमियाद्वा अस्तमियाद्वा अभ्युद्धरणा
त्प्रागेवादर्पास्तमयो भवत इत्यर्थः ॥ अथवास्तमयकाले प्रणीतोऽग्निराहवनीयदेशे स्थितो होमात्पूर्वमुपशाम्येत ॥ तेषु त्रिषु विषयेषु प्रायश्चि
त्तं पृच्छ्यते ॥ तस्योत्तरमाह ॥ हिरण्यं पुरस्कृत्य सायमुद्धरेत् ज्योतिर्वै शुक्रं हिरण्यं ज्योतिः शुक्रमसौ तदेव तत् ज्योतिः शुक्रं पश्यन्नुद्धरेति रज
तमन्तर्धाय प्रातरुद्धरेदेतद्वा अत्रिहिरण्यं पुरा संभेदाच्छायानामाहवनीयमुद्धरेन्मृत्युर्वै तमश्छाया तेनैव तत् ज्योतिषा मृत्युं तमश्छायां तरति सा तत्र
प्रायश्चित्तिरिति ॥ ॥ यदा सूर्यास्तमयादूर्ध्वमुद्धारणीयं तदानीं हिरण्यं पुरस्कृत्योपर्यवस्थाप्य वह्निमुद्धरेत् ॥ यदेतद्धिरण्यमस्ति तदेतच्छुक्रं ।
ज्योतिर्वै अत्यन्तभास्वरः प्रकाशः ॥ असावादित्योऽपि शुक्रं ज्योतिरत्यन्तभास्वरः प्रकाशः ॥ तथा सति तदेव हिरण्यमेव तज्ज्योतिरादित्यप्रकाशः ॥ अ एमः
तः शुक्रं दीप्तिमाद्धिरण्यं पश्यन्नेवाग्निमुद्धरेत् ॥ प्रातःकाले तु रजतमन्तर्धायोपर्यवस्थाप्याग्निमुद्धिरण्यं पश्यन्नेवाग्निमुद्धरेत् ॥ प्रातःकाले

तु रजतमंतर्धायोपर्यवस्थाप्याग्निमुद्धरेत्॥ एतच्च रजतं रात्रेः स्वरूपं॥ रात्रौ हि चंद्रतारादिकं रजतसमानं दृश्यते॥ अतो रजतेन सूर्योदयात्प्राचीनो
रात्रिकाल एव संपाद्यते॥ यद्यप्येतावतैव त्रिविधप्रश्नोत्तरं संपन्नं॥ तथापि तत्प्रसंगान्नित्यमुद्धरणं पुरेत्यादिना प्रदर्श्यते॥ छायानां संभेद एकीभा
वः॥ सूर्यास्तमये सत्येषा मनुष्यच्छाया एषा वृक्षच्छायेति विभागो न ज्ञायते सोयं संभेदः॥ तस्मात्सूर्यप्रकाशवच्छायाविशेषो विज्ञायते॥ तस्मिन्नेव
काले सायंहोमार्थमाहवनीयमुद्धरेत्॥ तत्रोपपत्तिर्मृत्युरित्यादिः॥ यदिदं तमो याच च्छाया तदुभयं मृत्युःस्वरूपमेव॥ अतः सत्यादित्यप्रकाशे ते
नैव ज्योतिषा मृत्युरूपं तमस्तद्रूपां छायां च तरति॥ उद्धरेद्यपति॥ सेयमुक्ता तत्रैव कल्पे प्रायश्चित्तिः॥ नित्योद्धरणस्यापि वैकल्पिकविरोधित्वादुपच
रितं प्रायश्चित्तत्वमिति॥ अत्र सूत्रब्राह्मणानुसारी प्रयोगः॥ गार्हपत्यदक्षिणयोर्विद्यमानयोराहवनीयेनुगते आहवनीयानुगतजन्यदोषपरि
हारार्थं प्रायश्चित्तं करिष्य इति संकल्प्य॥ सायंचेद्धिरण्यं प्रातश्चेद्रजतं पुरस्कृत्योक्तमंत्रेणाहवनीयं प्रणीयाग्निहोत्रशेषं समाप्य तेष्वेवाग्निष्वग्नये
ज्योतिष्मते वरुणाय चेष्टिं पूर्णाहुतीं वा कुर्यात्॥ इष्टिपक्षे आहवनीयानुगतजन्यदोषपरिहारार्थं इष्ट्या यक्ष्य इत्यादि॥ अग्निर्ज्योतिष्मान्॥ वरु
णाय चरुस्थाली॥ उदग्ने शुचयस्तवाऽग्ने बृहन्नित्यग्नेर्ज्योतिष्मतो याज्यानुवाक्ये॥ इमं मे वरुण तत्त्वा यामीति वरुणस्य॥ अग्नेर्ज्योतिष्मतोहम
न्नादः॥ वरुणस्याहं प्रप्रजया च पशुभिश्चेति॥ अन्वाहार्यो हिरण्यं च दक्षिणा॥ पार्वणहोमचतुर्धाकरणपुनरालंभवर्ज्जं सर्वं पौर्णमासवत्॥ पूर्णा
हुतिपक्षे॥ अग्नये ज्योतिष्मते स्वाहा॥ अग्नये ज्योतिष्मत इदं०॥ वरुणाय स्वाहा॥ वरुणायेदं०॥ इदं स्रौप पूर्वाहुतिप्रक्षेपात्पूर्वं॥ तदनंतरमनु
गते तु विशेषमाह॥ तत्राश्वलायनः॥ अग्नावनुगते तराहुती हिरण्य उत्तरां जुहुयात्स्थिरण्य उत्तरां जुहुयादिति सूत्रं॥ आहुत्योरंतराग्नावनुगते

३१ सति हिरण्यं निधाय तस्मिन्द्वितीयामाहुतिं जुहुयात् ॥ हिरण्य एव यथासंभवं शेषकार्याणि कुर्यात् ॥ न पुनरग्निरुद्धर्तव्यः ॥ अभ्यासोऽध्यायपरिसमा-
31 प्त्यर्थ इति वृत्तिः ॥ अत्र प्रयोगः ॥ अनुगताहवनीयस्थाने हिरण्यं निधायोत्तराहुतिं हुत्वा तत्रापि समिदाधानवर्जं परिसमूहनादि यथासंभवं कुर्वन्न-
ग्निहोत्रं समाप्य पुनराहवनीयं प्रणीय विध्युपराधार्थं व्याहृतिहोमं कुर्यात् ॥ उत्तराहुत्यनंतरमनुगते त्वग्निहोत्रं समाप्याहवनीयं प्रणीय विध्युपरा-
धार्थं व्याहृतिहोमः ॥ अत्राश्वलायनेन प्रणयनोत्तरं पूर्वाहुतिप्रक्षेपात्पूर्वमाहवनीयेऽनुगते द्विर्हविष्कापामुक्तापामपि बौधायनेनास्मिन्नवसरे एक-
हविष्केव ज्योतिष्मत्येष्टिरुक्तासेव ग्राह्येति भाति ॥ कुतः एतावत्त्वं हविषामित्याश्वलायनेनोक्तत्वात् ॥ अथ गार्हपत्यदक्षिणयोर्युगपदनुगतयोः प्रा०
॥ तत्र प्रयोगः ॥ भस्मनारणी संस्पृश्येत्यादि मथित्वा गार्हपत्यायतने निधाय तस्माद्दक्षिणं प्रणीयाग्निहोत्रं समाप्य तपस्वतीं कुर्यात् ॥ इदमाहवनीया-
हुतिद्वयपर्यंतं ॥ तदनंतरमनुगतयोस्तु तदाहुत्योर्लोपः ॥ आहवनीय एव यथासंभवमग्निहोत्रशेषं समाप्य भस्मनारणी संस्पृश्येत्यादि मथि-
त्वा गार्हपत्यायतने निधाय तपस्वतीं कृत्वा पराधार्थं व्याहृतिहोमं च कुर्यात् ॥ अथ गार्हपत्याहवनीययोर्युगपदनुगतयोः प्रा० ॥ तत्र प्रयोगः ॥ भस्म-
नारणी संस्पृश्येत्यादि मथित्वा गार्हपत्यायतने निधाय सायं चेद्धिरण्यं प्रातश्चेद्रजतं पुरस्कृत्येत्याद्युक्तमंत्रेणाहवनीयं प्रणीयाग्निहोत्रं समाप्य ते-
ष्वेवाग्निषु तपस्वतीं ज्योतिष्मतीं च कुर्यात् ॥ इदमाहवनीयपूर्वाहुतिप्रक्षेपात्पूर्वं ॥ तदनंतरमनुगतयोस्त्वाहवनीये हिरण्यं निधायोत्तराहुतिं दक्षि-
णाग्नौ च हुत्वा यथासंभवमग्निहोत्रं समाप्य भस्मनारणी संस्पृश्येत्यादि मथित्वा गार्हपत्यायतने निधायाहवनीयं प्रणीय तपस्वतीं कृत्वा पराधार्थं
सर्वप्रायश्चित्तं च कुर्यात् ॥ आहवनीयं प्रणीय तपस्वतीं कृत्वा पराधार्थं सर्वप्रायश्चित्तं च कुर्यात् ॥ आहवनीयोत्तराहुत्यनंतरमनुगतयोस्तु दक्षिणा

हुत्वा यथासंभवमग्निहोत्रं समाप्य मन्थनारणी संस्पृश्य त्वादि मथित्वा गार्हपत्ये पतने निधाय आहवनीयं प्रणीय तपस्वतीव्याहृतिहोमं च कुर्यात्॥ अथ दक्षि
णाहवनीययोर्युगपदनुगतयोः प्रा०॥ तत्र प्रयोगः॥ गार्हपत्याद्दक्षिणं प्रणीय समापं चेद्धिरण्यं प्रातश्चैद्दृन्नतं प्रास्कृत्य गार्हपत्यादुक्तमंत्रेण आहवनीयं प्रणी
याग्निहोत्रं समाप्य तेष्वेवाग्निषु तपस्वतीं ज्योतिष्मतीं च कुर्यात्॥ इदमाहवनीयपूर्वाहुतिप्रक्षेपात्पूर्वं॥ तदनंतरमनुगतयोस्त्वाहवनीये निधायोत्त
राहुतिं गार्हपत्ये च हुत्वा यथासंभवमग्निहोत्रं समाप्याहवनीयं प्रणीयापराधार्थं सर्वप्रायश्चित्तं जुहुयात्॥ उत्तराहुत्यनंतरमनुगतयोरपि गार्हपत्ये
हुत्वा यथासंभवमग्निहोत्रं समाप्याहवनीयं प्रणीयापराधार्थं व्याहृतिहोमं कुर्यादिति॥ अथ सर्वेष्वग्निषु युगपदनुगतेषु प्रा०॥ तत्राश्वलायनः॥
सर्वांश्चेदनुगतानादित्योऽभ्युदियादभ्यस्तमियाद्वाग्न्याधेयं पुनराधेयं वेति सूत्रं। यदि त्वर्वेष्वग्निष्वनुगतेष्वादित्योऽस्तमुदयं वा गच्छेत्तदाग्न्याधेयं पुनरा
धेयं वा प्रायश्चित्तं भवेत्॥ अनयोर्वकालयोः शास्त्रातो गार्हपत्याहवनीययोर्द्वयोर्वानुगतावेतत्प्रायश्चित्तमुक्तं॥ तस्मिन्छास्त्रे दक्षिणाग्निर्भिन्नयोनिः
अत एवं विनिवेशः॥ एकयोनित्वे सर्वानुगमने भवति॥ भिन्नयोनित्वे द्वयोर्वानुगमनऽपि॥ अत्राग्न्याधेयपुनराधेयाभ्यां सेष्टिके तेग्रह्येते॥ अग्न्युत्पा
दकत्वसामान्यात्॥ एतदर्थमेवाधानाद्द्वादशरात्रमित्यत्र सेष्टिकेऽग्न्याधाने आधानशब्दप्रयोगः संव्यवहारार्थं कृतः॥ तस्मिन्काले सर्वदा सर्वेषामग्नयो
विहृता एव प्रायेण्यासते॥ तत्र केवलगार्हपत्यानुगमने मंथनेनोत्पाद्य तपस्वतीकार्येत्युक्तं॥ दक्षिणाग्न्यनुगमनेपि स्वयोनितो विहृत्य सैवेष्टिः कार्या॥
आहवनीयानुगमनेपि प्रायश्चित्तविशेष उक्तः॥ द्वयोर्द्वयोरनुगमने तान्येव यथासंभवं कर्त्तव्यानि अतः सर्वानुगमने इदमवशिष्यते॥ अतः सर्वशब्दावि
वक्षायामपि नैमित्तिकस्य स्वभावपर्यालोचनया सर्वानुगतावेवैतन्भवतीति मंतव्यं॥ एकयोनित्वे भिन्नयोनित्वे उक्तो विनिवेशः॥ उभयोरनुगम

३२ नेपि विधीपमानस्याग्न्याधेयस्य सर्वोत्पादकत्वभावात्यागात् तद्विधानसामर्थ्यादेवानष्टोपि दक्षिणाग्निर्नष्ट इति गम्यते विहृते त्वेवं भवति॥ अविहृते त्वपि
किं गार्हपत्यानुगमने सर्वोऽनुगमोऽस्ति न वाऽस्तीति ब्रूयात्॥ तत्र हि सर्वे न पः समवेता इति गम्यते॥ ततो विहरणदर्शनात्॥ कथं तत्र समवायः॥ अंगा(र)
समवायस्तावन्नास्ति॥ कर्मार्थं प्रयुक्तानां कर्मसमाप्तौ तत्रैवानुगमनदर्शनात्॥ अथायमभिप्रायः॥ अंगार एव ययोर्दक्षिणाग्न्याहवनीयाख्यः
शास्त्रगम्यः स कर्मसमाप्तौ गार्हपत्यांगार एनमनुप्रविशति॥ अन्यथा ततन उद्धरणविधानं नोपपद्यते॥ न त्वसंसर्गदोषश्च नास्ति॥ अंगारसंसर्गो हि सः
तथा च शास्त्रांतरे वचनं॥ यदि पूर्वोनुगतः संचर्य पश्चाद्धियत इति एवमपि न युज्यते॥ अविहृतावस्थायां गार्हपत्ये गार्हपत्यं प्रज्वल्येति तत्र प्रयोगा
त्॥ तथा च शास्त्रांतरे सूत्रकारप्रयोगः मंत्रवर्णश्च दृश्यते गार्हपत्यमभिमंत्रयते सु गार्हपत्य इति॥ तेनावगम्यते॥ तत्रानुप्रवेशोऽप्यंतरस्यानास्तीति॥ य
त्पुनः पश्चाद्धियत इति हि गत इति॥ तदप्यन्यतरं यदि हि सर्वदाऽनुगतस्याहवनीयस्य गार्हपत्यात्प्रणयने नैवोत्पत्तिः स्यात्तदैवैतद्विंगमनुप्रवेशस्यात
त्र हि शास्त्रे मंथनादप्युत्पत्तिरुक्ता॥ अतोऽस्यायमर्थः॥ यस्मिन्ननुगमने गार्हपत्यात्प्रणयनेनोत्पत्तिरुक्ता॥ तदनुगते तत्र संचारणमविरुद्धं मंथनेनो
त्पाद्येऽनुगते प्यंतरान संचरितव्यमिति॥ अतोऽन्यपरत्वादेवास्य वाक्यस्यानुप्रवेशे लिंगं न भवितुमर्हति॥ अतस्तत्र समवायः प्रत्यक्षेण शास्त्रेण वा
लक्षयितुं न शक्यते॥ कथं तर्हि तत उद्धृत आहवनीयादिर्भवति॥ वचनगम्यो हि सः वचनमेवं भवति॥ गार्हपत्यं प्रज्वल्य ततो दक्षिणाग्निमुद्धृत्य गा
र्हपत्यादाहवनीयं ज्वलंतमुद्धरेदिति॥ तेनाधिकृतेन पुरुषेण तस्मिन्युक्तेन वाग्निहोत्राद्यर्थं स्वकाले यथोक्तेन विधिनाऽपउद्धियते स एवाहवनीयाभि
र्भवति॥ नान्यथा॥ अन्यथा चेदुद्धियते तदा समारोप्यतमग्निं विक्षेपयप्रायश्चित्तं कर्तव्यं नान्यत्॥ अभ्युदितेष्टौ तु वचनान्मथ्योद्धृतोप्याहवनीयादि

दिर्भवति॥ एवं तर्हि कर्मान्तरालकालेऽग्निः क्वासौ तिष्ठति॥ वयमपि न जानीमः क्वासौ तिष्ठतीति॥ एतावदत्रावगंतुं शक्यते॥ सर्वे कर्मार्थमग्नयः आहिताः तत्र गार्ह
पत्यो यावज्जीवं धार्यते॥ वचनादितरौ तु कर्मणि कर्मण्युद्ध्रियेते गतश्रियः सर्वे धार्यंते॥ वचनादेव नान्यदतोऽवगंतुं शक्यते॥ एवं सति कर्मापूर्ववत्ति
ष्ठति॥ यथा यागादिजनितान्यपूर्वाणि यावज्जीवं धार्यंते॥ वचनादितरौ तु कर्मणि कर्मण्युद्ध्रियेते गतश्रियः सर्वे धार्यंते॥ वचनादेव नान्यदतो
वगंतुं शक्यते॥ एवं सति कर्मापूर्ववत्तिष्ठति॥ यथा यागादिजनितान्यपूर्वाणि यावत्फलभोगसंबंधं तिष्ठंति॥ तथाहवनीयादिरपि तिष्ठतीति॥ अ
तोऽवस्थितेषु गार्हपत्यानुगमने सर्वानुगमनं नास्तीति॥ तत्राग्न्याधेयं पुनराधेयं वा न कर्तव्यमिति सिद्धमिति वृत्तिः॥ अथ प्रयोगः॥ सर्वानुगतिस्त्रि
विधा॥ सूर्यास्तोदयात्माकृतकाले न दृष्टे चेति॥ तत्रास्तोदयात्माकृतदृष्टे च भस्मनारणी संस्पृश्येत्यादि यावज्जन्म तावन्मथित्वा गार्हपत्यायत
ने निधाय दक्षिणं प्रणीय सायं चेद्धिरण्यं प्रातश्चेद्रजतं पुरस्कृत्योक्तमंत्रेणाहवनीयं प्रणीयाग्निहोत्रं समाप्य तेष्वेवाग्निषु तपस्वतीं ज्योतिष्मतीं च
कुर्यात्॥ इदमाहवनीयपूर्वाहुतिप्रक्षेपात्पूर्वं॥ तदनंतरं चेदाहवनीये हिरण्यं निधायोत्तराहुतिं हुत्वा तत्रैव यथासंभवमग्निहोत्रं समाप्य भस्मा
नारणी संस्पृश्येत्यादि मथित्वा गार्हपत्यायतने निधाय दक्षिणाहवनीयौ प्रणीय तपस्वतीं विध्यपराधार्थं व्याहृतिहोमं च कुर्यात्॥ अस्तोदयात्मा
ऊ॰ मंथनोपक्रमाभावेऽग्न्याधेयं पुनराधेयं वा इति वृत्तिकृन्मतं॥ देवत्रातस्तु अन्येषामध्वर्यूणां यजमान एवाग्नयो भवंतीति वचनादनुदिताम्य
स्तमितेष्वरण्योः प्रत्यवरोहणं कृत्वा यथाकृत्यनु पुनर्नाग्न्याधेयं पुनराधेयं वेति॥ इति विहरणपक्षेऽग्न्यनुगतप्रायश्चित्तानि॥ अत्र किंचिदुच्य
ते॥ आश्वलायनसूत्रवृत्तिकृता विहरणपक्षे गार्हपत्यदक्षिणयोरनुगतयोरदृष्टसंधा ~~अर्थेकयोर्याद्रिय पक्षाश्रयणे~~ नार्थं तपस्वत्येष्वास्ती

३३
33

यय पूर्वाहुतिप्रक्षेपात्पूर्वमाहवनीयेऽनुगते ज्योतिष्मत्येष्टावाग्निहोत्रनिर्वाहः कर्तव्य इत्युक्तम् अजस्रविषयेऽन्वाहितविषये किमिति नोक्तमतोऽजस्रविष
येऽन्वाहितविषये च बौधायनप्रायश्चित्तसूत्रस्य सा तदाहुर्यस्य सर्वे एवाग्नय उपशाम्येयुरनुक्ता तत्र प्रायश्चित्तिरिति सोऽग्नये तपस्वते जनद्वते पावक
वते अष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये आ याहि तपसा जनेष्वा नो याहि तपसा जनेष्विति आहुतिं वाहवनीये जुहुयादग्नये तपस्वते जनद्वते
पावकवते स्वाहेति सा तत्र प्रायश्चित्तिरित्येतेन यद्वा ब्राह्मणे आहवनीयगार्हपत्यदक्षिणाग्नीनां सर्वेषां उपशान्तौ तपस्वज्जनद्वत्पावकवद्गुणत्रययु
क्तोऽग्निः पुरोडाशदेवतेति तद्ब्राह्मण्ये पूर्वोक्तदेवतात्माष्ये च सर्वेग्रहणादिदानीं तन शिष्टावाप्यच विषयद्वयेपि तपस्वते ~~जनद्वते पावकवते स्वाहेति~~
तीष्टिः प्रायश्चित्तपक्षमाश्रित्योच्यते॥ तत्रान्वाहितविषये बौधायनोक्तं पुनरन्वाधानं व्याहृतिभिरुपस्थानं चाधिकमिति विशेषः॥ अथाजस्रय
स्तेष्विकपोन्यादिपक्षाश्रयणेनाग्न्यनुगतप्रायश्चित्तानि॥ तत्र गार्हपत्येऽनुगते तदीयावक्षामे भस्मसंमीमं पेपत्॥ क्षामाभावे भस्मनारणीसंस्प
र्श्य तो जन्नरूत्पनेनमथित्वायतने निधाय तपस्वतीं पूर्णाहुतिं वा॥ अत्रापि पूर्ववदत एवैके प्रणयन्तीत्यादिकस्यांतराश्रयणं कुर्यादिति केचि
त्॥ दक्षिणेऽनुगते गार्हपत्यात्तं प्रणीय तपस्वतीं पूर्णाहुतिं वा॥ आहवनीयेऽनुगते गार्हपत्यात्तं प्रणीय तपस्वतीं पूर्णाहुतिं वा॥ गार्हपत्यदक्षिण
योर्युगपदनुगतयोः पूर्ववन्मथित्वा गार्हपत्यायतने निधाय तस्माद्दक्षिणं प्रणीय तपस्वतीं पूर्णाहुतिं वा॥ गार्हपत्याहवनीययोर्युगपदनुगत
योः पूर्ववन्मथित्वा गार्हपत्यायतने निधाय तस्मादाहवनीयं प्रणीय तपस्वतीं पूर्णाहुतिं वा॥ दक्षिणाहवनीययोर्युगपदनुगतयोर्गार्हपत्यात्तौ
क्रमेण प्रणीय तपस्व०वा॥ सर्वेष्वग्निषु युगपदनुगतेषु स्वपोस्तोदयात्प्राक् तदूर्ध्वं च भस्मनारणीसंस्पर्श्यत्यादि मथित्वायतने निधाय तस्माद

ग्निद्वयंप्रणीयतयस्तीपूर्वा॰ वा॥ अस्तोदपात्मारूढंमंथनोपक्रमाभावेल्लग्न्याधेयंपुनराधेयंवेति॥ अथैकस्योग्न्यादियज्ञाग्निप्रणेनान्वाहिताग्न्यनुगतप्राय
श्चित्तानि॥ तत्राग्न्युत्पत्तिर्जलवद्देव॥ अग्न्युत्पत्त्यनंतरमाक्रमेस्रमाप्नुः तस्यतस्याग्नेर्बौधायनोक्तंपुनराधानंवाहुतिभिरुपस्थानंवाकर्तव्यं॥सर्वानुग
मेतत्प्रपुरुपादावन्वाहितप्रायश्चित्तमेव॥ नाग्न्याधेयंपुनराधेयंवा॥ इत्यन्वाहितप्रायश्चित्तानि॥ अथाज्ञस्नविषयेन्वाहितविषयेच बौधायनो
क्तान्यप्युच्यंते॥ तानिनानाविधानि॥ तत्रस्रुकरेणोदपात्तोग्नीनामुद्धृतानांप्रायश्चित्तिरहुतःसंस्कारार्थादृष्टंभवंति चतुर्होतार इत्येकेव्याहृत
यइत्येकेमिंदाहुतीइत्येकेमनस्वतीइत्येकेऽथयदिसर्वतएवोद्धापेतुनरायतनेभ्योरण्योरग्नीन्समारोह्यमंथनस्यावृत्तागार्हपत्यंमंथतीतः प्रथ
मंजज्ञे अग्निः स्वाद्योनेरधिजातवेदाः॥ सगायत्रियात्रिष्टुभाजगत्यादेवेभ्योहव्यंवहतुप्रजानन्निति छंदोभिरेवैनऽस्वाद्योनेः प्रजानयतीतिब्रा
ह्मणमथैनमुपतिष्ठते इत्येषेष्वेरमस्वस्तइत्सेदुःस्मायोजैपस्मापेत्यथैनमुपसमिंधेस्मारस्वतोल्लोत्सोसमिंधाताऽसम्राडग्निरिडारसीत्यथै
नमुपसमाधायान्वाहार्यपचनमाहृत्यन्वलंतमाहवनीयमुद्धृत्यनुप्योपसमाधायगार्हपत्यआज्यंविलाप्योत्पूयस्त्रुचिचतुर्गृहीतंगृहीत्वाद
शहोतारंमनसानुद्रुत्याहवनीयेजुहोत्यनाद्येयजमानेस्वाहेत्यथप्रदक्षिणमावृत्यगार्हपत्येदशात्मकंब्राह्मणएकहोतेत्येतस्यानुवाकस्यद
शात्मकंवाहुतीरथयद्यन्वाहार्यपचनेस्थाचनउद्धापेद्गार्हपत्यादेनमुद्धृत्यान्वाहार्यपचनेचतुर्होतारंजुहोतिगार्हपत्येदशात्मकमथयद्याहव
नीयउद्धापेद्गार्हपत्यादेनमुद्धृत्याहवनीयेपंचहोतारंजुहोतिगार्हपत्येदशात्मकमथातःसवनगतानामाग्नीध्रीयउद्धापेद्धिष्ण्यानामुखीयादेनमु
द्धृत्याग्नीध्रीयेषड्ढोतारंजुहोतिशालामुखीयेदशात्मकमथयद्युत्तरवेदिकआहवनीयउद्धापेदाग्नीध्रीयादेनमुद्धृत्योत्तरवेदिकेआहवनीये

सप्तहोतारं जुहोत्याग्नीध्रीयेदशात्मकं ॥ एतयैवावृतैकस्मिन्नुद्धूपे द्धूपो वा प्रतिविभज्य होतृं जुहूपाद्या आहुतीश्च यत्ताः समस्ताश्च जुहूपात तथामिं
दाहुती जुहूपान स्वती चेदाहवनीये जुहूपात्तेषां जस्त्राणामन्वाहितानां सवनगतानां चाग्नीनां मध्ये ज्ञातानां प्रायश्चित्तिरिति प्रायश्चित्त सूत्रोक्तोत्प
ति मदृष्ट संधानार्थं मनस्वती प्रायश्चित्तपक्षं त्वाश्रित्य लिख्यते ॥ तत्राजस्त्र गार्हपत्ये नुगते ऽयं ते योनिरित्यनेन भस्मनारणी संस्पृश्य तः प्रथमं
जज्ञे अग्निस्त्वायोनेरधिजातवेदाः ॥ सगायत्रि पात्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति मथित्वा दृषेर्प्यो म स्वमहसेध्मापोजे यत्या
येत्युपस्थाय सा एव तौ लौ तौ समिंधातां सस्मारसि विराडसीत्युपस्थाये ध्यापतने निधायाज्यं संस्कृत्य स्त्रुचि तुर्गृहीतं गृहीत्वाहवनीये मनस्वती
जुहोति ॥ मनोज्योतिर्जुषतामाज्यं वि० ॥ तु पारष्वा उ० तेन स्वाहेति बौधायनोक्तेन मंत्रेण ॥ मनसे ज्योतिषे इदं ० ॥ एवं यत्र यत्र मनस्वती होम
स्तत्र तत्र चतुर्गृहीतेनाहवनीय एव ॥ अत्रापि पूर्ववत्कल्प्यांतरग्रपणं कुर्वंति ॥ अथ दक्षिणे नुगते गार्हपत्यात्तं प्रणीयाहवनीये मनस्वती होमः
॥ अथाहवनीये नुगते गार्हपत्यात्तं प्रणीय मनस्व० मः ॥ अथ गार्हपत्यदक्षिणयोर्युगपदनुगतयोर्भस्मनारणी संस्पृश्य त्यादि बौधायनरीत्या
मथित्वायतने निधाय तस्माद्दक्षिणं प्रणीय मनस्व० मः ॥ गार्हपत्याहवनीययोर्युगपदनुगतयोर्भस्मनारणी स्पृष्ट्वादि बौधायनरीत्या मथित्वा गार्ह
पत्यायतने निधायाहवनीयं प्रणीय मनस्वती होमः ॥ दक्षिणाहवनीययोर्युगपदनुगतयोर्गार्हपत्यात्तौ क्रमेण प्रणीय मनस्व० मः ॥ सर्वेष्वमिषु यु
गपदनुगतेषु तु पूर्ववत् ॥ एवमेवानाहितविषये ॥ तत्र अन्वाहिताश्चेदग्नय उद्धायेयुरित्युपक्रम्यान्युप्योयसमाधाय पुनरन्वाधाय व्याहृतिभिरुपति
ष्ठेते ति क्रमो ते बौधायनवचनात् पुनरन्वाधानं व्याहृतिभिरुपस्थानं चेति विशेषः ॥ अनाहितगार्हपत्यानुगतो यदि चेद्गार्हपत्याग्निर्नश्येत्स्वा

हितस्तदा ॥ मंथनं त्वेवं कर्तव्यं नोध्योत्पूर्वपावकमिति कुतूहलेप्रयोगो यालवचनात् कल्पांतरे प्रयणं नास्ति ॥ अन्वाहितानां सर्वानुगमे सत्यप्युद्धारो
न पुनराधानं ॥ अथ पशुचातुर्मास्यादिषु तत्रैवेद्ध्मावेनुगते शालामुखीयात्पुनः प्रणीयोत्तरवेद्यग्नौ मनस्व॰ मः ॥ उत्तरवेदिप्रणयनोत्तरं शाला-
मुखीये नुगते गार्हपत्यात्पुनः प्रणीयोत्तरवेद्यग्नौ मनस्वतीं हुत्वा शालामुखीयं पुनरन्वाधाय व्याहृतिभिरुपतिष्ठते ॥ अत्र शालामुखीये नुगते भस्म
समारोपणाद्यावृता मथित्वा शालामुखीये निधायेति मदीपकारादिभिरुक्तं तत्समन्वानयनपक्षे अथवा भिन्नयोनिपक्षे इति भाति इति सरिविंना
रणीये ॥ पुनराणगार्हपत्ये नुगते तु भस्मसमारोपणाद्यावृता मथित्वा पतने निधायोत्तरवेद्यग्नौ मनस्वतीं हुत्वा गार्हपत्यं पुनरन्वाधाय व्याहृतिभिरु-
पतिष्ठेत् । अथ सोमविषयाणि ॥ तत्रोपानुवाक्ये बौधायनः ॥ अथ पश्चाहवनीयगार्हपत्यावुद्धृपेयातां गार्हपत्यं मथित्वाग्नीध्रीयादाहवनीयमुद्धृ-
रेद्याग्नीध्रीयगार्हपत्यावुद्धृपेयातां गार्हपत्यमाथित्वाग्नीध्रीयमुद्धरेद्यथ पश्चाग्नीध्रीयाहवनीयावुद्धृपेयातामाग्नीध्रीयमुद्धृत्य तत आहवनीयमु-
द्धरेद्यदि सर्व एवोद्धृपेयुर्गार्हपत्यं मथित्वाग्नीध्रीयमुद्धृत्य तत आहवनीयमुद्धरेद्यदि सर्व एवोद्धृपेयुर्गार्हपत्यं मथित्वाग्नीध्रीयमुद्धृ-
त्य तत आहवनीयमुद्धरेदित्यथ वै भवति गार्हपत्यं मंथति गार्हपत्याद्वा अ॰ जनयतीति ब्राह्मणमिति ॥ अत्र प्रयोगः आग्नीध्रीयं प्रणयना-
त्पूर्वमनत्तरवेद्यग्नावनुगते शालामुखीयात्पुनः प्रणीयोत्तरवेद्यग्नौ मनस्वती होमः ॥ आग्नीध्रीयप्रणयनोत्तरमुत्तरवेद्यग्नावनुगते आग्नीध्रीया-
त्प्रणीयोत्तरवेद्यग्नौ मनस्व॰ मः ॥ आग्नीध्रे नुगते शालामुखीयात्तं प्रणीयोत्तरवेद्यग्नौ मनस्व॰ मः ॥ उत्तरवेद्यग्निप्रणयनोत्तरं शालामुखीये नुगते
पुनराणगार्हपत्ये नुगते च पूर्ववत् ॥ आग्नीध्रीयप्रणयनात्पूर्वं शालामुखीयोत्तरवेदिरूपयोर्युगपदनुगतयोर्गार्हपत्याच्छालामुखीयं प्रणीय तत् ।

३५ 35 स्मिन्मनस्वतीं हुत्वा शालामुखीयं पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत ॥ शालामुखीयाग्नीध्रीययोर्युगपदनुगतयोर्गार्हपत्याच्छालामुखीयं प्रणीय
तस्मादाग्नीध्रीयं प्रणीयोक्तएवेधग्नौ मनस्वतीं हुत्वा शालामुखीयं पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेत ॥ आग्नीध्रीयोक्तएवेधग्न्योर्युगपदनुगतयोः
शालामुखीयादाग्नीध्रीयं प्रणीय तस्मादुक्तवेदिं प्रणीय तस्मिन्मनस्वतीहोमः ॥ गार्हपत्यादिषु पञ्चसु युगपदनुगतेषु मन्थनेनारण्योः संस्पर्शेपत्या
दिमथित्वा गार्हपत्ये निधाय तस्माद्दक्षिणमाहवनीयं च प्रणीयाहवनीयादाग्नीध्रीयं प्रणीय तस्मादुक्तवेदिं प्रणीय तस्मिन्मनस्वतीं हुत्वा गार्ह
पत्यं पुनरन्वाधायोपस्थाय दक्षिणं पुनरन्वाधायोपस्थाय शालामुखीयं पुनरन्वाधायोपतिष्ठेत अथ पञ्चानां मुखीयादिषु त्रिषु युगपदनुगतेषु गार्हपत्या
च्छालामुखीयं प्रणीय तस्मादाग्नीध्रीयं प्रणीय तस्मादौत्तरवेध्यं प्रणीय तत्र मनस्वतीं हुत्वा शालामुखीयं पुनरन्वाधाय व्याहृतिभिरुपतिष्ठेतेति सो
मविषयाणि प्रदीपकारोक्तान्यग्न्यनुगमनप्रायश्चित्तानि ॥ अपान्वाधानार्थं प्रणयनोत्तरमन्वाधानात्पूर्वमग्न्यनुगतौ पुनः प्रणीय तत्र मनस्वतीं पूर्णा
हुतिं वा ॥ अत्रान्वाधायनमतान्मनस्वतीहोमः ॥ अथ चतुर्होत्रादिदर्विहोमार्थं प्रणयनोत्तरं होमात्पूर्वमग्न्यनुगतावपि पुनः प्रणीयान्वाधायनमतान्म
नस्वतीहोमः ॥ अथ पशौ शामित्राद्यसंस्कृताग्नीनां प्रणयनोत्तरं स्वस्वकार्यात्पूर्वमनुगतौ योनित उत्पाद्य श्वापनेनानुक्ततादाहवनीये व्याहृ
तिहोमः ॥ अथवान्वाधायनोक्तत्वान्मनस्वतीहोमः ॥ अत्रादिशब्देन कपालोपधिस्थापितपयेग्निकरणोल्मुकान्यविलापनचरुश्रपणार्थशधानाक
मयपरिवापामिक्षाश्रपणगोपितपत्नीपिंडपितृयज्ञतदर्थातिप्रणीतमहापितृयज्ञत्र्यंबकमाहतसुपर्णाग्रायणप्रवर्ग्यमहावीरोखाश्रपणपितृमेधार्था
दीनां ग्रहणं ॥ अत्राप्यादिशब्देनान्वाधानान्वेषणीयनिर्गोपितपत्नीसाध्यार्थप्रणीतपिंडपितृयज्ञे चाहवनीयाभावात्तस्मिन्नेवाग्नौ होमः ॥ एवं पत्र पत्र्या

हवनीयाभावस्तत्र तत्र तत्तत्कार्यकारिण्यग्नौ होमः ॥ शामित्रस्य पाकानंतरमेनुगतो गृहहोमस्योपर्यके चिदिच्छंति ॥ अन्ये तु शामित्रावक्षायाणात्तस्मात्सम्मतं
स एष लौकिकाग्निर्यतो पंतस्मत्यागाद्वा मथित्वाग्निर्दहोमं कुर्वंतीति शतद्रूपीकाराः ॥ लौकिकेन्नाविन्यापस्तंबीयप्रायश्चित्तसुबोधिनीकारः ॥ पितृमेधे
चितिमन्त्रव्याख्यानप्रमतिः शरीरदाहयर्पेतं संस्कृताग्नीनां नाशे तस्मात्स एष लौकिकाग्निर्यतो पंतरत्याघाद्वा मथित्वा मनस्वतीं हुत्वा तेनाग्निना पु
नर्दहेदितिप्रदीपकाराशयः ॥ अथोख्याग्न्यनुगतप्रा० ॥ तत्र बौधायनः ॥ अथ वै भवति यथा वै पुत्रो जातो म्रियेत एवं वा एष म्रियते यस्याग्निरुख्य
उद्वायति यन्निर्मथ्यं कुर्याद्विच्छिंद्याद्भ्रातृव्यमस्मै जनयेत्स एव पुनः परीध्यः स्वाद्वै नं योनेर्जनयति नास्मै भ्रातृव्यं जनयतीति ब्राह्मणमुख्यश्चेदुद्वा
पेद्रुक्मभस्म पर्वेश्यो रवाणं शल्कास्त्रिंद्रेन परिलिप्य पुनरेवैनं परि व्रज्यापरिदायाहुतीषाहं हुत्वाथैनं स्रुवाहुतिमिन्द्रे होति सुवर्नघर्म स्वाहा सुव
र्णार्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्नज्योतिः स्वाहा सुवर्नसूर्यः स्वाहेत्यर्कवतीभ्यामर्कसमिधावभ्यादधात्यर्कः पवित्रं पवित्रमर्को रजसो विमानरति
द्वाभ्यां मुंजकुलायमभ्यतिनाकमेणाग्नमपद्यताकृष्णाजिनवाचनादथ वै भवति तमे। वा एतं गच्छति यस्याग्निरुख्य उद्वायति मन्त्रस्तमः कृष्णं वा
सः कृष्णा धेनुर्दक्षिणेति शतमानं हिरण्यमिति तमसैवतत्तमोपहन्तेति हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिषैव तमोपहते तेजो वै हि
रण्यं तेज एवात्मन्धत्त इति ब्राह्मणमिति ॥ अथ प्रयोगः ॥ नष्टस्योख्याग्नेः पुनरुत्पादनं करिष्य इति संकल्प्य भस्मास्क्रनिक्षिप्यारवाणं शकृत्स्त्रिं
द्रेन परिलिप्याहवनीयस्यांतिमधेगारेषु स्रुवापयतीत्यादि परिदानांतं कृत्वाहुतिसहनपाग्नं कृत्वा समिधमाधाय तस्मिन्स्रुवर्नघर्म स्वाहेत्या
दिभिः पंचस्रुवाहुतीर्हुत्वा ॥ अर्कः पवित्रं रजसो विमानः ॥ पुनाति देवानां भुवनानि विश्वा ॥ द्यावापृथिवी पयसा संविदाने ॥ घृतं दुहाते अम

३६ 36 तंप्रपीने ॥ पवित्रमकोर्जसोविमानः ॥ पुनाति देवानां भुवनानि विश्वा ॥ सुवर्ज्योतिर्यशो महत् ॥ अशीमहि गाधमुत प्रतिष्ठामिति द्वाभ्यां दू अर्क
समिधौ प्रक्षिप्य मुंजकुशाप निधानादि पञ्जमाने वाच्चपन्स प्रानामुत्तमे औदुम्बर्यौ समिधावाधाय त्वं तं कृत्वा ध्वर्युर्वेकुर्यां धेनुं रूप्यं वा सं शत
मानं हिरण्यं च दद्यादिति ॥ अथायोरुण्म्यनुगत प्रा० ॥ अग्निहोत्रहविः पाकार्थमुद्धृते ग्नावनुगते पुनरुद्धृत्याहवनीयं मनस्वती होम इति प्रदी
पकारः ॥ अयोढे विद्यमाने गार्हपत्ये नुगते तु मंथनेनैवोत्पन्नि इति केचित् ॥ अयोढे कदेशं गार्हपत्ये निधाय सर्वप्रायश्चित्तमिति शतद्रुपीकारः ॥ उ
द्धृतस्य गार्हपत्यस्य च नाशे मंथनादि तपस्वतीष्टिं तं कृत्वांगारं निर्हरणादि होमशेषं समापयेदिति कुतूहलकारः ॥ अथ प्रासंगिकान्यग्निवैगुण्या
नि ॥ तत्रासादव विधानेनाग्न्युत्पादने प्रा० ॥ अत्र प्रदीपकारः ॥ आग्निषूद्धृतेष्वविधानेनोत्पादने विधानेनोत्पादने पूक्त प्रायश्चित्ताकरणे सति हूय
माने प्यग्निहोत्रेऽष माग्निहोत्रहोमकालादूर्ध्वमकृतसमत्वादाधानं कर्तव्यं ॥ चतूरात्रमहूयमानोग्निर्लौकिकः संपद्यत इति वचनादष्यमाग्निहोत्र
होमकालात्पूर्वमेवान्यथाकृतमिति सानं चेद्विधानेनाग्निमुत्पाद्य पथोक्तं प्रायश्चित्तं कृत्वा कृतानामग्निहोत्रहोमानामकृतप्रायत्वात्सोमविच्छेद प्राय
श्चित्तं मनस्वतीं हुत्वा प्रतिहोमं च कुर्यात् ॥ गार्हपत्यस्यान्यथोत्पादने एकस्मिन्होमकालेऽतीते आधानं कर्तव्यं ॥ उदयास्तमयात्पूर्वमन्यथाकृतमि
ति तानं चेद्विधानेनाग्निमुत्पाद्योक्तप्रायश्चित्तं कुर्यादिति ॥ केशवी शतद्रुपीकारौ प्येवमेव ॥ अत्र कुतूहलकारः ॥ अन्वाहितस्य लेऽविधि समारोपिता
नामनुगमोत्तरमुदयास्तादावपि न पुनराधानं ॥ अनन्वाहितस्य लेनुगमवत्येव पुनराधानं ॥ अन्वाहितगार्हपत्यमात्रस्य समारोपमेणोपक्षि
तस्यानुगमोत्तरमुदयास्तादोसत्यपि न पुनराधानं ॥ समारोपमन्मयोनेर्वमंथनोत्पादिते श्रौचतूरात्रमग्निहोत्रे हूयमानेपि पुनराधानं ॥ पक्ष

होमादिविधिनाग्निहोत्रहोमेषु कृतेषु समारोपणक्रमेण मंथनोत्पादितं दक्षिणाग्निमनुद्धृत्य क्रमादाहवनीयं प्रणयेत्॥ उक्तमंत्रेण विनावाहनीयं प्रणे
तेग्नौ समुत्पन्ने चतुर्गृहीतातिक्रमेण पुनराधानं॥ अथान्यदपि॥ तत्र कुतूहलकारः॥ अथ यदि दक्षिणाग्निमनुद्धृत्य क्रमादाहवनीयं प्रणयेत्॥ उक्तमं
त्रेण विनावाहनीयं प्रणयेत् तदा तमग्निं गार्हपत्यायतने निक्षिप्य वक्ष्यमाणप्रकारेणाग्निं विहृत्य प्रायश्चित्तं विधाय विधायविधिनाहवनीयं प्रण
येदिति देवः॥ एवमुद्धरणकालात्पूर्वं प्रणीतयोरेवाग्न्योर्विहृत्य प्रायश्चित्तं कृत्वा काले पुनः प्रणयेत्॥ यद्युद्धरणकाले गार्हपत्यायतनेऽग्निमप
रिशेष्य कृत्स्नमुद्धरणं क्रियते तदोद्धृतमग्निं सर्वं गार्हपत्यायतने प्रक्षिप्य विहृत्य प्रायश्चित्तं विधाय पुनरुद्धरणं कार्यं॥ अत्र देवयाज्ञिकः
॥ एवमिष्टिपश्वादिष्वपि सर्वोद्धरणे पशुश्रपणार्थं सर्वनयने सर्वस्याग्नीध्रीयस्योपयच्छोमार्थनयने धिष्ण्यार्थनयने च॥ सर्वत्रैकदेशनय
ने विहिते सर्वनयने कृते तेयमिति॥ अथ यमपत्नी विनाग्निप्रज्वलनप्रा०॥ तत्र बौधायनं स्मार्तसूत्रे॥ सर्वत्र स्वयंप्रज्वलितेग्नौ समिधावादधा
त्युद्दीप्यस्व जातवेदो मा नो हिंसीज्जातवेद इति द्वाभ्यामिति॥ अत्र प्रदीपकारः॥ प्रयत्नं विनाग्नौ प्रज्वलिते उद्दीप्यस्व जातवेदोपघ्नन्निर्ऋतिं मम
॥ पशूꣳश्च मह्यमावह जीवनं च दिशो दिश स्वाहा॥ मा नो हिꣳसीज्जातवेदो गामश्वं पुरुषं जगत्॥ अबिभ्रदग्न आगहि श्रिया मा परिपातय
स्वाहेति द्वाभ्यामाहुतिद्वयं मंत्राभ्यां स्वयंप्रज्वलितेग्नौ समिधावाधायाहवनीये स्रुवाहुतिरेकैव॥ मंत्रद्वयस्य जातवेदसद्वृदमिति त्यागः॥ अथाग्नि
बहिष्यातमा०॥ तत्रापस्तंबः॥ प्राक्प्रयाजेभ्योग्निं बहिष्प्राग्निधिनिर्वर्तं तमनुवदंदे नाभिनिदध्यात्मातयोमायज्ञतपनमायतपतितस्तपत्
॥ नमस्ते अस्त्वायते नमो रुद्र परायते नमो यत्र निषीदसीति॥ १॥ अमुं मा हिंसीरमुं मा हिंसीरिति च प्रतिदिशमध्वर्युर्यजमानो वा प्रस्तावेद्धस्तय

३७ जमानो दक्षिणतो होता पत्नी यजमानात्पश्चादाग्नीध्रो यजमानादुत्तरतः ॥ २ ॥ अथैनमनुमह्ये दाहं यज्ञं ददे निर्ऋते रुपस्थात्तं देवेषु परिददामि विद्वान् । सु
37 प्रजास्त्वं शतं हिमा मदंत एहनो देवा मपि शर्म यच्छेतेति ॥ ३ ॥ तमभिजुहुयात् इहस्वथं गोवृषभो जातवेदाः स्तोमपृष्ठो घृतवान्सुप्रतीकः ॥ मा नो
हिंसीद्धिंसितो नैनमोजहाम गोपोषं च नो वीरपोषं च यच्छ स्वाहेति ॥ ४ ॥ इति चत्वारि सूत्राणि ॥ प्राक्प्रयाजेभ्य इति स्रुगादापनात्प्राक् स्रुक्त्वं संगृह्य
ते बहिः परिधीत्यस्य परिधिशब्दस्य देशोपलक्षणार्थत्वात्सर्वेनो निर्वर्त्यं गृह्यते ॥ तत्र वक्ष्यमाणैः सूत्रैः स्पष्टयतीति प्रथमसूत्रस्य वृत्तिः ॥ अथ
पृमा हिंसी यजमानं मा हिंसीरिति एवं मन्त्रेण मातयन्त्येनेन प्रस्तोन्निर्गतमभिनिदध्यात् ॥ एवमुत्तरेष्वपि प्रयोगो द्रष्टव्यः ॥ चशब्दो मुमादेः स
पूर्वेण समुच्चयार्थः ॥ दिगनुक्रमणे न प्रतिदिशत्वेऽपि द्वे पत्न्येति दिशग्रहणं करोतीति तज्ज्ञापयति सर्वदिक्संबद्धं कर्म अनेन क्रमेण कर्तव्यमितीति
द्वितीयस्य ॥ नात्र स्वाहाकार इति तृतीयस्य ॥ तमिति प्रकृतमेवांगारमभिजुहुयादित्ययं इति चतुर्थस्य ॥ अत्र शतद्रूपीकारः ॥ पूर्वीवधे एमावाद
न्वाधानप्रभृति प्रयाजोपक्रमात्पूर्वमयं विधिर्भवति ॥ केचित्परिधिदानप्रभृतीत्याहुः ॥ अपरे तु स्रुगादापनप्रभृत्युत्तमप्रयाजपर्यंतमिति ॥
अथाश्वलायनानुसारी प्रयोगः ॥ आरंभप्रभृति स्रुगादापनात्पूर्वं यद्याहवनीयोग्निः प्रस्तोन्निर्गतस्तदा ब्रह्मा निर्गतमग्निं स्रुवदंडेन यात्रांतो
भिनिदध्यात् ॥ मा तपो मा यत॰ इति ॥ अथ पृमा हिंसी यजमानमा हिंसीरिति च ॥ यदि दक्षिणतस्तदा मा तपोऽध्वरः संसि ॥ ब्रह्माणं मा हिंसी
र्यजमानं मा हिंसीरिति च ॥ यदि पश्चात्तदा मा तपो॰ सि ॥ होतारं मा हिंसीः पत्नीं मा हिंसीर्यजमानं मा हिंसीरिति च ॥ यद्युत्तरतस्तदा मा तपो॰
सि ॥ आग्नीध्रं मा हिंसीर्यजमानं मा हिंसीरिति च ॥ इति यथादिशं कृत्वा तमग्निमाहवनीये प्रक्षिपेत् ॥ आहं यज्ञं ददे॰ यजेत ॥ ततः प्रहृत

मग्निमभिजुहुयात्॥ सहस्रशृंगो० स्वाहेति॥ बहूनामंगाराणां बहिःपाते परिमंत्रांतेकेषांचित्समस्ते पत्तदाव शिष्टप्रक्षेपार्थं पुनर्मंत्रो वाच्यः॥ हो
मश्च सर्वेषु प्रक्षिप्तेष्वंगारेषु सकृत्कार्यः॥ तथानकृते चेदवशिष्टांगारेषु पुनर्होमः कृतेप्यइति कुतूहले देवत्रातः॥ अस्मिन्नवसरेऽग्नेतरे बहिर्गते तु
तूष्णीं स्थापतने प्रक्षिप्याहवनीये व्याहृतिहोमः॥ अथोक्तकालातिरिक्ते कालेग्निबहिष्पाते प्रा० ॥ तत्राश्वलायनः॥ आहवनीयमवदीप्यमानमर्वा
क्शम्यापरासादिदंतएकंयाऽऽकृतएकमितिसंवपेत्॥ १॥ पदित्वतीयात्॥ २॥ इष्टिः॥ ३॥ अग्निः पथिकृत्॥ ४॥ वेत्याहि वेधो अध्वन आ देवानामपि
पंथामगन्मेत्य नड्वाहं दक्षिणेति पंचसूत्राणि॥ आहवनीयस्यैकदेशः समस्तो वापश्चापतनाडुत्सर्प्य अर्वाक्शम्यापरासात् बहिर्गच्छेत्तदा तमिदं
तएकं इत्यायतने संवपेत्॥ ततः समस्ताभिर्व्याहृतिहोमः कर्त्तव्यः॥ अग्नीनां सर्ववेदसंबंधित्वात्॥ आहवनीयग्रहणादस्मिंतरेनैतत्प्रायश्चित्तं॥ त
त्र तूष्णीं प्रक्षिप्य व्याहृतिहोमः कर्त्तव्यः॥ तस्य चविध्यपराधत्वात्॥ दीप्यमानवचनं यावत्प्रायश्चित्तकालं जीवन एवैतत्प्रायश्चित्तं भवति॥ न वि
स्फुलिंगमात्रस्येत्येवमर्थमिति प्रथमसूत्रस्य वृत्तिः॥ उक्तं शम्यापरासदेशमनतिक्रांतस्य॥ अतिक्रांतस्येदमुच्यते॥ पदित्वतीयात् शम्या
परासदेशमित्यर्थ इति द्वितीयस्य॥ इष्टिं कुर्यादिति तृतीयस्य॥ तस्यामिमं देवता॥ अग्निः पथिकृद्गुणक इति चतुर्थस्य॥ शकटवहनस
मर्थो बलीवर्दोऽनड्वां दक्षिणेति पंचमस्य॥ वोढुं समर्थोनड्वान् पंचवर्षो भवतीति देवत्रातः॥ अथ प्रयोगः॥ आहवनीयस्यैकदेशः समस्तो वा
पश्चापतनाडुत्सर्प्यार्वाक्शम्यापरासाद्बहिर्गच्छेत्तदा तमग्निमिदंतएकंयाऽऽकृ० जनित्रइत्यायतने निक्षिपेत्॥ शेषश्चेन्मंत्रावृत्तिः ततो व्याहृतिहोमः
कर्तव्यः॥ यदि शम्यापरासदेशमतिक्रम्य निर्गच्छेत्तदा पदित्वतीयादित्यत्र तु शब्दो मंत्रनिवृत्त्यर्थ इति देवत्रातभाष्यकृत्॥ तूष्णीमायतने प्रक्षिप्य पायि

३८ कृतीं पूर्णाहुतिं वा कुर्यात्॥ अथ पाथिकृत्याः प्रयोगः॥ शम्यापराग्देशाधिक्रमाहवनीयोत्सर्पणजन्यदोषपरिहारार्थं पाथिकृते ष्टापक्षे इत्यादि॥ अग्निः प
38 थिकृत्प्रधानदेवता उपांशु॥ अष्टौ कपालानि॥ वेत्था हि वेधो अध्वन आ देवानामपि पंथामगन्मेति याज्यानुवाक्ये॥ अग्नेः पथिकृतोऽहं मन्नादः॥ अन
ड्वान् दक्षिणा॥ पार्वणहोमवत्तु धोकरणपुनरालंभवर्जं सर्वं पौर्णमासवत्॥ पूर्णाहुतिपक्षे॥ अग्नये पथिकृते स्वाहा॥ अग्नये पथिकृत इदमिति॥ सूत्रे आ
हवनीयग्रहणात् अग्न्यंतरे एतत्प्रायश्चित्तं न भवति॥ अग्न्यंतरे निर्गते तु तूष्णीं प्रक्षिप्याहवनीये व्याहृतिहोमः॥ इदमेवाग्निहोत्रादावपि ज्ञेयमिति॥ अथ
संसर्गप्रायश्चित्तानि॥ तत्रादावाहवनीये स्थितेऽग्नौ पुनरुद्धरणे कृते प्रा०॥ तत्राश्वलायनः॥ साग्नावग्निप्रणयनेऽग्निवते॥१॥ अग्निनाग्निः समिध्यते
त्वं ह्यग्ने अग्निनेति सूत्रदृष्टे॥ निवृत्तकर्मण्याहवनीयाग्निनासहिते आहवनीयापतनेऽपघ्नोऽग्निराहवनीयार्थमुद्धृतमग्निमनिधायैव स्मार्ते चेदायतनस्थ
मुद्धृत्यैशानीमुद्धृतं निदध्यात्॥ तथा सतीष्टिर्न भवति॥ एतस्मिन्नपि पक्षे यद्यनपवृत्तकर्मा दृष्टे तदा व्याहृतिहोमः कर्तव्यः॥ अपवृत्तकर्मा चेन्न
किंचिदपि प्रायश्चित्तं॥ यद्यस्मिन्नेव तस्मिन्पूर्वं प्रणीते निदध्यात्तदेयमिष्टिः कार्येति वृत्तिः॥ अत्र कुतूहले देवयाज्ञिकास्तु॥ पश्चादुद्धृतो मथश्च
खनगार्हपत्ये समक्षेप्तव्यः॥ पूर्वप्रणीत एव कर्मशेषं समाप्य तत्रैव बर्हिष्यात्तन्निमित्तं सर्वप्रायश्चित्तमिति॥ कात्यायनस्तु पूर्वनिहितस्यापश्चा
त्पुरस्ताद्वा पश्चादुद्धृतं निधायोभयत्र होमः कार्य इति॥ आलेखननमते तु पश्चादुद्धृतो नुगमयितव्यः॥ नेष्टिः॥ पूर्वप्रणीते कर्मशेषं समाप्य त
त्र प्रायश्चित्तमात्रमिति॥ अथ प्रयोगः॥ तत्रेष्टिपक्षे ऽग्निसंसर्गजन्यदोषपरिहारार्थं अग्निवते ष्टापक्षे॥ अग्निरग्निवान्प्रधानदेवता॥ उ
पांशु॥ अष्टौ कपालानि॥ अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निनेति याज्यानुवाक्ये॥ अग्नेरग्निवतोऽहं मन्नादः॥ हिरण्यं दक्षिणा॥ पार्वणहोमेच

तुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे ॥ अग्नये ग्निवते स्वाहा ॥ अग्नये ग्निवत इदं ॥ अथ प्रासंगिकं ॥ तत्र कुतूहले शतरूपीका
रः ॥ पथाय यक्षू तायस्यैकदेशस्तथाविधेन लौकिकाग्निना संसृज्येत तदा न संसर्गेष्टिः ॥ किंतु तत्संसृष्टमंगारमुपेक्ष्य सर्वप्रायश्चित्तमिति ॥ पद्यायत
नाहवहिः पतितोंगारः कस्यैकदेश इति न मन्यमित्वानं तदा तमुत्सृज्याऽऽस्तताग्निवहिः पातनिमित्तं सर्वप्रायश्चित्तं जुहुयात् ॥ अथ गृहदाहे प्रायश्चि
त्तं ॥ तत्राश्वलायनः ॥ क्षामायागारदाहे ॥ १ ॥ अग्ने त्वमस्मद्युयोध्यमीवा अक्रंददग्निस्तनयन्निव द्यौरिति सूत्ररूपं ॥ यजमानस्य स्वभृतगृहदाहेष्
टिः ॥ अन्यस्य गृहवासेन दाहे पीति केशवी शतरूपीकारः ॥ अत्र केनाग्निना गृहदाहे इष्टिः कर्त्तव्येति केनापि नोक्तं ॥ अतः येन केनाग्निना स्वगृहदु
दाहे नैमित्तिकेष्टिरिति भाति ॥ अथेष्टिप्रयोगः ॥ स्वगृहदाहजन्यदोषपरिहारार्थं क्षामेष्ट्या यक्ष्ये इत्यादि ॥ अग्निः क्षामः प्रधानदेवता ॥ उपांशु ॥
॥ अष्टौ कपालानि ॥ अग्ने त्वमस्मद्युयोध्यमीवा अक्रंददग्निस्तनयन्निव द्यौरिति याज्यानुवाक्ये ॥ अग्नेः क्षामस्याहं मन्त्रादः ॥ हिरण्यं दक्षिणा ॥ पा
र्वण होमं चतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे ॥ अग्नये क्षामाय स्वाहा ॥ अग्नये क्षामायेदं ॥ परिगृहदावाग्निना
श्रौताग्निसंसर्गस्तदा शुचय इष्टिरिति केशवी शतरूपीकारः ॥ अथ शवाग्निनाग्निसंसर्गप्रा० ॥ तत्राश्वलायनः ॥ शुचये संसर्जनेग्निनान्येन ॥ १
अग्निः शुचिव्रततम उदग्ने शुचयस्तवेति सूत्ररूपं ॥ अन्य इति शवाग्निरुच्यते इति वृत्तिः ॥ प्रेतदहनाय प्रवृत्तोग्निः शवाग्निरिति ब्राह्मणभाष्यं ॥
अथेष्टिप्रयोगः ॥ शवाग्निना संसर्गजन्यदोषपरिहारार्थं शुच्येष्ट्या यक्ष्ये इत्यादि ॥ अग्निः शुचिः प्रधानदेवता ॥ उपांशु ॥ अष्टौ कपालानि ॥ अ
ग्निः शुचिव्रततम उदग्ने शुचयस्तवेति याज्यानुवाक्ये ॥ अग्नेः शुचेरहं मन्त्रादः ॥ हिरण्यं दक्षिणा ॥ पार्वणहोमं चतुर्धाकरणपुनरालंभवर्जं स

३८ वैपौर्णमासवत्॥ पूर्णाहुतिपक्षे॥ अग्नये शुचये स्वाहा॥ अग्नये शुचय इदं०॥ अथ परस्पराग्न्योर्नानाग्निसंसर्गे प्रा०॥ तत्राश्वलायनः॥ मिथश्चेद्विविचये॥
39 विते विष्वग्वातजूतासो अग्ने त्वामग्ने मानुषीरीलते विश इति मन्त्रद्वयं॥ गार्हपत्यादयः सर्वे द्वौ वा परस्परं परिसंसृज्येरन् तदा विविचये इष्टिः कार्येति वृ-
त्तिः॥ अथेष्टिप्रयोगः। परस्पराग्न्योर्नानाग्निसंसर्गजन्यदोषपरिहारार्थं विविचीष्ट्या यक्ष्य इत्यादि॥ अग्निर्विविचिः प्रधानदेवता॥ उपांशु॥ अष्टाकपा-
लानि॥ विते विष्वग्वातजूतासो अग्ने त्वामग्ने मानुषीरीलते विश इति याज्यानुवाक्ये॥ अग्नेर्विविचेरहमन्नादः॥ हिरण्यं दक्षिणा॥ पार्वणहोमचतुर्धाक-
रणपुनरालंभवर्जं सर्वं पौर्णमासवत्॥ पूर्णाहुतिपक्षे॥ अग्नये विविचये स्वाहा॥ अग्नये विविचय इदं०॥ अथ गार्हपत्याहवनीययोः संसर्गे प्रा०॥
तत्राश्वलायनः॥ गार्हपत्याहवनीययोर्वीतये १ अग्न आ याहि वीतये यो अग्निं देववीतय इति मन्त्रद्वयं॥ पूर्वस्यापमयवादइति वृत्तिः॥ अथेष्टिप्रयो-
गः॥ गार्हपत्याहवनीयसंसर्गजन्यदोषप०र्थं वीतीष्ट्या यक्ष्य इत्यादि॥ अग्निर्वीतिः प्रधानदेवता॥ उपांशु॥ अष्टाकपालानि॥ अग्न आ याहि वीत-
ये यो अग्निं देववीतय इति याज्यानुवाक्ये॥ अग्नेर्वीतेरहमन्नादः॥ हिरण्यं दक्षिणा॥ पार्वणहोमचतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत्।
पूर्णाहुतिपक्षे॥ अग्नये वीतये स्वाहा॥ अग्नये वीतय इदं०॥ अथ पचनाग्निनासंसर्गे प्रा०॥ तत्राश्वलायनः॥ ग्राम्येण संवर्गाय॥ १॥ कुवित्सु
नो गविष्टये मा नो अस्मिन्महाधन इति मन्त्रद्वयं॥ ग्राम्यः पचनाग्निरिति वृत्तिः। ग्राम्योऽग्निर्महानसादिगतः स कदाचित्प्रमादेन प्रवक्ष्यमाणगतानि गृहाणि
दहन्नग्निहोत्रशालागतानाहवनीयादीनग्नीन्संस्पृशेत् इति तदानीमिष्टिरिति ब्राह्मणभाष्यं॥ अथेष्टिप्रयोगः॥ पचनाग्निनाग्निसंसर्गजन्य-
दो०र्थं संसर्गेष्ट्या यक्ष्य इत्यादि॥ अग्निः संवर्गः प्रधानदेवता॥ उपांशु॥ अष्टौ कपालानि॥ कुवित्सु नो गविष्टये मा नो अस्मिन्महाधन इति याज्या-

नुवाक्ये ॥ अग्नेः संवर्गस्याहमन्नादः ॥ हिरण्यं दक्षिणा ॥ पार्वणहोमचतुर्थीकरणपुनरालंभवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे ॥ अग्नये संवर्गाय
स्वाहा ॥ अग्नये संवर्गायेदं० ॥ अथ वैघृतेनाग्निनाग्निसंसर्गे प्रा० । तत्राश्वलायनः । वैघृतेनाक्षमते ॥ १ ॥ अप्स्वग्ने सधिष्टव यदग्ने दिवि जा असीति
सूत्ररूपं । अत्रेष्टिप्रयोगः । वैघृतेनाग्निनाग्निसंसर्गज० र्थमक्षमदिष्ट्यापस्परत्यादि ॥ अग्निरक्षमान् प्रधानदेवता ॥ उपांशु । अष्टौ कपालानि ॥
अप्स्वग्ने सधिष्टव यदग्ने दिवि जा असीति याज्यानुवाक्ये ॥ अग्नेरक्षमतोऽहमन्नादः ॥ हिरण्यं दक्षिणा । पार्वणहोमचतुर्थीकरणपुनरालंभवर्जं
सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे ॥ अग्नये क्षमते स्वाहा ॥ अग्नये क्षमत इदं० ॥ अथान्यदीयैराहवनीयादिभिर्लौकिकाग्निभिर्वाग्निसंसर्गे
प्राय० ॥ तत्रैतरेयब्राह्मणं । तदाहुर्यस्याग्नयोऽन्यैरग्निभिः संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्नये क्षामवतेऽष्टाकपालं पुरोडाशं निर्वपेत्तस्य
याज्यानुवाक्ये अक्रंददग्निस्तनयन्निव द्यौरधा यथा नः पितरः परास इत्याहुतिं वाहवनीये जुहुयादग्नये क्षामवते स्वाहेति सा तत्र प्रायश्चित्तिरिति । य
स्याग्निहोत्रिणः संबंधिन आहवनीयाद्यग्नयोऽन्यदीयैराहवनीयादिभिर्लौकिकाग्निभिर्वा संसृज्येरन्नित्यर्थ इति भाष्यं ॥ अथेष्टिप्रयोगः ॥ अन्यदीयै
राहवनीयादिभिर्लौकिकाग्निभिर्वा मदीयाग्निसंसर्गजन्यदोषप० र्थं क्षामवदिष्ट्यापक्ष्ये इत्या ॥ अग्निः क्षामवान् प्रधानदेवता ॥ उपांशु । अष्टौ कपा
लानि । अक्रंददग्निस्तनयन्निव द्यौरधा यथा नः पितरः परास इति याज्यानुवाक्ये ॥ अग्नेः क्षामवतोऽहमन्नादः ॥ हिरण्यं दक्षिणा ॥ पार्वणहोमच
तुर्थीकरणपुनरालंभवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे ॥ अग्नये क्षामवते स्वाहा ॥ अग्नये क्षामवत इदं० ॥ अथारण्येनाग्निनाग्निसंसर्गे
प्राय० ॥ तत्रैतरेयब्राह्मणं ॥ तदाहुर्यस्याग्नय आरण्येनाग्निना संदह्येरन्का तत्र प्रायश्चित्तिरिति समेवारोपयेदरणी वोल्मुकं वामोक्षये

४० 50 द्ययाहवनीयाद्दिगार्हपत्याद्दक्षिणशङ्कुयास्तोमग्नये संवर्गायाष्टाकपालं पुरोडाशं निर्वपेत्तस्योक्ते याज्यानुवाक्ये आहुतिं वाहवनीये जुहुयादग्नये संवर्गाय स्वा
हेति सा तत्र प्रायश्चित्तिरिति ॥ दावाग्निरण्याद्दागत्याग्निहोत्रशालां दहेनाहवनीयादीन्यदा सम्यग्दहति तदानीं दहनात्पूर्वमेवाग्नीरण्योः सह समारोपये
देवत दशकोणा गार्हपत्याद्दाहवनीयाद्वोल्मुकं मोक्षयेत् ॥ सहसोल्मुकमारोपयितो गच्छेत् ॥ समारोपणं वोल्मुकमा च न नं वेतिय पक्षद्वयस्याग्निदाहलक्षणाप
दानशक्तिस्तदा संवर्गगुणकाग्निर्देवतेति भाष्यं ॥ अथैषि प्रयोगः ॥ आरण्येनाग्निसंसर्गजन्यदोषपरिहारार्थं संवर्गेष्टिमापक्ष्ये ॥ शेषं पूर्ववत् ॥ अथ जात
कर्माग्निनाग्निसंसर्गेष्टि ० ॥ तत्र कुतूहलानुसारी प्रयोगः ॥ जातकर्माग्निनाग्निसंसर्गजन्यदोषप ० र्थं संकुसुकेष्टिमापक्ष्ये इत्यादि ॥ अग्निः संकुसुकः प्र
धानदेवता ॥ अष्टाकपालानि ॥ संकुसुकोविकुसुकोपश्चविषदः ॥ मा षा ज्ये न न ल ने धे न क्रम्याद४ं शमपा से म सि उं ॥ ये ३ प ० हे अग्निं संकुसुकं अ
स्मिन्वय ४ं सं संकुसुकं सोरिमाणिमन्महे ॥ अमृयमयपत्नियाः शुद्धाः प्रण आपू ४ंषि ताषत्वौ ० इति याज्यानुवाक्ये ॥ अग्नेः संकुसुकस्याहमन्नादः
॥ हिरण्यं दक्षिणा ॥ पार्वणहोमवत्तु धर्मकाण्ड पुनराधानमवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे ॥ अग्नये संकुसुकायस्वाहा ॥ अग्नये संकुसुका
येदं ० ॥ सर्वेत्राग्न्यंतासं संसृष्टाग्निमिमरण्योः समारोप्य मथित्वा पावके होषि ः कार्येतिके शवीकाराः ॥ अथाग्न्युपघातप्रायश्चित्तानि ॥ तत्र बौधायनः
॥ सर्वेषामग्न्युपघाते षु पुनस्त्वादित्याः रुद्रा वसवः समिंधतामित्येतया समित्येतया समिधमादध्यादेतयैव स्रुवाहुतिं जुहुयादिति ॥ अत्र गोपालवि
वरणं ॥ सर्वेषामग्न्युपघाते श्वप्रपतस्पर्शमूत्रपुरीषाद्यामध्यनिरूप्यसंसर्गे वामूत्रपुरीषयोर्वेष्टमाणत्वात् ॥ यथा मेध्याभ्याधाने समारोप्य म
थित्वा पावमानेष्टिरिति ॥ अत्र महाभाष्ये ॥ अग्निरजसलाचेत्स्त्रीसंस्पर्शे दग्निहोत्रकं ॥ इष्टि रष्टाकपालेनकार्या तु शुचयेग्नये ॥ केचित्त्वाहुरग्नये पति

नस्तिकोऽस्माश्वादिभिरुपघातेऽग्निविनाशमिच्छंति ॥ नैवमाचार्यो मेने ॥ सर्वेष्वग्न्युपघातेष्विति सर्वग्रहणादिति । अत्र प्रदीपकारः । अग्निषु ध्रियमानेषु अरण्योः समारूढेषु वा शूद्रवायसपतितरासभरजस्वलासूतिकाचांडालश्वपचमेध्यादिभिः स्पर्शने समारोपो नश्यंति ॥ वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः ॥ श्लेष्माश्रुदूषिकास्वेदो द्वादशैते नृणां मलाः ॥ एतैश्च स्पर्शने अग्नीनां नाशः ॥ तत्राधानं प्रायश्चित्तमिति ॥ अत्र कुतूहलकारः ॥ रजस्वलापात्यग्निस्पर्शे इष्टिरेव नाग्न्याधानमिति केचित् ॥ अज्ञातस्पर्शे इष्टिः ॥ ज्ञातस्पर्शे आधानमिति व्यवस्थिति ॥ अथाग्नीनां विड्वादिभिर्व्योपहतौ प्रा० ॥ तत्र प्रदीपकारः ॥ आग्नीनां विड्वादिभिर्व्योपहतौ येन केनापि कारणेनाग्नीनां दोषे व्यसनति समारोप्य मथित्वाग्नीन्विहृत्य त्रिहविः पवमानेष्टिः कर्तव्या ॥ तस्याः प्रयोगः ॥ यथानिमित्तमुद्दिश्य त्रिहविष्कपापवमानेष्टापक्ष्ये इत्यादि ॥ अग्निः पवमानः । अग्निः पावकः ॥ अग्निः शुचिरिति त्रयः प्रधानदेवताः ॥ अस्यामिष्टौ बौधायनोक्तत्वात् प्रधानं उच्चैः ॥ सर्वे षट्कपालाः ॥ अग्न आयूंषि पवसेऽग्ने पवस्व स्वपा अ०र्यं ॥ दधत्पोषं रयिं मयीत्यग्नेः पवमानस्य याज्यानुवाक्ये ॥ अग्ने पावक रोचिषा मन्द्रया० पावक दीदिवइत्यग्नेः पावकस्य ॥ अग्निः शुचिव्रततम उदग्ने शुचयस्तवेत्यग्नेः शुचेः ॥ सर्वेषामन्वाहार्यः ॥ हिरण्यं दक्षिणा ॥ पार्वणहोमचतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत् ॥ इष्ट्यशक्तौ तत्तद्देवतायै तत्तद्दिष्टितयाज्यानुवाक्याभ्यां पूर्णाहुतिं जुहुयात् ॥ अथवा चतुर्थ्यंतेन तत्तद्देवतानाम्ना तत्तद्देवतायै एकैकां स्रुवाहुतिं जुहुयात् उभयत्रापि यथालिंगं त्यागः ॥ एवं सर्वत्र बौधायनोक्तेष्टिस्थाने भवति ॥ सर्वत्राग्नीनामन्यस्योपहतौ उदकेनोपहतौ च पुनरस्त्वेति समिदाधानं पुनस्त्वेति स्रुवाहुतिश्चेति ॥ अथ पारीबीजकादिस्पर्शे प्रा० ॥ तत्र कुतूहलकारः । पारीबीजकादिस्पर्शे सर्वप्रायश्चित्तं ॥ पारीबीज

४१ जकारश्च: तत्तत्स्वरूपं च कर्त्तव्ये गुण्यप्रायश्चित्तावसरे । यः सोऽदोज्येष्ठ इत्यादिपरीक्ष इत्यं तं ज्ञेयं ॥ अथाग्निसमीपे अप्रयतो प्रवेशनविचारः । तत्राप स्तं
बसूत्रविषयं । अग्निनाप्रत आसीदे दिक्षुमात्रादित्येके इति । अत्रो ज्वलाकाः । अप्रयतः सन्नग्निनासीदेत् अग्रे ए सन्त्रो न भवेत् पावति देश उभ्यो
पलंभः अत्राप्यशङ्को न दोषः । एके आचार्या इषुमात्राद्वाक्यनासीदे इष्योपलंभो भवतु वा मा भूदिति मन्यते इति अथाग्न्यपहारे प्रा० ॥ तत्र अग्नौ सीना
मेकदेशस्य लपहोमे न स्वतीति काएकाकाएमतादेकदेशापहोमे न स्वती प्रायश्चित्तमिति ॥ अथ व्यवायप्रायश्चित्तानि ॥ तत्राश्वलायनः ॥ यदि
वा स्या स्यो ग्नि एनीन्यवेयाद्ध दिवास्याग्निहोत्रं उपसन्ने हविषि वा निरुप्ते चक्री वच्छ पुरुषो वा विहारमन्तरियात् ॥ १ ॥ इष्टिः ॥ २ ॥ अग्निः पथिकृत् ॥ ३ ॥ वेश्या
ह्विधो अध्वन आदेवानामपियं धाम गन्मेत्यनड्वान् दक्षिणा ॥ ४ ॥ व्यवायेऽल नाग्नेनो प्राणिषेणो मन्तरेणातिक्रमयेता ॥ ५ ॥ भस्मना श्वनः पदं प्रतिवपेदि
दं विष्णुर्विचक्रम इति ॥ ६ ॥ गार्हपत्याद्धवनीयायोदतेः भस्मए ज्योदकए न्याच संततनुयाद्ततन्वन्त्र जसोभानुमन्विहीति ॥ ७ ॥ अनुगमयित्वा चाहवनी
यं पुनः प्रणीयोपतिष्ठेत ॥ ८ ॥ परवेग्न्यपूर्वे प्रहितं यदं हितं सपर्यस्य एष्पीनन्वात तानु ॥ तत्रापि च्छामनु संभवेतां सत्रः सृजसू मत्यावाजवत्या ॥ त्व म
ग्ने सप्रथा असीति चैति नवसूत्राणि ॥ अस्यायमीनयोवाऽग्निर्व्यवेयात् । यद्यग्निहोत्रं इध्मे कुशेषूपसादिते दर्शपूर्णमासादिषु वा हविषि निरुप्ते
चक्री वद्धपशकटादिश्वा वा । पुरुषो मनुष्यजातिः । स्व वा । अग्नी नाम मध्ये नातिक्रामेदिति प्रथमसूत्रस्य वृत्तिः ॥ द्वितीयचतुर्थो नो पूर्वमुक्तौ । अ
ग्निचक्रीवच्छु पुरुषे व्यवाये इष्टिरुक्ता । तत्राग्निवर्जितैर्व्यवायेगवाति । क्रमणं भस्मएन्युदकए । निम्पांसेना न मनुगमयित्वा प्रणयनमुप
स्थानमिति विशेषः । श्व व्यवायेऽल पम प्यपटे विशेषः । भस्मना श्वनः पदं प्रति वपेदिति ॥ एते पदार्था नि निमित्तानंतरमेव कर्त्तव्याः ॥ त

तो वर्तमानं कर्म समाप्येष्टिः कर्तव्या ॥ दर्विहोममध्ये एष विधिः ॥ इष्टिमध्ये तु तदेव तंत्रमुपजीव्य तत्रैव पाथिकृती कार्या ॥ प्रागिष्टेरिति वचनं पूर्वो-
क्ताया अपीष्टेः प्रागेवैते पदार्थाः कार्या इत्येवमर्थमिति पंचमस्य ॥ अनो यानि पदानि तानि भस्मना प्रतिवपेत् ॥ पूर्वे येऽदित्यर्थः प्रतिपदं मंत्राव-
त्तिरिति षष्ठस्य ॥ प्रति एजि मंत्रावृत्तिरिति सप्तमस्य ॥ एजिभ्यां संतानं कृत्वा आहवनीयमनुगमयेत् ॥ ततः प्रणीयोपतिष्ठेत ॥ पदमग्ने पूर्वं त्वम-
ग्ने सप्रथा असीति च द्वाभ्यां ॥ चशब्दः पूर्वोत इति कारणाभावात् त्वमग्ने सप्रथा असीत्यस्य पूर्वमंत्रशेषाशंकानिवृत्त्यर्थः ॥ इष्टेरपि स एव विहारः
॥ प्रायश्चित्त अस्तमित्ये पूर्वप्रवृत्ता अग्न्यनुगमपि त्वाहवनीयं पुनः प्रणयेदित्यष्टमस्य ॥ अथ प्रयोगः ॥ यदि यजमानस्याग्नीनन्यो लौकिको व्य-
वेयात् ॥ अनुगताग्निहोत्रद्रव्ये कुशेषु सादिते दर्शपूर्णमासादिषु हविषि निरुप्तेषु चरपशकुनादि श्वा पुरुषो वान्यो नामध्येऽतिक्रामेत्तदाग्नि व-
र्जितैरन्यैर्भस्म वापेत् तूष्णीं गामंतरेणातिक्रामयेत् ॥ भस्मवापे तु इदं विष्णुर्विचक्रमे० सु इति मंत्रेण गार्हपत्यभस्मना पुनः पदं यत्र येन्प्रतिपदमं-
त्रावृत्तिः ॥ ततोऽग्निवर्जं सर्वत्र तंतुं तन्वन्रजसो० जनमिति मंत्रावृत्त्या गार्हपत्यादाहवनीयपर्यंतं गार्हपत्यभस्मोरवांजलधारां च कृत्वाहवनीय-
मनुगमयित्वा गार्हपत्यात् पुनः प्रणीयोपतिष्ठेत ॥ भिद्यते इति गम्यते तेनैतद् दृष्टिं भावति ॥ हविर्भ्यश्चाग्न्योरन्तरं तमाहुर्विः च प्रधानाप्रधानवि-
पदमग्ने पूर्वं प्रहितं० वत्या ॥ त्वमग्ने सप्रथा असि जु० न्वतर इति द्वाभ्यां ॥ ततो वर्तमानकर्माग्निहोत्रं चेत्समाप्येष्टिमध्ये चेत्तदेव तंत्रमुपजीव्य समा-
प्य वा तेष्वेवाग्निषु पाथिकृतीं कुर्यात् ॥ इष्टावपि समिष्टयजुष ऊर्ध्वं चेद्व्यवाये तदेव गवातिक्रमणाद्युपस्थानांतं कृत्वा तत्कर्म समाप्य तेष्वेवाग्निषु
पाथिकृतीमिति कुतूहलकाराः ॥ अनुगमनं प्रणयनं पक्ष एव ॥ नाजस्त्रे ॥ अग्निना भवाये तु पाथिकृत्येव नान्यद्रवातिक्रमणादि ॥ अत्रेतरे पंचास्त-

४२ णां। तदाहुर्यस्य गार्हपत्याहवनीयावन्तरेणानो वा रथो वा श्वा वा प्रतिपद्येत का तत्र प्रायश्चित्तिरिति नैनन्मनसि कुर्यादित्याहुरात्मन्यस्याहिता भवन्तीति
तद्वै मनसि कुर्वीत गार्हपत्याद् विच्छिन्नामुदकधारां हरेत् तन्तुं तन्वन्रजसो भानुमन्विहीत्याहवनीयात्तत्र प्रायश्चित्तिरिति। अत्र तन्मन्त्रार्थः॥ गार्ह-
पत्याहवनीययोर्मध्ये शकटं वा रथो वा श्वा वा यदा गच्छेत्तदानीमेतच्छकटादिकं मनसि न कुर्यात्॥ अस्यानुष्ठातुरात्मनि स्वकीये पारमार्थिकस्व-
रूपे वेदान्तप्रतिपाद्ये वह्नयो निहिता भवन्ति तानि शकटादीन्यवतिष्ठंते॥ अतः शकटादिरूपत्वबुद्धिं परित्यज्य परमात्मबुद्धिं कुर्यात्। यद्यात्मविवेकाभा-
वेन तच्छकटादिकं मनसि कुर्वीत शकटादिषु स्थितं परित्यजेत् तदानीं गार्हपत्यादारभ्याहवनीयपर्यंतमविच्छिन्नामुदकधारां हरेत् तंतुं तन्वन्रजसो
भानुमन्विहीति मन्त्र इति॥ इदं प्रतिक्रमे कालादर्धमन्त्रकर्माऽऽम्नातं द्रव्योपसादनात्पूर्वं होमोत्तरं चेति कुतूहलकारः। हविरादीनोव्यवापे आश्व-
लायनः॥ उत्तरेण होतारमतिव्रजेद्दक्षिणेन दंडं हरेन्न चानेन संस्पृशेदात्मानं वस्त्रं वा प्रैषवचनात्।१। अन्यास्वपि यत्तागामनुप्रयुक्तानि न विहारे-
णाध्वेयात्। इति सूत्रद्वयम्। अनेन दंडेन आत्मानमन्यं वा न संस्पृशेत्। आप्रैषवचनात्। यावत्प्रैषोच्चारणं नास्ति तावदयं नियमः॥ आद्ये
प्रथमप्रैषे नायं नियम इति प्रथमसूत्रस्य वृत्तिः॥ अन्यास्वपीति वचनाद्यत्पूर्वोक्तमुत्तरेण होतारमतिव्रजेद्दक्षिणेन दंडं हरेदिति तदपि
व्यवायपरिहारार्थमेवेति गम्यते तेनैन दृष्टिं तं भवति॥ हविर्मध्यस्थाग्नयोत्तरमाहविःषु चमसधानामधानविशेषोऽस्ति ततः स्रुगादीनि सा-
धनानि तेषु च विशेषोऽन्वेषणीयः ततः कर्तारः तेषु च स्वामिमुख्यद्वितीयततीयचतुर्थेषु विशेषः त्वेवंरूपाणि तेषु पश्चादेकृते यत्तांगा-
नि विहारेणाध्वेतानि भवंतीति॥ उपयुक्तवचनमनपवृत्तकर्मणामेवग्रहणार्थम्॥ सर्वार्थं चेदं सूत्रं व्यवायप्रतिषेधपरत्वादिति द्वि

तोपस्य ॥ अत्र धर्मसूत्रे बोधायनः ॥ नमंत्रवतापत्तौ गेनात्मानमभियाणि होरस्यंतरारणिपत्तां गाति बाह्या ऋत्विजः पत्नीयजमानौ नारलिप्येतां त
रतमोपपत्तौ गोस्य आज्यमाज्यास्थवीषि हविर्भ्यः पशुः पशोः सोमः सोमाद्यस्मपोपपाकर्मेत्र ऋत्विज रति ॥ अथप्रयोगः । उक्तकारादिति रिक्तकालेतं तरग
मने हविष्पात्रादीनां स्ववापेच्च स्वसूत्रे नुक्तत्वाच्च हुति होमः कर्तव्य इति भाति । अथ गृह्यप्रकीर्णप्रकरणस्थं बौधायनोक्तं तेयमिति ॥ अथार
णिविषयं प्रा० तत्राश्वलायनः ॥ समारूढेषु चारणीनाश इति सूत्रं ॥ अग्निषु अरण्योः समारूढेषु सत्सु अरण्योर्नाशेऽग्न्याधेयं पुनराधेयं वा कर्तव्यं ॥
अन्यतरारणिनाशेपि भवत्येव तत्प्रायश्चित्तं तयोरेकैकस्या एवकार्यविशेषनियमाज्ज्ञापायतिसंस्कृत तत्वाच्च ॥ नन्वरणीनाश इति शब्दएक
स्याम्यप्यनष्ठापां नप्रवर्तेत इति ॥ सत्यमसौ शब्दो न प्रवर्तते तथापि मंथनपरार्थी नैकया संपादितुं शक्य त इति ॥ अनष्टापि नष्टैवेति कुल्लोक्तं ॥ यदि
परमनष्टामेवृद्धिधाकृत्वा मंथनसिद्धिरिति तथापि नैवं वक्तुं शक्यते ॥ उपादानकाले अरणी आहरेदिति द्वयोरुपादानमदृष्टार्थं स्यात् इति पु
नः कार्यभेददर्शनादिति ॥ एवं सति उर्वशी पुरूरवः संस्कृतिरधरोत्तरयोररण्योः श्रूयमाणा नोपपन्ना भवतीति युक्तमिति वृत्तिः ॥ अन्यतरारणिवि
नाशे तु शिष्टादिद्विधाकृत्वा मथनं कर्तव्यमिति सिद्धांतभाष्यकृत ॥ केचिन्मस्य स्थष्टारणीनाशे प्यग्निनाशमिच्छंतः पुनराधानं कर्तव्यमिति वर्णयंती
ति शतदूपीकारः ॥ देवत्रातस्तु येषां यजमानरवाग्नयो भवंतीति वचनात्ते अरणी आहृत्य नयोः मत्यवहसमेथंतिनाग्न्याधेयं पुनराधेयं वेति
॥ अत्र बौधायनः ॥ अथ यद्यरणी जीर्णे स्यातां जंतुभिर्मथनेन वा समानेन वे अन्ये अरणी आहृत्य मावास्यायामुपोष्य मोभूते दर्शेनेष्ट्वा
तस्मिन्जीर्णे शकलीकृत्य गार्हपत्ये प्रक्षिप्य प्रज्वाल्य दक्षिणेनोत्तरारणिमादाय सव्येनाधरारणिमुपर्यग्नौ धारयन् जपत्सु उद्बुध्यस्वाग्ने प्र

४३ विशस्तयोनिमन्थाद्देवपत्न्यां वा देवेजातवेदः ॥ अरण्योररणी अनुगतं क्रमस्तजीर्णौ तनुमजीर्णपाणिर्गृह्णुदस्वेत्य यथापंते योनिर्कृत्ति यरृत्वारण्योरग्नी न्स
43 मारोह मंथनस्यावतागार्हपत्यं मथित्वा विहाय कृत्स्नपित्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीत्वाहवनीये संतनिं कृहोति मनो ज्योति॰ घृ
तेन स्वाहेत्यथाग्नये तंतुमते पुरोडाशमष्टाकपालं निर्वपति शरावं दक्षिणां ददाति साप्रसिद्धेष्टिः संतिष्ठते ॥ अथातोरण्योर्व्यापत्तिव्याख्यास्यामो
ऽभिर्निर्मित्ते विनश्यत्समेध्यश्वचांडालशूद्रवायसपतितरासभरजस्वलाभिश्च संस्पर्शेनेऽरण्योर्विनाशस्तत्पोहुत्स्नन्त समाने नवे अन्ये अर
णी आहृत्याग्निगतमग्न्याधेयमरणिगतं पुनराधेयं नष्टारणी अस्तु निमन्थतिमवतेना समनसावित्यथो तरोस्यि त्वाभित्वा शकली कृत्य मंथन
सामर्थ्ये समारोपणसामर्थ्ये मंथनशेषं वा प्रमंथनेन कुर्यात् समस्तशकल्यवर्जं संतिष्ठते रण्योर्व्यापत्तिरितिप्रायश्चित्तसूत्रद्वयं ॥ अत्र द्वैधं ॥ अ
पहृतारण्योर्नष्टारणीकस्येति सूत्रं शालीकेत्रोह स्माह बौधायनः ॥ कामं नष्टेषु वापहृतेषु वाग्निषु नाद्रियेताग्न्याधेयमाधानप्रभृति यजमान
एवाग्नयो भवंतीति तस्य प्राणो गार्हपत्योपानोन्वाहार्यपचनो व्यान आहवनीयः कामममुपावरोहन्नुहुयादिति ॥ अत्र क्रमोंते ॥ अपहृतारण्योर्नष्टार
णीकस्यब्रह्मौदनेनैव प्रतिपद्यते सिद्धमग्न्याधेयमिति ॥ अत्र बौधायनानुसारी प्रयोगः ॥ अरणीनाशो द्विविधः ॥ असमारूढात्मकः ॥ समा
रूढात्मकश्च ॥ समस्ते प्येकं त्रिविधः ॥ कार्याक्षमत्वं ॥ स्वरूपनाशः ॥ अमेध्यादिनोपहतिश्च ॥ तत्रादावसमारूढनाशप्रयोगः ॥ विद्यमानेष्वग्नि
षु पद्यरणी कार्याक्षमे स्यातां तदोत्सेधापामविस्त्वा जोत्स्या दो: पूर्वोरण्योः समे अन्ये रनुपयुक्ते लक्षणान्विते कार्याक्षमे नवे अन्ये अर
णी संपाद्यामावास्यायां मातदरग्निहोत्रं हुत्वा भस्त्यास्थव्यवाहादिति मंत्राभ्यां अरणी आहृत्याग्न्याधानादि कृत्वोपोष्य श्वोभूते दर्शे

नेष्टा जीर्णे अरणी शकलीकृत्य गार्हपत्ये प्र। क्षिप्य प्रज्वाल्य नवे अरणी दक्षिणेनोत्तरारणिं सव्येनाधरारणिं मार्गयगार्हपत्याग्नेरुपरि धारयं जप
ति॥ उद्बुध्यस्वाग्ने प्रविश स्वयोनिमिति सौत्रं मंत्रमुक्त्वा यं ते योनिरिति मंत्रेण नवारण्योः समारोपणं॥ इतः प्रथममित्यादिना मंथनादि कृत्वाग
र्हपत्यायतनं शकृतो येन परिलिप्यायतने ग्निं निधायाग्निद्वयं प्रणीयाज्यं संस्कृत्य चतुर्गृहीतेन मनस्वतीं हुत्वा तां तु मतेष्टिं कुर्यात्॥ तस्याः प्रयोगः
॥ अरणीनाशजन्यदोषपरिहारार्थं तां तु मतेष्टाय पक्ष्ये इत्यादि॥ अग्निस्तंतुमान्देवता॥ अस्यां दृष्टौ बौधायनोक्तत्वात्प्रधानमंत्रैः॥ अथैकपा
लानि॥ त्वं नस्तंतुरुत सेतुरग्ने त्वं पंथा भवसि देवयानः॥ त्वयाग्ने पृष्ठं वयमारुहेमाथा देवैः सधमादं मदेम॥ स्वपं कृण्वानः सुगमप्रयावं।
तिग्मशृंगो वृषभः शोशुचानः। प्रत्नं सधस्थमनुपश्यमान आ तंतुमग्निर्दिव्यं ततान वौषडिति याज्यानुवाक्ये॥ अग्नेस्तंतुमतोहमन्नादः॥ शरावं
दक्षिणा॥ एकभोजनपर्याप्तमन्नं शरावमित्युच्यते॥ पार्वणहोमचतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत्॥ इष्ट्यशक्तौ याज्यानुवाक्याभ्यां
पूर्णाहुतिः॥ अथवाग्नये तंतुमते स्वाहेति स्रुवाहुतिः॥ अग्नये तंतुमत इदमिति त्यागः॥ स्वाहपतो नाशेपि शकलीकरणं विना तां तुमत्ये
तं पूर्ववत्॥ अरण्योरमेध्यादिनोपहतौ उत्सेधायामादिना अग्नये आहत्स्य उपहते अन्यप्रक्षिप्य दर्शेनेष्ट्वेत्यादिना तंतुमतीं पूर्ववदेव। अमेध्या
स्याह गोपालः॥ अमेध्यामूत्रविट्कौ(?)तः श्लेष्मा श्रुपूपिकाः॥ मानुषास्थि नखस्वेदमद्यान्नवसादय इति॥ अन्त्ययागं तं प्रदीये। वसा शुक्रम
सृङ्मज्जामूत्रविट्करणे विण्नखाः॥ श्लेष्मा श्रुपूपिकास्वेदो द्वादशैते नृणां मला इति॥ चंडालग्रहणं सर्वेमपि लोमोपलक्षणं॥ उदक्याग्र
हणोनेह सूतिकापि वेति॥ पतत्पार्श्वे॥ सप्तभिः पंचभिर्वापि त्रिभिर्वा वेष्टनैः पुनः॥ अरणीनप्रदृष्ये(?) तपतितादि समागम इति। वेष्टनद्रव्या

४४ ण्याहृ शौनकः॥ अजिनं कंबलं दर्भा गोकेशाः शाणमेव च॥ भूर्जपत्रं ताडपत्रं सप्तधा वेष्टनं स्मृतमिति॥ अत्र प्रकारत्रयेपि नूतनारणीसंपादनपर्यं
तं अग्नीन्समारोहितः पालयेत्॥ नूतनारणीसंपादनात्पूर्वं अग्न्युपोगनाशे तु पुनराधानं कुर्यात्॥ अन्यतरनाशे पाकार्यक्षमां तां द्विधा कृत्वा यथापूर्वं परि
चरेत्॥ पद्याधाने समारोपणानंतरं मंथनात्पूर्वं अरण्योर्नाशे उपघाते प्रहारे वा सति प्रयोगामुत्सृज्यादित आरभ्य कालांतरे आदधीतेति प्रदीपकारः॥
प दाहकृतु मध्ये जीर्णे उपहते नष्टे वा स्यातां तदानीमेवान्ये नूतने आहृत्य उपहृते चेद् स्रुप्रक्षिप्य जीर्णे चेदग्नौ शकलीकृत्य निक्षिपेदित्यादितां तु मत्यं
तं कुर्यात्॥ अन्यतरनाशे पूर्ववत्॥ अथ पक्षमाहृच्छनाशप्रयोगः॥ अथ यदि समाहृतारणी कार्याक्षमे स्यातां तदा भवतं नरत्न स्रुप्रक्षिप्य नवे
अरणी आहृत्य पुनराधेयं कुर्यात्। स्वरूपतो नाशेपि अस्रुप्रक्षेपं विना पुनराधेयं कुर्यात्॥ अमेध्यादिनोपहतौ अस्रु प्रक्षिप्य पुनराधेयं कुर्यात्
अन्यतरनाशे पाकार्यक्षमां तां द्विधा कृत्वा तयामंथनादि कुर्यात्॥ शतद्रूष्यां तु। अथापद्यरण्योः शक्तिविषये नुग्रह उक्तः॥ आरोपितानां वा यदि प्र
णाशः स्यादाधानमापदि तु लौकिकेग्नौ॥ उपावरोह्य प्रत्यस्य जीर्णे आरोप्य मंथेन्नवारणीभ्यामिति॥ अयमत्र क्रमः॥ समारूढमग्निमुपावरोहेति
मंत्रेण लौकिकाग्नावुपावरोह्य तस्मिन् जीर्णारणी प्रक्षिप्य तस्मिन्नग्नौ नवे अरणी अरण्योर्निहितो जातवेदा इति मंत्रेण समारोप्य माथित्वा उपा
वरोहेति निर्वर्तमानजनं कृत्वा गार्हपत्यायतने निदध्यात्॥ इदमेवात्र पुनराधानमिति। अयं न्यायोस्माकमप्यनुग्राह्यो भवति॥ समारूढस्या
रण्योरन्योपहतौ मथित्वाग्नीन् विहृत्य मनस्वतीं जुहुयादिति प्रदीपकारः॥ असमारूढारण्योरन्यतरस्योपहतौ तु तक्षणप्रोक्षणाभ्यां शुद्धिः।
।पाणौ समारोपणे कृते यजमानस्यापन्नो ततः पाणिनान्वारभ्य मंथनेनाग्निं संपाद्यान्यतरस्ससर्गनिमित्तामिष्टिं कृत्वा स्थिपचाग्निसंस्कारं।

कुर्यात्॥ अरण्यभावे ऽप्येतदाधानं पालाशविधिश्च॥ अरणीनाशे ऽप्येवमिति॥ अथ प्रसंगान्मंथनप्रदेशादि लिख्यते॥ तत्र प्रदीपकारः। उक्तलक्ष
णसंपन्नामधरोत्तरारणिं च संपाद्याधरारण्या मूलभागे ऽंगुलद्वयं मुक्त्वा पार्श्वयोस्त्रीण्यंगुलानि मुक्त्वांतरा देवयोनिस्तन्मध्ये हुताशनस्तत्र मं
थनं कुर्यात्॥ उत्तरारण्या मूलभागे ऽष्टांगुलप्रमाणं षडंगुलप्रमाणं वा प्रमंथनशकलं छित्वातीक्ष्णं कृत्वाष्टादशांगुलप्रमाणं खादिरमयं नवं दंड
सुषिरे प्रमंथनशकलं मूलतः कीलयित्वा मंथनप्रदेशे निधाय खादिरेणाष्टादशांगुलप्रमाणेनापक्वीलितेन प्रमंथनदंडेनोपर्युपरि रुपित्वा मं
थयेत्॥ अरणिः कृमिदष्टा चेत्पुत्रहानिर्दाग्रे पिपुक्ता चेत्पत्नीहानिः सा अपाटिता चेद्दुःखदा सुषिरा चेद्यजमानहानिरिति॥ अत्र त्रिकांडमं
डनकारः॥ क्लिन्नारणिः पुत्रहंत्री स्फुटिता शोककारिणी॥ ग्रंथिमूर्ध्वे तु च क्षुध्नी यतिघ्नी सुषिराश्रितेति॥ अतः सुषिरादिदोषरहिते उक्तल
क्षणे अरणी ग्राह्ये इति॥ ॥श्रीमद्विठ्ठलात्मजचंद्रदीक्षितप्रसादाद्वैजक्षेत्रापरनामवाणिक्षेत्रवासिपिटेइत्युपनामकमयूरेश्वरा
त्मजविश्वंभरदीक्षितग्रथितायां श्रौतप्रायश्चित्तप्रयोगरत्नमालायामग्न्यनुगमनाद्यग्निवैगुण्यारणिवैगुण्यानि च प्रायश्चित्तानि॥ छ
॥ अथ हविःस्कंदनादिप्रायश्चित्तानि॥ तत्रादावाधाने प्रभूतान्यशेषनाशयोः॥ तत्र कुतूहले रामांगः॥ प्रभूतान्यशेषनाशे अन
न्यत्वाः समिध आधेया इति॥ विस्मृताश्चेत्॥ अनाहितस्तस्याग्नयः समिधो नाधायाग्निमाधत्त इति श्रुतेः॥ अत्र पुनराधानप्रयोगः क
र्तव्य इति। समिन्नाशे ऽवशिष्टसाधनैर्वैगुण्यावसरोक्तं संभावनाशवत्प्रायश्चित्तं कर्तव्यं॥ अथाग्निहोत्रविषयाणि॥ तत्र प्रसंगादग्नि
होत्रद्रव्याणि। तत्र प्रदीपः॥ अग्निहोत्रे पयसा नित्यहोमः॥ पयसो ऽभावे ब्रीहिभिर्यवैर्वा तयोरभावे श्यामाकादिभिरारण्यैस्तेषामभा

४५ वे ॥ तैलं दधिपयः सोमोयवागूरोदनंघृतं ॥ तंडुला मांसमाषश्च दश द्रव्याण्यनुक्रमात् ॥ तेषाममन्यतमेन जुहुयात् ॥ दध्नोधिश्रपणं नास्ति ॥ आज्यतै
लपोः प्रतिषेचनस्थाने दर्भाग्रद्वयं क्षिपेत् ॥ ओदनपक्षे सिद्धमोदनमानीय जुहुयात् ॥ यवागूमत्रैव श्रपयेत् ॥ तंडुलानां च मांसादेर्नाधिश्रयण
मेवचने ॥ व्रीह्यादीनां द्रव्याणाममावे मंत्रजप इति ॥ अथ पक्षान्तरप्रा० ॥ तत्राप्यादोहपयःपक्षान्तरप्रा० ॥ तत्राश्वलायनः ॥ यस्याग्निहोत्र्युपावसृष्टा
दुह्यमानासीदेत्सा यत्तत्र स्कंदयेत्तदभिमृश्य जपेद्यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरत्यसृपद्यदापः ॥ पयो गृहेषु पयो अघ्न्यायां पयो वत्से
षु पयो अस्तु तन्मयीति ।१। तत्र यत्परिशिष्टं स्यात्तेन जुहुयात् ॥२॥ अन्येन वाभ्यानीय ३ एतद्दोहनाद्यप्राचीनहरणात् ४ इति चत्वारि सू
त्राणि ॥ दोहनावस्थायां पयसि स्कन्ने यद्युत्पतनेन अभिमर्शनं स्कन्नमभिमंत्रयेत दोहनावस्थायां स्कन्ने एतन्मन्त्रवतीत्येतावदत्राविवक्षितं ॥
इत्याश्वलायनानुवादः ॥ पयोलिंगत्वात्पयस्येवेदं भवतीति प्रथमसूत्रस्य वृत्तिः ॥ अर्थप्राप्तस्य विधाने शेषकार्यस्यापर्याप्तावपि तेनैव होमः क
र्तव्यः ॥ शेषकार्यस्य भस्मादेर्लोप एव स्यात् ॥ अप्रयोजकत्वाद्द्रव्यस्येति द्वितीयस्य ॥ जुहुयादिति शेषः ॥ होमस्यापर्याप्ताविदं भवतीति तृती
यस्य ॥ मर्यादायामयमाकारः उत्तरत्र तत्रेति वचनात् ॥ दोहनवचनं पूर्वसूत्रे स्कंदननिमित्तविशेषणाविवक्षितत्वसूचनार्थं ॥ आदिग्रह
णमधिश्रितेपि पयसि स्कन्ने एतदेव प्रायश्चित्तं न ब्राह्मणोक्तं ॥ अधिश्रितं स्कन्दति वा विष्यंदते वेति ॥ इदं तु द्रव्यान्तरेष्वभवति ॥ विष्यंदने तु पयस्य
पीदमेव भवति ॥ विष्यन्दने ऽधिश्रिते अन्यस्यानाम्नानात् ॥ तत्र यत्परिशिष्टमित्यादि द्रव्यान्तरेष्वपि साधारणं अन्यस्यानाम्नानात् ॥ उत्तीया एमः
हवनीयं प्रति हरणं प्राचीनहरणमित्युच्यत इति चतुर्थस्य । अग्निहोत्रहविरर्थे दोग्धव्या धेनुरग्निहोत्री । यस्याग्निहोत्रिणः संबंधिनी सा धेनुः

उपावसृष्टा वत्सेन संयोजिता दुह्यमाना सती दोहनस्य विघ्नं कृत्वा परिस्पन्देत तदानीं प्रायश्चित्तमित्येतदेव ब्राह्मणभाष्यं ॥ स्कन्दनं नाम स्खलनं ॥ अधःप
तनमिति यावत् ॥ अथ प्रयोगः ॥ दोहनप्रभृति अधिश्रयणपर्यन्तं स्कन्दने पतत्स्कन्नं तद्यद्दुग्धं पय॰ तन्मपीत्यनेनाभिमृश्य जले प्रक्षिप्य दोहने यद
वशिष्टं तेनैवाग्निहोत्रं जुहुयात् ॥ इदमाहवनीयप्रधानद्रव्यपर्याप्तौ भवति ॥ प्रधानस्यापर्याप्तौ तु अन्यत्पय आनीय यथापूर्वं संस्कृत्य तेन जुहुयादिति
॥ अथोन्नयनप्रभृति आहवनीयप्रधानहोमद्रव्यपर्यन्तं स्कन्दने मा॰ ॥ तत्राश्वलायनः ॥ प्रजापतेर्विश्वभृति तन्वं हुतमसीति तत्र स्कन्नाभिमर्शनं ॥१
शेषेण जुहुयात् ॥२॥ पुनरुन्नीयाशेषे ॥३॥ आज्यमशेषे ॥४॥ एतदा होमात् ॥५॥ इति पञ्च सूत्राणि ॥ इदमपि यपस्यैव पूर्वेणासंबन्धित्वात् ॥ तत्रेति प्रा
चीनहरणादूर्ध्वं इत्यर्थः इति प्रथमसूत्रस्य वृत्तिः ॥ अन्तरेणापि वचनं सर्वस्य वा प्रधानमात्रस्यैव वाऽपर्याप्ते शेषेणैव होमो युक्तः ॥ उक्त्वा तदिदमस्यैव वचनमि
दानीं किमर्थमपममभिप्रायः ॥ अस्ति चेच्छेषः होमद्रव्यस्यापर्याप्तः ॥ तथापि शेषेणैव मात्राहीनेनापि जुहुयादिति वचनमिति द्वितीयस्य ॥ स्रुगतस्या
शेषे पुनरुन्नीय जुहुयात् पुनरुन्नयनेऽयं विशेषः ॥ प्राचीनहरणे यावति गते स्कन्नं भवति तावत्येवाध्वनि उपविश्य स्थाली मन्येन प्राचीनां नीत्वा तत्रैवो
पविश्य उन्नयेत् ॥ नेत्थं परं स्रुग्वा प्रत्यगाच्छेदिति तृतीयस्य ॥ स्थाल्यामपि यदा नास्ति तदा आज्यं गृहीत्वा तस्य पयःसंभवं संस्कारं कृत्वा उन्नीय तेन जुहुयादिति
चतुर्थस्य ॥ द्रव्योऽपि होमयोः प्रधानत्वात् होमद्रव्यपर्यन्तमेतदेव प्रायश्चित्तं भवति इति पञ्चमस्य ॥ एतदा होमादित्यस्यार्थः प्रजापतेर्विश्वभृतीत्येतदादि
प इत्युक्तं तत्सर्वमा होमसमाप्तेः स्कन्ने भवतीतिहि स्थान्तभाष्यकारः ॥ अथ शेषेण जुहुयादित्यत्र मात्रापचारे होमे पुनरुन्नीय होमे आज्यहोमे च यो विशेषः स
उच्यते ॥ मात्रापचारो नामाहुत्येकदेशहीनः ॥ तत्राश्वलायनः ॥ ब्राह्मणीं जपित्वा ब्राह्मण्या जुहुयात् ॥१॥ अनशनमान्यस्मा होमकालात् ॥२॥ पुनर्होमं

५६ ५८

चगाया गा।ऽऽ। इति त्रीणि सूत्राणि॥ विशेषाभावाद्येकैकत्र नवाहुत्यैवो भवतः॥ पूर्वहोमे प्राकृतस्य मंत्रस्यापवादो वारुणी इति प्रथमसूत्रस्य वृत्तिः॥ अनशनं यज
मानस्यन होमकर्तुः॥ वारुणी जपो वारुणी होमो ऽनशनमित्येतत्त्रयं शेषे पाञ्जुहुयादित्यत्र मात्रापचारे होमे पुनराज्ञीय होमे आज्यहोमे च भवतीति द्वि
तीयस्य॥ एतेष्वेव त्रिषु पक्षेषु गार्हपत्याणाः पुनर्होमं नेच्छति॥ आचार्यग्रहणं विकल्पार्थं॥ पुनर्होमे पूर्वं समाप्य पुनर्विहरणादि सर्वं क्रियते निमित्ते
प्रयोगावृत्ति विधानादिति तृतीयस्य॥ अथ प्रयोगः॥ स द्विविधः॥ उन्नयनप्रभृति यर्यंतमेकः। पूर्वाहुत्यनंतरमुन्नएहुति पर्यंतमेकः॥ तत्रादावुन्नयनप्र
भृति पूर्णाहुति यर्यंतं स्कंदने यत्स्कन्नं तत्प्रजापते विश्व॰ मसीति अनेनाभिमंत्र्य जलेप्रक्षिप्य होमद्रव्यस्य प्रधानमात्रस्यापर्याप्तप्रावपित्वागा
तशेषेणो वमात्राहीनेनापि जुहुयात्॥ तस्याप्यभावे यत्र स्कन्नं तत्रैवोपविश्यान्येनानीतस्याली तश्चतुष्कल उन्नीयाहवनीयसमीपे कुशेषु निधाय
जुहुयात्॥ स्थाल्यामपि यदा नास्ति तदा आज्यं गृहीत्वा मासानानातस्य पापासे भवं संस्कृत्योन्नीय कुशेषु निधाय जुहुयात् इति॥ आज्यं गार्हपत्ये
विलाप्यानीय तदाज्यमुन्नीय जुहुयात् नाग्निहोत्रद्रव्यसंस्कारः सर्पिषीति चोदितत्वादिति देवत्रातः॥ एषु त्रिष्वपि पक्षेषु विद्युदसीत्युपस्पर्शनं कृत्वा
पां कृत्वा पां कांचिद्वारुणी मंत्रं जपित्वा सायं चेदग्निर्ज्योतिरित्यस्य स्थाने प्रातश्चेत्सूर्यो ज्योतिरित्यस्य स्थाने पपाक पाचिद्वारुणं चीत्वा होतयाहुत्वा
पश्चात्प्रेपद्धेत्यादि प्रकृतिवत्समाप्य पक्षे पुनर्विहरणादि पुनर्होमं च कृत्वा ऽनशनमाप्रस्महो होमकालात्कुर्यात्॥ शेषेण जुहुयादित्यादिषु त्रिष्वा
पि पक्षेषु प्रतिनिमित्तं वारुणी जपो वारुणी होमो ऽनशनमित्येतत्त्रयं समुच्चितं भवति॥ पुनर्होमो विकल्पेन भवति॥ अथ पूर्वाहुत्यनंतरमुन्नएहुति
पर्यंतं तस्य प्रयोगः॥ तत्रादौ पूर्वं हुतौ हुतायां स्कंदने यो विशेषः स उच्यते॥ तत्राश्वलायनः॥ यत्रवेत्थ वनस्पत इत्युत्तरस्या आहुत्याः स्कंदने इति

सूत्रं ॥ समिदाधानमिति शेषः इति वृत्तिः ॥ अथ प्रयोगः ॥ पूर्णाहुत्यनंतरमुत्तराहुतिपर्यंतं स्कंदने पतत्स्कन्नं तत्प्रजापते विश्व॰ मसीत्यनेन पूर्ववदभिमृश्याङ्गु
प्राक्षिप्य पत्रे वेत्यवनयेत् दे॰ गामपश्चाहू इति समिदं तमाधाय शेषेण जुहुयात् ॥ अशेषे पुनरुन्नयनं ॥ आज्यमशेष इति चेत्येयं ॥ अत्र त्रिरुन्नयनमि
ति केचित् ॥ तस्मिन्पक्षे प्रथममंत्रस्य भूरिलेत्यस्य लोपः ॥ आहवनीयहोमोत्तरं स्थालीगतस्य यत्किंचित्स्कंदने सामान्येनोक्तेन समुद्रं वः प्रहिणोमि
॰ गोपतावित्यनेनाभिमंत्र्याङ्गुष्ठप्रक्षिप्य शेषेणापरो योग्यो होमः कर्तव्यः ॥ इति पयस्कंदनप्रा॰ ॥ अथान्यद्रव्यस्कंदने प्रा॰ ॥ तत्राधिश्रिते स्कंदने आश्व
लायनसूत्रेनुक्तत्वादैतरेयब्राह्मणोक्तमुच्यते ॥ तत्र ब्राह्मणं ॥ तदाहुर्यस्याग्निहोत्रमधिश्रितं स्कंदति वा विष्यंदते वा का तत्र प्रायश्चित्तिरिति नदभिहृत्यनि
नयेच्छान्त्यै शान्तिर्वा आपो येन दक्षिणेन पाणिनाभिमृश्य जपतीति ॥ अत्र नम्राख्यं ॥ अग्निहोत्रद्रव्यं गार्हपत्ये पाकार्थमधिश्रितं सत् स्कंदति चेत्स्कंदतिस
खलति क्षीरं बिंदुरधः पततीत्यर्थः ॥ विष्यंदते विशेषेण स्यंदनं दाहाधिक्येन स्थाल्यामुखस्योपरि उद्गमनं तत्स्कन्नं विष्यंदितं वा द्रवं दक्षिणेन पाणिना स्पृष्ट्वा
वक्ष्यमाणमंत्रं जपेत् ॥ तं दर्शयति ॥ तत्र ब्राह्मणं दिवं तृतीयं देवान्यज्ञो गात्ततो मा द्रविणमाष्टान्तरिक्षं तृतीयं पितॄन्यज्ञो गात्ततो मा द्रविणमाष्ट पृ
थिवीं तृतीयं मनुष्यान्यज्ञो गात्ततो मा द्रविणमाष्टेति ॥ अत्र तन्द्राख्यं ॥ अस्य स्कंदनस्य विष्यंदितस्य वा यः प्रथमस्तृतीयांशस्तद्रूपं दिवं स्वर्गं लोकमगा
त् प्राप्नोतु ॥ तेन यज्ञोपि देवान्प्राप्नोतु प्रापणाद्धेतुकः यपि होऽस्ति मामग्निहोत्रिणं द्रविणमाष्ट धनं प्राप्नोतु ॥ तथैवापरं तृतीयं द्रव्यांशस्तद्रूपमंत
रिक्षमगात् तेन यज्ञोपि पितॄन्प्राप्नोति ॥ ततः प्रापणान्मां धनं प्राप्नोतु ततोप्यपरं तृतीयं द्रव्यांशस्तद्रूपं पृथिवीमगात् ॥ तेन यज्ञोपि मनुष्यानगात् ॥ त
तस्तद्रूपप्रापणान्मां द्रविणं धनमाष्ट प्राप्नोतु ॥ मंत्रांतरं जपं विधत्ते ॥ तत्र ब्राह्मणं ॥ यपोऽजसास्त्रमिताजोसीति वैष्णवाहण्णीमत्र चं जपति विष्णु

४७ 47 वैपत्तस्य दुरिष्टं पाति ब्रह्मणः स्विष्टं तयोर्ह्मयोरेव शान्त्या इति ॥ अत्र तन्त्रावृष्ट्यं ॥ ययोरोजसेत्यादृक् सूत्रे पठिता तस्याश्चतुर्थपादे विष्णूअगन्वरुणापूर्वहूता
विति श्रुतत्वादिदं विष्णुवरुणदेवताकं यज्ञस्य यदुरिष्टमङ्गवैकल्यं तत्सममपित्वा विष्णुः पाति यज्ञस्य यत् स्विष्टं यथाशास्त्रमनुष्ठितमङ्गं तद्वरुणः पा
ति फलप्रतिषेधनिवारणेन तत्प्रतिपालनं ॥ तस्मादृषयं जपः ॥ तयोर्ह्मयोर्दुरिष्टस्विष्टयोर्यथाक्रमप्रकारेण शान्त्यर्थं संपद्यते ॥ उक्त्वा समुपसंहरति ॥
तत्र ब्राह्मणं । सा तत्र प्रायश्चित्तिरिति ॥ अत्र तत्संस्कंदननिमित्तं परिगृह्य प्रयोगः ॥ तंडुलमांससोमव्यतिरिक्तस्याधिश्रितस्य द्रव्यस्य स्कंदने यत् स्कन्नं
तज्जलेन प्रतिषिच्य दक्षिणेन पाणिनाभिमृश्य जपति ॥ दिवं तृतीयं ० ष्टान्तरिक्षं ० ष्टपृथिवीं ० षेति । ततो वैष्णववारुणीमृचं जपेत् ॥ ययोरोजसा
स्कभिता रजांसि वीर्येभिर्वीरतमा शविष्ठा ॥ या पत्येते अप्रतीता सहोभिर्विष्णू अगन्वरुणा पूर्वहूताविति ॥ ततः स्कन्नमस्रुप्रासिष्यस्यात्स्त्रांपदवशि
ष्टं तेनैव जुहुयात् ॥ प्रधानस्यापयोऽस्रोत्वन्यदानीयाधिश्रित्य तेन जुहुयात् ॥ अथोद्वासनानंतरं पयोव्यतिरिक्तद्रव्यस्कंदने प्रा० तत्राश्वलायनः ॥ भि
न्नेति क्व वाभिमंत्रयेत समुद्रं वः प्रहिणोमि स्वां योनिमपिगच्छत ॥ अरिष्टा अस्माकं वीरा मापि गावः सन्तु गोपता विती ति सूत्रं ॥ स्यान्नीभेदेन विशि
ष्टद्रव्यं भिन्नमित्युच्यते ॥ विक्षेपात्तद्दुष्टं भवति ॥ सिक्तमिति स्कन्नमुच्यते ॥ स्कंदने च यावत् स्कन्नं तावन्मात्रं दुष्टं भवति ॥ न यात्रगतं ॥ भिन्नसिक्ता
नि चेति वचनात् ॥ तद्भिन्नं सिक्तं च समुद्रमित्यनेनाभिमंत्रयेत ॥ ततः अपोभ्यवहरेयुः ॥ अपोभ्यवहरेयुरित्यस्य वचनस्य प्रकरणविशेषाभावाद्या
पत्रहविर्मात्रमेवास्य विषय इति भेदने हरमेवास्मिन्प्रकरणे सर्वावस्थिपयस्ति अन्येषु द्रव्येषु च ॥ स्कन्ने पुनः यथासिवक्ष्यमाणत्वादिदमभिमंत्र
णं द्रव्यान्तरेष्वेवेति स्थितमिति वृत्तिः ॥ अथात्र तत्स्कन्ननिमित्तं परिगृह्य प्रयोगः ॥ उद्वासनप्रभृति यत्स्कन्नं तत्समुद्रं वः प्रहि० गोयनाविस्येनाभि

मंत्राश्च प्रक्षिप्य तत्र पत्न्याः शिष्टमित्यादिमप्रधानहोमं परिसर्पेत् दुग्धवत्॥ तत्राप्यभिमंत्रणमंत्रस्तूष्णीमेवेति॥ अथ प्रासंगिकं किंचिदुच्यते॥ तत्रा
पस्तंबसूत्रानुसारी श्रीनिवासः। उत्तराहुतौ हूयमानायां तद्देशः पूर्वाहुतिद्रव्येण सह स्यात् तदा सर्वप्रायश्चित्तमनाज्ञात तत्र प्रजपो वा कर्तव्यः॥ पू
र्वाहुतौ हूयमानायां प्रमादात् क्षत्र द्रव्यपतने सर्वप्रायश्चित्तं हुत्वा। स्थालीतत्र नीलात्रि हत्वा पद्धितीयाहुतिं हुत्वेत्यादि द्वितीयाहुतौ हूयमानायां स
र्वद्रव्यपतने प्राशनादेर्लोपः॥ स्थाल्यां हविःस्थाने अपराग्निकहोमानीलोप इति तत्तेपं॥ सर्वमिदं तं हुत्वादि होमे पि समानमिति स्कंदस्वामी॥ अ
स्यापवादः॥ सर्वमिदं प्रायश्चित्तमाहुतिपरिमाणद्रव्यस्कंदने एव न न्यूनस्य॥ आहुतिपरिमाणं च द्रव द्रव्याणां स्रुवबिलपूर्णं॥ कठिनानामं
गुष्ठपर्वमात्रेतं दुत्वानां शतसंख्याकमित्यादि॥ चंद्रिकायां तु आहुतिपरिमाणान्न्यूनस्कंदने स्कन्नानुमंत्रणं कृत्वा सर्वप्रायश्चित्तमित्युक्तं॥ प्राय
श्चित्तप्रदीपे॥ भस्मन्यग्नौ हविर्धाने वेद्यां स्तीर्णे त्र बर्हिषि॥ कूर्चे विप्रस्य पाणौ न स्कन्न दोषो न विद्यते इति॥ सर्वत्र पुनर्होमविधौ तज्जातीय
मेव द्रव्यं स्वीकर्तव्यं॥ न पुनर्द्रव्यांतरमिति शतदूपीकाराः॥ अथाग्निहोत्राहुतेः क्षरणे हुतस्य हविषो नाशे वा प्रा०॥ तत्र प्रदीपः॥ अग्निहोत्रा
हुतिरग्रे स्यात्त्र परिस्रुतो ऽस्रुतस्य हविषो नाशो वा परिमवे तदा स्रुगगत शेषेण पुनराहुतिं हुत्वा त्वं नः स त्वं न इति द्वे स्रुवाहुती हुत्वाग्निं दाहुती
हुत्वा ऽन्यां दुग्ध्वा पुनराहुती हवा सश्रेति॥ अथाधिश्रित द्रव्य क्षरणप्रायश्चित्तं॥ तत्राश्वलायनः॥ अग्निहोत्रमधिश्रितं स्रवदभिमंत्रयेत
गर्भं स्रवंतमगदमकर्माग्निर्होता पृथिव्यंतरिक्षं यतमत्र तदग्नावेव तत्रामिप्राप्नोति निर्ऋतिं पराम्ऋत्यादिति सूत्रे॥ अधिश्रितमग्निहोत्रद्रव्यं स्थाली
मूलेन परिस्रवति तदनेनाभिमंत्रयेत गर्भमिती तिवृत्तिः॥ अथ प्रयोगः॥ अधिश्रितमग्निहोत्रद्रव्यं स्थालीमूलेन परिस्रवति तदा पस्तुत

४८ तद्धर्मं स्रुवं तमग्रे दक्षिणतः पात्रस्तादित्यनेन तामभिमंत्र्याग्नेय्यां स्थाल्यां तदधिश्रित्य वक्ष्यमाण पात्रभेदनप्रायश्चित्तोक्तरीत्याभिमंत्र्य स्थालीमस्रू प्रक्षि
५६ प्य सर्वप्रायश्चित्तं हुत्वा तोषेण जुहुयात्। शेषाभावे स्यात् द्रव्येणान्यस्थालीस्थ तेन जुहुयात्॥ अथाग्निहोत्रस्थालीभेदेन भिन्न द्रव्यस्य प्रा०॥ तत्रा
श्वलायनः॥ भिन्नं सिक्तं वाभिमंत्र्य पेतसमुद्रं० ताविति सूत्रं॥ एतस्य वृत्तिः पूर्वोक्ता ज्ञेया॥ अत्र भिन्ननिमित्तं प्रयोग स्तमपोगः॥ स्थालीभेदेन
विक्षिप्त द्रव्यं समुद्रं व्यः प्रहिणो० गोपता वित्यनेनाभिमंत्र्यास्रू प्रक्षिप्य होम द्रव्यपर्याप्तौ शेषेण जुहुयात्॥ अपर्याप्तौ तु वक्ष्यमाण पात्रभेदनप्रा
यश्चित्तोक्तरीत्या स्रुचि तां स्थालीम स्रू प्रक्षिप्य सर्वप्रायश्चित्तं हुत्वान्य द्रव्येणान्य स्थालीस्थेन जुहुयादिति॥ अथाधिश्रिताग्निहोत्र द्रव्यश ब्दो
त्पत्तौ प्रा०॥ तत्राश्वलायनः॥ अग्निहोत्रे शब्दे शब्दायमानमोषामुमिति द्विष्यान्मुदाहरेदिति सूत्रं॥ अधिश्रितमग्निहोत्र द्रव्यं यदि शब्दयेत तदा तद्द्रव्यं
समोषामुत्यमित्यभिमंत्र्य पेत॥ अमुमित्यस्य स्थाने यजमानद्वेष्य नाम निर्दिशेत्॥ अधिश्रित विशेषणं तत्रैवास्य संभवाद्धाल्लोता दर्शनाद्वेति वृ
तिः॥ अथ प्रयोगः। अधिश्रितमग्निहोत्रतापवशेन यदि शब्दयेत तदा तद्द्रव्यं समोषामुमित्यभिमंत्र्य पेत॥ अमुमित्यस्य स्थाने यजमानस्य द्वे
ष्युर्नाम गृह्णीयात्॥ समोषा देवदत्तमिति॥ द्वेष्याभावे समोष पाप्मानमिति॥ अथाग्निहोत्र विष्यंदन प्रा०॥ तद्द्विविधं॥ अधिश्रित विष्यं
दनस्यैकं॥ उद्वासित विष्यंदनस्यैकं॥ उद्वासित विष्यंदनस्यैकं॥ तत्राधिश्रित विष्यंदने विशेषः॥ तत्र ब्राह्मणं॥ तदा हुर्यस्याग्निहोत्रमधिश्रि
तं स्कंदति वा विष्यंदते० सा तत्र प्रायश्चित्तिरिति॥ अत्र तं विष्यंदन निमित्तं प्रयोगस्य प्रयोगः॥ तत्रादौ विष्यंदन स्वरूपं॥ विष्यंदन स्वरूपं॥ विष्यंद
नेनामस्थालीमुखस्योपरि उद्गमनं। तद्द्विविधं सिक्तमसिक्तं च। तत्र यदि ष्यंदमानं भूमिमतीत्याग्निं भूमिं वा प्राप्नुयात्तत्सिक्तं। तदेव दुष्टं। पक्के

म्यां बहिर्गमनमात्रेण विष्यंदते तत्र श्मिक्रमं दुष्टं च। यद्विष्यंदनेन दुष्टं तदेव प्रतियादयेदिति प्रयोगस्तु॥ अधिश्रितस्य द्रव्यस्य विष्यंदनेन प दुष्टं तज्जलेन प्रति
षिच्य दक्षिणेन पाणिनाभिमृश्य जपति॥ दिवं तृतीयं देवान्य०ष्टं तीक्षंत तीयंपितृन्०ष पृथिवीं तृतीयमनुष्येति॥ ततो वैश्मु ब्राह्मणीमचं जपेत्॥ प
योऽन्नसा ०पूर्वहुताविति शेषेण जुहुयात्॥ शेषाभावेन्य द्रव्यमानीय जुहुयादिति तूहलकारिकायां प्रायश्चित्तप्रयोगः। त्वश्च· अथो देव कुद्वासितं विष्यंद
नप्रा०॥ तत्राश्वलायनः॥ विष्यंदते एतन्द्रवति॥ अधिश्रिते तु ब्राह्मणो क्रमेवेतिवतिः॥ अत्राथग्निबर्जे विष्यंदन स्वरूपं पूर्ववत्तत्रैव॥ अत्र प्रयोगः
॥ उद्वासिते अग्निहोत्र द्रव्ये तापवशेन विष्यंदने तत्र यदुष्टं तन्महीद्यौः पृथिवी च०मभि॥ त्वाहवनीयस्य भस्मान्ते निनीय शेषेण जुहुयात्॥ अशे
षेन्येनेति॥ अथ केशादिभिरग्निहोत्रद्रव्यदुष्टे प्रा०॥ तत्रादावधिश्रितद्रव्यदुष्टे प्रा०॥ तत्रैतरेयब्राह्मणं॥ तदाहुर्यस्याग्निहोत्रमधिश्रितम
मेध्यमापद्येत का तत्र प्रायश्चित्तिरिति सर्वमेवैनत्स्रुच्यभिपर्यासिच्य प्राङुदेत्याहवनीये हतास समिधमभ्यादधात्य योजएत आहवनीयस्योष्णं
भस्म निरूह्य जुहुयान्मनसा वा प्राजापत्यया वर्चा तत्सुतं चाहुतं च स पद्ये कस्मिन्नुन्नीते यदि द्वयोरेष एव कल्पस्त्रेष्व पनयितुं शक्नुयान्निःषिच्ये
तदुष्टमदुष्टमभिपर्यासिच्य तस्य यथोन्नीती स्यात्तेषां जुहुयात्सा तत्र प्रायश्चित्तिरिति॥ अत्र तद्भाष्यं॥ अग्निहोत्रार्थे प्रयोगाहे पयस्ये या कार्थे
यदधिश्रितं तद्यदि किंचिदमेध्यं प्राप्नुयान्महं केशकीटादिकमापद्येत प्राप्नुयात्॥ तदानीमेतत्स्यविः सर्वमप्यग्निहोत्रहवण्यां स्रुचि माकल्येन सिक्त्वा
प्राङ्मुखउदेत्यात्याप आहवनीयं प्रतिगत्वा तस्मिन्नेतान्नित्यां समिधमादध्यात्॥ अथानंतरमाहवनीयस्योत्तरभागे किंचिदुष्णं भस्म ततो निः
सार्य तस्मिन्मनसा नित्याग्निहोत्रमंत्रमनुस्मृत्य वा वा प्राजापतेन त्वं देवतानीति मंत्रमुद्वार्यजुहुयात्तदेतदस्मन्नुष्णं वा स्यात्तमपि भवति।

४९

अग्निरोहित्वाऽद्रुतमपि भवति न केवलमधिश्रित एवामेध्यपात एतत्प्रायश्चित्तं किं तर्हि च तुर्हनपनावस्थायां यद्येकस्मिन्नुन्नीते यदि वा द्वयोर्हा
न्नीतयोरमेध्यपातस्तदानीमेष एव कल्प्यः प्रकारः॥ उन्नयनान्तमाग्निहोत्रहवण्यां सेचनं तत्केशकीटादिदूषितमग्निहोत्रहवण्यामुन्नीतं पश्चाद्प
नेतुं शक्नुयात्॥ तदानीमेव तद्दुष्टं निःषिच्य निःसार्य स्थाल्यामवस्थितमदुष्टं क्षीरमग्निहोत्रहवण्यामभिपर्यासिच्य पयोन्नीतीस्यात् उन्नी
तीये न प्रकारेण भवति तेन प्रकारेण जुहुयात्॥ अदुष्टं द्रव्यान्तरमधिश्रयणादिना संस्कृत्य जुहुयादित्यर्थ इति॥ अथ प्रयोगः॥ अधिश्रितेऽग्नि
होत्रे केशादिभिर्दुष्टे तदा तत्सर्वं स्रुचि प्रक्षिप्याहवनीयं प्राप्य तूष्णीं समिधमाधायाहवनीयोत्तरतस्तदुत्तरं भस्म निःसार्य मनसा नित्याग्निहो
त्रमंत्रेनुस्मृत्य वा वाचा वा प्रजापते न त्वदेता० एणीमिति मंत्रमुच्चार्य वस्मिन्सर्वं हुतं नं जुहुयात्। उन्नीतोपपन्नमेव प्रकारः। ततोपि श्रपणादिसंस्कृतेना
दुष्टेन जुहुयात्। अस्यापवादमाह कुंदुहलेगोपालः। पिपीलिकामक्षिकाभिः षट्पदकीटैर्न दुष्यति। तानुद्धृत्याग्निरप्सु क्षेपतद्रुत्सूपहृयतां इति
अयोद्धृत्य सितेरदुष्टे आश्वलायनः॥ सान्नाय्यं वर्द्धीमत्सेदिति सूत्रं॥ प्रजापतयेत्वमनयामध्यमेन पलाशपर्णेन वल्मीके जुहुयादित्यर्थ इति वृत्तिः॥
अथ प्रयोगः॥ उद्धासनोत्तरं केशादिभिर्हविर्मात्रे दुष्टे मध्यमेन पलाशपर्णेन प्रजापते न त्व० एतानी यामित्यनया वल्मीकबिले जुहुयात्॥ अ
स्रुवात्तस्मीं प्रक्षिप्य द्रव्यांतरमुत्पाद्य होमः॥ अत्रापि पूर्वोक्तमपवादकवचनं ज्ञेयं। केशादिदूषकद्रव्याणां स्वरूपं वक्ष्यमाणरीत्या ज्ञेयं॥ अथा
ग्निहोत्रद्रव्याभिवर्षणप्रा० तत्राश्वलायनः॥ अभिवृष्टे मित्रो जनान्यातयति ब्रुवाण इति समिदाधानमिति सूत्रं॥ अधिकं पयः समितः॥ उन्नीतरहुत्य
पयस्याप्यभिवर्षणासंभवात्॥ अतः पूर्वोहुतायाः प्रागग्निपि अस्मिप्रिनिमित्ते सति निमित्तानंतरं समिदं तमाधेयमेवेति वृत्तिः॥ अथ प्रयोगः॥

अग्निहोत्रद्रव्येजलधाराभिवृष्टिमिश्रोजनान्यातपितं । होतस्माहेत्वनपासमिदंतमाधायप्रकृतिवत्सोमः ॥ उत्तराग्नुत्स्मिवर्षणेपीदमेव ॥ अथदर्शपू
र्णमासादिषुहविर्विषयप्रा० ॥ तत्राहोसान्नाय्यप्रायश्चित्तानि ॥ तत्रसान्नाय्यार्थमयाकृतेपत्नैःपानेमा० ॥ तत्राश्वलायनः ॥ वत्सानांधानेवायवेयवाग्
मितिसूत्रं । सान्नाय्यार्थमपाकृतानांवत्सानांयानेवायुदेवत्यांयवागूंनिरूप्यतपापष्ठ्यामित्यर्थः ॥ सर्वपानेएतत्प्रायश्चित्तं ॥ पीतशिष्टमेवहविषः
यपीपूंचेष्याहृतिहोमएवनपागूः ॥ यवाग्वायागंकृत्वापुनर्यागः कर्त्तव्यइतिवृत्तिः ॥ यवागूर्नामशिथिलौदनः ॥ अयंचहृहूपक्रान्तापममावास्या
यामेवैष्णवधिको भवतीतिसिद्धान्तभाष्यकाराः ॥ अत्रप्रयोगः ॥ तत्रपरिसायंधयेपुमत्स्यामेवेष्टौ प्रातरग्नेयंप्रकृतिवंनिरूप्यततोवायवेजुष्टंनिर्व
पामीतिपवागर्थेचतुरोमुष्टीन्व्रीहीन्निरूप्यंद्रमाहेंद्रंवाप्रकृतिवंनिर्वपेत् ॥ एवंनिरूप्यततोवायवेजुष्टंनिर्वपामीतियवागर्थं श्रपयणापर्येतंवायु
हविरूपत्वर्थेधर्माश्चहरवत्कार्याः ॥ उद्धूसनप्रभृतितुसान्नाय्यवदेव ॥ पश्यानापस्त्नापवाहेविरूत्यतसर्थधर्माश्चहवत्कार्याः ॥ उद्धूसनप्रभृतितु
सान्नाय्यवदेव ॥ यस्यागस्त्वसमीभवंतीत्यर्थः ॥ प्रचारकालेप्रकृतिवदाग्नेयंविसृज्यचप्रचर्यसान्नाय्यधर्मेणवायुंप्रचर्यपुरोडाशपयोभ्यांमहेन्द्रंमहे
न्द्रंवाप्रचरेत् ॥ पान्यापुरोनुवाक्येभ्रनासीरीयोक्तेज्ञातव्ये ॥ एवमिष्टिंसमाप्यतस्मिन्नेवाग्नावन्वाधानप्रभृतिप्रकृतिवदिन्द्रस्यमहेन्द्रस्यवापुनर्यागः कृ
र्तव्यः ॥ शतद्रूयीकारस्क ॥ केचित्तुप्रधानयागांतेवत्सापाकरणादितदेवहविरूत्याघतेनचेष्टद्रशेषंसर्वेषांतंत्रेणकुर्वंतीत्याहुरिति ॥ पुरिम्रा
तर्धयेपुःस्तदापिएवमेव ॥ प्रचारकालेपुरोडाशदधिभ्यांमहेन्द्रंमहेन्द्रंवाप्रचरेदितिविशेषः ॥ दोहद्रूपयानेप्यनेनैवन्यायेनयवागूद्रूपंकार्यं ॥ स
र्वत्रसतिसंभवेनिर्वापावघातादिसहैवकृत्वाकालेविभागः कर्तव्यः ॥ अत्रयवागूद्रूपस्यमहद्रूमदानेएकदेवतत्वात्सर्वमन्यत्पूर्ववत् ॥ इदंसर्वम

५० 50

वेपानेभवति॥ पीतमवशिष्टं प्रधानपर्याप्तं चेद्याहुतिहोमएवनपवागृइति॥ अपक्केशादिभिर्दुष्टेप्रायश्चित्तं॥ तत्राश्वलायनः॥ प्रजापतेनत्वादेतान्यन्य
ति चवल्मीकवपायांवासान्नाय्यमध्यमेनपलाशपर्णेनप्रजापतेनत्वदित्यचास्वाहाकारांतयावल्मीकद्वारेप्रतिषिंचेत्। अस्रवात्स्वीमितिविज्ञा
त्यः॥ मध्यमग्रहणं द्विपर्णस्यमाभूदित्येवमर्थमितिवृत्तिः॥ अत्रप्रयोगः॥ सान्नाय्यंदुष्टं॥ प्राजापतेनं॰ पीणामित्यचास्वाहाकारांतयामध्यमे
नपलाशपर्णेनवल्मीकद्वारेप्रतिषिंचेत्॥ अस्रवात्स्वीमक्षिपेत्॥ ततः सर्वप्रायश्चित्तं हुत्वाशेषेणजुहुयात्॥ इदं स्रुक्कीटादिभिरुपहतौ अनं
तोपहतौतुवक्ष्यमाणान्यतरादोषेयासिच्यमचोपुरीत्यादिसूत्रोक्तरीत्याज्ञेयं॥ अथविष्यंदनप्रा॰॥ तत्राश्वलायनः॥ विष्यंदमानेमहीद्यौःपृथिवी च
नइत्येतं तः परिधिदेशे निनयेदुपरीति सूत्रं॥ द्विविधं विष्यंदनं सिक्तमसिक्तं च सिक्तं दुष्टंभवति॥ अन्यदटुष्टं॥ यद्विष्यंदमानंकुंभीमतीत्याग्निं पृथिवीं वाप्रा
प्नुयात्॥ तत्सिक्तंभवतिदुष्टंचतदेव॥ यत्कुंभ्यांबहिर्गमनमात्रेणविष्यंदते तदसिक्तमदुष्टंच॥ यद्विष्यंदनेनदुष्टं तदेवप्रतिपादयेत्॥ महीद्यौरि
त्यनयर्चातःपरिधिदेशेनिषिंचेत्॥ देशग्रहणं परिध्यभावेपितस्मिन्देशेनिनयार्थमितिवृत्तिः अथप्रयोगः॥ विष्यंदनेनदुष्टं तन्महीद्यौःपृ
थिवी च॰मपि इत्यचातःपरिधिदेशे निनीयसर्वप्रायश्चित्तं हुत्वाकुंभीस्थेनशेषेणजुहुयात्दितिदेवकुतूहलकाराप्रायश्चित्तप्रयोगरत्नेश्वप्तवे
विष्यंदनेतु अनंतरमेववक्ष्यमाणंज्ञेयं॥ अथ सांपदो हदोषे प्रा॰॥ तत्राश्वलायनः॥ अन्यतरदोषे यासिच्यमचोपुरीतिसूत्रं॥ अदुष्टेप्रातर्दोह
एतन्न्दवति॥ तस्मात्तर्दोहं यासिच्यदृष्योः पात्रयोः कृत्वातयोरन्यतरत् दधिमावापातं चतास्यां दधिपयोभ्यां प्रचरेदुपरीत्यर्थः॥ अतएवादुष्टेप्रात
र्दोहरत्यक्तमितिवृत्तिः॥ अत्रदोषशब्देनाशोच्यहीतव्यः॥ इतिबौधायनसूत्रयोरर्थिशब्दग्रहणात्॥ आर्जि शब्दो नाशवाचकः॥ तेनकेशकी

दिभिः पतनशोषणाशुचिस्पर्शादिना च नाशस्यापि दोषशब्देन संग्रहः ॥ अथ प्रयोगः ॥ तत्राल्पोपहतो पूर्ववमुक्तं ॥ आवाहनात्प्रागल्पंतोपहतो लिंदमुच्यते
॥ पूर्वोक्तविधिना सायंदोहमतिषिच्य प्रातर्दोहं द्वयोः पात्रयोः कृत्वा तयोरन्यतरं दधिभावापातं च ताभ्यां दधिपयोभ्यां पुरोडाशेन सह प्रचरेयुरिति
आवाहनादूर्ध्वमल्पंतोपहते तु वक्ष्यमाणसामान्यहविर्दोषोक्तवदाज्येन समापयेत् पुनरिज्या चेति ॥ अत्रैतरेयब्राह्मणं ॥ तदाहुर्यस्य सायं दुग्धं
सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरिति प्रातर्दुग्धं द्वैधं कृत्वा तस्यान्यतरां भक्तिमातच्य तेन यजेत सा तत्र प्रायश्चित्तिरिति ॥ अत्र तन्द्रा
ष्यं ॥ दर्शपूर्णमासयोर्दध्यर्थं सायंकाले दुग्धं पयः सान्नाय्यरूपं केशकीटादिभिर्दुष्येत् यः कश्चिदपहरेद्वा तदानीं पयोद्युः प्रातर्दुग्धं पयोभागद्वयं कृत्वा तत्रै
कभागमातंच्य तेन संस्कृत्य दधिस्थानीयेन तेन यजेतेति ॥ अपहारेप्येतदेव प्रा० ॥ अथ प्रातर्दोहदोषे प्रा० ॥ तत्राश्वलायनः ॥ पुरोडाशं वा तस्थाने इति
सूत्रं ॥ पयसि दुष्ट एतदेव भवति ॥ पूर्वोक्तस्यासंभवात् ॥ तेन यथावृत्ति तद्विभाषेयमिति वृत्तिः ॥ अथ प्रयोगः ॥ तत्राल्पोपहतो पूर्ववमुक्तं ॥ आवाहनात्प्रागल्पं
तोपहतो लिंदमुच्यते ॥ पूर्वोक्तविधिना प्रतिषिच्य ॥ पाणिस्मर्शनात्पूर्वं प्रातर्दोहकरणपक्षे प्रातर्दोहदोषे निर्वापकाले आग्नेयं निरूप्यैंद्रं माहें
द्रं वा निरूप्य पुनरपि प्रातर्दोहस्थाने तद्देवतमेकादशकपालं पुरोडाशं निरूप्याववघातादि सह कृत्वा काले विभागः ॥ तंडुलप्रक्षालनानंतरं दोहक
रणपक्षे दोहदोषे तु तदानीमेव निर्वपेत् ॥ उभयपक्षेपि एकदेवता कृत्वा तत्पुरोडाशाभ्यां दध्नाग्रह प्रचरेदिति ॥ आवाहनादूर्ध्वमल्पंतोपहतौ वा
क्ष्यमाणसामान्यहविर्दोषोक्तवदाज्येन समापयेत् पुनरिज्या चेति ॥ अत्रैतरेयब्राह्मणं ॥ तदाहुर्यस्य प्रातर्दुग्धं सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्राय
श्चित्तिरित्यैंद्रं वा माहेंद्रं वा पुरोडाशं तस्य स्थाने निरूप्य तेन यजेत सा तत्र प्रायश्चित्तिरिति ॥ अत्र तन्द्राष्यं ॥ प्रातर्दुग्धरूपस्य सान्नायस्य दोषा

५१ पञ्चशरावोभ्यां वैकल्पो भवति तस्य द्वयस्य स्थाने इंद्रदेवताकं महेंद्रदेवताकं वा पुरोडाशं कृत्वा तेन यजेत ॥ इंद्रं पाजिमरेंद्रं पाजिमेद्रेन देवताव्यवस्था ॥ अत्राप्यप

51 क्षे एतदेवमा० ॥ अथोभयपक्षेष्वेमा० ॥ तत्राश्वलायनः ॥ उभयपक्षेष्वैंद्राग्नं पंचशरावमोदनं ॥१॥ तयोः पृथक्प्रचर्या ॥२॥ ऐंद्रमेवेत्येके ३ इति त्रीणि सू

त्राणि ॥ अस्यार्थः अत्राप्युभयपक्षेषु पंचशरावपरिमितान्व्रीहीन्निर्वपेत् ॥ इंद्राग्निदेवत्यमोदनसिद्ध्यर्थमिति प्रथमसूत्रस्य वृत्तिः ॥ तयोरिंद्राग्नौ हविरुत्पत्तौ सहो

दिष्टयोरपि भिन्नकाले तस्मादेव हविषस्तयोः पृथगेव यागः कर्तव्य इत्यर्थः ॥ तत्राग्निर्देवतानां प्रथमं यजेदिति श्रुतेः ॥ अग्निमिष्ट्वेंद्रं यजेतेति द्वितीय

स्य ॥ एके ऐंद्रमेव पंचशरावमुत्पाद्य मन्यते इंद्राग्नोः पृथक्प्रचारमाहुः ॥ अत्राप्यग्निरेव प्रथमं यष्टव्यः ॥ अस्य पक्षस्येयं श्रुतिर्मूलं यस्योभयं हविरा

र्तिमार्छेदिति ॥ ऐंद्रं पंचशरावमोदनं निर्वपेत ॥ अग्निर्देवतानां प्रथमं यजेदिति ॥ अस्यां श्रुतावग्नियागस्यानुवादत्वेनापि संभवाद् ऐंद्रमेव निरूप्य

इंद्रायेव पष्टव्यमिति केचित्सूत्रार्थं वर्णयंतीति तेतीयस्य ॥ अथ प्रयोगः ॥ तत्रादावुभयपक्षेष्वित्यस्य सूत्रस्य सूत्रांतरात्सांनाय्यदर्शपूर्णमासयोर्वा तत्त्वमि

ति भाति तस्मिन्पक्षे प्रयोगः ॥ आवाहनात्पूर्वं दोहद्वयविनाशे तदानीमेव इंद्राग्निभ्यां जुष्टं निर्वपामीति मंत्रेण पंचशरावपरिमितान्व्रीहीन्निरुप्य प्रो

क्षणप्रभृति नक्षत्रकल्पेन चर्वंतं गार्हपत्येश्रपयित्वाभिघार्योद्वास्य वेद्यामासादयेत् प्रचारणकाले प्राकृतमग्निं विस्तृष्टं चेष्ट्वा चरोरेकदेशमवदायाग्नि

ष्टायतस्मादेव चरोरेकदेशेनेंद्रमिष्ट्वा प्राकृतेनेंद्रेण माहेंद्रेण वा पुरोडाशेन दिगे शमवदायाग्निमिष्ट्वा तस्मादेव चरोरेकदेशेनेंद्राशेनेष्ट्वा स्विष्टकृदादिक

मशेषं समापयेत ॥ कर्मीत्यादेवतयोर्यान्या पुरोनुवाक्याः प्रकृतिवदेव ॥ निगमेषु नित्यत्वेनेमिति कानां निगमनमिति ॥ अथैंद्रमेवेत्येक इत्यस्य सू

त्रस्य व्याख्यातोद्धृतं ॥ तत्र एके ऐंद्रमेव पंचशरावमुत्पाद्य इंद्राग्नोः पृथक्प्रचारमाहुरिति प्रथमव्याख्याप्रपणे कर्मांतरत्वं ॥ तस्मिन्पक्षे प्रयोगः ॥

आवाहनात्पूर्वं दोहद्वयविनाशे इंद्राय पंचपुषं निर्वपामीति प्रोक्ष्य क्रमेव पंचशरावं निरुप्य प्रोक्षणप्रभृति उपांशुयाजप्रचारांतं पूर्ववत्कृत्वा न्वहणा अग्नें
द्रयोः पूर्ववत्प्रयाजप्रचरणमाकृते नैंद्रेण माहेंद्रेण वायुरोडाशेनेत्यादि पूर्ववत्॥ इंद्रमेव वा निरुप्य इंद्रायेवपषव्यमिति द्वितीयमाख्या श्रपयेनु बो
धापनमापश्चित्तमत्र भाष्यस्य सात कर्मीतत्वं प्रतिनिधित्वं वा॥ तत्र कर्मांतरत्वपक्षे ऐंद्रं पंचशरावं निरुप्य प्राकृतमग्निविष्णुप्रचर्य चरणा इं
द्रमेवेष्वा प्राकृते नैंद्रेण माहेंद्रेण वायुरोडाशेनेत्यादि पूर्ववत्॥ प्रतिनिधित्वपक्षे तु इंद्रशब्दो महेंद्रस्याप्युपलक्षकः॥ तेन दोहद्वयस्थाने प्रतिनिधि
त्वेन ऐंद्रं माहेंद्रं वा पंचशरावं निरुप्य प्रोक्षणप्रभृत्युपांशुयाजांतं पूर्ववत्कृत्वा ऐंद्रं माहेंद्रं वा पुरोडाशमवदाय पंचऐः सान्नाय्यप्रतिनिधित्वात्सान्ना
य्यधर्मेण सान्नाय्यद्वयस्थाने चतुःकृत्वोवदाय पस्यह प्रचारः॥ ततः स्विष्टकृदादि पूर्ववत्॥ आवाहनानंतरं स्विष्टकृतः प्राक् तदूर्ध्वं वा दोहद्वयविना
शे वक्ष्यमाणप्रायश्चित्ता हविषां व्यापन्नावित्यादिष्टेयं॥ एष च तु पक्षेष्वं तिम पक्षः श्रपणसमीचीनमिति भाति॥ अत्रैतरेयब्राह्मणा श्रपणेनुतदा
हुर्यस्य सर्वमेव सान्नाय्यं दुष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरित्यैंद्रं वा माहेंद्रं वेति समानं सा तत्र प्रायश्चित्तिरिति॥ अत्र तन्द्राष्टं। सायं दुग्धं प्रातर्दु
ग्धं वेत्युभयं सर्वमिति॥ अथ ब्राह्मणानुसारी प्रयोगः॥ आवाहनात्पूर्वं दोहद्वयविनाशे तदानीमेवैंद्रो माहेंद्रो वा पुरोडाशो निरुप्य सान्नाय्य
धर्मेण सान्नाय्यद्वयस्थाने चतुःकृत्वोवदाय ताभ्यां पूर्वं निरुप्तैरैंद्रेण माहेंद्रेण वा सह प्रचारः। तत्र सान्नाय्यस्थानीयपुरोडाशयोः सान्नाय्यधर्मेणा
वदानं॥ अपहारेप्येवमेव प्रकारः॥ अथ सर्वहविर्दोषे पहारे च प्रा०॥ तत्रैतरेयब्राह्मणं॥ तदाहुर्यस्य सर्वाण्येव हवींषि दुष्येयुर्वापहरेयुर्का
तत्र प्रायश्चित्तिरित्याज्यस्यैतानि यथादेवतं परिकल्प्य तयाज्यहविषेष्ट्वा पुनर्यजेतातोन्याभिष्टिमनुल्बणां तन्वीत यत्तोपन्नस्य प्रायश्चित्तिरिति॥

५२
58

अत्र तन्त्राप्यं ॥ पुरोडाशदधिपयोरूपाणि हवींषि सर्वाणीत्युच्यन्ते आज्यस्य सेवं धीन्येतानि त्रीणि हवींषि तत्तद्देवतानामनतिक्रमणत दनुसारेण परिक्र-
म्याज्यहविर्युक्त तपातपेप्सापजेत दृष्ट्व तत्तद्ध्र्वमन्यामिष्टिमनुल्बणामन्यूनानधिकां यथाशास्त्रं तन्वीत विस्तारयेत् ॥ यथाशास्त्रमनुष्ठितो
यज्ञः पूर्वस्य वैकल्यस्य यज्ञस्य प्रायश्चित्तिरिति ॥ अत्र बौधायनः ॥ सर्वाणि चेत्स्थवींषि दुष्येयुर्नश्येयुरपहरेयुः क्षामेयुर्वान्येन देवताः प्रतिसंख्या
यमिष्ट्वेतामिष्टिमन्यामिष्टिमनुल्बणां तन्वीत यज्ञो हैव यज्ञस्य प्रायश्चित्तिरिति विज्ञायते ॥ अत्र तद्भाष्यविवरणं ॥ सर्वाणि चेत्स्थवींषि दुष्येयुर्नी
लमक्षिकादिभिर्नश्येयुरपहरेयुर्वान्येन प्रतिनिधिनाप्रसंख्याय प्रतिदेवतमिष्ट्वेष्टिं समाप्यान्यामेतामेवाऽविकृतामि
ष्टिमावर्तयेत प्रायश्चित्तार्थमिति ॥ इदं सान्नाय्यप्रसंगात्त्रिविवितं तत्सर्वहविर्विषयकमपि ज्ञेयं ॥ अथ सान्नाय्याभिवर्षिप्रा० ॥ तत्र प्रदीपकारः ॥ सा
न्नाय्यमभिवृष्टं चेन्मित्रो जनानीति मंत्रेणाहवनीये हुत्वान्यां दुग्ध्वा पुनः संनयेत् अथ सान्नाय्यस्य यागकाले कीटाद्युपहतौ अमेध्याद्युपहतौ प्रा०
तत्र प्रदीपकारः यागकाले कीटाद्युपहतममेध्याद्युपहतं च सान्नाय्यमप्सु प्रक्षिप्य लौकिकं दधिपयो वानीय एतेह मंत्रान् जपित्वा मिदां हुतीहुत्वा व्या
हृतीश्च हुत्वा तेनैव मन्त्रेणोत्तरेदिति ॥ अथाग्निहोत्रोच्छेषणनाशप्रा० ॥ तत्र कर्मान्ते बौधायनः ॥ स यद्यग्निहोत्रोच्छेषणाल्प मायेत्पुनरेवाग्निहोत्रं जुहु
यादिति ॥ अत्र प्रदीपकारः ॥ अमावास्यायामग्निहोत्रे हुत्वा सान्नाय्यातंचनार्थमग्निहोत्रोच्छेषणं निदध्यात् ॥ तस्मादाद्यदिनश्येत्तदा पुनरग्निहो
त्रं हुत्वा तच्छेषणेन सान्नाय्यमातंच्यात् ॥ अत्र मंडनादयस्तु ॥ अग्न्येरोषधितं दुलैर्वातं चनसर्वेषां प्रायश्चित्तं जुहुयादित्याहुः ॥ अथामिक्षानाशप्रा०
॥ तत्रापस्तंबसूत्रानुसारी प्रायश्चित्तसुबोधिनीकारः श्रीनिवासः ॥ पयोमन्ततायां पयो न पतः कुतश्चिदुत्पाद्य प्रचरेद्यद्युभयं व्यापद्येत तदाज्ये

नैव प्रचोदाज्येन वाजिनमिति मार्द्धजवचनात्॥ आमिक्षायां सान्नाय्यप्रायश्चित्तं न भवति॥ अत्र प्रयोगः॥ दधिपयसोर्मध्ये पयस्यान्नौ न दानीमेव तदुत्पा
द्यामिक्षां कुर्यात्॥ उभयातौ वप्येवमेव॥ यदि तत्रैय पयसि दध्यानयनानंतरमार्त्तिः स्यात्तदाज्येन मपति निधिनायजेत्॥ नेत्यावत्तीरिति॥ अत्र हि एणपक्रे
शियत्क्षत्नौगोयीनाथः॥ पद्युभयं प्राप्येत तदा आज्येन दध्ना पयसा वा यजुहत्सूतेनेत्यत्र देवत्वात्सवितोत्सुनातु॥ अच्छिद्रेण॥ वसोः स॰॥ मिति पर्युग्रोध्यं
॥ सायंदोहनाशे प्रातर्दोहनाशे चेदमेव प्रायश्चित्तं॥ आमिक्षानिष्पत्त्यनंतरमपीदमेव प्रायश्चित्तं॥ अत्राप्युभयनाशस्त्वादिति॥ वाजिनापचारे त्वाज्येनै
वयजेत॥ आमिक्षाया विष्यंदने सर्वप्रायश्चित्तमेवेति सुबोधिनीकाराः॥ ब्राह्मणी निष्काससनाशे आज्येन यागइति देवयाज्ञिकः॥ इति सान्नाय्यप्रायश्चित्ता
नि॥ अथ सान्नाय्यादिद्रव्यस्कंदनप्रा॰॥ तत्राश्वलायनः॥ हविषांस्कन्नमभिमृशेद्देवांजनमगन्यज्ञस्ततस्य माशीर्विनुवर्धतां॥ भूमिर्घृतेन मंत्रनुयत्तोय
त्पतिमंहसाः॥ भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा॥ यत्तस्य त्वामम पोन्मया भिमया प्रतिमया द्रप्सश्चस्कंदेति मंत्रं॥ देवांजन
मित्यादिनास्कंदेत्यंतेन स्कन्नं हविरभिमृशेदिति वृत्तिः॥ अथ प्रयोगः॥ आज्यं ब्रीहितंडुलादीनां निर्वपणोत्तरमाहुति पर्याप्तस्कंदने तदधिकस्कंद
ने च यत्स्कन्नं तद्देवांजन॰ स्कंदेत्यनेनाभिमृश्याप्तस्य प्राशित्र्यशेषेण जुहुयात्॥ अशेषे पुनरुत्पत्तिः॥ तत्र सान्नाय्यात्पत्तिस्तु पूर्वप्रकारेणैव॥ आहु
तेः पर्याप्तन्यूनस्कंदने नैतत्प्रायश्चित्तं॥ तत्र विष्णुपदव्यापर्थं सर्वप्रायश्चित्तमात्रं॥ अथ सान्नाय्यस्कंदने विशेषः॥ तत्र मानमानकल्पे बोधायनः॥ अथ
यद्यान्यस्य वा सान्नाय्यस्यान्यत्र बर्हिषः प्रोतमान्नयाजात्स्कंदति स्वधा सं प्रतिः संध्यास्तिं त्वामिपजुषा प्रजामायुर्धनं च॥ बृहस्पतिमसतो यजमान
इहमाशिषदिति स्कंनमनुमंत्रयते॰ भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्यथ यावत्याशिष्टेन प्रचरेदिति॥ अत्र प्रदीपकाराः॥ सान्नाय्य

५३ 53

स्रुग्घोत्रमात्रप्रणाज्जात् स्कंदने यजमानः संत्वा सिंचामीति स्कन्नस्योपरि जलं सिक्त्वा संत्वा सिंचामीत्यनेनाभिमन्त्रयेत् । अध्वर्युः भूपतयो स्वाहेत्यादिना स्कन्नमनुमं
त्र्य दुर्गादिगणेन कृत्वा स्कन्नशेषेण प्रचरेत् । स्कंसर्वस्कंदने लौकिकं दधिपयो वानीयदोहमंत्रान् जपित्वा दुर्गादिगणेन कृत्वा तेन प्रचरेदिति ॥ अथ तंदुलप्र
क्षालननापचारप्रा० ॥ तत्र दर्शपूर्णमासभाष्ये विद्यारण्यः ॥ तंदुलप्रक्षालनस्य वेधांनिनयनात्पूर्वमपचारे पुनः प्रक्षालनं कृत्वा निनयेत् ॥ अथ स्रुगा
ताज्यस्कंदनप्रा० ॥ तत्र कुतूहलकारः ॥ प्रयाजात्पूर्वं जुहूगताज्यस्य यत्किंचित्स्कंदने पूर्ववत्प्रायश्चित्तं कृत्वा शेषेण प्रचरेत् ॥ सर्वस्कंदने तु देवांजनमित्या
द्यभिमंत्र्य स्रुक्प्रक्षिप्य पुनः शुक्लेति चतुर्गृह्णीयात् ॥ एवमौपभृत्स्कंदने प्रयाजेभ्यः पूर्वं ज्योतिस्त्वित्यष्टवारं ॥ प्रयाजोत्तरं चेदनुयाजार्थं चतुर्वारं गृ
ह्णीयात् ॥ ध्रौवाज्यस्यासमिष्टयजुर्होमात्स्कंदने विश्लेत्यादि प्रकृतिवद्गृह्णीयात् ॥ अत्र त्रिकांडमंडनकारः ॥ जुहूपभृत्ध्रुवेतनष्टे ध्रौवाज्यस्यास्कन्नाशतः
॥ आज्यग्रहणमाचष्टे कात्यायनमहामुनिरिति ॥ अथ स्रुग्गादावत्तावदानस्कंदनप्रा० ॥ तत्र प्रयोगः ॥ स्रुच्यवत्तावदानकांडपात्र्यादिचयादिस्कंदेत
दादेवांजनमित्यभिमंत्र्य स्रुक्तत्र पुनरादाय जुहुयात् ॥ आदानायोग्यत्वे तु स्कन्नमभिमंत्र्य स्रुक्प्रक्षिप्य सति शेषे वक्ष्यमाणावदानदोषप्रायश्चित्तोक्त
रीत्या पुनराप्यतनादवदाय जुहुयात् ॥ कर्मयाज्ञादीनामादानायोग्यत्वे तु आप्यतनाभावात्पुनर्हृत्वा यपजेत् ॥ अथ हूयमानाहुतेर्बहिःस्कंदनप्रा० ॥ तत्रा
श्वलायनः ॥ आहुतिश्चेद्वहिष्परिध्याग्नीध्र एनां जुहुयात् ॥ हुतवते पूर्णपात्रं दद्यादिति सूत्रद्वयं ॥ परिहूयमानाहुतिर्बहिष्परिधिस्कंदेत्तदानस्यास्कं
न्नाभिमर्शने कृते तत आग्नीध्रस्तामादाय तत् स्वीमेव जुहुयादिति प्रथमसूत्रस्यार्थः ॥ होमे कृते हुतवते आग्नीध्राय तदानीमेव यजमानः केनचित्स्थाल्या
दिना पूर्णपात्रं दद्यादिति द्वितीयस्य ॥ अथ प्रयोगः ॥ परिहूयमानाहुतिः परिधेर्बहिःस्कंदेत्तदा ब्रह्मादेवांजनमिति तदभिमर्शनं कुर्यात् ॥ तत

आग्नीध्रतांत्तास्कन्नामादापतूष्णीमेव जुहुयात् ॥ ततः आग्नीध्रापयेनकेनचिद्विस्थान्यास्मादिना पूर्णपात्रं दद्यादिति ॥ अथ स्कन्नहोमप्रा० ॥ तत्र बौधायनः ॥ यद्ये
प स्पैदिश्युत्सिच्येत स्पैतस्पैदेवतायै स्रुवाहुतिं जुहुयाद्यदि प्रागग्नये यदि दक्षिणतो यमाय यदि पश्चाद्वरुणाय यद्युत्तरतः सोमाय यदि सर्वत एवोत्सिच्ये
ते ताभ्यः सर्वाभ्यो देवताभ्यः स्रुवाहुतीर्जुहुयात् तमाज्येनाप्यायनीभ्यामाप्यायस्व समेतु त इति ॥ अत्र प्रदीपकारः ॥ चरौ श्रप्यमाणे प्राक् दिशि
नायाउत्सिक्तेऽग्नये स्वाहेति स्रुवाहुतिर्यदि दक्षिणतो यमाय स्वाहेति स्रुवाहुतिः ॥ यदि पश्चाद्वरुणाय स्वाहेति स्रुवाहुतिः ॥ यद्युत्तरतः सोमाय स्वाहेति
स्रु० ॥ युगपत्सर्वत उत्सेके सर्वा आहुतीर्जुहुयात् ॥ विदिक्षु उत्सेके व्याहृतीर्जुहुयात् ॥ उत्सिक्तं च हमाज्येनाप्याययति ॥ आप्यायस्व समेतु इति द्वा
भ्यां मिंदाहुती च जुहुयादिति ॥ अथ चर्वादीनां स्रावे दुर्गादिगपाः प्रायश्चित्तमिति प्रदीपकारः ॥ अथ हविःशोषणप्रा० ॥ तत्र प्रयोगः । सान्नाय्या
दि द्रवद्रव्यं तापादिवशेन यदि शोषयेत् ॥ तदा प्रधानपर्याप्तं चेत्तेनैव प्रधानं संपाद्य ध्रौवाज्यात् स्विष्टकृतं हुत्वा भक्षस्य लोपः ॥ प्रधानापर्याप्तं चेत्सा
न्नाहीनेनापि प्रधानं संपाद्याज्येन स्विष्टकृतं भक्षस्य लोपः ॥ सर्वशोषणे तु पुनरुत्पत्तिरिति ॥ अथ हविरपक्वप्रा० ॥ तत्राश्वलायनः ॥ हविषि दुःश्रृते
चतुःशरावमोदनं ब्राह्मणान्भोजयेदिति सूत्रं ॥ यदा हविरपक्वं भवति ॥ तदा तेनैव हविषा तत्कर्म समाप्य चतुःशरावपरिमितव्रीहिभिरोदनं पक्त्वा चतुरो
ब्राह्मणान्भोजयेदिति वृत्तिः ॥ अथ प्रयोगः ॥ यदा हविरपक्वं भवति तदा तेनैव हविषा तत्प्रक्रान्तं कर्म समाप्य चतुःशरावपरिमितमोदनं देवत्रातभाष्य
मतातपचना ग्रोपलक्षा चतुरो ब्राह्मणान्भोजयेदिति ॥ ब्राह्मणग्रहणादृत्विजो न भवंतीति देवत्रातः ॥ इदं प्रायश्चित्तं कठिनद्रव्यविषयकं ॥ आज्यसान्ना
य्ययोर्दुःश्रृतयोस्तु सर्वप्रायश्चित्तमेवेति शतद्वयीकारः ॥ अथ हविषामश्रृतद्रवदाहोत्सेकस्निःस्रावेप्रा० ॥ तत्र बौधायनः ॥ अथ हविषामश्रृतद्र

५४ 55 वदाहोत्सेकनिःस्रावे प्रायश्चित्तिः । यते ह इदाय स्वाहेत्याहवनीये स्रुवाहुतिं जुहुयात् इदं वेवाय पवे विदग्धे निर्क्ते तैपरि दग्धं स्याद्यत्तत्र भूतं स्यात्तेन प्रचारो
दयपदि सर्वमेव दग्धं स्यात् दृयोम्य वहत्यमिंदाहुती हुत्वाथान्यं निर्वपेदाज्येन वाप्रचारोत्सेवतत्र प्रायश्चित्तिरिति ॥ अत्र प्रदीपकारः ॥ पुरोडाशादौ हवि
ष्यवते हदाय स्वाहेति स्रुवाहुतिं जुहुयात् ॥ हविषो इवे वापवे स्वाहेति स्रुवाहुतिं जुहुयात् । विदग्धे निर्क्ते स्वाहेति स्रुवाहुतिं जुहुयात् ॥ हविषामति
दाहे मिंदादिगणाः प्रायश्चित्तं ॥ अति दग्धहविषः प्रधानाहुतिमात्रसंभवे मिंदादिगणं हुत्वा दग्धप्रदेशादवदाय यजेत ॥ स्विष्टकृदादेरवदानासंभवे
ध्रुवाज्यात्स्विष्टकृदादि कुर्यात् ॥ परि सर्वमेव दग्धं स्यात् दग्धमस्म प्रक्षिप्य मिंदाहुती हुत्वाथ पो दानप्रभृति हविंतरं निरुप्य यागं कुर्यात् ॥ स्विष्टक
र्तव्यतानिमित्त प्राप्तौ ध्रुवाज्येन प्रधानयागं कुर्यात् ॥ तत्र मिंदादिगणं प्रायश्चित्तं हुत्वा पुनर्यागं कुर्यात् ॥ बहुहविष्के कर्मण्येकस्य नाशे आज्येनेष्टिं स
माप्य मिंदादिगणं हुत्वा पुनर्यागं ~~कुर्यात् ॥ बहुहवि~~ र्पितामेवेष्टिं कुर्यादिति ॥ अथ हविर्दाहप्रा० ॥ तत्राभ्युत्थापनः ॥ क्षामे शिष्टेनेष्ट्वा पुनर्यजेत १
अशेषे पुनरावृत्तिः ॥ २ ॥ दृष्ट्वा विहृदक्षिणां दद्यादिति त्रीणि सूत्राणि ॥ एकदेशक्षामस्याशकापरिहार्यत्वात् प्रायश्चित्तं न भवति ॥ यदा पुनर्दग्धं
किंचिदस्य वदानेभ्यो न पर्याप्नुवत् तदा एतत् प्रायश्चित्तं भवतीति प्रथमसूत्रस्य वृत्तिः ॥ हविष्यशेषे दग्धे पुनरावृत्तिः कार्या ॥ पुनर्यागपुनरा
वृत्त्योर्विशेषः ॥ वर्तमानं प्रयोगं समाप्य पुनरप्यादित एवारभ्यान्ताक्रिया पुनर्यागः ॥ पुनरावृत्तिस्तु वर्तमान एव प्रयोगे नष्टस्य हविषः पु
नरुत्पादनमिति ॥ पुनरावृत्तौ तु पुनरुत्पादितेन हविषा स एव प्रयोगः समापयितव्यः ॥ अयमनयोर्विशेष इति द्वितीयस्य ॥ प्रकृतमनुसरतः क्षा
मे शिष्टेनेष्ट्वा तस्मिन्प्रयोगे पारक्षिपा सादृष्ट्वा तम्या ॥ न त्विगम्य रम्यर्पूतितृतीयस्य ॥ अथ प्रयोगः ॥ यद्यधिविदग्धं तस्यैकदेशः प्रधानावदा

न पर्यायोऽपि न भवति तदा तेनैव हविषा प्रक्रान्तं कर्म समाप्य तस्मिन्प्रयोगे दक्षिणां द्वेष्ये दद्यान्न क्लिप्यः॥ द्वेष्याभावे यस्मै कस्मै वा दद्यात्॥ ततस्तस्मि
न्नेवाग्नौ पुनरन्वाधानादिना तद्दैवत्यो यागः कर्त्तव्यः॥ यदा कृत्स्नं दग्धं तदा तेन षष्ठमं श्रुप्रक्षिप्य वर्त्तमानप्रयोग एवाभ्यस्य विहत्याघत्ते न सहान्यैः प्रक्रान्त
प्रयोगं समापयेदिति॥ अथ केशादिभिर्हविर्दोषप्रायश्चित्तं॥ तत्राश्वलायनः॥ हविषां व्यापत्तावो ब्रह्मसु देवता स्तान्येनेष्ट्वा समाप्य पुनरिज्या॥१॥
व्यापन्नानि हवींषि केशनखकीटपतङ्गैरन्यैर्वा बीभत्सैः॥२॥ भिन्नसिक्तानि च॥३॥ अयोग्यवहे पुः॥४॥ प्रागावाहनाद्दोषे॥५॥ अप्यत्यंतंगण
भूतानां॥६॥ प्राक्स्विष्टकृत उक्तं प्रधानभूतानामिति सप्त सूत्राणि॥७॥ आवाहनादूर्ध्वं प्रधानयागादर्वाग्यदि हविर्व्यापद्येत ततस्य प्रधानयागा॥
दि सर्वमाज्येन समापयेत्॥ अव्यापन्नानि च यथापूर्वं समापयेत्॥ एवं समाप्य ततो व्यापन्नहविर्मात्रस्यैवाग्न्यन्वाधानादि पुनर्यागः कर्तव्यः
एवं द्वयोर्बहूनां व्यापत्तौ कर्त्तव्यं॥ हविषामिति बहुवचनमविवक्षितं॥ ब्राह्मणे च सर्वशब्दोस्य प्रायश्चित्तस्य सर्वहविष्षु प्रापणार्थः॥ नैकस्मिन् द्वयो
र्वा प्रतिषेधार्थः॥ इष्टिग्रहणं प्रधानयागे कृते शेषकार्ये चाकृते हविषि व्यापन्ने आज्येन समापनं कुर्यादित्येवमर्थं॥ तत्र पुनर्यागो न भवतीति
प्रथमसूत्रस्य वृत्तिः॥ अन्यैर्वा बीभत्सैरिति वचनात्केशादिभिरपि बीभत्सैरेवेति गम्यते॥ तेनाच्युतकेशनखसंसर्गो न दोषाय भवति तथा कीट
पतङ्गैर्वाप्यमेध्यनिवासिभिः संसर्गः॥ अन्यैर्वा बीभत्सैरिति वचनात्केशादिभिरपि बीभत्सैरेवेति गम्यते॥ तेनाच्युतकेशनखसंसर्गो न दोषाय
त्यनेन वमनादीन्युच्यंते॥ एतैः संसर्गे हवींषि व्यापन्नानीत्यर्थः॥ बीभत्सैरित्येतावतैवास्मिन्नर्थे सिद्धे केशादीनां पृथग्ग्रहणं केशादिसंसर्गे स्व
ल्पकः शुष्कपापोऽयः सहविषि न भवतीत्येवमर्थमिति द्वितीयस्य॥ भिन्नानि सिक्तानि च हवींषि दुष्टानि भवंति॥ कठिनेषु मेदनं द्रवेषु स्रावणमिति

५५ 55

ततीयस्य ॥ दुष्टानि हवींषि अप्सु प्रक्षिपेदित्यर्थः ॥ एषैतेषां प्रतिपत्तिरिति चतुर्थस्य ॥ पुनरावृत्तिप्रसंगात् सूत्रत्रयमारब्धं ॥ आवाहनात्प्राग्घविर्दोषे
सति पुनरावृत्तिरेवेति पंचमस्य ॥ गुणभूतानामल्पं तमपि पुनरावृत्तिरेव ॥ अल्पं तमित्याकर्मपरिसमाप्तेरित्यर्थ इति षष्ठस्य ॥ यत्तु न हविषां व्याप
त्ताविन्युक्तं तत्प्रधानहविषामेव स्विष्टकृतश्च प्रागेवेति चोभयमनेन निपद्यते तेन अत्राप्यंगानां पुनरावृत्तिरेवेति सप्तमस्य ॥ अत्र देवत्रातः ॥ एष्टिका
नि पुरोडाशादीनि हवींषि तेषां व्यापत्तौ व्यायत्तिर्विनाशः केशादिभिर्बीभत्सैः संसर्गो व्यापत्तिर्भवति ॥ अथ प्रयोगः ॥ तत्रादौ प्रधानहविषामावाहनात्प्रा
क् निर्वापाद्यापिष्टकरणांतं तुल्यादिद्रव्ये अल्पोपहतो दुष्टं हविरप्सु प्रक्षिप्य वर्तमानप्रयोगेन तस्य हविषः श्रपणादानादि पुनः कृत्वा तदनरूपापुनरा
वृत्तिः कर्तव्येति ॥ आवाहनादूर्ध्वं प्रधानयागादर्वाग् अल्पोपहतौ प्रोक्षणाच्छुद्धिः ॥ अनल्पेनोपहतौ दुष्टं हविरप्सु प्रक्षिप्य तस्यै देवतायै प्रधानयागा
र्घं ध्रौवाज्यं प्रकल्प्याद्दुष्टे हविर्मिर्यथापूर्वं वर्तमानं प्रयोगं समापयेत् ॥ ततो दुष्टहविर्मात्रस्यैव तस्मिन्नेवाग्नौ पुनरन्वाधानाद्यविकृतः पुनर्यागः
कर्तव्यः ॥ एवं द्व्येकहुतानां वा दोषे पि ज्ञेयं ॥ ग्रहणप्रघासेष्टौ दाग्न्यादीनामन्यतमस्य पुनरिज्यायां प्राप्तायां पौर्णमासमेव तंत्रं भवति न वैश्वदेवतंत्रं ।
ग्रहणप्रघासेषु पंचसंचरपेष्वमेवैतद्ब्राह्मणान्येव पंचहवींषिति च श्रुतेः ॥ तस्मात्तेष्वेव पंचसु अन्यतरस्य पुनरिज्यायां वैश्वदेवतंत्रं भवति ॥
एवमुत्तरयोरपि पर्वणोः ॥ एवमन्यत्रापि परीक्ष्य कर्तव्यमिति सिद्धांतभाष्यकारः ॥ प्रधानयागे कृते शेषकार्ये चाकृते यदि हविर्व्यापद्येत तदा आज्ये
न समापनं कुर्यात् ॥ न तत्र पुनर्याग इति ॥ अत्र स्विष्टकृतं ध्रौवाज्येन कृत्वा भक्षणस्य लोपः कर्तव्य इति केचित् ॥ इति प्रधानहविषां प्रयोगः ॥ अंग
भूतानि प्रयाजाज्यभागादीनि पशुपुरोडाशवनस्पति वा सुजिनादीन्यन्यान्यपात्यानि च तेषामप्रधानत्वात्पुनरावृत्तिरिति सिद्धांतभाष्यकृत ॥ आज्यकुंभादीनां तु आदि

त आरभ्याकर्मसमाप्तेः अन्योपहतो पुनः हव्यवनप्रोक्षणात् शुद्धिः ॥ अत्यंतोपहतोपदुष्टं तत् शूद्रप्रक्षिप्य पुनः हव्यादन हव्या पुनरावतिरेव ॥ इत्यंग
हविषां प्रयोगः ॥ अत्र बौधायनः ॥ अथ हविर्दोषान् व्याख्यास्यामो पयेत नीलमक्षिका शांतिकाम लूणश्लेल म ~~केऽश्मा ध्वांक्षाखुमूषिकसिकृपदके~~
शिरोसोर्पूकेकीटो वा पिंडकारी स्यात् सूद्रकीटमक्षिकापिपीलिका वर्ज्यं श्वमार्जारनकुलमर्कटध्वांक्षाखुमूषिकसिकृपदकेशमतननखकुनखपूतिदृश्लेसे
दास्रक्लेहाश्रुकासवस्रावपार्श्वपौरोप हतं ज्जेसलपातस्पृष्टं तथा अपतेन भ्रूणघ्नेन वा दृष्टं तथा यपात्रे पामेध्ये वा देशे स्कन्नं दुष्टं हविर
पोन्यवहां तिशौ तमस्मन्निवानिधापयंति मिंदाहुती हुत्वा याल्यं निर्वपेदाल्पेन वा प्रच्योतस्यैव तत्र प्रायश्चित्तिः पिनु खलु क्षिप्रसं स्कारतममा
ज्यं भुवतद्रितिमिंदाहुती हुत्वा मनस्वतीं जुहोति सैव तत्र प्रायश्चित्तिरिति विज्ञायते ॥ अत्र प्रदीपकारः ॥ ये हविर्दुष्यति तान् व्याख्यास्यामः ॥ अथ दे
ह वर्तिनी नीलमक्षिका ॥ गवामंगेषु वर्तिन्यांतिका ॥ ॥ तल्यवती मलूणाः ॥ चैलशिरोवर्तिनी पूका ॥ मलपिंडकारः कीटः ॥ श्वमार्जारनकुलमर्क
टाः प्रसिद्धाः ॥ ध्वांक्षाः काकः ॥ आखुर्मूषकः ॥ तेषामन्येषां च पुरीषं मलः ॥ केशाः शरीरद्विपुक्ताः ॥ सिकृपारिहितत्रसनां बलः ॥ पदं पादः ॥ म
तनखः देहच्युतनखः ॥ कुनखो दुष्टनखः पुरुषः ॥ पूतिर्दुष्टगंधवहः ॥ दृश्माः ॥ मुखजा विप्रुषः ॥ स्वेदो देहघर्मः ॥ असृक् रुधिरं ॥ स्नेहो नासिकाक
फः ॥ अश्रु नयनांबु ॥ कासः श्लेष्माक्षवथुः स्मृतं ॥ आर्द्रव्रणं चेति ॥ एते रुपहतं ॥ वसा शुक्रमसृङ्मज्जामूत्रविट्कर्णविण्णखाः ॥ श्लेष्माश्रुपू
पिकास्वेदो द्वादशैते नृणां मला इति ॥ एतैश्चोपहतं ॥ जसलातस्तिकाम्यां दृष्टं स्पृष्टं च ॥ अपपतेनाशुचिना दृष्टं स्पृष्टं च भ्रूणघ्नेन वा दृष्टं स्पृ
ष्टं च ॥ शिशुपत्न्या गर्भिणी च ब्राह्मणो नपदृत्समी इति पंच भ्रूणाः ॥ एतेषामन्यतमं यो हंति स भ्रूणघ्नः ॥ अपात्रे पाख्यामचंडालादिना दृष्टं स्पृ।

५६ 56 षं च ॥ ध्वजी चारजको लोहकारश्च पशुघातिनः ॥ तस्कोवागुरिकेति ग्रामचंडालकाः स्मृताः ॥ अमेध्यदेशे वास्कन्नं ॥ यत्र प्रसूयते नारी म्रियते दह्यते पि वा ॥
चंडालाधूषितं यत्र मूत्रविष्ठादिसंगतिः ॥ एवं कुत्समषभूयिष्ठाभूरमेध्या प्रकीर्तिता ॥ एवंभूतामेध्यदेशे स्कन्नं च ॥ एवं दुष्टहविरस्कशीतमस्मनिवा
प्रक्षिप्यमिंद्राहुती त्याहुतीश्च हुत्वा भूर्यो दानप्रभृति हविरंतरमुत्पाद्य यजेत ॥ अशक्तौ क्षिप्रकर्तव्यता प्राप्ता वान्येन वा यजेत ॥ आज्यपक्षे मनस्व
ती च प्रायश्चित्तं ॥ क्षुद्रकीटमक्षिकापिपीलिकावर्ज्ये ॥ क्षुद्रकीटोद्घुणादिः ॥ माक्षिकापिपीलिके प्रसिद्धे ॥ एषु प्रमादाद्धविषि पतितेषु न दोषः ॥ सर्वे
त्र क्षुद्रकीटकमक्षिकापिपीलिकादीनां आपं च मध्ये उद्धृत्याभ्युक्ष्योत्पूयजुहुयात ॥ ऊर्ध्वं चेद्दुष्टमेवेति जैमिनिः ॥ दुष्टेन हविषा यागे कृते पश्चाद्दो
षदर्शने पुनर्यागो न कर्तव्यः ॥ तथा हि कात्यायनः ॥ दुष्टेन हविषा यागाभिनिर्वृत्तौ पश्चाद्दोषसंवित्तिर्भवति तत्कृतमेवेति ॥ अदुष्टेन द्रव्येण पुनरेव
त्तिरिति केचित ॥ दुष्टहविर्विषये कारिकाः ॥ दुष्टेन हविषालिष्टे पश्चाद्वेद्दोषदर्शनं ॥ प्राक्समिष्टयजुर्होमात्तन्निरूप्य पुनर्यजेत ॥ ऊर्ध्वं स्मार
न्न यजेतेन त्विकेन सहवेतरैः ॥ दुष्टेनेष्टिपि नावृत्तिरिति कात्यायनोऽब्रवीदिति ॥ अत्र प्रकरणांतरस्थः प्रदीपः ॥ दोषदुष्टेन स्कन्नेन वा हविषा अज्ञानात्प्र
धान यागे कृते प्रणवव्याहृतीर्जुहुयादिति ॥ अत्र शतदूपीकाः ॥ पूर्वोक्तेषु पातत्यादिषु दोषहेतुषु विष्ठादिव्यतिरिक्तैर्दूषिते विहितं तंतुल्यादि
कं पेषणात्पूर्वं प्रक्षालनेनैव शुध्येत ॥ एवमभिषवात्माक्सोमः शुध्येत ॥ तथा विशसनात्पूर्वं पशुश्चेत्सर्वेत्र सर्वं प्रायश्चित्तं कर्तव्यं ॥ विष्ठा
दिसंसर्गे तु निर्वापादूर्ध्वं पशुव्यतिरिक्तं सर्वं त्याज्यमेवेति ॥ प्रायश्चित्तसुबोधिनीकारस्तु ॥ केशपिपीलिकादिदोषविषये तत्स्पृष्टप्रदेशमुत्सृ
ज्य त्यक्त्वा अवशिष्टहविः भस्म आदिनोशोधयित्वा तेन यागः ॥ तत्स्पृष्टपात्रं तु पात्रशुध्युक्तप्रकारेण संशोध्य प्रयोक्तव्यं ॥ केशादिभिः सह पाके

तुतस्य विहत्याज्यमेवेति॥ औषधद्रव्येषु पाकात् पूर्वं दोषप्रसक्तौ प्रक्षालनं कर्त्तव्यं॥ अभिषवात्पूर्वं सोमस्य प्रदोषे प्रक्षालनं॥ पशौ त्वनुयाकृतस्य दोषे
तत्परित्यागेनान्यस्य हरणं॥ उपाकृतस्य पशोरुद्धे दशमलेष्वन्यतमेषु सत्सु प्रक्षालनमेव॥ अवत्तस्य दोषे त्यागः॥ केशस्पर्शमात्रे तदंगस्यैव त्य
त्यागः इति॥ अथ प्रस्तुत्यमवत्तावदानदोषे प्रा०॥ तत्राश्वलायनः॥ अवदानदोषे पुनरायतनादवदानमिति सूत्रं। मध्यात्पूर्वार्धाद् गृहीतस्यावदानस्य
दोषे सति तस्य हविषो मध्यपूर्वार्धाभावात्तद्द्रव्यसदेवेति मन्यमानः प्रधानहविषश्चेदाज्येनेष्टिमित्यादि कर्त्तव्यं॥ अंगहविषश्चेत्पुनरावृत्तिरेव मध्य
पूर्वार्धयोरेव साधनत्वेनोपसंहार इति पोष्यति(?) तस्योत्तरमिदं सूत्रं॥ अवदानदोषे पुनरप्यवदानायतनान्मध्यात्पूर्वार्धाद्देवावदातव्यं अपेक्षित
त्वात् पोः शब्दयोरिति नतु मुख्याद्रिभिर्व्रीहिभिः संपादिते हविः सर्वप्रायश्चित्तमेव॥ तत्र यच्चावदानेन प्रायश्चित्तस्याः सत्त्वात् नादर्थ्ये तत्रोपसंहृतं भवेत्तन्नान्यपा
पत्कार्यार्थे यदुपादीयते तस्य तत्कार्याकरणे तत्स्थितिराद्रर्थ्यं नापैति॥ अतस्तादर्थ्यान्न पापातेनैव हविषाप्यस्य मितिसिद्धमिति वृत्तिः॥ अत्रासिद्धां
तमाप्यकारः। एतस्मिन्नन्नूच्यमाने पुनरायतनादवदानं नैव भवति अन्यस्य हविषः पुनरुत्पादनमेव स्यात् तस्मान्न्यायेन पुनरायतनादवदानस्य प्र
तिषिद्धत्वात्तस्माद्वचनमवदानदोषे पुनरवदानमिति एतावतास्मिन्नपि आयतनादिति वचनं पशोः संज्ञप्तस्य वपाहृदयवक्षआदीनामसर्वग्रहणं
क्रियते तेषामपि नाशे तस्मात्स्थानादन्यस्य मांसपिंडस्य पुनरवदानं कर्त्तव्यं॥ कथं स्यादित्येतदर्थमायतनादित्युच्यते आयतनस्याप्यभावे सर्वेष्वव
दानेषु दुष्टेषु किं कर्त्तव्यमिति॥ उच्यते तत्पाशतति अन्यः पशुरालब्धव्यः तत्राद्वतान्निक्षिपेत् तस्मिन्पक्षे पर्यग्न्यादीनां पुनरेव तोक्रियमाणा
पामधिगुप्रैषे वा जपेय मा जापयानां ब्रह्मरंध्रादालंभन पक्षे भवति वपां हुतापामन्यस्मिन्नालब्धव्ये पुनः पुरानाम्या अपि शस्रोवपाम्

४ त्विदंतामित्यस्योक्षाः कर्तव्यः तथाऽस्मात्क्षः संसृजतादित्यस्यापीति ॥ अत्र प्रदीपकाराः ॥ सर्वत्रावदाने अहुते हविषि दोषदर्शने अवत्तं हविः स्रुग्गत
५८ मस्मिनिवाप्रक्षिप्यत्वेनः सत्वंनरश्म्याहुती हुत्वा पुनरापतनादवदाय जेतेति ॥ अथावदानग्रहणानंतरं स्थिते पुरोडाशादौ दोषदर्शने प्रायश्चित्तं गत
57 त्र प्रदीपकाराः ॥ अवदानानंतरं पुरोडाशादौ दोषदर्शने वतेन हविषा प्रधानयागं कृत्वा दुष्टमस्म प्रक्षिप्य त्वं नः सत्वं नइति द्वे स्रुवाहुती हुत्वा ध्रुवाज्या
त्स्विष्टकृदादिकुर्यात् ॥ न पुनर्याग इति ॥ अथ हविषां काकस्पर्शादिप्रा० ॥ तत्र शातदूपीकाराः ॥ आमन्त्रे हविषि तत्समीपे परिकाकः पक्षवातेन
स्पृशेत् उपरिगच्छेन्निषीदेद्वा इदं विष्णुर्विचक्रम इति स्रुवाहुतिं जुहुयात् । तत्स्पृष्टं चेदधवित्स्याज्यमिति ॥ अथ पुरोडाशभेदनादौ प्रा० ॥ तत्राश्वलायनः
॥ यदि पुरोडाशः स्फुटेद्भूतस्तेत बार्हिष्येनं निधायाभिमंत्रयेत किमुत्पतसि किमुत्प्रोष्ठाः शांतः शांतेरिहागहि ॥ अघोरो यज्ञियो भूत्वासीद सदनं
स्वमिति मा हिंसीर्देवप्रेरित आज्येन तेजसाज्यस्व मा नः किंचन रीरिषः ॥ योगक्षेमस्य शांत्या अस्मिन्नासीद बर्हिषीति मंत्रः ॥ स्फुटेत् भिद्यादित्य
र्थः ॥ उत्पतेत उच्छ्रुतेदित्यर्थः ॥ पूर्वो निधानमंत्रः ॥ उत्तरोभिमंत्रणार्थः ॥ आनंतर्ययोगादिति वृत्तिः ॥ अत्र प्रयोगः ॥ यदि पुरोडाशो भिद्येतोच्छ्र
च्छेत् वा तदा पुरोडाशमुद्वास्योपस्तीर्णायां दारुपात्र्यां किंचिद्बर्हिरास्तीर्य तत्र किमुत्पतसि कि० नं स्वमिति मंत्रेण निधाय माहिंसीर्देवप्रे० सीद
बर्हिषीत्यनेनाभिमंत्र्य सर्वप्रायश्चित्तं जुहुयादिति ॥ अत्र विशेषो बोधायनः ॥ अथ हविषामुद्वासनकाले पतनपालनस्कंदनोद्धतेन स० ंसपे
णाविपर्यासे तथा वापकारणेषु प्रायश्चित्तिर्व्याहृतिभिराहवनीये स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्यथानारेणाबद्धुल्कणदेशेनोदं उ० यनिष्क्रम्याः तामि
तोहृदरु० यनिसृप्य व्याहृतिहल्का व्याहृतिभिरेव प्रतिपद्यते ॥ उध्वतेतु पुरोडाशे वेपिते स्पंदिते तथा ॥ भिन्ने स० स्पर्पणे चापि प्रायश्चित्तं कथं

भवेदितिविज्ञायते ॥ उद्धृते तु कुलं हन्याद्दूषिते न स्पतिप्रजाः ॥ मित्रे सं॰ सर्पणे चापि यजमानः प्रमीयत इत्यपथतनफालनखं उनोद्धृतेन सं॰ सर्पणे
पुनः सिद्धमुद्वासस्य बर्हिषं दक्त्वा प्रभृतेन सर्पिषाभ्यसिच्याभिमंत्रयते किमुत्पतसि॰ इदं त्वमिति ब्रह्मणे वरं दत्वांतर्वेद्यासादयेत् स्पा॰ सं॰ स्थितायां
मुर् क्विंषमभिमतीन्निर्वपेत स्पा॰ सं॰ स्थितायां तु मतीं निर्वपेदायुष्मत्यस्तु कर्तव्या उत्तरे श्छंदसः क्रिया इति ॥ अत्र प्रदीपकारः ॥ हविषामुद्वासन
काले पुरोडाशो दीप्यति तेस्फुटिते उद्धृतेने संसर्पणे खंडिते स्पंदनेतरागमने उत्पाने दृष्टे पोर्वे हूनां विपर्यये हविरंतरे यां तापिते चैतेषु निमित्तेषु व्या
हृतीर्हुत्वा आतमितोर्ह्यामाहुती हुत्वा वेष्टुकः एवं तरेणोऽरणा त्वा पुनर्व्याहृती रातमिनो हुत्वा वेष्टुकः एवं तरेण व्याहृतीर्वदन्नमविशेत ॥ पतनादिगुणवि
शिष्टं पुरोडाशं यथापूर्वमुद्वास्य पात्रांतरे प्रभूतेन सर्पिषाभ्यसिच्य दारुपात्र्यां निधाय वेद्यां बर्हिस्तृत्वैवासाद्य किमुत्पतसीत्यादिमंत्रेणाभिमंत्र्य ब्रह्म
णे वरं दत्वांतर्वेद्यासाद्य पजेत । उद्धृते तु कुलं हन्याद्दूषिते न स्पतिप्रजा । मित्रे संसर्पणे चैव यजमानः प्रमीयत इति ॥ पुरोडाशस्योद्धृतेनं सांमाप्यस्तु
रभिमत्येष्टापजेत ॥ इष्टापस्येत्यसिसंकल्प्यः ॥ अग्नये सुरभिमते ष्टाकपालं पुरोडाशं निर्वपेत ॥ गंधवतीभिः प्रोक्षणीभिः प्रोक्षणादि कुर्या
त ॥ गंधवंतक्रविनःप्रचोदयेः ॥ अग्निहोतानिषसारापजीपा॰ भावुलोके ॥ पुवाक्रविः पु॰ ॥ साध्वीमकरिति याज्यानुवाक्ये ॥ अग्नेः सुरभिमतो इमन्ना
दः ॥ पुन एलंभवजें संतिष्ठते ॥ पस्यामिष्टो पुरोडाशस्य भेदनं तो समाप्याचुष्मतीषिं कुर्यात ॥ इष्टापस्येति संकल्प्यः ॥ अग्नय आयुष्मते ष्टा
कपालं पुरोडाशं निर्वपेत ॥ आयुष्टे विश्वतो दध॰ प्राण आयति॰ ॥ आयुर्दा अग्न इति याज्यानुवाक्ये ॥ अग्नेरायुष्मतो हमन्नादः ॥ पुन एलंभव
र्जे संतिष्ठते ॥ पस्यामिष्टो संसर्पणं तो समाप्यात्मीयजन्मनक्षेत्र षिमावता कुर्यात ॥ अथवा मित्रे संसर्पणे वा प्राजापत्यां शत कृष्णालामि

५८ 58 षिं कुर्यात्॥ योमंत्रोर्बिभीयात्तस्मा एतामिष्टिं निर्वपेदिति॥ पवित्रयपप्(?)मितानि सुवर्णशकलानि कृष्णलाः इति कालनिर्णये माधवः॥ आपूर्वं ध्य
र्थं शतकृष्णलेष्ट्याय क्ष्ये इति संकल्प्यः॥ पात्रासादनकाले नवं चरुपात्रमासादयेत्॥ उलूखलादीनां नप्रयोजनमवहननाभावात्॥ प्रणीताप्रण
यनकाले घृतं प्रणयेत्॥ घृतं प्रणेष्यामीति वदेत्॥ कृष्णलप्रमाणानि शतं सुवर्णानि गुंजाकाराणि कृत्वा पात्र्यामोप्य देवस्य त्वेत्यादि प्रजापतये
जुष्टं निर्वपामीति कृष्णलानि रुप्य प्रोक्षणानंतरं धृष्टिमादायेत्यादि क्रम सीत्यादि चरुस्थालीमधिश्रित्य तस्यां तिरः पवित्रमाज्यमानीय तिरः
पवित्रं चरुधर्मेण कृष्णलान्योप्य श्रपयेत्॥ आज्यं निरुप्य पर्यग्निकरणं कृत्वा चरुधर्मेणोद्वास्य वेद्यामासादयति॥ यागकाले उपस्तरणाभिघा
रणे च न विद्यते॥ चत्वारि कृष्णलानि प्रथमावदानं द्वितीयं च तथैव एवमष्टौ कृष्णलानि चरुस्थाल्यां स्थितान्येन सहावयेत्॥ पंचावत्तीनाम
वदानत्रयस्यापि द्वादश कृष्णलान्यवद्यति॥ हिरण्यगर्भः समवर्तताग्रे प्रजापते नत्वदिति याज्यानुवाक्ये॥ हवनकाले आज्यमेव जुहोति॥ न
कृष्णलानि आज्यमेव जुहुत्वाज्यमेवप्राश्नंति॥ कृष्णलानामेकेन सह जुहुयाद्वा॥ प्रजापते रहं प्रयज पाचेति॥ चत्वारि स्विष्टकृतेवद्यति॥ पंचाव
त्तिनस्त्वष्टौ॥ आज्यमेव जुहुयात्॥ अष्टाविडायै चत्वार्यवांतरेडायै॥ आज्येन सहप्राशित्रस्येकं॥ न चतुर्धाकरणं॥ चतुर्धाकरणकाले चरुपा
त्रांशिष्टानि पात्रांतरे निधाय ब्रह्मणे प्रयच्छति॥ अवत्तानि कृष्णलानि ब्रह्मणो हस्ते दत्तानि च सर्वाणि समं विभज्य गृह्णीरन्॥ सामान्यदक्षिणां दद्यान
चान फलीकरण होमः॥ पुनराधेयं भवजं संतिष्ठते॥ पयद्यप्यत्र प्रदीपकारेण फलीकरण होमनिषेधः कृतस्तथापि दर्शपूर्णमासीयविधारणप्रभा
प्यात्कर्तव्य एव॥ एवं पिष्टलेप होमोपि॥ एवमामिक्षादिप्रयोगेष्वपि॥ एवं शतकृष्णलेष्टिं समाप्यानंतरं पंचहविष्कामापुष्कामेष्टिं कुर्यात्॥ आ

पर्वृध्यपर्येऽध्यापयेदिति संकल्पः ॥ आग्नेयमष्टाकपालं पुरोडाशं सौम्यं चरुं ब्राह्मणो दशकपालं पुरोडाशं सावित्रं चरुं ॥ आग्नावैष्णवमेकादशकपालं
निर्वपेत् ॥ आग्नावैष्णवाकाले धर्मपुरोग्रे जिह्वामित्० ॥ पंचन्वमैत्रं नवनीतममवद्यदसर्पत्तत्सर्पिरभवद्यदघ्रियत तत् घृतमभवत् ॥ इति द्वाभ्यामाज्यमवे
क्षते पञ्चवमैदित्येतेनैव बाह्वविरहस्तासनानं तां लोहिते पात्रे प्रवर्त्तं निधायाभिघार्य हविर्भिः सह वेद्यामासादयति ॥ आयुष्य आयुर्दा अग्न इत्याग्नेय
स्य ॥ आप्यायस्व समेतु त इति सौम्यस्य ॥ अवते हेल उदुत्तममिति वारुणस्य ॥ प्रणो देव्या नो दिव इति सावित्रस्य ॥ अग्नाविष्णू महितद्वां अग्नाविष्णू मा
हि तद्वामग्नावि धाम प्रियं इत्याग्नावैष्णवस्य ॥ अग्नेरहं मन्त्रादः ॥ सोमस्याहं स्तोताः ॥ वरुणस्याहं धर्मेभाक् ॥ सत्यस्त्वा अहं वा चमन्त्राद्यं पुषेयं
॥ अग्नाविष्ण्वोरहं वीर्यवान्भूयासं ॥ पुरस्तात्स्विष्टकृत उपहोमांजुहोति ॥ अश्विनोः प्राणोसि तस्य ते दत्तां ययोः प्राणोसि स्वाहा ॥ अश्विभ्यामिदं
न० ॥ सवेत्रप्राणापेदमितिवा ॥ संस्त्रावेण प्रवर्त्तमभिघारयति ॥ एरुसीति ॥ इंद्रस्य प्राणोसि तस्य ते ददातु यस्य प्राणोसि स्वाहा ॥ इंद्रायेदं० ॥ विरा
डसीति प्रवर्त्तमभिघारयति ॥ मित्रावरुणयोः प्राणोसि तस्य ते दत्तां ययोः प्राणोसि स्वाहा ॥ मित्रावरुणाभ्यामिदं० ॥ सम्राडसीति प्रवर्त्तमभि
घारयति ॥ विश्वेषां देवानां प्राणोसि तस्य ते ददातु येषां प्राणोसि स्वाहा ॥ विश्वेभ्यो देवेभ्य इदं० ॥ स्वराडसीति प्रवर्त्तमभिघारयति ॥ लोहितं पात्रं प्रव
र्त्तेन सहाग्नेण्याहवनीयेनीत्वा दक्षिणावेदिश्रोण्यामासाद्य पात्रस्यमाज्यं यजमानमवेक्षयति ॥ घृतस्य धारामभृतस्य पंथामिंद्रेण दत्तां प्रय
तां मरुद्भिः ॥ तत्त्वा विष्णुः परिपश्यतु तत्त्वेडा गव्यैरयदि त्यतेन ॥ अथर्त्विजो ब्रह्मणो हस्तमन्वारभ्य यथेत आसीना आहुः ॥ अथ ब्राह्मणा यजमानस्य
हस्तं गृह्णाति ॥ इतरे ऋत्विजो ब्रह्मणो हस्तमन्वारभ्य आहुः ॥ पावमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपांशोर्वीर्येण देवस्त्वा सवितोत्सृ

५९ 59 जतुजीवातवेजीवनस्यायै॥ बृहद्रथंतरयोस्त्वास्तोमेनत्रिष्टुभोवर्तन्याशुक्रस्यवीर्येणदेवस्त्वासविताजतुजीवातवेजीवनस्यायै॥ अग्नेस्त्वामात्रयाज
गत्यैवर्तन्याग्नेयपास्यवीर्येणदेव॰स्यायै॥ अथयजमानोहिरण्यद्वारेणपात्रस्यमाज्यंधिपिबति। पिबेतमध्वर्युरनुमंत्रयते॥ इदममन्नआयुषे
वर्चसेकृधिप्रियं रेतोवरुणसोमराजन्॥ मातेवास्मा अदितेशर्मयच्छविश्वेदेवाजरदष्टिर्यथासत्॥ यजमानआत्मन्प्रवर्त्तेमदूह्यदक्षिणेकर्णे
आबध्नीते॥ आयुष्यं विश्वतोदध॰ण्यः॥ पुनस्तेप्राणआयातिपरायक्ष्मं सुवामिते॥ प्रवर्तमनुपर्वर्तयति॥ आयुरसिविश्वायुरसि॥ सर्वायुरसि
सर्वमायुरसि॥ अथब्रह्मायजमानस्यहस्तंगृह्णाति॥ अग्निरायुष्मान्त्सवनस्पतिभिरायुष्मांतेनत्वायुषायुष्मंतंकरोमि॥ सोमआयुष्मान्त्सओ
षधीभिरायुष्मांते॰॥ यज्ञआयुष्मान्त्सदक्षिणाभिर॰॥ ब्रह्मायुष्मत्तद्ब्राह्मणैर॰॥ देवाआयुष्मंतस्तेमृतेनायुष्मंतस्तेन॰॥ पितरआयुष्मंतस्ते
स्वधयायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि॥ इतिषट्पर्यायानुक्रान्तिषट्कृदादिसमानंपुनरालंभवर्जंसंतिष्ठते॥ एवमायुष्कामेष्टिंसमाप्य।
अग्नयेपवमानायाग्नयेशुचयेइतिपुरोडाशद्वययुक्तामिष्टिंकुर्यात्॥ इष्टायस्य इति संकल्पः॥ अवशेषप्रयोगोग्न्युपघातप्रकरणोक्तोज्ञेयः
॥ आयुर्वृद्ध्यर्थे योब्रह्माब्रह्मणाद्यादिघ्नतसूक्तजपंकुर्यात्॥ उद्वासनकालादन्यत्रपुरोडाशपतनादौ दुर्गादिगणप्रायश्चित्तमितिप्रदीपकारः॥
प्रधानयागानंतरंहविःपतनादौ प्रधानहविषोन्यहविःपतनादौचप्रणवेनव्याहृतिभिश्चस्रुवेणजुहुयादितिचंद्रिकाकारः॥ अथपुरोडाशभेद
नादौप्रायश्चित्तार्थेनक्षत्रेष्टयः॥ तत्रबौधायनः॥ अथातोनक्षत्रेष्टीर्व्याख्यास्यामोग्निर्वाअकामयतअन्नादोदेवानांस्यामितिताब्राह्मणेन
व्याख्याताः सायावैशाख्याः पौर्णमास्याः पुरस्तादमावास्याभवतिसासकृत्सर्वतस्यापभरणीभिःसंपद्येततस्यामारभेतेतितस्याउपर

स यद्येनयोरग्नीन्समारोह्यो रवस्यप मथि त्वाग्नीन्विन्वाऽपि वा मातवास्यायां पौर्णमास्यां वोपवसेद्यस्यां तत्र क्षमं संपद्यते तत्रैषोऽत्यंतप्रदेशो ह विहछिष्यत्र
तो यजमानो भवतीति विज्ञायते पिता जन्मनक्षत्रे कुर्यादापुष्काम स्त्रियपवर्ग्यो वा मयोगो जीवंतां वाज्यभागोपजत्यानो अग्नेस्तु केतुना॰ जीवसेत्वं
सोममहे भगं॰ जीवसत्त्वस्य निर्वपत्यग्नये कृत्तिकाभ्यो जुष्टं निर्वपाम्यग्निं कृत्तिका उपजेति संप्रेष्यत्याग्नेयमष्टाकपालमनुमत्यै चरुमिति सर्वत्रानुषज
ति नक्षत्रं हविर्मध्ये अपपिल्वा सादयति तस्याः सप्तदश सामिधेन्यः समिध्यमानां समिधां चांतरेण श्रीमन्त्यो धाय्ये दधाति स्वाहा हा पस्याग्निर्यो दृश एपि
वीरवेतोपधा॥ अग्नेः पत्तस्यचेततः॥ अदाभ्यः पुर एताग्निर्विशां मानुषीणां॥ तूर्णी रथः सदा नवः॥ एतरपि मंतोपुष्टिमंता वाज्यभागोपजत्याग्निना एपि
म श्रवदूपस्फानो अमीव हेत्यथ हविषामग्निर्मूर्धा भुवोऽनुनो द्यानुमतिरन्विदनुमते त्वमिति संचरत्योपार्जाज्यानुवाक्या नक्षत्रं हविषामग्निर्नः पातु कृत्ति
का इति पयास समाम्नातमपपरस्तात्स्विष्टकृतः स्रुवाहुती रुपजुहोति अग्नये स्वाहा कृत्तिकाभ्यः स्वाहेति यथा समाम्नातं स्विष्टकृत्ये संयाज्ये हव्यवाहं
स्विष्टकृतमिति संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमादि विसृजते व्रतम्॥३॥ एवमेवमुत्तरमुत्तरं प्रतिवत्सरमुत्तरमुत्तरोऽहनि यजेत विशेषान्व्याख्यास्यामः
प्रजापतिः सवितेत्युयांं श्रुः सर्वेभ्य आश्लेषाभ्य आज्ये कामेमिति स वै पवामवंत्यधिश्रपणकालेनिः यवित्रमाज्यमानीपातिरेः यवित्रेकाभानाव
पति पितृभ्यो मघाभ्यः पुरोडाशं षट्कपालमिति पेतपत्निकेन निर्वपणप्रोक्षणादि वपनसंवपनादीनि व्याख्यातानि भवंति तानीपसवनिकेन
सोम्येनप्रचरंण्ठ कल्यो व्याख्यातोऽपैतद्वापवेनिष्प्यापेगर्षे दुग्धमितिपयसा प्रातर्दोहवत्सं स्कान्मा विशाखाभ्यामिष्ठूत तदानीमेव पौर्णमासी
मान्येन जैतापश्वो भूते मित्रायानुराधेभ्य श्वरु मित्युतराभिरेषा ठामिरिष्ठ्वा तदानीमेवाभिजितापजेता पश्वोभूते विष्णवे विष्णो श्रोणायै पुरोडाशं त्रि

कपालमित्युत्तरेषु प्रोष्ठपदेषु पुरोडाशं भूमिकपालमिति कपालमात्रं भूमौ परिलिख्य गार्हपत्यमधिवर्त्तयति तस्यैककपालवत्संस्कारः अपभरणीभिरिष्ट्वा तदा
नीमेवामावास्यामान्येन यजेताथ श्वोभूते चन्द्रमसे प्रतीदृश्याय पुरोडाशं पंचदशकपालमित्यभिनीय वाह निर्वपेदुदिते चन्द्रमसि प्रचरेत यानो व्रीही
णां शुक्लानां च कृष्णानां च समवास्यो दुग्धे श्वेतायै वेत्यभिनीय वाह विर्निर्वपेदस्तमिते प्रचरेदपि वासं धावेव निर्वपेत्संधावेव प्रचरेदथ पैतमुषसे चरुमित्य
भिनीय वरात्रौ निर्वपेदुषसि प्रचरेदथ पैतस्मै नक्षत्राय चरुं निर्वपति यथा पालं देवानामस्यैवमहं मनुष्याणां भूयासमिति निर्वपणकाले यजमानो जपत न।
आसीनो यजमानो जपत्यभिनीय वाह निर्वपेदुदितेषु नक्षत्रेषु प्रचरेदथ पैतं सर्पायनक्षत्रेभ्यश्चरुमित्यभिनीय वरात्रौ निर्वपेदुदिते सूर्ये प्रचरेद
थैतमदित्यै चरुमथैतं विश्वेभ्यो देवेभ्यश्चरुमिति यजति यज्ञो वै विष्णुर्यज्ञ एवान्ततः प्रतितिष्ठतीति ब्राह्मणं वरो दक्षिणा भवतीति विज्ञायते ऽपावद्मयसिद्धेषिः
प्रसिध्यः पशुः पाथिकृत्येष्टिसुत्वा दर्शपूर्णमासाभ्यां यजेत नक्षत्रसत्रेणायुतिरनेत्याय ज्योतिषामयनेनेष्ट्वायायं निर्णिद्य ज्योतिष्टममुपजायते ऽ
पपुनर्मृत्युं जयतीह स्माह बौधायनः ॥ ४ ॥ अत्र प्रदीपकारः ॥ रहस्यापाश्चिनप्रकरणे नक्षत्रेष्टीनाम परे शः पुरोडाशमेदनादिप्रायश्चित्तार्थे। आ
पुष्करस्य स्कन्दर्तव्यादत्या चापेणोक्ता नक्षत्रेष्टयोप्यामुष्मत्यः ॥ आनतस्तासां प्रयोगो वक्ष्यते ॥ नक्षत्रेष्ट्यनुष्ठानेन पापक्षयो भवति ॥ नक्षत्रे
ष्ट्यनुष्ठानात् ज्योतिष्टोमफलं प्राप्नोति ॥ अन्नाद्यकामोऽपि नक्षत्रेष्टिभिर्यजेत ॥ आयुष्कामस्तु नक्षत्रेष्टिभिर्यजेत ॥ अथवा स्वजन्मनक्षत्रेष्ट्याया वज्जीवं य
जेत ॥ त्रिः कृत्वो वा ॥ नक्षत्रेष्ट्यारंभकालं चैत्रमासामावास्याया अपभरणीयोगे सति तस्यामुपक्रमः ॥ अथवा वैशाखयोर्मास्यामावास्याया
मारंभः ॥ अथवा फाल्गुनादिमासत्रये यस्यां तिथावपभरणीयोगोऽस्ति तस्यामुपक्रमः कर्तव्यः ॥ यस्यां तत्र स्मसंपद्यतदृत्यूकल्वात् ॥ उपक्र

मदिवसात्पूर्वेद्युर्नांदीमुखादिश्वोभूते प्रातरग्निहोत्रं हुत्वा केशादिवापयित्वा स्नानादि पंचकं कृत्वा जले: समारोप्य वो स्वसायमथित्वाग्नीन्विहृत्य मनस्व
तीं हुत्वायाः पुरस्तादित्यादि आपुष्कामो न्नाद्यादिकामो वा मत्स्पं जपकामो वान्योतिष्कामो वा नक्षत्रेष्टिं यक्ष्ये ॥ नक्षत्रेण वा यक्ष्ये इति संकल्पः ॥ कृत्तिक
एणादि ॥ नक्षत्र सत्रेणायक्ष्यमाणोन्वारंभेष्ट्या यक्ष्ये इति संकल्पः ॥ नक्षत्रेष्टिभिर्यक्ष्यमाणो वान्वारंभेष्ट्या यक्ष्ये इति संकल्प्यान्वारंभेष्टिं कुर्यात् ॥ अ
पश्वोभूते कृत्तिका नक्षत्रे प्रातरग्निहोत्रं हुत्वा ॥ याः पुरस्तादित्यादि अन्नाद्यकामः कृत्तिका नक्षत्रेष्ट्या यक्ष्य इति संकल्पः कार्यः ॥ अग्नीन्विहृत्या
न्वाधानादि कुर्यात् ॥ प्रथमे दिवसे विहृतेष्वग्निषु सर्वासां नक्षत्रेष्टीनां यागः ॥ प्रतीष्ट्यग्निविहरणं वा ॥ नक्षत्रेष्टीनां सोपवसथत्वं सद्यस्कालत्वं वा
॥ सोपवसथत्वपक्षेन्वारंभणेष्ट्यनंतरमेव प्रथमेष्टेरन्वाधानादि कृत्वोपोष्य श्वोभूते यजेत । इध्मसंनहनकाले सर्वासां नक्षत्रेष्टीनां त्रयोविंशति धे
त्म्यूहः ॥ निर्वापकाले आग्नेयमष्टाकपालं पुरोडाशं निरुप्याग्नेयं कृत्तिकाभ्यो जुष्टं निर्वपामीत्यष्टाकपालं पुरोडाशं निरुप्यानुमत्यै जुष्टं निर्वपामीति च
रुं निर्वपेत् ॥ सर्वासु नक्षत्रेष्टिषु प्रथममाग्नेयमष्टाकपालं तन्नक्षत्रहविर्मध्ये पश्चादनुमत्यै चरुं निर्वपेत् ॥ सर्वासु नक्षत्रेष्टिषु नक्षत्रदेवता
हविषां पृथक्त्वं न देवतान्यनुमत्यै चरुं निर्वपेत् सर्वा अन्यत्र वापव्ययपयस आज्यहविषश्च प्रोक्षणादि समाहविरासादनात् ॥ होतुः सामिधेनी
षु समिध्यमानवत्समिद्धवतीं तरेण स्वाहा हाय स्मर्त्रियो दृशे ऽ प्राम्यः पुरएतेति धीमत्यौ धाय्ये सर्वासां नक्षत्रेष्टीनामेते एव धाय्ये सर्वासां
नक्षत्रेष्टीनामाज्यभागयोः अग्निनारयिमश्नवद्गयस्फान इत्यनुवाक्ये ॥ वृषाणो अग्निर्वृषाणः सोम इत्याज्यभागयोः याज्ये सर्वत्र । आपु
ष्टामस्य तु ॥ आ नो अग्ने सुकेतुना । त्वं सोम महे भगमित्याज्यभागयोः अनुवाक्ये ॥ अथ हविर्भिर्यजति । अग्नये नुब्रूहि ॥ अग्निं यजेति ॥ अग्नि

६१ मूर्धेत्यनुवाक्या ॥ भुवो यज्ञस्येति याज्या ॥ अग्नेरहमन्नादः ॥ अग्नये कृत्तिकाभ्योनुब्रूहि ॥ अग्निं कृत्तिका यजेति ॥ आग्निर्नः पातु कृत्तिका इत्यनुवाक्या ॥ य
स्य भांति रश्मयो यस्य केतव इति याज्या ॥ अग्नेः कृत्तिकानामहमन्नादः ॥ अनुमत्या अनुब्रूहि ॥ अनुमतिं यजेति । अन्विदनो द्यानुमतिर्यज्ञमित्यनुवा
क्या ॥ अन्विदनुमते त्वमिति याज्या ॥ अनुमत्या अहं प्रप्रजया नु पशुभिः श्रुजनिषीय ॥ सर्वेष्वनक्षत्रेष्विषु संचरदेवतयो रग्नेरनुमत्याश्च एता एव या
ज्यानुवाक्याः ॥ अनुमंत्रणं च ॥ सर्वेषां हविषामुत्तरार्धात् स्विष्टकृतमवदाय पश्चिराभिघार्य पुरस्तात्स्विष्टकृतः स्रुवेणोपहोमानुहोति ॥ अग्नये स्वा
हा । कृत्तिकाभ्यः स्वाहा ॥ अंबायै स्वाहेति नव स्रुवाहुतीर्यथालिंगमुद्देशः ॥ सर्वेषां नक्षत्रेष्टीनां पुरस्तात्स्विष्टकृतः स्रुवेणोपहोमान्जुहुयात् । अ
ग्नये स्विष्टकृतेनुब्रूहि ॥ अग्निं स्विष्टकृतं यजेति ॥ हव्यवाहमभिमातिषाहमित्यनुवाक्या ॥ स्विष्टमग्ने अभितत्पृणाहीति याज्या ॥ सर्वेषां नक्ष
त्रेष्टीनां एते एव स्विष्टकृतः संयाज्ये ॥ अग्नेः स्विष्टकृतो हमायुष्मान् ॥ प्राशित्रावदानादयन्वाहार्यस्यादनांतं समानं । अन्वाहार्यमासां(?) दद्या
ति ॥ हरितायगामिति प्रतिग्रहः ॥ सर्वासां नक्षत्रेष्टीनां अन्वाहार्येण सह गौर्दक्षिणा ॥ समानमनुयाजादि ब्राह्मणतर्पणांता(?) संतिष्ठते ॥ नक्षत्रेषु
पक्रमदिवसप्रभृति समाप्ति पर्यंतं पत्नीयजमानौ व्रतचारिणौ भवतः अधःशायिनौ ब्रह्मचारिणौ स्यातां यजमानो हविः शिष्टं भुंजीत हवि
ष्यं पत्नी ॥ यद्वोभावपि हविष्यमेवाश्नीयातां । अथ सोमस्तेयात राग्निहोत्रं हुत्वा यथाः पुरस्तादित्यादि ॥ रक्षणापिका मोरोहिणी नक्षत्रं यथा यक्ष्य इति सं
कल्पः ॥ अग्न्यन्वाधानादि निर्वापकाले आग्नेयं निरुप्य प्रजापतये रोहिण्यै जुष्टं निर्वपामीति चरुं निरुप्यानुमत्यै निरुप्य प्रोक्षणादि समानमा
हविरासादनात् ॥ आग्नेये नम्र चर्यं प्रजापतये द्वयोः पशुरोहिण्यावनुब्रूहीत्युच्चैः ॥ प्रजापतिं रोहिण्यं श्च रोहिणी यजेत्युच्चैः ॥ प्रजापतेरोहि

णीदेव्युदगादिति पान्या ॥ प्रजापते रोहिण्या अहं प्रजमान्वेति ॥ स्विष्टकृते वदायोपहोमां जुहोति ॥ प्रजापतये स्वाहा ॥ रोहिण्यै स्वाहेति चतस्रः
स्विष्टकृदादि समानं ॥ अनुयाजप्रभृति ब्राह्मणतर्पणान्तां संतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा पाः पुरस्तादि त्यादि ॥ समानानामाधिपत्य
कामो मृगशीर्षनक्षत्रेष्टाय क्ष्ये इति संकल्प्य ॥ निर्वापकाले आग्नेयं निरुप्य सोमाय मृगशीर्षाय जुष्टं निर्वपामीति ॥ श्यामाकान्निरुप्य पयसि
श्रपयेत् ॥ अनुमत्यै जुष्टमित्यादि समानमाहविःप्रचारात् ॥ आग्नेयेन प्रचर्य ॥ सोमाय मृगशीर्षायानुब्रूहि ॥ सोमं मृगशीर्षं यजेति ॥ सोमो राजा
मृगशीर्षेण आगन्नित्यनुवाक्यस्य ॥ यत्तेन क्षत्रं मृगशीर्षमस्तीति पान्या ॥ सोमस्य मृगशीर्ष स्वाहा ॥ प्रप्रजपा चेति ॥ सोमाय स्वाहा ॥ मृगशीर्षा
य स्वाहेति षडुपहोमां जुहोति ॥ स्विष्टकृदादि समानं ॥ अनुयाजप्रभृति ब्राह्मणतर्पणान्तां संतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा पाः पुर
स्तादित्यादि ॥ पशुकाम आर्द्रानक्षत्रेष्टाय क्ष्ये इति संकल्प्य ॥ निर्वापकाले आग्नेयं निरुप्य रुद्रायार्द्रायै जुष्टं निर्वपामीति ॥ प्रियंगून्निरुप्य ॥ चरुं
पयसि श्रपयेत् ॥ समानमाहविःप्रसादनात् ॥ आग्नेयेन प्रचर्य ॥ रुद्रायार्द्रायानुब्रूहि ॥ रुद्रमार्द्रां यजेति ॥ आर्द्रया रुद्र इत्यनुवाक्या ॥ हेती रु
द्रस्येति पान्या ॥ रुद्रस्यार्द्रया अहमप्रजपा चेति ॥ अनुमति यागादि ॥ रुद्राय स्वाहेत्यादि चत्वार उपहोमाः ॥ स्विष्टकृदादि समानं ॥ अनुयाजादि त
र्पणान्तां संतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा ॥ याः पुरस्तादित्यादि ॥ प्रजापशुकामः पुनर्वसुनक्षत्रेष्टाय क्ष्ये इति संकल्प्य ॥ निर्वापकाले
आग्नेयं निरुप्यादित्यै पुनर्वसुभ्यां जुष्टं निर्वपामीति चरुं निरुप्य श्रपयेत् ॥ समानमाग्नेयप्रचारात् ॥ अदित्यै पुनर्वसुभ्यामनुब्रूहि ॥ अदितिं
पुनर्वसू यजेति ॥ पुनर्नो देव्यदितिरित्यनुवाक्या ॥ एवा न देव्यदितिरिति पान्या ॥ अदित्याः पुनर्वस्वो रहं प्रजपा चेति ॥ अदित्यै स्वाहा ॥ पुनर्वसु

६२ 62 भ्यां स्वाहेति॥ चत्वार उपहोमाः॥ स्विष्टकृदादि समानं॥ अनूयाजादि तर्पणान्ता संतिष्ठते॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा॥ पाः पुरस्तादित्यादि॥ ब्रह्मव
र्चसकामस्तिष्यं नक्षत्रे स्थापक्षेप इति संकल्प्य॥ निर्वापकाले आग्नेयं निरुप्य॥ बृहस्पतये तिष्याय जुष्टं निर्वपामीति नीवारान्निरुप्य पयसि श्रपयेत्
॥समानमाग्नेयप्रचारात्॥ बृहस्पतये तिष्यायानुब्रूहि॥ बृहस्पतिं तिष्यं यजेति॥ बृहस्पतिः प्रथमं जायमान इत्यनुवाक्या॥ तिष्यः पुरस्तादिति
याज्या॥ बृहस्पते तिष्यस्याहं प्रप्रजयाचेति॥ बृहस्पतये स्वाहा॥ तिष्याय स्वाहेति॥ त्रय उपहोमाः॥ स्विष्टकृदादि समानं॥ अनूयाजादि तर्पणा
न्ता संतिष्ठते॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा॥ पाः पुरस्तादित्यादि॥ भ्रातृव्योपहतिकाम आश्लेषा नक्षत्रे स्थापक्षेप इति संकल्प्य॥ निर्वापकाले आ
ग्नेयं निरुप्य॥ सर्पेभ्य आश्लेषाभ्यो जुष्टं निर्वपामीति यवान्निरुप्य मोक्षणादि कृत्वा॥ यवानुलूखले परि क्षुद्य गार्हपत्ये भर्जनकपालमधिश्रित्य भ्रा
ष्ट्रम्यन्नानवतार्य चर्मावधूननादि पिष्टानि स्वमिश्रे स्वंगारेषु पात्रमधिश्रित्य तिरः पवित्रमाज्यमानीय तिरः पवित्रं करंभानावपति॥ समानमा हविः
प्रचारात्॥ सर्पेभ्य आश्लेषाभ्योनुब्रूहि॥ सर्पानाश्लेषा यजेति॥ इदं सर्पेभ्य इत्यनुवाक्या॥ ये रोचने सूर्यस्यापि सर्पा इति याज्या॥ सर्पाणामाश्लेषाणा
महं वृत्रहा भूयासं॥ सर्पेभ्यः स्वाहेत्यादि त्रय उपहोमाः॥ स्विष्टकृदादि समानं॥ अनूयाजादि तर्पणान्ता संतिष्ठते॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा
॥पाः पुरस्तादित्यादि॥ ऋद्धिकामो मघा नक्षत्रे स्थापक्षेप इति संकल्प्य॥ निर्वापकाले प्य॥ पितृभ्यो मघाभ्यो जुष्टं निर्वपामीति निरुप्य निर्वापादि षु
प्राचीनावीतित्वं पित्र्यर्थेषु॥ अन्यत्रानुमत्यार्थे यज्ञोपवीतित्वं॥ कपालोपधाने षट्कपालोपधानं॥ समानमाग्नेयप्रचारात्॥ पितृभ्यो मघाभ्योनुब्रूहि॥ अ
नत्ताक्रमेपैराश्राव्याह॥ पितॄन्मघा यजेति॥ वषट्कृते दक्षिणपूर्वार्धे प्राचीनावीती जुहोति॥ उपहूताः पितर इत्यनुवाक्या॥ ये अग्निदग्धा इति या

न्यापितॄणां मघानामहं० वत्त्रहामभ्यासं ॥ पितृभ्यः स्वाहेत्यादि षं चोपहोमाः ॥ स्विष्टकृदादि समानं ॥ अनुयाजादि तर्पणांतासंतिष्ठते ॥ ॥ श्वोभूते प्रात
रग्निहोत्रं हुत्वा ॥ पाः पुरस्तादित्यादि ॥ पशुकामः पूर्वाफल्गुनीनक्षत्रे ष्यापक्ष्ये इति संकल्प्य ॥ निर्वापकाले आग्नेयं निरूप्य ॥ अर्यम्णे फल्गुनीभ्यां जुष्टं नि
र्वपामीति चरुं निरुप्य श्रपयेत् ॥ समानमाग्नेयप्रचारणात् ॥ अर्यम्णे फल्गुनीभ्यामनुब्रूहि ॥ अर्यमणं फल्गुन्यौ यजेति ॥ गवां पतिरित्यनुवाक्या ॥ येनेमा वि
श्वेति याज्या ॥ अर्यम्णः फल्गुन्योरहं० प्रप्रजयावेति ॥ अर्यम्णे स्वाहेत्यादि त्रयं उपहोमाः ॥ स्विष्टकृदादि समानं ॥ अनूयाजादि तर्पणांतासंतिष्ठते
॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा ॥ पाः पुरस्तादित्यादि ॥ भागश्रेष्ठ्यकाम उत्तराफल्गुनीनक्षत्रे ष्यापक्ष्ये इति संकल्प्य ॥ निर्वापकाले आग्नेयं निरुप्य ॥
भगाय फल्गुनीभ्यां जुष्टं निर्वपामीति चरुं निरुप्य श्रपयेत् ॥ समानमा हविः प्रचारणात् ॥ भगाय फल्गुनीभ्यामनुब्रूहि ॥ भगं फल्गुन्यौ यजेति ॥ श्रेष्ठो देवाना
मित्यनुवाक्या ॥ भगो ह दाता भग इति याज्या ॥ भगस्य फल्गुन्योरहं० प्रप्रजयावेति ॥ भगाय स्वाहेति त्रयं उपहोमाः ॥ स्विष्टकृदादि समानं । अनू
याजादि तर्पणांतासंतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा पाः पुरस्तादित्यादि ॥ हस्ते नक्षत्रे ष्यापक्ष्ये मनुष्याः श्रन्मेदधीरन्स पितास मानानां ॥
स्याइति संकल्प्य ॥ निर्वापकाले आग्नेयं निरुप्य ॥ सवित्रे हस्ताय जुष्टं निर्वपामीति आशूनां व्रीहीणां निर्वापः ॥ कपालोपधाने द्वादशकपालान्युपदधा
ति ॥ समानमाग्नेयप्रचारणात् ॥ सवित्रे हस्तयोः शु हस्तायानुब्रूहीत्युच्चैः ॥ सविताऽमित्यया शु हस्तं यजेत्युच्चैः ॥ आयातु देवः सवितेत्यनुवाक्या ॥ हस्तः
प्रयच्छत्वमृतं वसीय इति याज्या ॥ सवितुर्हस्तस्याहं० स्वस्तिमानभ्यासं ॥ सवित्रे स्वाहा ॥ हस्तः प्रयच्छत्वमृतं वसीय इति याज्या ॥ सवितुर्हस्तस्याहं० स्व
स्तिमानभ्यासं ॥ सवित्रे स्वाहा ॥ हस्ताय स्वाहेति षडुपहोमाः ॥ स्विष्टकृदादि तर्पणांतासंतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा ॥ पाः पुरस्तादित्यादि

६३ ॥ चित्रानक्षत्रे इष्टाय इष्टे चित्रां प्रजां विंदेयेति संकल्प्य ॥ निर्वापकाले त्वष्ट्रे चित्रायै जुष्टं निर्वपामीति निर्वापः ॥ कपालोपधानकाले षट्कपालान्युपदधाति ।
63 समानमाग्नेयपर्यन्तात् ॥ त्वष्ट्रे चित्राया अनुब्रूहि ॥ त्वष्टा नक्षत्रमभ्येतीत्यनुवाक्या ॥ तन्नस्त्वष्टेति याज्या ॥ त्वष्टुश्चित्राया अहं मन्नादः ॥ त्वष्ट्रे स्वाहेति च-
त्वार उपहोमाः ॥ स्विष्टकृदादि तर्पणान्ता समितिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा ॥ पाः पुरस्तादित्यादि ॥ स्वातीनक्षत्रे इष्टाय इष्टे कामचार एषु लोके-
षु अभिजयेयमिति संकल्प्य ॥ अन्वाधानादि शाखाच्छेदनं ॥ शाखापवित्रकरणं ॥ निर्वापकाले आग्नेयं निरुप्यानुमत्यै निर्वापादि ॥ प्रातर्होमकाले वायवे नि-
ष्टायै गच्छाः सकृत्स्मृता यागोः पयो दोहयति ॥ एता आचरंतीत्यादि रहवो वायुर्निष्टा रमयतु गावरति ॥ का मधुस्स्प्रणोब्रूहि का वायवे निष्टायै हविर्नि-
र्दिष्टं ॥ बहुदुग्धि वायवे निष्टायै देवेभ्यो हव्यमाप्यायतां पुनरित्यादि समानमाग्नेयपर्यन्तात् ॥ अग्नेये नमर्चयं ॥ वायवे निष्टाया अनुब्रूहि ॥ वायुं नि-
ष्टां यजेति ॥ अवदानकाले पयसः स्रुवेण द्विरवदाय यजेत ॥ वायुर्नक्षत्रमभ्येतीत्यनुवाक्या ॥ तन्नो वायुरिति याज्या ॥ वायोर्निष्टाया अहमिंद्रियावी
जेमानमिति वा ॥ वायवे स्वाहेति चत्वार उपहोमाः ॥ स्विष्टकृदादि तर्पणान्ता समितिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा ॥ पाः पुरस्तात्यादि ॥ समानानां
श्रेष्ठकामो विशाखानक्षत्रे इष्टाय इष्टो रति संकल्प्य ॥ निर्वापकाले इंद्राग्निभ्यां विशाखाभ्यां जुष्टं निर्वपामीति निर्वापः ॥ कपालोपधाने एकादशक-
पालान्युपदधाति ॥ समानमाग्नेयपर्यन्तात् ॥ इंद्राग्निभ्यां विशाखाभ्यामनुब्रूहि ॥ इंद्राग्नी विशाखे यजेति ॥ इमं सत्र छत्रं वरदत्यनुवाक्या ॥ नक्षत्रा-
णामधिपत्नीति याज्या ॥ इंद्राग्न्योर्विशाखयो रहमिंद्रियावी मन्नादः ॥ इंद्राग्निभ्यां ~~विशाखाभ्यामनुब्रूहि~~ ॥ इंद्राग्निभ्यां स्वाहेति चत्वार उपहोमाः ॥ स्विष्ट-
कृदादि तर्पणान्ता समितिष्ठते ॥ ॥ अथ तदानीमेव पौर्णमासीमान्य हविषा यजेत ॥ पाः पुरस्तादि ~~॥~~ कात्यादि ॥ कामावाप्तिकामः पौर्णमासी

देवतामाज्यं हविषा यक्ष्य इति संकल्प्यः ॥ आग्नेयं निर्वापादि ॥ आग्नेयपुरोडाशमधिश्रित्याज्यं विहृप्य चरुं वेधि श्रपणादि समानमा हविः प्रचारात् ॥ आ
ग्नेयेन प्रचर्य पौर्णमास्या अनुब्रूहि ॥ पौर्णमासीं यजेति ॥ ध्रुवाज्याच्चतुर्गृहीत्वा यजति ॥ पूर्णा पश्चादित्यनुवाक्या ॥ पृथ्वी सुवर्चा इति याज्या ॥ पौर्ण
मास्याः प्रचारकाले उपांशु यजेत ॥ दृब्धिरसीत्यनुमंत्रणं ॥ पौर्णमास्यै स्वाहेत्यादित्रयमुपहोमाः ॥ स्विष्टकृदादितर्पणांतां संतिष्ठते ॥ ॥ श्वोभूते प्रा
तरग्निहोत्रं हुत्वा ॥ प्रातः पुरस्तादित्यादि मित्रधेयजयकामः अनूराधनक्षत्रेष्ट्या यक्ष्य इति संकल्प्यः ॥ आग्नेयं निरुप्य ॥ मित्रायानूराधेभ्यो जु
ष्टमिति चरुं निरुप्य श्रपयेत ॥ अनुमत्यै चरुं निर्वापादि समानमानमा हविः प्रचारात ॥ मित्रायानूराधेभ्योनुब्रूहि ॥ मित्रमनूराधान्यजेति ॥ ऋध्या
स्माहव्यैर्नमसेत्यनुवाक्या ॥ चित्रं नक्षत्रमिति याज्या ॥ मित्रस्यानूराधानामहं ॰ प्रप्रज्ञया चेति ॥ मित्राय स्वाहेत्यादि चत्वार उपहोमाः ॥ स्विष्ट
कृदादितर्पणांतां संतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा ॥ प्रातः पुरस्तादित्यादि ॥ ज्यैष्ठ्यकामो ज्येष्ठानक्षत्रेष्ट्या यक्ष्य इति संकल्प्यः ॥ आग्नेयं नि
रुप्य इंद्राय ज्येष्ठायै जुष्टं निर्वपामीति महाव्रीहीन्निर्वपेदनुमत्यै चरुं ॥ कपालोपधाने एकादश कपालान्युपदधाति ॥ समानमाग्नेयप्रचारात् ॥
इंद्राय ज्येष्ठायानुब्रूहि ॥ इंद्रं ज्येष्ठां यजेति ॥ इंद्रो ज्येष्ठामनुनक्षत्रमेतीत्यनुवाक्या ॥ युंदएयेति याज्या ॥ इंद्राय ज्येष्ठाया अहं ॰ मिंद्रिपावी॰
॥ इंद्राय स्वाहेत्यादि चत्वार उपहोमाः ॥ स्विष्टकृदादितर्पणांतां संतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा प्रातः पुरस्तादित्यादि ॥ मूलनक्षत्रे
ष्ट्या यक्ष्ये मूलप्रजाविदे येति संकल्प्यः ॥ आग्नेयं निरुप्य । प्रजापतये मूलाय जुष्टं निर्वपामीति चरुं निरुप्य श्रपयेत ॥ समानमाग्नेयप्रचा
रात ॥ प्रजापतये मूलायानुब्रूहि ॥ प्रजापतिं मूलं यजेति ॥ मूलं प्रजां वीरवतीं विंदेयेत्यनुवाक्या ॥ अहं नो अद्येति याज्या ॥ प्रजापतेर्मू

६४ 64 ऽनस्माहं०प्रप्रजयाचेति॥ प्रजापतये स्वाहेति त्रय उपहोमाः॥ स्विष्टकृदादि तर्पणांतासंतिष्ठते॥ ॥श्वोभूते प्रातरग्निहोत्रं हुत्वा॥ याः पुरस्तादित्यादि॥
कामानां जयकामः पूर्वाषाढानक्षत्रे स्थापयेदिति संकल्प्य॥ आग्नेयं निरूप्याद्भ्योषाढाभ्यो जुष्टं निर्वपामीति चरुं निरूप्यानुमन्त्रये जुष्टमिति श्रप
णादि॥ समानमाप्रचारात्॥ प्रचारकालेऽद्भ्योषाढाभ्योनुब्रूहि॥ अपोषाढा यजेति॥ या दिव्या आप इत्यनुवाक्या॥ याश्च कूप्या इति याज्या॥
अपामषाढानामहं०प्रप्रजयाचेति॥ अद्भ्यः स्वाहेति पंच उपहोमाः॥ स्विष्टकृदादि तर्पणांतासंतिष्ठते॥ ॥श्वोभूते प्रातरग्निहोत्रं हुत्वा॥
याः पुरस्तादित्यादि॥ अनपजय्यजयकाम उत्तराषाढानक्षत्रे स्थापयेदिति संकल्प्यः॥ आग्नेयं निरूप्य॥ विश्वेभ्यो देवेभ्योषाढाभ्यो जुष्टमिति
चरुं निरूप्य श्रपयेत्॥ आग्नेयप्रचारात्॥ विश्वेभ्यो देवेभ्योषाढाभ्योनुब्रूहि॥ विश्वान्देवानषाढा यजेति॥ तन्नो विश्व उप शृण्वन्तु देवा इत्यनुवाक्या
॥ शृण्वन्तु कन्याइति याज्या॥ विश्वेषां देवानामषाढानामहं०प्रप्रजयाचेति॥ विश्वेभ्यो देवेभ्यः स्वाहेति चत्वार उपहोमाः॥ स्विष्टकृदादि तर्पणांता
संतिष्ठते॥ ॥अथ तदानीमेव याः पुरस्तादित्यादि॥ ब्रह्मलोकादिजयकामोभिजिन्नक्षत्रे स्थापयेदिति संकल्प्यः॥ आग्नेयं निरूप्य॥ ब्रह्मणेभि
जिते जुष्टं निर्वपामीति चरुं निर्वपेत्॥ अनुमन्त्रे निर्वापादि॥ समानमाग्नेयप्रचारात्॥ ब्रह्मणेभिजितेनुब्रूहि॥ ब्रह्माणमभिजितं यजेति॥
यस्मिन्ब्रह्माभ्यजयत्सर्वमेतदित्यनुवाक्या॥ उभौ लोकौ ब्रह्मणा संजितेमाविति याज्या॥ ब्रह्मणोभिजितोहं०प्रप्रजयाचेति॥ ब्रह्मणे स्वाहे
त्यादि चत्वार उपहोमाः॥ स्विष्टकृदादि तर्पणांतासंतिष्ठते॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा॥ याः पुरस्तादित्यादि॥ श्रोणानक्षत्रे स्थापयेत्पुण्यं
श्लोकं यशः पापीयमापापीकीर्तिरागच्छेदिति संकल्प्यः॥ आग्नेयं निरूप्य॥ विष्णवे श्रोणायै जुष्टं निर्वपामीति पुरोडाशं निर्वपेत्॥ कपालोपधानकाले

त्रीणि कपालान्युपधाय ॥ पुरोडाशमधिपणक्ति ॥ समानमाग्नेयप्रचाराएत ॥ विष्णवे श्रोणायाअनुब्रूहि ॥ विष्णुं श्रोणां यजेति ॥ शृण्वंति श्रोणामम
तस्येत्यनुवाक्या ॥ त्रेधा विष्णुरुरुगाय इति याज्या ॥ विष्णोः श्रोणायाअहमन्नादः ॥ विष्णवे स्वाहेत्यादि चत्वारउपहोमाः ॥ स्विष्टकृदादितर्पणांतासंतिष्ठते
॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा ॥ पाः पुरस्तादित्यादि ॥ समानानाममग्रगामिलकामः श्रविष्ठानक्षत्रेष्ट्याय क्ष्य इति संकल्प्यः ॥ आग्नेयं निरूप्य वसुभ्यः
श्रविष्ठाभ्यो जुष्टं निर्वपामीति पुरोडाशं निरूप्यानुमतिनिर्वापादि ॥ कपालोपधानेष्टौ कपालान्युपदध्यात् ॥ समानमाग्नेयप्रचाराएत ॥ वसुभ्यः श्र
विष्ठाभ्योनुब्रूहि ॥ वसून् श्रविष्ठा यजेति ॥ अष्टौ देवा इत्यनुवाक्या ॥ पुनन्नः पांतु वसव इति याज्या ॥ वसूनां श्रविष्ठानामहमन्नादः ॥ वसुभ्यः स्वाहे
तिचत्वारउपहोमाः ॥ स्विष्टकृदादितर्पणांतासंतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा ॥ पाः पुरस्तादित्यादि ॥ शतभिषङ्नक्षत्रेष्ट्याय क्ष्ये
दृढोशिथिलस्यामिति संकल्प्यः ॥ आग्नेयं निरूप्य ॥ वरुणाय शतभिषजे भेषजेभ्यो जुष्टं निर्वपामीति ॥ कृष्णव्रीहिनिर्वापः ॥ कपालोपधाने द
शकपालान्युपदधाति ॥ समानमाग्नेयप्रचाराएत ॥ वरुणाय शतभिषजे भेषजेभ्योनुब्रूहि ॥ वरुणं शतभिषजं भेषजान्यजेति ॥ क्षत्रस्य राजा
वरुणइत्यनुवाक्या ॥ यस्ते नो राजा वरुण इति याज्या ॥ वरुणस्य शतभिषजो भेषजानामहं॰ धर्ममाकृभूयासं ॥ वरुणाय स्वाहेति त्रय उपहोमाः ॥
स्विष्टकृदादितर्पणांतासंतिष्ठते ॥ ॥ श्वोभूते प्रातरग्निहोत्रं हुत्वा पाः पुरस्तादित्यादि ॥ तेजस्कामो ब्रह्मवर्चसकामः पूर्वप्रोष्ठपदनक्षत्रेष्ट्याय
क्ष्य इति संकल्प्यः ॥ आग्नेयं निरूप्याजायैकपदे प्रोष्ठपदेभ्यो जुष्टं निर्वपामीति ॥ चरुं निरूप्य श्रपयेत् ॥ अनुमत्यै निर्वापादि समानमाग्नेयप्र
चाराएत ॥ अजायैकपदे प्रोष्ठपदेभ्योनुब्रूहि ॥ अजमेकपादं प्रोष्ठपदान्यजेति ॥ अज एकपादित्यनुवाक्या ॥ विभ्राजमान इति याज्या ॥ अजस्यैकप

६५ दः प्रोष्ठपदानामहं० प्रप्रजया चेति॥ अजायैकपदे स्वाहेति चत्वार उपहोमाः॥ स्विष्टकृदादि तर्पणान्तां संतिष्ठते॥ ॥श्वोभूते प्रातरग्निहोत्रं
65 हुत्वा पाः पुरस्तादित्यादि॥ प्रतिष्ठाकाम उत्तरप्रोष्ठपदे नक्षत्रेष्ट्या यक्ष्ये इति संकल्प्य॥ आग्नेयं निरूप्याहिर्बुध्न्याय प्रोष्ठपदेभ्यो जुष्टं निर्वपामी
ति पुरोडाशं निर्वपेत्॥ कपालोपधाने एककपालमात्रं भूमौ परिलिख्याङ्गारानधिवर्तयेत् यादेवयज्यं वहेति॥ लिखितस्थानं ध्रुमेव मासि पृथिवी
मित्यभिमृशति॥ अङ्गारैरभिवासयति॥ भृगूणामङ्गिरसामिति एककपालवत् संस्कारः॥ तस्मिन्भूमिकपाले पुरोडाशमधिश्रयणान्ते॥ समा
नमाग्नेयप्रचारात्॥ अहिर्बुध्न्याय प्रोष्ठपदेभ्योऽनुब्रूहि॥ अहिं बुध्न्यं तां प्रोष्ठपदान्यजेति॥ अहिर्बुध्न्यः प्रथमान एतु वासा॥ चत्वार
एकमभिक्रम इति याज्या॥ अहिर्बुध्न्यस्य प्रोष्ठपदानामहं० भूमानं प्रतिष्ठां गमेयं॥ अहिर्बुध्न्याय प्रोष्ठपदेभ्यः स्वाहेति त्रय उपहोमाः॥ स्विष्टकृदादितर्पणा
न्तां संतिष्ठते॥ ॥श्वोभूते प्रातरग्निहोत्रं हुत्वा पाः पुरस्तादित्यादि॥ पशुकामो रेवती नक्षत्रेष्ट्या यक्ष्ये॥ इति संकल्प्य॥ आग्नेयं निरूप्य पूष्णे रेव
त्यै जुष्टं निर्वपामीति चरुं निरूप्य श्रपयेत्॥ समानमाग्नेयप्रचारात्॥ पूष्णे रेवत्या अनुब्रूहि॥ पूषणं रेवतीं यजेति॥ पूषा रेवत्यन्वेतु पन्थाम्॥ दु
ह्रान्य शृनिति याज्या॥ पूष्णो रेवत्या अहं०॥ पुष्टिमान्पशुमान्भूयासं॥ पूष्णे स्वाहेत्यादि त्रय उपहोमाः॥ स्विष्टकृदादितर्पणान्तां संतिष्ठते॥ ॥
श्वोभूते प्रातरग्निहोत्रं हुत्वा पाः पुरस्तादित्यादि॥ अश्विन नक्षत्रेष्ट्या यक्ष्ये॥ श्रोत्रस्वी अबधिरो भवतीति संकल्प्य॥ आग्नेयं निरूप्याश्विभ्यामश्व
युग्भ्यां जुष्टं निर्वपामीति पुरोडाशं निर्वपेत्॥ कपालोपधाने द्विकपाले उपदध्यात्॥ येषां मेककपाले उपचिन्वंति वेधसः॥ पूर्णमस्ते अपि श्रतरं
द्विपाद्यं नाम॥ ~~अश्विभ्यां स्वाहे~~त्याद्द्वा पूपं क्रामिति॥ समानमाग्नेयप्रचारात्॥ अश्विभ्यामश्वयुग्भ्यामनुब्रूहि॥ अश्विनावश्वयुजोपजे

ति॥ तदश्विनावश्वयुजाविति अनुवाक्या॥ योदेवानामिति याज्या॥ अश्विनोरश्वयुजोरहं० इन्द्रियावानन्नादः॥ अश्विभ्यां स्वाहेत्यादि चत्वार उपहोमाः॥ स्वि
ष्टकृदादि तर्पणान्तां संतिष्ठते॥ ॥श्वोभूते प्रातरग्निहोत्रं हुत्वा याः पुरस्तादित्यादि॥ समानानामग्र्यं कामो यमभरणीनक्षत्रे ष्यापक्ष्ये इति संकल्प्यः॥
आग्नेयं निरुप्य॥ यमायापभरणीभ्यो जुष्टं निर्वपामीति चरुं निरुप्य ~~॥यमायापभरणीभ्यो~~ रुप्य श्रपयेत्॥ समानमानग्नेयप्रचाराणां॥ यमायापभरणीभ्यो
नुब्रूहि॥ यममपभरणीर्यजेति॥ अपपाप्मानं भरणीरित्यनुवाक्या॥ यस्मिन्नक्षत्रे इति याज्या॥ यमस्यापभरणीनामहं० प्रप्रजया चेति॥ यमायस्वा
हेत्यादि चत्वार उपहोमाः॥ स्विष्टकृदादि तर्पणान्तां संतिष्ठते॥ ॥अथ तदानीमेव याः पुरस्तादित्यादि॥ कामावाप्तिकाम अमावास्यामाज्येन हविषाप
क्ष्ये इति संकल्प्यः॥ आग्नेयं निरुप्याधिश्रित्याज्यं निरुप्यानुमत्यै चरुमधिश्रयतीत्यादि॥ समानमाग्नेयप्रचाराणां॥ ध्रुवाज्यात्स्रुवेणाज्यस्य गृहीत्वा अ
मावास्याया इत्युपांशु अनुब्रूहीत्युच्चैः॥ अमावास्यामित्युपांशु यजेत्युच्चैः॥ निवेशनी संगमनीत्यनुवाक्या॥ यत्ते देवा अदधुरिति याज्या॥ दाद्धि
रसीत्यनुमंत्रणं॥ अमावास्यायै स्वाहेत्यादि त्रय उपहोमाः॥ स्विष्टकृदादि तर्पणान्तां संतिष्ठते॥ ॥श्वोभूते प्रातरग्निहोत्रं हुत्वा याः पुरस्तादित्यादि॥
दृष्टापक्ष्ये चन्द्रमसः सायुज्यं सलोकतामाप्नुयामिति संकल्प्यः॥ आग्नेयं निरुप्य॥ चन्द्रमसे प्रतीदृश्याय पुरोडाशं पञ्चदशकपालं निर्वपेत्॥ कपा
लोपधानकाले यं चदशकपालान्युपदध्यात्॥ अहनि हविरासादनान्ते कृत्वा उदिते चन्द्रमसि प्रचरेत्॥ आग्नेयेन प्रचर्य॥ चन्द्रमसे प्रतीदृश्याया अ
नुब्रूहि॥ चन्द्रमसं प्रतीदृश्यं यजेति॥ नवो नवर्हत्यनुवाक्या॥ यमादित्या इति याज्या॥ चन्द्रमसः प्रतिदृश्याया अहमन्नादः॥ चन्द्रमसे स्वाहेत्यादि
सप्त उपहोमाः॥ स्विष्टकृदादि तर्पणान्तां संतिष्ठते॥ ॥श्वोभूते याः पुरस्तादित्यादि॥ इष्टापक्ष्ये॥ अहोरात्रमृच्छेयेति नावहोरात्रे आप्नुतामि

६६ 66 तिसंकल्पः॥ आग्नेयं निरूप्य होरात्राभ्यां जुष्टं निर्वपामीति शुक्लकृष्णव्रीहीन्नक्तंमिश्रान्निर्वपेत्॥ अनुमत्यै चरुं निर्वापादि॥ अधिश्रयणकाले सवात्योः प
पसि श्रपणं॥ मृतवत्सा जीववत्सा च वत्से नैकेन दुह्यते तेन सवात्यो॥ तयोः काकृष्णान्याश्वेता॥ तयोः पयसि चरुं श्रपयेत्॥ आनुमतस्य चाग्नेः श्रपणे स
र्वत्र॥ अहनि हविरासादनांतं कृत्वास्तमिते प्रचरेत्॥ अपि वा होरात्रयोः संधावेव निर्वपेत्॥ संधावेव प्रचरेदिति॥ संधौ निर्वापप्रचाराविव॥ समानमाग्ने
यप्रचारात्॥ अहोरात्राभ्यामनुब्रूहि॥ अहोरात्रे यजेति॥ ये विरूपे समनसा संव्ययन्तीत्यनुवाक्या॥ वृषं देवी ब्रह्मणेति याज्या॥ अहोरात्रयोरहं ॰ प्रप्रजया चेअन्ने
स्वाहेत्यादित्रय उपहोमाः॥ स्विष्टकृदादितर्पणांता संतिष्ठते॥ ॥ तस्य एत्याश्वयुजे भागे पाः पुरस्तादित्यादि दूष्यापक्षे॥ समानानां सुभगः प्रियस्या
मितिसंकल्पः॥ आग्नेयं निरूप्य॥ उषसे जुष्टं निर्वपामीति चरुं निरूप्यानुमत्यै चरुं निर्वापादि॥ समानमाग्नेयप्रचारात्॥ उषःकाले आग्नेयेन प्रचर्य॥
उषसेनुब्रूहि॥ उषसं यजेति॥ प्रत्युष्य दृश्याय तीत्यनुवाक्या॥ उद्गा स्त्रियाः सचतइति याज्या॥ उषसोहं ॰ प्रप्रजया चेति॥ उषसे स्वाहेति पंचोपहोमः
॥ होमकाले तेष्वेवाग्निषु अग्निहोत्रहोमः॥ स्विष्टकृदादितर्पणांता संतिष्ठते॥ ॥ श्वोभूते पाः पुरस्तादित्यादि॥ दूष्यापक्षे मनुष्याणां तेजस्वी भवा
मीति संकल्पः॥ आग्नेयं निरूप्य॥ नक्षत्राय जुष्टं निर्वपामीति चरुं निर्वपेत्॥ निर्वापकाले यजमानो जपति॥ यथा त्वं देवानामसी एवमहं मनुष्याणां
भूयासमिति॥ यथा ह वा एतद्देवानां॥ एवं हवा एष मनुष्याणां भूयासमिति॥ अनुमत्यै चरुं निर्वापादि समानमाग्नेयप्रचारात्॥ आहनि
हविरासादनांतं कृत्वोदितेषु नक्षत्रेषु प्रचारः॥ होमकाले तेष्वेवाग्निहोत्रहोमः॥ आग्नेयेन प्रचर्य नक्षत्रायानुब्रूहि॥ नक्षत्रं यजेति॥ तं नो ना
क्षत्रमर्चिमदित्यनुवाक्या॥ प्र नक्षत्राय देवायेति याज्या॥ नक्षत्रस्याहं प्रप्रजया चेति॥ नक्षत्राय स्वाहेत्यादिदशोपहोमाः॥ स्विष्टकृदादित

पर्णांतां संतिष्ठते ॥ तस्या एवास्तु पूर्वभागे यः पुरस्तादित्यादि दृष्ट्वा पक्ष्ये ॥ समानानां प्रतिष्ठा स्यामिति संकल्पः । आग्नेयं निरूप्य ॥ सर्पेभ्यो नक्षत्रेभ्यो जुष्टं निर्व-
पेत् ॥ अनुमत्यै निर्वापादि समानम् आग्नेयप्रचाराणात् ॥ उदयात् पूर्वं हविरासादनान्तं कृत्वोदिते सर्पप्रचारः ॥ उदयानन्तरम् अग्निहोत्रं हुत्वाग्नेयेन प्रचर्य
॥ सर्पेभ्यो नक्षत्रेभ्योऽनुब्रूहि ॥ सर्पान् नक्षत्राणि यजेति ॥ उदु त्यं जातवेदसमित्यनुवाक्या ॥ चित्रं देवानामिति याज्या ॥ सर्पस्य नक्षत्राणामहं० प्रप्रज-
पाचेति ॥ सर्पेभ्यः स्वाहेत्यादि त्रय उपहोमाः ॥ स्विष्टकृदादि तर्पणान्तां संतिष्ठते ॥ ॥ तस्मिन्नेवाहनि दृष्टेनन्तरं यः पुरस्तादित्यादि अस्यां भूमौ प्रतिष्ठा-
कामः आदित्ये दृष्ट्वा पक्ष्ये इति संकल्पः ॥ आग्नेयं निरूप्यादित्यै जुष्टं निर्वपामीति चरुं निरूप्यानुमत्यै निर्वापादि समानमाग्नेयप्रचाराणात् ॥ अदित्या अनु-
ब्रूहि ॥ अदितिं यजेति ॥ अदितिर्न उरुष्यत्वित्यनुवाक्या ॥ महीमू षु मातरमिति याज्या ॥ अदित्या अहं० पाऽहसोमुच्येयमिति ॥ प्रप्रज पाचेति वा ॥
अदित्यै स्वाहा ॥ प्रतिष्ठायै स्वाहेति द्वावुपहोमौ ॥ स्विष्टकृदादि तर्पणान्तां संतिष्ठते ॥ ॥ श्वो भूते प्रातरग्निहोत्रं हुत्वा यः पुरस्तादित्यादि ॥ दृष्ट्वा पक्ष्ये प-
न्नै प्रतिष्ठां गच्छामीति संकल्पः ॥ आग्नेयं निरूप्य विष्णवे जुष्टमिति चरुं निरूप्यानुमत्यै निर्वापादि समानमाग्नेयप्रचाराणात् ॥ विष्णवेऽनुब्रूहि ॥ विष्णुं
यजेति ॥ इदं विष्णुरित्यनुवाक्या ॥ प्र तद्विष्णुरिति याज्या ॥ विष्णोरहं० प्रप्रज पाचेति ॥ विष्णवे स्वाहेति त्रय उपहोमाः ॥ स्विष्टकृदादि तर्पणान्तां
संतिष्ठते ॥ ॥ एवमौपवसथ्ये काले त्र्यहं हविषां द्वात्रिंशद्धोमा भवन्ति ॥ नक्षत्रसत्रं सत्रमध्यपातिन्यौ दर्शपूर्णमासेष्टी स्वस्वकाले क-
र्तव्ये ॥ अतिक्रमितव्ये वा ॥ सत्रसमाप्त्यनन्तरं पथिकृते घृतियत्वप्रायश्चित्तार्थं पथिकृतीमिष्टिं कृत्वा ॥ अतिक्रान्तदर्शपूर्णमासेष्टिं कुर्यात् ।
नक्षत्रसत्त्रेणेष्ट्वा पापं निर्णुदन्यो प कृ संकल्पः ॥ भरणीदिने नक्षत्रसत्त्रेण पक्ष्ये इति संकल्प्य अन्वारम्भणीयापाः प्र पमेष्टिं श्वान्वाधा-

नेतंत्रेण कृत्वा इध्माबर्हिषी पृथक्त्वं मन्त्रस्तोभूते आरम्भणीयायाः पुरएयांप्रयाणपनात्वतुर्होत्रादि हुत्वान्वारम्भणीयां समाप्य पाणिसंमर्शनादि प्रथमे
ष्टिं कुर्यात्॥ भिन्नोपवसथपक्षे नक्षत्रेण आपस्यमानः सोनक्षत्रमारभमाणो वान्वारम्भणीयपायक्ष्य इति संकल्पयेदित्युक्तं॥ तस्मामन्वारम्भेते त्वने
तरपष्ठिते तस्या उपवसथे आरण्योरग्नीन्समारोप्योदवसाय मथित्वाग्नीन् हुत्वा जस्याम्बेति मन्त्रे उपवसथपदस्य चतुर्दशीपरतया योपालेन व्या
ख्यानात् चतुर्दश्यामेव विहरणं तन्त्रं दीक्षोत्वादि कृत्वा भारणीपुत्रपर्वण्यन्वारम्भणीयां कृत्वा कृत्तिकायुक्तप्रतिपदि प्रथमेष्टिः कार्या द्वितीयादि प्रयोगे
नुभरण्यां नक्षत्रसत्रेण यक्ष्ये इति संकल्पमात्रमिति विशेष इति तुन्यायविदः॥ इति कृत्स्नमेते तु प्रथमप्रयोगेपि नान्वारम्भणीया तदानुभरण्यां
संकल्पमात्रं॥ अस्तमितप्रत्योदित्यादि विशेषविधिशून्यात्वृषयः पूर्वाह्ण एवानुष्ठेयाः॥ अतः पूर्वाह्णमाप्यन्नततन्नक्षत्रमुपादेया ननु प्राकृतो वैकृतो वापर्व
निर्णयो नक्षत्रेष्वनुसर्तव्यः॥ पूर्वाह्णे वा यमध्याह्ने प्रतिपदि पर्वसमाप्तेरित्यादि शास्त्रे निमित्तान्तर्गतपर्वग्रहस्याविवक्षाकारणाभावे न सर्वकार्या
पत्तेष्वपि नक्षत्रेषु पर्वनिर्णयाप्राप्तेः॥ कचिन्नक्षत्रे दिनद्वयेपि पूर्वाह्णव्याप्तौ नक्षत्रेष्टिः प्रथमदिन एवानुष्ठानं तत्र यान्नक्षत्रस्य तृतीयदिने
पूर्वाह्णव्याप्तौ मध्यमदिने विरम्य तत्रैवानुष्ठानं॥ न चैवं सोमभूते मित्रायान्वारभेध्य इत्यादि सत्र विरोधः॥ श्वः शब्दस्यात्र नाक्षत्रदिनपरत्वात्॥
उक्तं हि॥ नक्षत्रसत्राण्यहानि वैरोमाने न कुर्यात् भगणात्मकेनेति॥ तृतीयदिने तद्व्याप्तौ तु मध्यदिन एव प्रातरुपक्रमेण नक्षत्रेष्वसमाप्तेः
कस्यचिन्नक्षत्रस्योदयसंबंधाभावेन द्वयोर्नक्षत्रयोरेकाहोरात्रव्याप्तिरेकेण पूर्वाह्णसंबंधात्वा मेरिष्टिद्वयमपि तत्रैवाहोरात्रे कार्ये॥ प्रयोगमध्ये प
त्यामनालम्भकार्यतामप्राप्य ततत्कालेत तदिष्टिं कुर्यात्॥ प्रक्रान्तमग्निहोत्रादि यच्छ्रौतं कर्म चोदितं॥ आर्तत्वाभिप्लुतां भार्यां विहायकुरु

ते हि जहतीति गोपालोक्तेः ॥ संकल्पोऽनंतरं त्वपरूढ्यत तत्पूर्वं णांते तत्काले नु ष्ठानं यदि जहतीति चानुर्मास्यगोचरः शतद्वयी व्याख्योक्तेस्तत्समानार्थप्रदी
पोक्ते श्चात्रापि शमो हत्वा तत् ॥ एवं स्त्रीप्रसवे मासे पुत्रप्रसवे विंशतिरात्रमपकृष्येव प्रयोगः ॥ पाथिकृत्येष्ट्युर्दर्शपूर्णमासारम्भोपजेति प्रयोगां
ते सत्रकृद्गुके रस्यकर्मयोर्दर्शपूर्णमासारम्भणं गामिति निमित्तः दीक्षाकालमग्निहोत्रारम्भणनिमित्तप्रायश्चित्तवदत्र पाथिकृत्या उपदेशा
नुपपत्तेः ॥ अतः प्रयोगमध्ये प्राप्तौ दर्शपूर्णमासौ कर्तव्यौ ॥ अत एव कपर्दिस्वामिना भरणीदिने नक्षत्रसत्रसंकल्पेऽपि पौर्णमासामावास्येनेष्ट्वा
कृत्तिकेष्टिः कर्तव्येत्याह ॥ सत्रं तु प्रारभ्य नक्षत्रसत्रस्य दैवाद्दर्शनिक्रांतदर्शपूर्णमासयोर्गौणकालस्याप्यतिक्रमे प्रायश्चित्तमात्रं नित्येन प्रा
प्ताप्राप्तकर्तव्यत्वयोः कर्तव्यताप्रापणार्थमिष्ट्योर्द्वावतः ॥ अथ प्रयोगः ॥ भरणीयुक्तेकदिनात्पूर्वेद्युः समारोप्याग्नीनत्रैः सह वा उदवसाय मथित्वाऽग्नी
न्विहृत्य मनस्वतीं हुत्वा ज्ञस्थाने ववापतनस्थानं कृत्वा दिवा नांदीश्राद्धं विधाय रात्रावुदकशांतिं प्रतिसरबंधौ कुर्यात् ॥ प्रातरग्निहोत्रं हुत्वा केशा
दिवापपिताप्नानादि पंचकं कृत्वा जघनेन गार्हपत्यं पत्न्या सह दर्भेष्वासीनोऽपज्ञाधिदेवतं विस्मं ध्यात्वा देशकालौ स्मृत्वा उक्तफलानां मध्ये
पक्कामसत्त्वाममग्रहणपूर्वकं अमुककामो नक्षत्रेष्टिभिर्यक्ष्ये नक्षत्रसत्रेणायक्ष्ये इति वा संकल्प्य ॥ ऋत्विग्वरणं पार्वणेन कुर्यात् ॥ ततः पुनः पा
पुरस्तादित्यादि नक्षत्रसत्रेणायक्ष्यमाणो नाम्नां भरणीपर्यन्तानिष्ट्वा पक्ष्ये इति संकल्प्य पूर्वकं पुनरारंभवर्जं मितामिष्टिं समाप्य ॥ तत्र प्रयोगः ॥ तदा
नीमेव पाः पुरस्तादित्यादि अमुककामो नक्षत्रेष्ट्या यक्ष्य इति संकल्पः ॥ साधारणसंकल्पेऽन्वाधानादिकामदृति निर्देशे कृत्तिकेष्ट्यादिषु अत्रा
यं कामः कृत्तिकेष्ट्या यक्ष्येऽग्निपमाप्तिकामो रोहिण्येष्ट्या यक्ष्ये इति विशिष्य तत्तत्फलनिर्देशः ॥ अन्यदा साधारणसंकल्पे यत्फलनिर्देशः प्रत्ये

६८ कं संकल्पेपि तत्र निर्देशएवोचितः॥ सर्वासु नक्षत्रेष्टिषु यद्यहकालत्वं सद्यस्कालत्वं वा विहरणपक्षेपि प्रथमेष्ट्यर्थे विहृतेष्वग्निष्वेव सर्वा इष्टयः॥ प्र
तीष्टि विहरणं पक्षेपि प्रदीपे उक्तं तथापि सद्यस्कालं प्रतीष्टि विहरणं वोचितमिति न्यायविदः॥ तत्र प्रयोगः॥ प्रातः पुरस्तादित्यादि कृत्तिकेष्ट्या।
पक्ष्येदित्यादि अग्निनाऽपि मन्त्रवदुपस्थानो अमीवहेत्यान्यभागयोरनुवाक्ये॥ आयुष्काम कृतं क्रमयोगे॥ आनो अग्ने सुचेतुना त्वं सोमम हे भग
मिति॥ अन्वाहार्यमासाद्य वरं ददाति॥ अत्र लौगाक्षिः॥ वर्णकौगां विजानीयाच्चतुर्वर्षामिति श्रुतिः॥ दक्षिणानां वरएष्ठ पद्धतेमितरे विदुः॥
गोपक्षे अपंवो वर्णपृथामागमहिंसतः प्रतिगृह्णीयादिति॥ याज्ञीवप्रयोगे तु पुनरालंभो भवत्येव॥ प्रथमदिवसप्रभृति समाप्तिदिनपर्यं
तं दंपती व्रतचारिणौ भवतः॥ अधः शायिनौ ब्रह्मचारिणौ स्यातां॥ यजमानो हविर्हविःशिष्टमेव भुंजीत हविष्यं पत्नी॥ यद्वा उभावपि ह
विष्यमेवाश्नीयातामिति प्रदीपे॥ नक्षत्रसत्रानंतरं श्वोभूते ऐंद्राग्नेन पशुना यजेत वैश्वानरीं वा तत्स्थाने कुर्यादिति॥ तस्याः प्रयोगः॥ प्रातः पुर
स्तादित्यादि नक्षत्रसत्रोत्तरांगपशुस्थाने वैश्वानरीष्ट्याप क्ष्ये अवशिष्टः प्रयोगो बोधायनमतेत्यादि पूर्वोक्तोस्ते यदृति॥ ॥ अथ सर्वहविरपहो
ऐष्ट्राः॥ तत्रैतोऽपं ब्राह्मणं॥ तदाहुर्यस्य समाप श्रितावस्तोऽपूर्वमुक्तं॥ इदानीं हविरपहारनिमित्तं प्रायश्चित्तमुच्यते॥ यदाकदाचिद्दोषवशाद्दि
नापक्षविरपहृतं तत्स्थाने आज्येपरिकल्प्यते नादुष्टं हविर्भिश्च प्रक्रांतप्रयोगं समापयेत्॥ अत्रान्यहविष्याद्युपांशुपाजधर्मे शेका
नकार्याः॥ ततोपहृतहविर्मात्रस्यैव तस्मिन्नेवायो पुनरग्न्याधानादि अविकृतः पुनर्योगः कर्तव्यः॥ एवं द्वयोर्बहूनां सर्वेषां वापहारे ज्ञेयं॥ अ
ध्याये पणायेष्टौ एककपालपुरोडाशपर्यावर्तनप्रा०॥ तत्र बोधायनः॥ अथ यद्येककपालः पर्यावर्तेत प्रजापतेर्विर्गने निमनुवर्गे सेत्सध्वर्युः स्व

स्थाने प्रतिष्ठापयेत्प्रतिसूत्रे प्रतितिष्ठामि एषु विश्वमन्या मिवावृध इत्येताभ्यां यजमानोनुमंत्रयेतास्कान्द्यौः पृथिवीमस्कानजनीत्येताभ्यां स्रु
वाहुती जुहुयात्स्वं ॥ स्थिते वैश्वानरीं निर्वपेद् द्विजायते च पत्न्या उपध्येत देवलोकमभिजयेद्यद्दक्षिणोपितृलोकं पत्न्या सप्तकपालः स्थालीं सिपत्तं हुम्
ये दुद्दश्च नुष्यलोकमभिजयेत्प्रतितिष्ठति नैरेतत्स्मृतिः ॥ अत्र प्रयोगः ॥ यद्येककपालः पुरोडाशः स्कन्नहुतः पर्यावर्तेत तदाध्वर्युः स्वस्थाने प्रति
ष्ठापयेत् ॥ प्रजापतेर्वर्तनिमनुवर्तस्व ॥ अनुवीरैरनुराध्याम गोभिः ॥ अन्वश्वैरनु सर्वेण पुष्टैः ॥ अनु प्रजयान्विंद्रियेण ॥ देवा नो यज्ञमृजुधा
नयंतु ॥ इदं प्रतिष्ठापनं स्रुगग्रेणैव कर्तव्येन पाणिनेति शतदूषीकारः ॥ यजमानस्तं प्रतिष्ठितं ॥ प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे ॥ प्रत्यश्वेषु प्रतिति
ष्ठामि गोषु ॥ प्रतिप्रजायां प्रतितिष्ठामि भव्ये ॥ विश्वमन्याभिवावृध इत्येताभ्यामनुमंत्रयते ॥ अध्वर्युः ॥ अस्कान्द्यौः पृथिवीमस्कानृषभो यु
वा गाः ॥ स्कन्नेमा विश्वा भुवना ॥ स्कन्नो यज्ञः प्रजनयतु ॥ अस्कानजनि ॥ आस्कन्नाज्जायते वृषा ॥ स्कन्नात्प्रजनिषीमहि इत्येताभ्यां द्वे स्रुवाहुती जु
हुयात् ॥ ततः प्रक्रांतामिष्टिं समाप्य एककपालपुरोडाशपर्यावर्तनप्रायश्चित्तार्थं वैश्वानरं पेष्टाय द्वादश इति सकल्पेष्टिं कुर्यात् ॥ तस्याः प्रयोगः
पूर्वोक्तो बौधायनोक्तेयः ॥ प्रायश्चित्तशतदूषीकारस्य ॥ होमात्प्राक् अपि स्कंदने पर्यावर्तने च प्रतिष्ठापनप्रभृति द्वे आहुती जुहुयादित्यंतमाहे
ति ॥ अथ पयुषु हविर्वैगुण्यप्रायश्चित्तानि ॥ तत्रादौ स्कन्नप्रायश्चित्तानि ॥ तत्र पृषदाज्यस्कन्नप्रायश्चित्तं ॥ तत्रोपानुवाके बौधायनः ॥ स्कन्ने पृ
षदाज्ये कंसं वा चमसं वा पात्र तितमंतर्वेदि निधाय तस्य स्वधा समयेति भूतिर्दध्ना घृतेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमागम्यादिति स्क
न्नमनुमंत्रयेत ॥ भूपतये स्वाहा ॥ नांपतये स्वाहेति अथैतस्मिन् स्रुच्यवदधाति शतमानं हिरण्यं इत्येग्रहणैव स्म गीमं च मनुवर्तयति वि

६९ 69

ष्णो त्वंनो अंतम इत्यपोध्य त्वा हिरण्यमश्वमवघ्राप्य सादयति॥ अथातो मेध्यमूतस्यैवाश्वावघ्रातस्यध्यां स्नावमध्यस्य कीटावपन्नस्येति यदु तान्यद
मेध्यं मन्यते सर्वेशा एवैतां स्नुच मश्रूयवेष्णा यान्यस्याः स्नुच्यवदधाति॥ शतमानं हिरण्यं नित्येय ग्रहणे वै स्मर्यी मन्त्रमनुवर्तयति विष्णो त्वं
नो अंतम इति अपोध्य त्वा हिरण्यमश्वमवघ्राप्यैव सादयति॥ अथ वै भवति विवा एतस्य यज्ञस्याछिद्यते यस्य ० गृह्णातीति सर्वे स्मय च्चो पुनर्ग
ह्णाति यज्ञो वै विष्णु ० सं तनोतीति ब्राह्मणमिति॥ अत्र प्रदीपकारः॥ एषदाज्यग्रहणप्रभृति प्रथमानुष्टेयपाजप्रचरणात्पूर्वं एषदाज्ये स्कन्ने।
प्रायश्चित्तं कुर्यात॥ ग्रहणप्रभृति यावदनूयाजप्रचरणं वा॥ सादनप्रभृति प्रथमानुयाजचरणात्पूर्वं वा॥ सादनप्रभृति यावदनूयाजच
रणं वा प्रायश्चित्ते अनूयाजेभ्य ऊर्ध्वं स्कन्ने मा प्रायश्चित्तं नास्ति॥ एषदाज्ये स्कन्ने कंसं वा चमसं वा तत्र वै हिर निधाय तस्मिन् स्कन्नशेषमवनयति भूति
देश्रा घते नेति॥ स्कन्नमनुमंत्रयते भूपतये स्वाहेति॥ एषदाज्यग्रहणपांशतमानं हिरण्यं निधाय कंसादौ संभृतं एषदाज्यं पुनर्गृह्णी
यात्॥ महीनां पयोसि॥ विष्णो त्वन्नो अंतमः शर्मयच्छ सहंत्य॥ प्रते धारा मधुश्चुत उत्सं दुह्रते अक्षित मित्यनुवर्तते॥ विश्वेषां देवानां तनूः
॥ विष्णो त्वन्नो अंतमः शर्मय० क्षितं॥ ऋध्यासमद्य० विष्णो त्वंनो अंतमः ० विष्णो इदयमासि। विष्णो त्वंनो अंतमः ०॥ एकमिषविष्णु
स्त्वानुविच्चक्रमे॥ विष्णो त्वंनो अंतमः इति ऋचं एषदाज्यग्रहणमंत्रेषु पंचस्वनुवर्तयेत॥ अथवा विष्णो त्वंनो अंतम इत्यृचैव पंचग्रहणा
नि गृह्णीयात्॥ हिरण्यमपोध्य त्वाश्वमवघ्राप्य एषदाज्यं यथास्थाने सादयेत॥ अश्वघ्रातं हिरण्यमध्वर्यवे दद्यादिति॥ एषदाज्यग्रह
णानंतरं स्यात्नीगत एषदाज्यस्कंदने प्येवमेवेति प्रदीपकारः॥ अथ एषदाज्ये षमनाघ्राते केशादिभिरुपहते कीटादिभिर्दूषिते वमृषे चे

प्रायश्चित्तं ॥ तत्रावमखे औयानुवाके बौधायनः ॥ अथ यद्वै भवति पलृष्मशकुनः पृषदाज्यमवमृशेद्० यजमानः प्रमायुकः स्यादित्य यद्वै भवति
प ~~लृष्मशकु~~ नः शवो वै पृषदाज्यं पशवो वा० पशूनेवास्मै पुनर्गृह्णातीति ब्राह्मणम यद्वै भवति प्राणो वै पृ० प्राणमेवास्मै पुनर्गृह्णातीति हिरण्य
मवधाय गृह्णातीति ॥ अत्र प्रदीपकारः ॥ पृषदाज्यं शुनाघ्रातं केशादिभिरुपहतं कीटादिभिर्दूषितं अवमर्षं च पृषदाज्यं स्त्रुचा सहर्भूमिभू
मिमगादि तत्स्कन्नप्रायश्चित्तप्यान्याज्ये च प्रक्षाल्य स्थाल्यामादपि त्वा मोक्ष्य तस्मिं शतमाने हिरण्यं निधाय वैश्यं व्य चो सह स्थालीगतेन दध्ना पूर्ववद्गृहीत्वा हि
रण्यमवधाय पृषदाज्यग्रहणीमादपि त्वा भूरायुर्महमिमं च तुर्गो दिगणं तुलाशतमाने हिरण्यं अप्स्वपवेदद्यादिति अत्र कुतूहलेशतदूषीका
रः ॥ स्नुगातं पृषदाज्यं पदिकाकोमुखेनावमशैत्तदाय दवामक्ष्छकुनिरिति मुख्यविमर्षं पृषदाज्यमभिमंत्र्याश्रूक्षिप्स्वात्मु च तत्क्षणे विधाय तस्मिं
पूर्ववद्धिरण्यं निधायेदं विस्मरिति पृषदाज्यग्रहणादिसादनांतं कुर्यात ॥ पृषदाज्यगां तरेण काको वमशाति तदा व्यापत्रे हविरपोऽभ्यवहरेदिति इति वच
नात्स्कन्नक्षिस्वात्मुचं स्तं तस्य पुनः पूर्वोक्तविधिना गृहीत्वा सर्वप्रायश्चित्तं कुर्यादिति ॥ अत्र वाजपेयी शतदूषीकारः ॥ अथ वायव्य दान्त्य स्कन्नेभूप
त पर्लम्ब मेत्र्य स्कन्न शिष्टस्यायपेभ्यः त्य पृषदाज्ये तूष्णीं गृहीत्वा पतने स्थादपित्वा मनो ज्योतिरित्या हुतिं जुहुयात ॥ एवं सोमे स्कन्ने पिस्त्वपोनि
तो गृहीत्वान्या हुतिं जुहुयात ॥ अताग्निहोत्रे तु सोमस्कंदने तत्रोक्तमेव प्रायश्चित्तं कर्त्तव्यं ॥ नेतरदित्यर्थः ॥ इदं सर्वं स्नुगाते पृषदाज्यस्कंदने ॥
स्थालीगतस्य त्वाज्यस्कंदनोक्तं प्रायश्चित्तमिति ॥ इति पृषदाज्यस्कंदनादि ॥ अथ वपा हविरवदान स्कंदने प्राय० ॥ तत्र बौधायनः ॥ अथ यद
दि वपा हविरवदानं वा स्कंदेद्वीत्वादद्ये पशसे वीपी प च ॥ अस्मा स्व प्रियायापूर्णं दधाथे द्रियं पराण्मा दाप जः होविपस्ते द्र शेयास्त उदर्षोऽदेवयुः

७० केतुर्विश्वं भुवनमाविवेश ॥ स्वनः पाह्यग्निष्वे स्वाहेति ॥ अत्र प्रदीपकारः ॥ यदि वपाहविर्वेदानं वा हुतमहुतं वा स्कंदेत स्कंनावदानमादायात्वा ददे यशसेइति
78 स्वस्थाने निदध्यात् ॥ स्कंने प्रायश्चित्तमाज्येन जुहुयात् ॥ यस्ते द्रप्सो यस्त उदर्षइति ॥ इदं प्रायश्चित्तं स्रुगातानामस्रुगातानां वा वपादीनां स्कंदनेपि भवती
ति शतद्रुपीकारः ॥ अथ स्विष्टकृदर्थावदाने स्कन्ने प्रा० ॥ तत्र प्रदीपकारः ॥ स्विष्टकृदर्थावदाने स्कन्ने स्कन्नमादाय तूष्णीं यथास्थाने निधाय सर्वप्राय
श्चित्तं हुत्वा पूर्ववदवं दद्यादिति ॥ अथ वपाया अपहारे नाशे च प्राय० ॥ तत्र बोधायनः ॥ अथ यदि वपामाक्रियमाणां श्येनो यद्रहेन्नश्येद्वा पात्र्यां हिरण्य
मंतर्धाय चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने ॥ उद्यत्सुपर्णो न विभाति सर्वं हिरण्यकुक्षिः सुपुष्टिरः पुरस्तात्सर्वेषु लोकेषु विभुः प्रवि
ष्टो गातुमग्निर्मन्यतां यजमानाय विंदस्वाहेत्यथैतस्यै वपायै स्थाने यत्किंचिन्मेदो हृदयमवशिष्टं स्यात्तदुत्पाद्य तेन प्रचरेद्यथा पुनर्नैतीति ॥ अत्र प्रदीप
कारः ॥ आक्रियमाणां वपां वपां श्येनो यद्रहेत्तवपां नश्येद्वा तु हिरण्यशकलं निधाय ध्रुवाज्याच्चतुर्गृहीत्वा यजमानेन्वारब्धआहवनीये जुहोति ॥ उ
द्यत्सुपर्णो न विभाति सर्वमिति ॥ वपास्थाने यत्किंचिन्मेदो हृदयमवशिष्टं स्यात्तेन वपास्थाने यजेत ॥ तदलाभे आज्येन यजेत ॥ यदि वपां पुनर्विंदेत
नैनामाद्रियेतेति ॥ अथ पशोरवदाननाशे प्रा० ॥ तत्रोपानुवाके बौधायनः ॥ अथ यदि पशोरवदानं नश्येदाज्यस्य प्रत्याख्यायमवद्येद्यदि सपावं
ति पशोरवदानानि नश्येयुस्तावत्कृत्व आज्यस्य प्रत्याख्यायमवद्यति सैव तत्र प्रायश्चित्तिरिति ब्राह्मणमिति ॥ अत्र हैरण्यं ॥ यदि पशोरवदानं न
श्येद्यद्येकं यदि द्वे आज्यस्य प्रत्याख्यापमिष्ट्वा तत्कृत्वा पुनर्यजेतेत्यत्रो हस्माहश्वा लौकिर्येरि पशोरवदानं नश्येद्यद्येकं यदि द्वे आज्यस्य प्रत्या
ख्यापमिष्ट्वा तत्कृत्वा कृतमेव मन्येतेति ॥ अत्र प्रदीपकारः ॥ पशोरवदानानि एकं द्वे बहूनि वा नश्येयुस्तावदवदानस्थाने ध्रुवाज्यमवदाय यजेत ॥

॥ अल्पयोगनाशे आज्येन यागे कृते न पुनर्यागः॥ भूयोंगनाशे आज्येन समाप्य पुनर्यागः कर्त्तव्यः॥ अत्र शांतद्रूपीकारः॥ वपाहृदयादीनामन्यतमस्यवाना
शे आज्येन प्रतिनिधिना प्रतयागं कुर्यात्॥ वपाहृदयादिसर्वांगविनाशादौ तद्रूपवर्णवयसमन्यंपशुमालभ्य यागः कर्त्तव्यः॥ केचित्तु वपाया हृदयस्य
वा नाशादौ वा त्यावयेवित्यादिश्रुतेः पश्वंतरालंभमिच्छंति॥ सत्यैकदेशेतु तेनैव यागः॥ मात्रानुग्रहार्थं सर्वप्रायश्चित्तं कर्त्तव्यमिति॥ अथ पश्ववदाना
नां पूतिगंधोत्पत्तौ वक्ष्यमाणहोम हविर्वैगुण्यात्कं प्रायश्चित्तं तत्रैपं॥ अथ जाघनीनाशे प्रा०॥ तत्र प्रदीपकारः॥ जाघन्या नाशे लौकिकजाघनीं क्रीत्वातत्
पापत्नीयागः कर्त्तव्यः॥ सर्वप्रायश्चित्तं जुहुयात्॥ यद्वा जाघनीनाशे आज्येन पत्नीसंयाजान्कृत्वा सर्वप्रायश्चित्तं जुहुयात्॥ अथ गुदनाशप्रा०॥ तत्र
प्रदीपकारः॥ उपयड्यागाय गुदनाशे वसाहोमहवन्यां सकृत्सकृद्गृहीतेनाज्येनैकादशकृत्वो जुहुयात्॥ सर्वप्रायश्चित्तं चेति॥ अथ वसानाशे प्रा० तत्र प्र
दीपकारः॥ वसायान्यत्रायामवदाने पृषदंकं मिश्रीकृत्य वसां स्थापयित्वा सर्वप्रायश्चित्तं कृत्वा वसाहोमं कुर्यादिति॥ अथ वपाहुतौ अंगारहुतौ वाहुतायां नीललव
र्णधूमोत्पत्त्यादौ प्रा०॥ तत्र प्रदीपकारः॥ यदि वपाहुतौ हुतायामंगारहुतौ वा नीललवर्णो धूमो प्रद्युत्पद्येत धूमो दक्षिणां दिशं प्रदिग् गच्छेत् समन्तानोवा प्र
सप्तमावेवपेदेतेषु निमित्तेषु सर्वप्रायश्चित्तं कुर्यात्॥ अथ घर्मप्रायश्चित्तानि॥ तत्रादौ स्कन्नप्रा०॥ तत्र प्रदीपकारः॥ ययोवाज्येवा हविषि यदि स्कन्ने तत्
दभिमंत्रयते॥ अस्कान्द्यौः पृथिवीं॥ अस्कानृषभो युवागाः॥ स्कन्नेमा विश्वा भुवना॥ स्कन्नो यज्ञः प्रजनयतु॥ अस्कानजनिप्राजनि॥ आस्कन्नाज्जायते
वृषा॥ स्कन्नात्प्रजनिषीमहीति॥ अत्र शांतद्रूपीकारः॥ अग्निहोत्रहोमात्पूर्वं अभिपूरणप्रभृति घर्मस्य सशेषस्कंदने ऽस्कानिति द्वाभ्यामभिमं
त्र्य शेषेण यागादि कर्त्तव्यं॥ नेतु यागात्पूर्वं पुनश्च हविहत्याघप्रचारः॥ ततः पर्यन्तु रूपान्विद्ध्याभिवर्धितेन शेष समाप्तिः सर्वस्कन्नाभि

७२ मंत्रणं च कर्तव्यमिति ॥ अथ महावीरेषु घर्मद्रव्येषु वातिवर्षणा प्रा० ॥ तत्र प्रदीपः ॥ महावीरेषु वा घर्मद्रव्येषु वातिकर्षणे घर्माय स्वाहा घर्मिभ्यां स्वाहाह्
71 वायस्वाहा हृद्गहोत्रे स्वाहा व्याहृतीस्तिस्र इति सप्त स्रुवाहुतीर्गार्हपत्ये हुत्वा मरुद्भिः प्रोक्ष्य प्रचरेदिति ॥ अथ महावीरे पय स्त्रवनीते होमार्थे शेषिता
ज्यनाशे प्रा० ॥ तत्र प्रदीपः ॥ महावीरे हि पयस्त्रवनीते होमार्थे शिषितमाज्यं यदि नश्यात् तस्मिन्महावीरे आज्यमानीय होमारिकुर्यात् ॥ तत आहवनी
ये इति स्वः स्वाहा इतीं जुहुयादिति ॥ भूर्भुवः स्वरिति ॥ अथ रूपनवशात् घर्मस्य सशब्दं बहिर्गमने प्रा० ॥ तत्र शतद्रुपीकारः ॥ यदि रूपनवशात् घ
र्मस्य सशब्दं बहिर्गमनं भवेत् तदा मो नो घर्मव्यापितो विष्योनः ॥ मा नः पाप्मधर्मा जोने ॥ मोषु स्माँ स्तमस्पे तए धाः ॥ मा हृद्रोपा सो अभिगु
र्द्धानाः ॥ मा ~~द्यावापृथि~~ नः क्रतुभिर्हीडितेभिरस्मान् ॥ द्विषासुनीते मा यए द्राः ॥ मानो रुद्रो निर्ऋतिर्मो नो अस्ता ॥ मा द्यावापृथिवी हीडिषातां ॥ उ
पनो मित्रावरुणाविहावतं ॥ अन्वादीध्याथामिह नः सखाया ॥ आदित्यानां प्रसितिर्हेतिः ॥ उग्रा शतापाष्ठाघविषापरि णो वृणक्तु ॥ इदं म मे वरुण तत्वा
यामि ॥ त्वं नो अग्ने स त्वं नो अग्ने ॥ त्वमग्ने अयासीति अ षभिः प्रतिमंत्र होमः कर्तव्यः ॥ एतासां च तसृभिरभिमंत्रणं वा घर्मस्य कर्तव्यमिति ॥ अथ
घर्मदुघादयमावेप्रा० ॥ तत्र बोधायनः ॥ अथ घर्मदुघं न विंदेदन्यां होहयेदथ यदि घर्मामं न विंदेदजां दोहयेदथ यदि अजां न विंदेदर्कक्षीरैः प्रचरेदथ य
दर्कक्षीरं न विंदेत पयःपिष्टानि व्रीहिपिष्टानि श्यामाकपिष्टानि वाद्भिः संसृज्य ततः प्रचरेत् ॥ अत्र प्रदीपः ॥ यदि घर्मदुघं न विंदेत् तामां दोहयेत्
॥ यद्यन्यां न विंदेत् तां जां दोहयेत् ॥ यद्यजां न विंदेत अर्कक्षीरेण प्रचरेत् ॥ अर्कक्षीरस्याभावे व्रीहिपिष्टानि यवपिष्टानि वाद्भिः संसृज्य प्रचरेत्
॥ तयोरप्यभावे श्यामाकपिष्टानि वाद्भिः संसृज्य प्रचरेत ॥ अथ महावीरभेदनादि प्रा० ॥ तत्र बोधायनः ॥ अथ यदि विधुर्वा प्रदरे वाजा पते

श्मचूर्णानि छागापयसि संप्रकीर्य तैः प्रत्युक्ष्योल्मुके नाभितपति॥ विधुं दद्राणं समने बहूनां॥ युवानं संतं पलितो जगार॥ देवस्य पश्य काव्यं म
हित्वाद्य ममार॥ स ह्यः समान॥ यदृते चिदभिश्रिषः॥ पुरा जर्तृभ्य आतृदः॥ संधाता संधिं मघवा पुरूवसुः॥ निष्कर्ता विह्रुतं पुनः॥ इति द्वाभ्यां
सहैव रोहति पशुर्वै सर्वशः एव भिद्येत एतान्यवाञ्जने पिष्ट्वा सेषामन्त्या पश्चितापयति। शतेतत पासंसृज्य कृत्वा पल्काछु घृनि दधात्यथान्यं प्रचार
णीयं महावीरं प्रवृणक्तीति॥ अत्र प्रदीपकारः॥ महावीरो यदि विधुर्वा प्रदरो वा जायते श्मचूर्णानि छागापयसि संप्रकीर्य तैः प्रत्युक्ष्योल्मु
केनाभितपति विधुं दद्राणं यदृते चिदभिश्रिष इति द्वाभ्यां॥ यदा महावीरः सर्वशः एव भिद्यते एतान्येव कृत्वान्यं वा जनं पिष्ट्वा सूक्ष्मचूर्णीकृत्य
महावीरकरणकाले यामन्त्या पश्चितायं निहितात याकपालं पिष्टानि संसृज्य मदन्तीभिः संयुत्यगायत्रोष्ठीत्यादिना कृत्वा पल्कालूछ घृनि दधाति॥ गो
पयसाभिविष्यंदनांतं कृत्वा निदधाति॥ उपशयो महावीरः योरन्यं प्रचरणीयं महावीरं कृत्वा नदानीं कृतं महावीरमुपशयं कुर्यात्॥ अथ नाराध्वे
आराध्वे च प्रवर्ग्ये स्तमितेया पश्चितं॥ तत्र बौधायनः॥ अथ यदि प्रवर्ग्ये प्रवृत्त मादित्योभ्यस्तमियाद्गार्हपत्येति स्त्रः स्तुवाहुती जुहुयात् भूर्भुवः
सुवरित्यथापरस्या द्वारि सत्रे या हिरण्यं प्रग्रथ्य प्रचरेदिति॥ अत्र प्रदीपकारः॥ अनाराध्वे प्रवर्ग्ये यद्यादित्यास्तमयो भवेद्गार्हपत्येति स्त्रो व्या
हृतीर्हुत्वा आपराह्णिकोपसदा प्रचर्य घर्मो भूते प्रातरति निष्क्रान्ते न प्रवर्ग्येण प्रचर्यानंतरं कालेन प्रवर्ग्येण प्रचरेत्। प्रवर्ग्ये प्राराध्वे आपरा
ह्णिके आदित्यास्तमये स्तति गार्हपत्येति स्त्रो व्याहृतीः स्तुवाहुतीर्हुत्वा परस्या द्वारि सत्रे या हिरण्यं ऊर्ध्वं तमसस्परीति विग्रथ्य प्रचारशेषं
कृत्वा समाप्योपसदा प्रचर्य घर्मो भूते वपः सुपर्णोऽस्यादित्यमुपस्थाय कालेन प्रवर्ग्येण प्रचरेत्॥ अथ प्रवर्ग्यार्थ निरूपीतायानुगमने प्रा०॥

७२ 75 तत्र प्रदीपः ॥ प्रवर्ग्यार्थं निहृष्य परिचितोऽग्निरुपशान्तश्चेत् ॥ तयोश्चाग्न इति पुनरग्निं हुत्वा चितस्य परिचितेति परिचिनुयात् ॥ व्याहृतिभिर्गार्हपत्ये हुत्वा
व्याहृतिभिरुपतिष्ठेत ॥ अथ प्रवृञ्जनार्थं महावीरे स्वोऽसादिते आज्यपूर्णात्याकृपतने प्राग् ॥ तत्र बौधायनः ॥ अथ परिसावतः प्रवर्तेत गार्हपत्ये
ति स्वः स्रुवाहुती जुहुयात् ॥ तत्र प्रदीपः ॥ प्रवृञ्जनाय स्वोऽसादिते महावीरे आज्यपूर्णात्याकृपादिपतेतु इमीमेनं महावीरं उच्छ्रित्य भूर्भुवः सुवरिति
गार्हपत्येति स्वः स्रुवाहुती जुहुयात् ॥ अथ स्वोऽसादनानन्तरं माज्यपूर्णोत्तरं महावीरे पर्यावर्तेत पतेन्निर्वाप्य ॥ तत्र बौधायनः ॥ अथैनमुच्छ्र
यत्यूर्ध्व ऊ षु ण ऊतय ऊर्ध्वो नः पाह्यंहस इति द्वाभ्यामथैनमाज्येन प्रप्यायन्त्वञ्जेति पंप्रपर्यन्तोनविप्रा इति ॥ अत्र प्रदीपः ॥ स्वोऽसादितो महावी
रे यदि पर्यावर्तेत पतेत्तदा गार्हपत्येति स्वः स्रुवाहुती जुहुयात् ॥ अथैनमुच्छ्रयत्यूर्ध्व उ षु ण ऊतय ऊर्ध्वो नः पाह्यंहस इति द्वाभ्यां आज्येनैनं प
नः पूरयति ॥ अञ्जन्ति यं प्रथयन्त इति ॥ अथ परिभ्रमणे न्यूनाधिकसंप्राप्तौ ॥ तत्र बौधायनः ॥ अथ यदि भ्रमन्ताः पर्येति गार्हपत्येति स्वः स्रुवाहुती
र्जुहुयात् भूर्भुवरिन्यथ पुनरूर्जा सह रय्येति पुनः प्रतिपर्येतीति ॥ अत्र प्रदीपः ॥ ऋत्विजः भ्रमन्तः सन्तो महावीरं त्रिः परीत्य यदि चतुर्थं पर्येयुः
तदा गार्हपत्ये व्याहृतिभिस्त्रिः स्वः स्रुवाहुती हुत्वा ॥ पुनरूर्जा निवर्तस्व सह रय्या निवर्तस्वेति द्वाभ्यां यावत्कृत्वोऽधिकं परीयात्तावत्कृत्वः प्रतिप
रीयादिति ॥ अत्र शतदूषीकारः ॥ अत्र परीयुरित्युपलक्षणं ॥ परिन्यूनमधिकं वा परीयुः प्रतिपरीयुरिति यावत् ॥ तदा पुनरूर्जा सह रय्येति मन्त्र
द्वयं सकृदुच्चार्य तावत्परिक्रमणं प्रतिपरिक्रमणं वा कुर्युर्यावता न्यूनमधिकं पूर्यते अधिके पुनरूर्ध्वं पत्राविपर्ययेणोभयं कुर्युरित्यर्थः ॥ केचि
त्तु न्यूनाधिके परिक्रमणे न्यूने वा प्रतिपरिक्रमणे कृते मन्त्रद्वयेन सकृदेव परीयुरिति वर्णयन्तीति ॥ अथ महावीरः शफाभ्यां परिग्रहणानन्तरम्

घृत उत्स्रीयमानो वा पदिपते तदाप्रा ०॥ तत्र बौधायनः॥ अथो घृतः प्रपतेद्गार्हपत्येति स्रुवः स्रुवाहुती जुहूयात् भूर्भुवः स्रुवा इत्यथैनमभिमृशति मा
नो घर्मो व्यथितो विश्वथो नो मा नः क्रतुभिर्हीडितेभिरस्मान्नितिद्वाभ्यामिति॥ अत्र प्रदीपः॥ शफाभ्यां परिगृह्योघृत उत्स्रीयमानो वा पदिपते
द्गार्हपत्ये व्याहृतिभिस्तिस्रः स्रुवाहुती हुत्वा पतितं महावीरमभिमृशति मा नो घर्म व्यथितो विश्वथो नो मा नः क्रतुभिर्हीडितेभिरस्मान्नितीति
॥ अथ घर्मे दुग्धोपरि महावीरस्योपरि वा अमेध्यपाशिभिः स्नावादिकं पतेत्प्रा०॥ तत्रैव बौधायनः॥ अथ पदि घर्मेदुघं वा महावीरं वा वयो वाभिस्रा
वयेत्ता वुत्सोरक्केनप्रक्षालयेदुपनोमित्रावरुणा विहावतमित्यथ गार्हपत्ये स्रुवाहुती जुहूयादिमं मे वरुण तत्त्वायामि त्वं नो अग्ने स त्वं नो अग्ने
त्वमग्ने अयास्यग्ने पंतमसस्पर्युद्वयं चित्रं वपः सुपर्णा इतीति॥ अत्र प्रदीपः॥ घर्मे दुग्धोपरि महावीरस्योपरि वा अमेध्यपक्षीप्रस्नावादिकं पतेति
तदा उपलोदकेन प्रक्षालयेन्नो मित्रावरुणा विहावतमिति॥ गार्हपत्ये नव स्रुवाहुतीर्जुहोति॥ इमं मे वरुण तत्त्वायामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने
अयास्युद्वयं तमसस्परि उदुत्यं चित्रं वपः सुपर्णा इति नवभिर्मन्त्रैरिति॥ अथ काकादिभिरमेध्यादिभिर्वा महावीरोपहतेप्रा०॥ तत्र प्रदीपः॥ य
दि महावीरः काकादिभिरमेध्यादिभिर्वा उपहतश्चेत्तं महावीरं भूमिर्भूमिमगादिति अप्सु प्रक्षिप्य गायत्रो मीत्यादिना प्राप्य श्वितार्थमदापूर्व वद
न्यं महावीरं कृत्वा निधाय पमृणपुर्मरेति अभिमन्त्र्य गार्हपत्ये तिस्रः स्रुवाहुतीर्हुत्वोपशयपोरन्यं महावीरं प्रचरणीयं कृत्वा तदानीं कृतमनुपशाकं प
कुर्यादिति॥ अथ प्रवर्ग्ये प्रक्रान्ते विद्युत्पतनेप्रा ०॥ तत्र बौधायनः॥ अथ पदि विद्युदापतेद्गार्हपत्ये स्रुवाहुती जुहूयाद्या पुरस्ताद्विद्युदापतद्दिव्ये
तैर्यथाहूय मिति॥ अत्र प्रदीपकारः॥ पदि पुरस्ताद्विद्युदापतेत्तदा॥ या पुरस्ताद्विद्युदापतत्॥ तां त एते नाव पनेस्वाहेति गार्हपत्ये हुत्वा मिंद्रा

७३ 73

हुतीर्व्याहृतीश्च जुहुयात् ॥ परिदक्षिणतश्चेत् ॥ या दक्षिणतो वि० प्रजे स्वाहेति जुहुयात् ॥ पश्चिमतश्चेत् ॥ या पश्चाद्दिग्धुरा० जे स्वाहेति ॥ उत्तरतश्चेत्
या पश्चाद्दिग्धुरा० जे स्वाहेति ॥ उत्तरतश्चेत् ॥ योत्तरतो विद्यु० जे स्वाहेति ॥ पउपरिष्टाच्चेत् ॥ योपरिष्टाद्दिग्धुरा० प्रजे स्वाहेति ॥ अथ घर्मधुङ्महावी
रपोः श्येनेनोपहारेण० ॥ तत्र प्रदीपः ॥ परिघर्मदुघं महावीरं वाश्येनः परेनोपहरेत् ॥ पूर्ववदन्यं महावीरं कृत्वा निधापाभिमंत्र्य गार्हपत्येति स्रुः स्रुवाहुती हुत्वा
॥ अहोरात्रे त्वोदीरयतां ॥ अर्धमासास्त्वोदीजयंतु ॥ मासास्त्वा श्रपयंतु ॥ ऋतवस्त्वा पचंतु ॥ संवत्सरस्त्वा हंत्वसाविति जुहुयादिति ॥ अथ महावीरमे
भितः सृगालशब्देना० ॥ तत्र प्रदीपः ॥ परि महावीरमभिसृगालो वाश्येत ॥ विगाईं दृविच्चरन्स्यायशायस्व ॥ स्वपंतमिंद्र पशुमंतमिच्छ ॥ वज्रेणा
मुं बोधय दुर्विदत्रं ॥ स्वपतोस्य महरभोजनेभ्यः इति तस्मै उभयत आदीप्तमुल्मुकं क्षिपेत् ॥ अग्ने अग्निना संवदस्व ॥ मृत्यो मृत्युना संवदस्व ॥ नमस्ते अ
स्तु भगवन्निति प्रवर्ग्याग्निमुपतिष्ठते ॥ एककृते अग्नये नमः ॥ द्विस्ते नमः ॥ त्रिस्ते नमः ॥ त्रिस्ते नमः ॥ चतुस्ते नमः ॥ पंचकृत्वस्ते नमः ॥ दशकृत्वस्ते नमः ॥ शत
कृत्वस्ते नमः ॥ आसहस्रकृत्वस्ते नमः ॥ अपरिमितकृत्वस्ते नमः ॥ नमस्ते अस्तु मा मा हिंसीरित्यंतादनुवाकस्य ॥ अथ महावीरमभितो गृध्रशब्द
नेना० ॥ तत्र प्रदीपः ॥ परि गृध्रो महावीरमभिवाश्येत तमनुमंत्रयते ॥ असन्मुखो रुधिरेणाव्यक्तः ॥ यमस्य दूतः श्वपाद्विधावसि ॥ गृध्रः सुपर्णः कु
णपं निषेवसे ॥ यमस्य दूतः प्रहितो भवस्य चोभयोरिति ॥ अथान्तेवाकुश्रवणेना० ॥ तत्र प्रदीपः ॥ पश्चात्तो वा गुदिपात्ता मनुमंत्रयते ॥ परेतद्द
कसोमभूत्वा ॥ वाग्देव्यभिरारपसि ॥ द्विषंतमेभिरारप ॥ तं मृत्यो मृत्यवे नय ॥ स आर्तिमार्छत्विति ॥ अथ काककुक्कुटकपिंजलानां वाशनेना० ॥ त
त्र प्रदीपः ॥ काककुक्कुटपिंजलानां वाशनेष्विति तद्वाशितमनुमंत्रयते ॥ परीषितो यदि वा स्वकामी ॥ भयेडको वदति वाचमेतां ॥ तामिंद्राग्नी ब्रह्म

णा संविदानौ ॥ शिवामस्मभ्यं कृणुतं गृहेष्विति ॥ अथ सालावृकीवाशनेप्रा० ॥ तत्र प्रदीपः ॥ यदि सालावृकी वाश्येत तामनुमंत्रयते ॥ दीर्घमुखि दुर्हणु
॥ मा स्म दक्षिणतो वदः ॥ यदि दक्षिणतो वदाद्विषंतमेव बाधासै इति ॥ अथोलूकमंडूकयोः शब्दश्रवणेप्रा० ॥ तत्र प्रदीपः ॥ उलूकशब्दं मंडूकं वानुमं
त्रयते ॥ इत्या इलूक आपप्तत् ॥ हिरण्याक्षो अयोमुखः ॥ रक्षसां दूत आगतः ॥ तमितो नाशयाग्ने इति ॥ अथानार्त्तवाक्श्रवणे प्रा० ॥ तत्र प्रदीपः ॥ यद्या
नार्तो वाग्वदियात्तामनुमंत्रयते ॥ परेतमद्रुतामन्वाविश्य ॥ दैवीं वाचं वदसि ॥ द्विषतो नः परावदत्तामत्यो मत्यवेनय ॥ तत्रात्यो तिमा छेत्तु ॥ अग्निना
ग्निः संवदतामिति ॥ अथान्यशब्दश्रवणेप्रा० ॥ तत्र प्रदीपः ॥ एतेभ्यो न्यो यदि शब्दः कुर्यात्तमनुमंत्रयते ॥ उत्तु दृशि मिजावरि ॥ तस्येजेतस्य उत्तु
द ॥ गिरिरेनुप्रवेशय ॥ मरीचीरुपसंनुद ॥ यावदितः पुरस्तादुदयाति सूर्यः ॥ तावदितो मुन्नाशय ॥ योस्मान्द्वेष्टि ॥ यं च वयं द्विष्म इति ॥ तस्माच्चमपत
भात्री पृष्ठमस्मुकं क्षिपेदुत्तु दृशि मिजावरीति ॥ अथ प्रवर्ग्ये प्रवृत्ते शत्रुशब्दश्रवणेप्रा० ॥ तत्र प्रदीपः ॥ प्रवर्ग्ये प्रवृत्ते भ्रातृव्यः शत्रुर्यदि वा न्वं व्याह
रेत्तमनुमंत्रयते ॥ ब्रह्मणा त्वा शपामि ॥ ब्रह्मणस्त्वा शपथेन शपामि ॥ घोरेण त्वा भृगूणां चक्षुषा प्रेक्षे ॥ रौद्रेण त्वांगिरसां मनसा ध्यायामि ॥ अघस्य
त्वा धारया विध्यामि ॥ अधरो मत्पद्यस्वासाविति असावित्यस्य स्थाने संबुध्यंते शत्रोर्नाम गृह्णीयात् ॥ अथ प्रवर्ग्ये प्रवृत्ते शत्रोरागमनेप्रा० ॥ तत्र प्रदी
पः ॥ अथ यदि प्रवर्ग्ये प्रवृत्ते भ्रातृव्यो यदि आगच्छेद्गार्हपत्ये स्रुवाहुतीर्जुहुयात् ॥ आहुरेव घ ॥ भ्रतस्य हविषो यथा ॥ तत्सत्यं ॥ यदमुं यस्य जेभ
पोः ॥ आदधामि तथा हि तत् ॥ त्वेण्णकण्मन्त्रसीति ॥ यजमानो यं द्वेष्टि तस्य शाल्यायाः पूर्वस्यां द्वारि दक्षिणं द्वा बाहुमनुप्रचालयेत् ॥ अथ घर्मेदु
घोपरि अमेध्यपक्ष्युपवेशनेप्रा० ॥ तत्र प्रदीपः ॥ घर्मेदुघोपरि अमेध्य पक्षी पक्षौ प्रसार्य यदि तिष्ठति तमनुमंत्रयते ॥ प्रसार्य सक्थ्यो पत

७४ सि ।सव्यमक्षिनिपेपिच ।मे हूकस्य च नाम मग्रदिति ॥ अथ महावीरस्योपरि अमेध्यपक्ष्युपवेशने प्रा० ॥ तत्र प्रदीपः ॥ महावीरस्योपरि यद्यमेध्य पक्षी अधि
74 तिष्ठति तं महावीरमस्रूप्राश्यति ॥ भूमिर्भूमिमगादिति ॥ अन्यं महावीरं पूर्ववत्कृत्वानुमंत्रयाते । अथ घर्मदुघो महावीरस्य वाऽभिप्राप्तौ प्रायश्चित्तं ॥
तत्र प्रदीपः ॥ यदि घर्मदुघं महावीरं वाक्रमय उपाधिं गच्छेयुः ॥ अत्रिणा त्वा क्रिमे हन्मि कण्वेन जमदग्निना ॥ विश्वावसो ब्रह्मणा हतः ॥ क्रिमीणां राजा ॥
अप्येषां स्थपतिर्हतः । अथो माता अथो पिता ॥ अथो स्थूरा अथो क्षुद्राः ॥ अथो कृष्णा अथो श्वेताः ॥ अथो आशातिका हताः ॥ श्वेताभिः सह सर्वे हताः ॥
इत्यनुवाके न तान्प्रक्षाल्यपेदिति ॥ अथ वायुनोत्क्षिप्ते महावीरे प्रा० ॥ तत्र प्रदीपः ॥ यदि धून्वानो वातो वापातत्तमनुमंत्रयते ॥ भूर्भुवः स्वो भूर्भुवः स्वो भू
र्भुवः ॥ भुवो स्थापि भुवो स्थापि ॥ नम्णापि नम्यापि नम्यां नम्णापि नम्यां ॥ निधाय्यो वापि निधाय्यो वापि निधाय्यो वापि । ए अस्मे अस्मे । सुवर्नज्यो
तीरिति ॥ अथ प्रावृतस्य प्रवर्ग्ये प्रवृत्ते शालाप्रवेशने प्रा० ॥ तत्र प्र० ॥ दीपः ॥ अवृत प्रवर्ग्ये प्रवृत्ते शालान्न प्रविशेद्यदि प्रविशेदाभिर्गीर्भिरित्येतया प्रविशेत्
॥ अथ वृतस्य प्रवर्ग्ये प्रवृत्ते शालाप्रवेशे प्रा० ॥ तत्र प्रदीपः ॥ वृतोपि प्रवर्ग्ये काले शालान्न तां प्रविशेद्यदि प्रविशेदेतयैव प्रविशेदिति ॥ अथ सर्वत्र घर्म
प्रयोगे विध्यपराधे प्रा० ॥ तत्राबोधायनः ॥ प्राणाय स्वाहा पूष्णे स्वाहेत्युक्तानि प्रायश्चित्तानि यानि कानि चित् घर्मकार्यविपर्यासे चैता आहुतीर्जुहुयात् ॥
नमस्ते घर्म भूपतये स्वाहा नमस्ते घर्म भुवनपतये स्वाहा नमस्ते घर्म भूतानां पतये स्वाहा घर्माय स्वाहाश्विभ्यां स्वाहेंद्राय स्वाहा बृहस्पतये स्वाहा प्र
जापतये स्वाहा ब्रह्मणे स्वाहेति ॥ तत्र प्रदीपः ॥ सर्वत्र घर्मकार्यविपर्यासे प्राणाय स्वाहा पूष्णे स्वाहेति द्वाभ्यामानुवाकाभ्यां प्रायश्चित्तं हुत्वा नैमि
त्तिकानि जुहुयात् ॥ नमस्ते घर्म भूपतये स्वाहेति न वल्गुवाहुतीर्जुहुयादिति ॥ अत्र शतरुद्रपोकारः ॥ सर्वत्र घर्मप्रयोगे विध्यपराधे सति प्राणाय स्वा

हा पूष्णे स्वाहेत्येताभ्यामनुवाकाभ्यां व्याहृतिभिर्व्यस्ताभिः समस्ताभिश्च प्रतिमंत्रमाहुतयो होतव्याः ॥ पत्राप्याहुत्यप्रायश्चित्तं नोक्तं तेत्रैताएवाहुतयः ॥
अन्यत्र तत्र विहिते न समुच्चीयंते विकल्प्यंते वेति ॥ अपसोमरुद्रविवैगुण्यानि ॥ तत्रावसतीवर्याणां नाशे दोषपरिहारे च प्रा० ॥ तत्र प्रदीपः वासतीवर्येषु
नष्टासु दुष्टासु पदुहृतासु वा हविष्मतीरित्यादिना पूर्ववद्गृहीत्वा सादयित्वा पूर्ववत्परिहृत्य हविर्धाने सादयेत् ॥ एवं वसतीवरीर्गृहीत्वाभिंदाहुत्वा त्वम
ग्ने अपासि प्रजापतेर इति च हुत्वा व्याहृतीश्च जुहुयात् ॥ अथ वसतीवरीकलशभेदेन स्कंदने स्कंदने स्त्रावे च प्रा० ॥ तत्र बोधायनः ॥ अथ परि
वासतीवरः कलशः इति ॥ अत्र पात्रांतरग्रहणसंभवे न तत्स्वैनैव पञ्जूषेत्यादि समभिधतामित्यं तंव स्यमाणपात्रभेदनावसरे कंशेषसूत्रं तेयं
॥ अत्र प्रदीपानुसारे प्रयोगः ॥ वसतीवर्यौ पदि परिस्विच्य न तदैकदेशवसतीवरीशेषे विद्यमाने शेषं शुद्धोदकेन संसृज्य स्त्रावदेशादायें रीषमा
पविस्नाव्य पूर्वोक्तं प्रायश्चित्तं कुर्यात् ॥ भेदने तु ॥ पूर्वोक्तप्रायश्चित्तस्य दुर्गादिगणस्य च समुच्चय इति ॥ अथैकधनानां पात्रे जनानां नाशापहार
स्त्रावदोषभेदनस्कंदनेषु प्रा० ॥ तत्रैव बोधायनः ॥ पात्रे जन एकधना इति अत्रय एतस्त्रिच्छ्य एक्तित्येतत्सम्मतिसादनपरिहरणं वर्जं सर्वं वसतीव
रीवत्तत्रैषं ॥ तत्र पात्रे जनीनां वसुभ्यो रुद्रेभ्य इत्यादिग्रहणमंत्रः ॥ एकधनानां दूंद्वापवरूत्पादपः ग्रहणमंत्रा तेय ॥ अथाग्रयणस्थाल्यादी
नां भेदनस्त्रवणपतनदोषादौ केशाद्युपघाते च प्रा० ॥ तत्र प्रदीपः । आग्रयणस्थाल्यादीनां भेदस्त्रावणपतनदोषादौ केशाद्युपघाते स
ति पत्र पत्र सोमरसः पतेत्तत्र तत्र पावदार्द्रपुरीषमादाय वसतीवरीभिः संसृज्य वस्त्रादिभिर्विस्नाव्य तत्तत्स्थाल्यां तत्तन्मंत्रेण पुनर्गृहीत्वा त
त्र तत्र सादयेदिति ॥ भित्रेयपात्रे या त्रांतरेण द्रोणम् देवि स्नाव्य वसतीवरीभिः संसृज्य पुनर्गृहीत्वा सादयित्वाभिमंत्र्य मित्त्रमस्कृ प्रक्षिपेद्

75 मृन्मिमगादिति॥ दोषे हूयहते दुष्टं सोमं पात्रांतरेण सहाग्नौ प्रक्षिप्य द्रोणात्पुनर्गृहीत्वा सा ऋचाभिमंत्रयेत्॥ द्रोणाभावे सर्वेषामाग्रयणाद्ग्रहणं॥ आ
ग्रयणाभावे ऋजीषमभिषुत्याग्रयणं गृह्णीयात्॥ वाचस्पतेविधेनामन्नित्यादि ग्रहाणामेकेन जुहुयाभावे ऋजीषमभिषुत्याग्रयणं गृह्णीयात्
॥ द्रोणाभावे सर्वेषामाग्रयणाद्ग्रहणं॥ आग्रयणाभावे ऋजीषमभिषुत्याग्रयणं गृह्णीयात्॥ वाचस्पते विधे नामन्नित्यादि ग्रहाणामेकेन जुहुयात्
॥ अथ ग्रहस्कन्नप्रा०॥ तत्र प्रदीपः॥ अपगृहीतानां ग्रहाणां निःशेषस्कंदनं यदि भवेत्॥ नानादेशेषु स्कन्नत्वादसंसृष्टत्वान्नतत्स्कंदनदेशतः पाव
संदृष्टपूर्णामादाय पवमानीभिः संसृज्य पूर्ववद्दिष्ट्वा वयतत्र ग्रहं पूर्ववत्तन्मंत्रेण गृहीत्वा सा ऋचा तेन यजेत्॥ तत्र प्रत्येकं प्रायश्चित्तानि॥ ग्रहणामे
केन चतुर्गृहीतेन जुहुयात्॥ अथ स्थालीनां ग्रहाणां वा एकस्मिन्देशे युगपत्स्कंदनप्रा०॥ तत्र प्रदीपः॥ अथ स्थाल्यो वा ग्रहा वा एकस्मिन्देशे युगपद्यदि
स्कंदिस्कंदिपुस्तदा सोमो॥ पदं सृप्यापेन प्रायश्चित्तं कुर्यात्॥ स तु प्राप्य कथ्यते॥ आग्रयणादिस्थालीषु पूतभृदादिकलशेषु ग्रहेषु चमसेषु च सोमोय
द्युगपद्स्पन्दस्तु सोमोपदंस्मदिति॥ अस्मिन्सोमोपदं सविषये औपानुवाके बोधायनः॥ अथ वै भवति यस्य सोम उपदस्येत्सुवर्णं० जुहुयाद्यन्यदि
ति यस्य सोम उपदस्येति तत्सुवर्णं हिरण्यं द्वेधा विच्छिद्य ऋजीषेन्यद्वधायमुख्येच चमसेन्यद्वधाय जुहोति सोममेवाभिषुणोतिसोमं जुहो
तीति ब्राह्मणमिति॥ अथ प्रदीपानुसारिप्रयोगः॥ सर्वे सोमोपदं सेसर्वे सोमानामेकस्मिन्देशे स्कंदने वा स्वर्णशकलं द्विधाछित्वा एकं स्वर्णशकल
मृजीषे निधाय तस्मिन्न सतीवरीः सिक्त्वा प्रागपागिति मंत्रेणाभिषुत्य प्रभूते सोमं हुत्वा धवनीयेदशापवित्रमासृज्य विनत्य अतिग्राह्यमानस्य एन्द्रः आ
ग्रयणं मंत्रेण गृहीत्वा पूर्ये निधाय सा ऋचाग्रयणात् सर्वान्ग्रहान् क्रमेण गृह्णीयात्॥ आग्रयणादेव पूतभृदाधवनीयौ गृहीत्वा चमसांश्च पूर्व

वद्वन्हीपमुखेन चमसे स्वर्णस्य शकलं तं निक्षिपेत्॥ श्रुतिः सोमेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमानागम्यादिति सर्वाग्रहृच्चमसानभिमंत्र्यमिंद्रा
हुतिद्वयं प्रापश्चित्तं हुत्वा होमकाले स्वर्णशकलेन सह सोमे जुहुयात्॥ अथाग्रयणे। स्थिते सर्वसोमनाशे प्रापश्चित्ते॥ तृतीयसवनाभिषवश्चेत्तन्नि
ग्रामः॥ आग्रयणे स्थिते योग्रहः कलशो वा स्थाली वा पूतभृद्वाधवनीयो वा एतेषां सोमे एकस्मिं देशे स्कन्ने दुष्टे उपदंसने वा एकं द्वौ वा बहून्वाक्र
मेणाग्रयणात तत्तन्मंत्रेण पुनर्गृहीत्वा सादयित्वाग्रयणं वसतीवरीभिर्वर्धयेत्॥ तत्र मिंद्राहुतिद्वयं प्रायश्चित्तं॥ अथाग्रयणस्य नाशे दो उपदंस
ने वा प्रा० तत्र प्रदीपः। आग्रयणस्य नाशे दो उपदंसने वा द्रोणकलशादाग्रयणं पुनर्गृहीत्वा सादयित्वा मिंद्राहुतिद्वयं जुहुयात्॥ तत्र प्रदीपकाराः स
र्वसोमनाशे आसाद्याग्रयणे। स्थिते नैतत्प्रायश्चित्तं अथ द्रोणकलशनाशे वा उपदंसने वा प्रा० प्रदीपः। द्रोणकलशस्य नाशे उपदंसने वा आग्रयणा
द्रोणकलशं गृहीत्वा आसाद्य मिंद्राहुतिद्वयं जुहुयादिति अथ द्रोणकलशाग्रयणयोर्नाशे प्रा०॥ तत्र प्रदीपः द्रोणकलशाग्रहणयोर्नाशे ऋ
जीषं पूर्ववदभिषुत्याधवनीये पवित्रं वितत्य धारया आग्रयणं मंत्रेण गृहीत्वा साद्य प्रजापतये त्वेति द्रोणकलशमभिमृश्य मिंद्राहुती जुहुयात्।
अथ द्रोणकलशस्य भुग्नानंतरमाग्रयणनाशे प्रा० तत्र प्रदीपः॥ द्रोणकलशस्य भुग्नानंतरमाग्रयणस्य नाशे पूर्ववदृजीषमभिषुत्य मंत्रेणा
ग्रयणं गृहीत्वा साद्य मिंद्राहुती जुहुयात्॥ सर्वदा आग्रयणस्य निःशेषस्रपे द्रोणकलशाभावे ऋजीषाभिषवः कार्यः॥ अथ सर्वत्राहुतिमात्र
सोमस्य स्कंदने प्रा०॥ तत्र प्रदीपकाराः॥ सर्वत्राहुतिमात्रसोमस्य स्कंदने स्कन्नमनुमंत्र्य द्रप्सश्चस्कंदपत्ने द्रप्सो यो द्रप्सोयस्ते द्रप्स इति चतसृ
भिः स्रुवाहुती हुत्वा मिंद्राहुती जुहुयादिति॥ अथाग्रयणादीनां द्रोणकलशाधवनीयपूतभृदादीनां ग्रहाणां चमसानां वा अमेध्याद्युपहतौ प्रा०

७६
76

तत्रप्रदीपः॥ सर्वदा आग्रयणादीनां द्रोणकलशाधवनीयपूतभृदादीनां ग्रहाणां च मसानां वामेध्याद्युपहतौ दुष्टं सोममयोऽप्सवहृत्य मिंद्राहुतीहु
त्वा पुनर्गृहीत्वा सादयित्वोपहतं चेत्पात्रं निर्णिज्य स्थालीमाग्रयणं कलशं वा पूर्ववद्गृहीत्वा मिंद्राहुतीं जुहुयात्॥ अथाग्रयणममेध्यादिभिरुपहतौ
प्रा॰ तत्रप्रदीपः आग्रयणममेध्यादिभिरुपहतं चेद्दुष्टमप्सु प्रक्षिप्य स्थालीं निर्णिज्य द्रोणकलशात्पुनर्गृहीत्वा मिं अथ द्रोणे विद्यमाने आग्रय
णोपहतौ प्रा॰ तत्रप्रदीपः द्राहुतीं जुहुयात्॥ द्रोणे विद्यमाने आग्रयणोपहतौ ऋजीषाभिषवः॥ सर्वत्रात्यंतोपहतं पात्रमपि त्यक्त्वान्यदुत्पाद्य पूर्व
वद्गृहीत्वा मिंद्राहुतीं द्रूपं जुहुयात्॥ अथ चमसेष्वमेध्यादिभिरुपहृतेषु प्रा॰॥ तत्र बौधायनः॥ होतृणां ग्रहेषु वा चमसेषु वा हविर्दोषो वा भवेत्तथा
पोऽप्सु वहृत्य तत्सर्वं प्रायश्चित्तं हुत्वा तथा पुनर्गृहीत्वा चमसेषु वा पुनरुन्नीय जुहुयात् धुत्वा वा तस्मिन्हिरण्यमंतर्धाय पय आनीय भक्षयेत् सैव ततः प्राय
श्चित्तिरिति॥ तत्रप्रदीपः॥ चमसेष्वमेध्यादिभिरुपहतेषु उपहतमप्सु प्रक्षिप्य पात्रं निर्णिज्य पुनरुन्नीय मिंद्राहुतीं द्रूपं जुहुयात्॥ अथहु
तानां ग्रहाणां चमसानां वा दोषदर्शने प्रा॰ तत्रप्रदीपः। हुतेषु ग्रहेषु चमसेषु वा दोषदर्शने दुष्टमप्सु प्रक्षिप्य पात्रं निर्णिज्य हिरण्यं निधाय प
आनीय भक्षयेत्॥ अथ ग्रहाणां चमसानां वा प्रथमाहुतिं हुत्वानुवषट्कारात्पूर्वं दोषदर्शने प्रा॰ तत्रप्रदीपः॥ ग्रहेषु वा चमसेषु वा प्रथमाहु
तिं हुत्वानुवषट्कारहोमात्पूर्वं दोषदर्शनेपि दुष्टमप्सु प्रक्षिप्य मिंद्राहुतीं हुत्वा पुनर्द्रोणकलशादीषु दवनीयचमसं वा पुनरुन्नीय जुहुयात्॥
सर्वत्र सोमोपहतौ सत्येतदेव प्रायश्चित्तं॥ अथ द्रोणकलशादिदीर्णमात्रभेदे प्रा॰ तत्रोपानुवाक्ये बौधायनः॥ अथातो दीर्णप्रवृत्तानामेव मीमां-
सा द्रोणकलशे दीर्णे वा प्रवृत्ते वा पात्रां चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने विधुं दद्राणं समने॰ समुद्रः समान स्वाहेति अथ

होतच्चमसेवसतीवरीम्पोध्यपोनिःषिच्यंतस्यस्वधाꣳ संभृतिभृतिः सोमेनवर्धतांतस्यमेष्टस्यवीतस्यद्रविणमागम्यादितिस्कन्नमनुमंत्रयतेभूप।
तयेस्वाहाभुवनपतयेस्वाहाभूतानांपतयेस्वाहेतिपरिदीर्णंभवतिप्रतिलिंप्रत्येनंपशुवैप्रवत्तउछित्येनंबर्हिषीअंतर्धायस्वधामानयत्यपोध्वत्य
बर्हिषीआग्रयणादेवात्रापुंप्रस्कंदयत्याधवनीयेदीर्णेवाप्रवत्तेवातथैवपात्र्यांचतुर्गृहीत्वाहवनीयेजुहोत्यन्वारब्धेयजमानेद्रोसमुद्रेविततनाव
नूर्पीपर्यावर्तेतेजठरेवपादाः॥तयोःपश्यंतोअतिपंत्यन्यमपश्यतःसेतुनातिपंत्यन्यꣳस्वाहेत्यथहोतच्चमसेनवसतीवरीम्पोध्यपोनिःषिच्यसे
तस्यतथैवस्वधाꣳ संभृतिभृतिः सोमेनवर्धतांतस्यमेष्टस्यवीतस्यद्रविणमागम्यादितीस्कन्नमनुमंत्रयतेभूपतयेस्वाहा॰नांपतयेस्वा
हेतिसपशुहृदीर्णोभवतिप्रतिलिंपंत्येनंपशुवैप्रवत्तउछित्येनंबर्हिषीअंतर्धायस्वधामानयत्यपोध्वत्यबर्हिषीआग्रयणादेवात्रापुंप्रस्कंद
पतिपूतमतिदीर्णेप्रवृत्तेवातथैवपात्र्यांचतुर्गृहीतंगृहीत्वाहवनीयेजुहोत्यन्वारब्धेयजमानेद्रूधसीसततीवस्तएकःकेशीविश्वाभुवनानि
विद्वान्॥तिरोधापैत्यसितंवसानःशुक्रमादत्तेअनुहायजापैस्वाहेत्यथहोतच्चमसेवसतिवरीम्पोध्यपोनिषिच्यतस्यतथैवस्वधाꣳसंभृ।
तिभृतिःसोमेन॰गम्यादितिस्कन्नमनुमंत्रयतेभूपतयेस्वाहा॰हैनांपतयेस्वाहेतिसपशुहृदीर्णोभवतिप्रलिंपंत्येनंपशुर्वैप्रवत्तउध्वत्येनंब
र्हिषीअंतर्धायस्वधामानयत्यपोध्वत्यबर्हिषीआग्रयणादेवात्रापुंप्रस्कंदयतिअथास्मिन्नग्रहेदीर्णेवाप्रवत्तेवातस्यैवपुरोरुचाहुत्वोद्धृपंत्ये
नंबर्हिषीअंतर्धायस्वधामानयत्यपोध्वत्यबर्हिषीआग्रयणादेवात्रापुंप्रस्कंदयतीति॥अत्रप्रायश्चित्तमसूत्रेपिवोधायनः।द्रोणकलशोवादी
र्येतेति।अत्रतत्तत्स्वेनैवेत्यादिवक्ष्यमाणयात्रमेदनावसरएकंशेषसूत्रंतेपं।अत्रप्रदीपः।द्रोणकलशेदीर्णेप्रवृत्तेवायजमानेनान्वारब्धोध्व

७७

पैर्जुह्वां चतुर्गृहीत्वाहवनीये जुहोति॥ विधुं दद्राणमित्यृचा होतृचमसे त्विषिकां वसतीवरीर्षिर्निःषिच्य तस्मिं द्रोणकलशस्थं स्कन्नशेषं सोममवन
पति॥ श्रुतिः सोमेन वर्धतां तस्य मे यष्टस्य वीतस्य द्रविणमागम्यादिति स्कन्नमभिमन्त्रयते भूपतये स्वाहेति॥ दीर्णे द्रोणकलशं मदादिना प्रतिलिप्य प्र
वर्तं पतितमुच्छ्रित्य स्वस्थाने प्रतिष्ठितं निधाय नष्टे दग्धे पहृते च पुनर्हृत्वा द्यामण्णुमेदित्यभिमन्त्र्य त्वमग्ने अपासि प्रजापत इति द्वे स्रुवाहुती मिं दाहुती
चहुत्वा द्रोणकलशे बर्हिषी अन्तर्धाय होतृचमसस्था अपो निनीय बर्हिषी उच्छ्रित्याग्रयणात् स्वं सोममवनपति॥ अथाधवनीये दीर्णे प्रवृत्ते
नष्टे दग्धे प्रहृते वा प्रा॰ तत्र प्रदीपः॥ आधवनीये दीर्णे प्रवृत्ते नष्टे दग्धे पहृते वा जुह्वां चतुर्गृहीत्वा यजमाने नान्वारब्धो द्वे समुद्रोरूतिपुरएरुचा
हुत्वा होतृचमसे वसतीवरीरित्यादि आग्रयणाद् इत्वं सोमं प्रस्कन्दयेदित्यं तं कुर्यात्॥ पूतभृतो दारणे तथैव चतुर्गृहीत्वान्वारब्धे यजमाने द्वे द्र
धसी इति हुत्वा होतृचमसे वसतीवरीरभ्य इत्यादि॥ आग्रयणादन्यसोमप्रस्कन्दनान्ते कुर्यात्॥ अथाग्रयणस्य दारणे दोषप्रा॰ तत्र प्रदीपः आ
ग्रयणस्य दारणे पूर्ववच्चतुर्गृहीत्वा ये देवा दिव्येकादशस्थेति पुरोऋचा हुत्वा द्वौ समुद्राविति द्वाभ्यां वाहुत्वा होतृचमसे वसतीवरीरभ्य इत्यादि अ
पो निनीयाग्रयणाद् एव स्कन्नशेषं सोमं होतृचमसे वनपति॥ श्रुतिः सोमेनेति स्कन्नमनुमन्त्र्य दीर्णमदादिना लिप्य प्रवृत्तमुच्छ्रित्य नष्टे दग्धे अ
पहृते वा पुनर्हृत्वा द्यामभिमन्त्र्य त्वमग्ने अपासि प्रजापत इति द्वे मिदाहुती चहुत्वाग्रयणे बर्हिषी अन्तर्धाय होतृचमसस्था अपो वनीयापो स्थाप्य
बर्हिषी द्रोणकलशाद् अन्यं प्रस्कन्दयेत्॥ अथान्येषां ग्रहाणाममुक्थ्यध्रुवस्थाल्यादीनां दारणे दोषप्रा॰ तत्र प्रदीपः। एवमेवान्येषां ग्रहाणां उक्थ
क्थ्यध्रुवस्थाल्यादित्यस्थाल्यादीनां दारणे तस्य तस्य पुरो ऋचा हुत्वा होतृचमसे वसतीवरीरभ्य इत्यादि आग्रयणात्सोमं सेचनान्ते कुर्यात्॥ अथै

द्रवायवग्रहस्य द्रोणे प्रा० मदीयः॥ ऐन्द्रवायवग्रहस्य द्रोणे स्थाप्यांशुपुरोहम्योद्देस्कृत्वा हुती हुत्वा शेषं समानमिदं दीर्णप्रायश्चित्तं भवतं प्रायश्चित्तं च यस्य शेष स्व
पे भवति॥ निःशेषस्थपे आग्रयणस्य चक्षुर्गोपाद्यभिषवः॥ अन्येषां निःशेषस्थपे आग्रयणात् ग्रहणं भवति॥ अथ क्रीतसोमस्य नाशे चौर्ये दोषे दा
हे पहारे वा प्रा०॥ तत्रौपानुवाक्ये बौधायनः॥ अत्र प्रदीपकारः॥ अक्रीतसोमस्य नाशे चौर्ये दोषे दाहे पहारे वान्यं सोमं क्रीणीयादिति॥ अथ क्रीतसो
मनाशे प्रा०॥ तत्राश्वलायनः॥ क्रीते राजनि निषद्धे दग्धे वेति।१। अन्यं राजानमभिषुणुयुः २ अनधिगमे पूतीकान् फाल्गुनानि॥३॥ अन्या वा ओष
धयः पूतीकैः सह॥४॥ प्रायश्चित्तं वा हुत्वा तदमावभेत॥५॥ सुत्या स्तकमेव मन्येत।६। प्रतिधुक् प्रातः सवने।७। शृतं माध्यंदिने॥८॥ दधि तृती
यसवने॥९॥ आपंतीपं वस्य सामयदि फाल्गुनानि वा एवं तीर्यपत्नापत्नीयस्य स्थाने॥१०। आपंतीयमेके॥११॥ एकं दक्षिणा पशूनां स्थाप्योदवसाय
पुनर्यजेत॥१२॥ तस्मिन् पूर्वस्य दक्षिणां दद्यात॥१३॥ सोमाधिगमे प्रकृत्या १४ इति चतुर्दश सूत्राणि॥ प्रायश्चित्तं वक्ष्यतरति शेषः॥ नष्टदग्धच्यु
तेनाशप्रकारविशेषाग्रहणात् सर्वप्रकारे नाशो गृहीतो भवति किमर्थं दग्धवचनमिति॥ तस्य प्रयोजनमुच्यते॥ लतावस्थे सोमे द्वादशभ्यो वत्स
शृङ्गादिभ्यो मलेभ्यो न्यूनकेशकीटादिना दुष्टे तस्य त्यागो न कर्तव्य इत्येवमर्थं॥ अन्यदपि दग्धवचन प्रयोजनमस्ति॥ केचिदेवं वदंति दग्धे सोमे त
देवमस्माभिषुत्यते न [illegible] मिति तन्निवृत्त्यर्थं चेति प्रथमसूत्रस्य रतिः॥ अन्यं राजानमानीय तमभिषुत्य तेन यजेते इत्यर्थ इति द्वितीयस्य॥ सो
मानधिगमे पूतीकान् फाल्गुनानि च संस्थाप्याभिषुणुयुः॥ पूतीका नाम लतारूपाः सोमसदृशाः फाल्गुनानि नाम स्तंबरूपा ओषधिविशेषाः॥ अ
प्रसिद्धाः पदार्थाः अभियुक्तैः शिक्षितव्या इति तृतीयस्य॥ फाल्गुनानामभावे अन्या वा ओषधयः कुशदूर्वाद्याः पूतीकैर्मिश्रयित्वाभिषोतव्याः॥ अ

१८ 78 न्याया ओषधयः पूतीकैः सहेति पूतीकानां स्यापि त्वदर्शनात्पूर्वं सत्त्रोक्तानामेभिः सहितायां नामेव प्रतिनिधित्वमवगम्यते॥ अत एवाचार्याः सोमप्रति
निधीनकेवलमेव द्रव्यमिच्छति॥ अन्याया ओषधयः पूतीकैरिति सहभावे सिद्धे पुनः सहेति वचनं तत्स्थापयति पूतीकानामप्यभावे द्रव्यांतराणि सह
मिश्रपि त्वाभिषुत्पते यथा स्यामिति चतुर्थस्य उक्त। सूत्रस्य सुत्याविषयत्वादिदं दीक्षायसदुविषयं भवति॥ दीक्षासु अक्रीतो न श्येत्तदा सोमलाभा
द्दीक्षा वर्द्धयेत्॥ उपसत्सु पसदो वर्धयेत्॥ तत्र सर्वत्र प्रधानकालाविरोधेनाहर्वर्धनं कर्तव्यं॥ अहर्वर्धने क्रियमाणेपि प्रधानकालाविरोधेनाल
भ्यमाने प्रतिनिधिमुपादाय संकल्पितकाले प्रधानयागं संपादयेत्॥ इत्यं वा कुर्यात॥ प्रायश्चित्तं हुत्वा ऽध्वं प्रयोगं विसृज्य सोमे सेपाद्यतस्मा एव
कर्मणे प्रयोगांतरमारभेत्॥ भूः स्वाहेतीदं प्रायश्चित्तमित्युच्यते॥ अथवाप्यामवस्यायां शाखांतरे प्रायश्चित्तविशेषोस्ति चेत्कर्तव्यमिति पंचमस्य
॥ सुत्यासु नष्टे एवं जानितदलाभे उक्तमेव॥ प्रतिनिधिप्रयोगमेवेत्यर्थः॥ तत्कर्तव्यत्वेन मन्यते त्यर्थः॥ नात्राहर्वृद्धिः प्रयोगत्यागो वा कर्तव्य इत्यर्थ इ
ति षष्ठस्य॥ प्रतिधुगिति सद्योदुग्धं पय उच्यते॥ तस्मात् सवनेप्रतिनिधिद्रव्यमभिषुत्य तद्रसेन मिश्रयेदित्यर्थ इति सप्तमस्य॥ क्वथितं पयः श्र
तमित्युच्यते॥ तेन माध्यंदिने प्रतिनिधिद्रव्यरसं श्रीणीयादित्यष्टमस्य॥ पूर्ववन्मिश्रयेदित्यर्थ इति नवमस्य॥ यदि फाल्गुनानि प्रतिनिधित्वेन प्रवि
ष्टानि तदेते सामनी श्रायंतीयवारवंतीये ब्रह्मसामाग्निष्टोमसाम कार्ये यो भवतोयथासंख्येनेति दशमस्य॥ एके शाखिनः श्रायंतीयं पश्चात्पतीय
स्य कार्ये भवतीत्याहुः॥ ब्रह्मसामप्रकृत्ये वेत्येकादशस्य॥ एवं प्रतिनिधिना क्रियमाणं पक्षप्रयोगमुदवसानीयापर्यंतं समाप्य तस्मादेव शाद्
दवसाय सोमं संपाद्यतमेव यक्षे पुनः प्रयुंजीतेति द्वादशस्य॥ पुनः प्रयोगे ताद्दक्षिणा दद्यात्॥ पूर्वस्मिन्प्रयोगे संकल्पितास्तत्संख्याका एव दद्यात्

॥ नवैकल्पिकसंख्यां तु रघुक्तात् इत्यर्थः पूर्वस्मिन्प्रयोगे एकैव गौर्दक्षिणेति त्रयोदशस्य ॥ यद्युपात्तेपि प्रतिनिधौ यागात्प्राग्यदि सोमो लभ्येत तदा प्र
प्रतिनिधिद्रव्यं त्यक्त्वा सोमेनैव यष्टव्यं ॥ प्रतिनिधिनिमित्तानि सोमस्यापणानि भवंति ॥ एतच्चैकाहेषु ॥ आहर्गणेषु तत्र मध्ये उदवसाय पुनर्यागो न शक्य
ते कर्तुमिति ॥ सर्वाहः साधारणत्वात्प्रयोगस्य ॥ यदा पुनरहर्गणेषु मुख्यासंभवात् प्रतिनिधिनैवैकमहः क्रियते तदा सत्रप्रयोगं समाप्य उदवसायत दे
वाहः पुनः प्रयुंजीरन् सत्रिणः संहत्य एवतद्धर्मेव पत्तं संस्थाप्येति पत्तग्रहणं कृतं तस्याप्य अभिप्रायः ॥ आद्योयोपत्तः फलसाधनं तस्य प्रयोगंस
माप्येतत्कृतं भवतीति तमेकस्मान्न्यूनः प्रयोगमिति ॥ एकाहेषु प्रतिनिधावुपात्ते प्रतिनिधिनैवेष्ट्वा पुनर्यष्टव्यमेवेति चतुर्दशस्य ॥ अत्रप्रयोगः ॥ तत्रा
क्रीतसोमनाशे सुत्याकालानुरोधेन दीक्षावर्धापित्वा सोमं संपाद्य क्रीणीयात् ॥ क्रयोत्तरं नाशे उपसदो वर्धापित्वा सोमं संपाद्य अग्नीषोमीयादि
कुर्यात् ॥ सुत्याकालाविरोधेन अलभ्यमाने तु पूतीकैः सह फाल्गुनानि प्रतिनिधित्वेन गृह्णीयात् ॥ फाल्गुनानामलाभे कुशदूर्वादीन् पूतीकैः
सह फाल्गुनानि गृह्णीयात् ॥ पूतीकानामप्यलाभे कुशदूर्वादीन् सह मिश्रयित्वा गृह्णीयात् ॥ एवं प्रतिनिधिं गृहीत्वाभिषुत्य तस्मिन्नाधिश्रितं स
द्योदुग्धं पयः प्रातःसवने मिश्रयित्वा श्रृतं दुग्धं माध्यंदिने मिश्रयित्वा दधि तृतीयसवने मिश्रयित्वा एकां दक्षिणां पत्तं समाप्योदवसाय सोमं संपा
द्य तमेव पत्तं पुनः कुर्यात् ॥ तस्मिन्पूर्वाधिकृता दक्षिणा दद्यात् ॥ अथवा सोमनाशोत्तरं भूः स्वाहेति प्रायश्चित्तं हुत्वा प्रयोगमुत्सृज्य सोमं संपा
द्य तस्मा एव कर्मणे प्रयोगांतरं कुर्यात् ॥ सुत्यायां नाशे तु प्रतिनिधिनैव समाप्य सोमं संपाद्य पुनर्यागः ॥ नात्राहर्गणेष्विवैवं प्रयोगस्य त्यागः ॥ एका
हेषु फाल्गुनानां प्रतिनिधित्वेन ग्रहणपक्षे श्यायंतीयवारवंतीये ब्रह्मसामाग्निष्टोमसामकार्ये यो भवतः ॥ अथवा श्यायंतीयमेवाग्निष्टोमसाम

७९ 79 स्यानेकुर्यात् ॥ तदाब्रह्मसामप्रकृत्यैवेति ॥ उपांशौ पि प्रतिनिधौ याज्ञात्स्याग्यदि सोमो लभ्येत तदा प्रतिनिधिद्रव्यं त्यक्त्वा सोमेनैव यष्टव्यं ॥ प्रतिनिधिनिमित्तानि सो-
मप्रपातानामिनमवंति ॥ अहर्गणेषु तु यस्मिन्नहनि प्रतिनिधिः क्रियते तं सत्रं प्रयोगं समाप्यो दवसाय पुनः सर्वैः सत्रिणः संहृता एवं तदेवाहः पुनः कुर्युरिति
॥ अत्र बौधायनः ॥ दुग्धेषु सोमेषु वा नष्टेषु वा उपघाताय पहारेषु वा यथालाभमंशून् गृहीत्वाभिषुत्य प्रचरेत् सर्वविनाशे ओषधीभिरभिषुत्य प्रचरेत्न त्कृ-
त्वा पुनर्यजेतेति श्रुतिरेवं कुर्यात्सा प्रायश्चित्तिरिति ॥ तथोपानुवाके बौधायनः ॥ अथ यद्येवं भवति यस्य क्रीतमपहरेयुः ॥ ० षु पाणुपादिश्यादारान् स्रुकृतणानि फा-
ल्गुनानि हेमवतानि तेषामलाभे श्वेतकाः प्रतिनिधिर्विज्ञायते तृतीयस्यामिति पर्णत्वमिति तरध्वाममध्यंदिन इति ॥ दध्येतस्य वतीमनीतमिश्रेण तृतीयस-
वन इति विमथितेस्य पिलकमप्राङ्नवनीतमावात् इत्येतदाच क्षते ग्निष्टोमसाम स्यात् रथंतरसामा यस्य एवर्त्विजो वृतास्युःस्त एवैनं याजयेयुरितितएवैवं
याजयंत्येकां गां दक्षिणां दद्यादित्येकां गामत्र दक्षिणां ददाति यदि हदा स्यन्नवति तद समुत्र ददाति पुनः सोमं क्रीणीयाद्यज्ञे नैव तद्यज्ञमिच्छति सौकुतामारन्नप्राय-
श्चितिरितिब्राह्मणमिति ॥ अत्र प्रदीपकारः ॥ क्रीतस्य सोमस्य नाशादौ नष्टावशेषिताः सोमलतामृग्यमाणा यदि लभ्येरन् ता अभिषुत्य प्रमृताभि-
रभिः साम्ना प्रचरेत् ॥ क्रीतस्य सोमस्य सर्वनाशे उपघाते दाहादौ वा आदाराः श्यफाल्गुनानि वाभिषुणुयात् ॥ स्रुकः कात्यायत् णान्यादारा इति कथ्यंते ॥
हैमवतानि तृणानि फाल्गुनानीति प्रचक्षते ॥ तयोरभावे पलाशपुष्पमध्यस्था वक्राः श्वेतकसंज्ञिता अभिषुणुयात् ॥ तेषामलाभे पलाशपत्रदंडान्
पर्णत्सरह संज्ञितानभिषुणुयात् ॥ तदभावे यज्ञिया ओषधीरभिषुत्य प्रचरेत् ॥ सोमाभावे पूतीकानभिषुणुयादिति श्रुतेः ॥ पूतीका नाम सोमसदृश्यो लता
स्ता अभिषुत्य प्रचरेत् ॥ आदाराफाल्गुनादिप्रतिनिधिप्रयोगे प्रतिनिधिद्रव्यरसे अथ तेन प्रातःसवने श्रीणीयात् ॥ दध्नामाध्यंदिने सवने नीतमिश्रेण

तृतीयसवने श्रीणीयात् तत्पूर्वं पयः प्यते ॥ दधिप्रसिद्धं ॥ मंथितमनुत्पूतं अबद्धुं दधिनीतमिश्रमित्युच्यते ॥ यदि पूर्वसंकल्पितः क्रतुः कस्याश्चिदसंस्थस्तथा
पि प्रतिनिधिप्रयोगः सोमस्य समाप्तव्या दक्षिणा समस्तस्य स्यात् ॥ बहुदा घन्यतमं सोमयष्ट्व्ये पि रथंतरं यष्ठोमभवेत् ॥ एकां गां दक्षिणां दद्यात् ॥ पूर्वे वृता एव ऋ
त्विजः ॥ एवमपक्रांते प्रयोगं समाप्य पुनस्तैरेव ऋत्विग्भिः सहस्रं कल्पादि पूर्वमारभ्येनो कस्याश्चित् तेनापूर्वसंकल्पित दक्षिणेन बहुदादि यष्ठेन यजे
त ॥ पूर्वसंकल्पित क्रतु एवमिष्टो मश्वेदा दाणादिप्रयोगेण क्रतुं समाप्य पुनस्तेनैव यजेत ॥ यद्वा सोमे यहृते आदाणादि प्रयोगे येनके नचि द्रुपायेनाल्पम
पि सोमं पतस्तत आहृत्य आदानादिभिः संमिश्याभिषुत्य क्रतुं समापयेत् ॥ सोमेनमिश्रित्य प्रयोगस्य कृतत्वात् तस्यामेव नास्ति दक्षिणामेदो
पि नास्ति पुनर्योगः कर्तव्य इति ॥ अत्र विशेषे शतद्व्यीकारः । पुनर्योगनिमित्ते प्राप्ते द्वादशदिनाभ्यंतरे दीक्षित्वा पुनर्योगः कर्तव्यः ॥ तत्र संस्थासाम दक्षिणा
दिकं पूर्वसंकल्पितमेवेति ॥ सोमे दग्धे येत देवयाप श्चित्तं कुर्यात् ॥ कयाम्या गूर्ध्वं चर्जं र्ध्व तु प्रतिनिधिनायागे कृते यच्छ्रगावोदे या: ॥ नल पहृत व देका गोः
॥ उभयत्रापि सत्ये कदेशे नैवयागः न प्रतिनिधिना ॥ दक्षिणा दानादूर्ध्वं सोमस्य नाशादौ यस्य सोमउपदस्येदिति विधिना सोममन्या घतेनैव
क्रतुशेषसमाप्तिः कर्तव्या ॥ ऋजीषेणासह सोमरसस्य नाशादौ पूतिकादिप्रतिनिधिना शेषसमाप्तिः केऽस्कृत शेखो पजननः ॥ १ ॥ प्रातःसवने
स्ति सोमो अयं सुतो गो ईद्र पतिमहत्ता मितिस्तोत्रियानुरूपौ ॥ महां इंद्रो य ओजसा तो देवा अवं तु न दृत्यै द्वाभिर्वै सवनीभिश्च सोम मति शर्प्यै घापजे
त ॥ २ ॥ वैरूप्यावा ॥ ३ ॥ एं द्रा वैरूपस्य नि गाणागारिदैवतप्रधानत्वात् ॥ ४ ॥ संवो कर्मणा समिषा हिनोमीति ५ ॥ माध्यंदिने बण्महां असि सूर्यो दुत्य दृशे
तं वपुरितिप्रगाथौ स्तोत्रियानुरूपौ महां इंद्रो न वद्धिस्तोर्नु कंपा विश्वा सांजनितारमतीनामिति याज्या ॥ ६ ॥ तृतीयसवने उत्तरेणात्तरेण संस्थामपेयुर

एति एत्रात॥७॥ अतिएत्राश्चेत्स्यात्तदा अघ शिपिविष्टनामसन्तद्धिमस्तवते वीर्येणेति स्तोत्रिपानुरूपो माध्यंदिने न शेषः ॥८॥ त्रेषमित्याम् मरणांशि मीव
तो रितिवायाज्या ॥९॥ इति नवसूत्राणि ॥ सोमातिरेको नाम सवनार्थीयः सोमः स सवने यस्मिन्प्रपद्यतेति रिच्येत ॥ तदा सोमातिरेक इति उच्यते ॥ प्रदास्त
तशस्त्रयोः प्रपन्नो भवति ॥ छंदोगेः स्तोतव्यमस्माभिः शंस्तव्यमित्यर्थ इति प्रथमसूत्रस्य वृत्तिः ॥ पादग्रहणेप्येंद्राभिर्वैश्यवीभिश्चेति बहुवचननिर्दे
शात्प्रावदर्पमुभप्योगहीतव्याः ॥ ऐंद्राभिर्वैश्यवीभिश्चेति च शब्दः सामर्थ्यात्समुच्चिताभिरेवोभयीभिः सोमातिरेकनिमित्तं स्तोमसमतिशस्य एकपा
द्वाभ्यां वा प्रातः सवने ऽपएमिताभिरुतपोः सवनयोरित्येनेनान्यापेनपयाकयाचिदैंद्या गायत्र्या यजेत ॥ प्रातःसवननावत्क्रापत्र्येतिविशेष्यते इति दि
तीयस्य ॥ गायत्र्येति शेष इति तृतीयस्य ॥ यद्यैंद्रावैश्यव्या वा यजेत तदा पथावाव शस्त्रमेवं याज्येत्येतद्विरुध्येत ॥ यद्यप्यैंद्रावैश्यव्या यजेत तदा तद्देवत्या
याः गायत्र्याः अभावादपत्रप्रातःसवनमित्येतद्विरुध्यते ॥ तत्रैकस्य त्यागे सति छंद एव स्यात्क्रमबहिरंगत्वादप्राधान्यात्तस्येति देवतापास्त्वमभिधेयत्वा
दंतरंगतेति मन्यमानो गाणगारिर्देवताप्रधानत्वादित्युक्तवानिति चतुर्थस्य ॥ मिषाएंद्रावैश्यवी त्रिष्टुप् ॥ अनपेवयपष्ठ्यामिति सिद्धमिति पंचम
स्य ॥ ऐंद्राभिर्वैश्यवीभिश्चेत्याद्यत्राप्यनुवर्तते ॥ अतो हीनयाद्यग्रहणमत्रा स्तरत्वा घवार्थमेवनकृत्स्नसक्रमग्रहणार्थमिति षष्ठस्य ॥ तृतीयसवने
परिसोमो तिरिच्येत तदा उत्तएेत एंसंस्थाकुर्युः एति एत्रात ॥ एतदुक्तं भवति यद्यग्निष्टोमे तृतीयसवनेतिरेकः स्यात्तदोक्थ्यं कुर्युः ॥ यद्युक्थ्ये षोडशि
शिनं ॥ यदि षोडशिन्यतिएत्रमिति ॥ यद्यति एत्रे तत्र व स्पतीति ॥ एवं चेदातिएत्रादितिवचनमुत्तएेत एंसंस्थामित्यत्र संनिहिता एव च तत्संस्था
ग्रह्यंतेऽत्यैवमर्थं ॥ इतरथा अग्निष्टोमः प्रसज्येत ॥ षोडशिनि वाजपेयः ॥ अतिएत्रे अप्तोर्यामः इत्येतं निवृत्त्यर्थमातिएत्रादित्युक्तमिति सप्तमस्य ॥

महाँ इन्द्रो नवत इत्यादिपाञ्यान्तः शेषइत्युच्यत इत्यष्यमस्य॥ इयं पाञ्यामाध्यंदिसोमिका नाम भवति॥ अत्यग्निष्टोम वाजपेयाप्तोर्यामेषु तृतीयसवनेषु सोमातिरेके इ
दमेव शस्त्रं भवति॥ सोमातिरेकाद् इन्येन वा निमित्तेन शास्त्रान्तरेके नपदिष्ट शस्त्रोपजननः स्यात्तदाप्युन्नेनैव सोमातिरेकोक्तेनानुसवनं शस्त्राणि संपादनीया
नि॥ स्तोत्रिय एक एव तदनुसारेणानुरूपः कल्पनीयः॥ एतच्च सोमातिरेके प्रातः सवने स्तिसोम इत्येतावते वास्य पर्यस्य सिद्धे सत्यां शस्त्रोपजनन इत्यस्मा
द्वचनाल्लभ्यते॥ एतदुक्तं भवति॥ यत्र यत्र नैमित्तिकः शस्त्रोपजननस्तत्र तत्रानुसवनमेतेन विधानेन शस्त्राणि कल्पनीयानि॥ स्तोत्रियानुरूपयोश्छन्दोगप्र
त्ययतदनुसारेकल्पनाप्यामिति नवमस्य॥ अत्र प्रयोगः॥ तत्र प्रातः सवने सोमातिरेके॥ अभि हिं कृत्वा हूयामि सोमो अपं सुत इति तच्च स्तोत्रियः॥ आ हूयगो
र्धपतिमहत्वामिति तच्चो नुरूपः आहूयम हो इन्द्राय ओजसे त्वष्टृत्वारिंश इन्द्रचे सूक्तमेवं द्वौ॥ अतातो देवा अवंतु न इति वैश्वदेवं षल्चं सूक्तमाप्यत्र इप्यस्तो
मातिशंसनार्थपावदर्थमुभयो गृहीत्वा हूयोत मांशं सेत्॥ तत्र पूर्वैर्मैत्रीभिः पश्चाद्वैश्वदेवीभिरिति॥ क्रमस्यागेमानाभावात्॥ एवं शस्त्वो कथं वा चीति
जपित्वा सर्वां कर्मेया प्रमिष्टाहिनो मीत्यैन्द्रावैश्वमन्त्रि पु मानवानेयजति॥ प्रातः सवनेनवानविधानात्॥ माध्यंदिने सोमातिरेके अभि हिं कृत्वा हूयव
पमहो अस्ति सुर्योड त्यद्दशीतेव पृ इति प्रगाथो स्तोत्रियानुरूपो पयास्कृतं शस्त्वा हूयमहाँ इन्द्रो नवदिति त्रयोदशर्चं विस्रोर्नं कमिति षत्स्वमत्रा पिपृवे
वृराभ्यो यावदर्थं गृहीत्वा हूयोत मांशस्त्वो कथं वा चीन्द्रायेति जपित्वा पाविष्टा सां जनितास्मतीनामिति याज्येति॥ ततीयसवने स्तिष्टोमे पष्ठितिरेच्च
तेतदो कथ्य संस्थाकते चापवृकथ्येतिरिच्यते तदा षोडशीयदि षोडशिन्यतिरिच्यते तदातिरात्र इति॥ पष्ठितिरात्रेतिरिच्यते तदा प्रततेअ षाशि
पिविष्टनाम प्रतद्दिष्म स्तवते वीर्येणेति स्तोत्रियानुरूपौ॥ अन्यत्तत्सर्वं माध्यंदिनातिरेकवत्॥ अयं च विशेषः उक्थं वा चीतिशस्त्वा जपः॥ उ धेत्राषो त्व

८१ शिनइतिवचनात् ॥ त्वेषमित्यास्य समरणं शिमीवतोऽन्तिमा माध्यंदिनोक्थागापान्येति ॥ इदमेवात्याग्निष्टोमवीजेपवाप्नोर्यामेषु तृतीयसवनेषु सामातिरेके
६\ शास्त्रं भवतीति ज्ञेयं ॥ अन्यस्याविधानात् ॥ अतोऽत्र एतं स्यामिति तु न भवति ॥ एवं पत्रपत्रनिमित्तेन स्तुतशास्त्रं भवतत्त्वतत्र सामातिरेकन्यायेन श
स्त्र कल्पना कर्तव्या ॥ तत्र प्रातःसवने यदि चेत्तदा छंदोगम्यस्तोत्रियं गृहीत्वा तदनुसारेणानुरूपं कल्पयित्वा महां इंद्रो य ओजसेत्यादि प्रातःसवनवत्
॥ यद्युत्तरयोः सवनयोस्तदा पूर्ववत्स्तोत्रियानुरूपौ गृहीत्वा महां इंद्रो नवदित्यादि माध्यंदिनवत् ॥ तत्र यदि त्रिकद्रुकेषु महिषो यवाशिरमिति स्तुवंति
तदा योषस्येपुरोऽयमित्यनुरूपइति ॥ भक्षस्तु क एवं सर्वत्रेति ॥ अत्र सामसत्रोक्तविशेषः सामप्रायश्चित्ता वसरे वक्ष्यते ॥ अत्रौपानुवाक्यो बोध्या
यनः ॥ अयं वै भवति यस्य प्रातःसवने सोमोऽतिरिच्यते अभ्यतिरिच्यते समातःसवने प्राडुपन्याह ॥ होतश्च मसमनूत्न यध्वमंनेतः सर्वशएव एना
न२ ~~समुंनीयो नावेयाः२सं~~ मुं नयमातिरिरिच्यइति होतश्च नाम समेव मथ समनूत्न यति यथो यथाऽस्मितए न सर्वं शाएव एनाम २ समुंनीयो नावे
यः २ सं२ सादयंति ॥ अथाप त्र यस्य श्यबर्हिषी आदाय वा चंयमः प्रसृप्य हुत्वा स्तोत्रमुपाकरोति स्तुवते तत्रैतद्धा य त्र २ साम यं च दशं त्वगोर्ध
यति महत्तामिति धयद्वतीषु कुर्वंति होत्र एषोत्तमेति प्राहुः समानमत ऊर्ध्वम थ वै भवति यस्य माध्यंदिने सवने सोमोऽतिरिच्य० अभ्यतिरिच्यत
इति माध्यंदिने प्राडुपन्याह ॥ होतश्च मसमनूत्न० स्तुवते तत्रैतद्गौरिवीतं साम सप्तादशं ब्रह्म होमित्ति सर्पेत्येतावत्कुर्वंति होत्र एषोत्तमेति०
समानमत ऊर्ध्वं यस्य तृतीयसावने सोमोऽतिरिच्येतोक्थ्यं कुर्वीत० तत्वे दुष्प्रस्तानमिति अग्निरात्रातिरिक्ते प्राडुपन्याह ॥ होतश्च मस० स्तुवते
तेदत तद्बृहत्सामैकविंशं वैश्वदेवीषु शिपिविष्टवतीषु कुर्वंति होत्र एषोत्तमेति प्राहुः समानमत ऊर्ध्वं ॥ २५ ॥ इति तु छंदोगबह्वृचेषु क्रामयमाने षुते

चेन्न कामयेत न सप्रातः सवने तिसृभिः क्त्वायां स्थालीमत्वं एतेति शिष्टाः यमन्यते तस्या उपरिष्टाद् आग्रयणमानीयाधस्ताद् उपगृह्णाति त्रिभिर् विष्यंदयति सोमि
विष्यंदमानः सर्व आग्रयणः संपद्यते त्रिभिर् हिंकृत्य पाणिमन्यस्या दयति माध्यंदिने सवने तिसृभिः क्रेतथैव पांस्थालीमत्वं एतेति शिष्टाः यमन्यते तस्या
उपरिष्टाद् आग्रयणमानीयाधस्ताद् उपगृह्णाति ॥ त्रिभिर् विष्यंदयति सोमि विष्यंदमानः सर्व एवाग्रयणः संपद्यते तेन तथैव त्रिभिर् हिंकृत्य पाणिम
न्यस्यादयति तृतीयसवने तिसृभिः क्रेहारियोजनमेवान्त्राभिविष्यंदयति न हि पुनर्ग्रहणं विद्यते इति ॥ अत्र प्रदीपः ॥ सवनस्यांतिमो भक्ष्यपर्यायो होतो
मात्याक्रूसोमातिरेकः तिरिक्तं सोमं सर्वे चमसेष्वानीय पञ्जुहुयात् ॥ चमसोन्नयनानंतरमपि सोमेतिरिक्ते तिरिक्तं सोमं चमसेषु सह जुहुयात् ॥ हो
मानंतरमतिरिक्तमिति ज्ञाते माता सवने प्रयोगो वक्ष्यते ॥ अंतिमपर्यायपसर्वैर्भक्षमाणे पंतरत्यंतं कृत्वा प्राशापन्याह ॥ होतुश्चमसमनून्न
यध्वमुन्नेतः सर्वे शएवएजानन्नमुन्नयमातिरिरिच इति ॥ होतृचमसमेवप्रथमं उन्नयति ॥ पयोपपादमितएनसमुन्नीयोनताभे घां संसादयति
॥ अथापपउपस्थ श्यवानं यमः प्रत्यह हुत्वा स्तोत्रमुपाकरोति स्तवते तदेतद्रापत्रं सामयंचरद शंगोर्धयतिमहतामितिधयद्वती षुकुर्वेति
॥ होत्रएषोत्तमेतिप्राहुः ॥ शस्त्रं प्रतिगीर्य उक्थ्यशा पत्र सोमानामितिवषट्कृतानुवषट्कृते होतृचमसमध्वर्युर्हूर्न होति ॥ चमसाध्वर्यवः
सर्वान्चमसान्हिन्वंति ॥ भक्षणेनुसवनमक्षरं द्राविलुम्यांपातस्येति होतृचमसमेवैते त्रपः समुपहूय परस्यादि सर्वे भक्षमाजेयंते ॥ प
दिमाध्यंदिने सोमो तिरिच्यते अंतिमो भक्ष्यहोमात्पूर्वे चोक्ताम सेषून्नीय पञ्जुहुयात् ॥ अंतिमो भक्ष्यपर्यायपहोमाद् ऊर्ध्वं चेत्सोमोतिरिक्तः प्राशापन्या
ह ॥ होतुश्चमसमित्यादि सर्वे शएवएजानं समुन्नीयोनताभेघामासाद्य दहिषी आदापस्तोत्रमुपाकरोति स्तवते तदेतद्गौरिवीतसाममसप्तदशं

८२ 82 बन्धमहं अतिसर्पेतिकुर्वेति होत्र एषोन्तमेतिप्राहुः ॥ प्रसिद्धमुक्थ्यं प्रतिगीर्य हुत्वा भक्षं पत्न्यनुसवनभक्षो हरिवदुद्गणस्य इन्द्राविष्णुभ्यां पीतस्येत्यादि ॥
॥ यदि तृतीयसवने सोमो ऽतिरिच्येत तदा प्रवर्त्तः क्रतुरग्निष्टोमश्चेत् ॥ ध्रुववानग्निष्टोमसंस्थश्चेल्लातदानीमेवातिरिक्तसोमं उक्थ्यसंस्थां गच्छति ॥ उप
यामगृहीतो ऽसीत्याद्युपस्थावबहूक्त इति गृहीत्वा सादयित्वा उक्थ्यक्रतुको उक्थ्यपर्याये श्चैंति उक्थ्यस्यात्वा उपशयेन गच्छति ॥ उपयामगृहीतो ऽसीन्द्रा
वरुणाभ्यां त्वादि ० एषवइन्द्रावरुणाभ्यां जुष्टं गच्छामि इन्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामिति तेषां ग्रहाः आदित्यवदुद्गणस्येत्यादिनाभक्ष पित्वा समापये
त् ॥ उक्थ्ये सोमातिरिक्ते श्चेदतिरात्रं कुर्यात् ॥ पर्यायानंतरं षोडशिपात्रे कल्पयित्वातिरिक्तं षोडशिपात्रे गच्छति आतिष्ठेंद्र मिदं सावित्रि ॥ मन्त्रेभिः षो
डशिनं गृहीत्वा सादयित्वा षोडशिना चरिष्यन्नित्यादि कृत्वातिरात्रक्रतुं समापयेत् ॥ अत्यंः सोमो ऽतिरिक्तश्चेदग्निः प्रभूतं कृत्वा प्रचरेत् ॥ दीक्षोपस
त्क्रतुपशूनां निवृत्तिः ॥ अतिरात्रे सोमो ऽतिरिक्तश्चेत् संधिस्तोत्रं समाप्य होतुश्चमसमित्यादि सर्वं शस्त्रएव एनां संमनीय सादयित्वा स्तोत्रमुपा
कुर्वीति स्तुवते तदेतत्बृहत्साम एकविंशं वैरूपं षोडशि पि विधवती पुष्कुर्वेति ॥ होत्र एषोन्तमेतिप्राहुः ॥ प्रसिद्धमुक्थ्यं प्रतिगीर्य वषट्कृतानुवषट्कृते
हुत्वानुसवनभक्ष आदित्यवद्गणस्येत्यादि सर्वगणस्येत सर्वगणा ॥ अश्विभ्यां पीतस्येति वा होतृचमसमेवैते त्रयः पर्यायादि कुर्यात् ॥ सर्वत्रांत्यपर्याये हो
मात्पूर्वं अतिरिक्तमिति समत्रे चेत् सर्वेषु चमसेष्वानीय जुहुयात् ॥ ततो ऽप्यतिरिक्तश्चेच्चमसैः सह जुहुयात् ॥ अंत्यपर्याये होमानंतरमतिरिक्तश्चेत्स्तोत्रश
स्त्राते कुर्यात् ॥ छंदोगा बह्वृचाः पदीछ्छ पुनः स्तदेतत्स्यात् पश्चिमं कुर्यात् ॥ छंदोगा बह्वृचेष्वनिष्ठुत्सु पश्चात्तत्र स्पते । प्रातःसवने सोमो ऽतिरिक्तश्चेदतिरिक्तस्य
सोमस्य प्रातःसवनगृहीतायग्रयणस्य चस्यूर्णा पर्याये हतीस्या नीयातिरिक्त्यमाध्यंदिनस्य सवनस्याग्रयणग्रहणकाले उपरिष्टादाग्रयणमा

नीपाधस्ताद्वहन्ति ॥ अतिरिक्तं सोमं त्रिर्विलिप्यावगृह्णीति ॥ तृतीये सर्वे गृहीत्वा त्रिरभिहिंकृत्य सादयति ॥ अतिरिक्तसोमः सर्वोपि पूर्वोग्रयणेन सह गृही
तत्वाद्राग्रयणो भवति ॥ माध्यंदिने तिरिक्तश्चेत्तृतीयसवनाग्रयणग्रहणकाले पूर्ववद्वहन्यात् ॥ तिरिक्तश्चेत् हारियोजनग्रहणकाले तिरिक्तं सोमं
त्रिरात्रीपहारियोजनं कृत्वा जुहुयादिति ॥ अत्र शतद्वीपिकाः ॥ हुते हारियोजने सोमे तिरिक्ते तं ऋजीषे निनीयावभृथं गमयेदिति ॥ अथ ध्रुवावनयने
विस्मृते प्रा० ॥ तत्रोपानुवाक्ये बौधायनः ॥ अथातो ध्रुवस्यैव परिहीणस्य मीमांसा ऐंद्राग्निभ्यामेनमभ्यां परिगृह्य जुहुयादिंद्रो वै देवानां पुनःपुनरभ्यु
पकारं प्रजनस्सह हृत्येतदेकं अश्विनीभ्यामेव मरुभ्यां परिगृह्य जुहुयादश्विनौ हि देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोतीत्येतदेकं वैश्वदेवीभ्यामेन
मगम्यां परिगृह्य जुहुयाद्यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपिविष्टमभ्यतिरिच्यत इत्येतदेकं अवभृथेनैनं सहाभ्यवहरेद्यथान्यानि सोमलिप्तानि पा
त्राण्येवमेवमभविष्यतीत्येतदपरं बर्हिष्येनं सहाभ्युपोषयेदेषवा अग्निर्वैश्वानरो यत्प्रदाव्योग्निरेष वैश्वानरः परागृह्यते न ध्रुवमेव मन्त्रोवै
श्वानरे हुतो भविष्यतीत्येतदपरं अथ पुनर्दीक्षते यज्ञो ह वै यज्ञस्य प्रायश्चित्तिरिति तात्तिरीयकः प्राजिनोथसत्रिणां माजोलीयोपरि विष्यंदनवंतं कृ
त्वानरे नैनं निनयंति । आहारदहेति ब्रूयादिति ॥ अत्र प्रदीपकारः ॥ ध्रुवावनयने विस्मृते ध्रुवं मंत्रेण परिगृह्य प्रत्याव्यैंद्राग्नी रोचना दिवः श्नथद्वृ
त्रमिति द्वाभ्यामिंद्राग्नी उद्दिश्य ध्रुवस्यात्येवाहवनीये जुहुयात् ॥ तामा अथवा प्रातर्युजा विबोधय प्रातर्यावाणेति द्वाभ्यामश्विनावुद्दिश्य जुहु
यात् ॥ यद्धवषट्कृते त्या विश्ववासः प्रतन्नेऽयद्या शिपिविष्टेति द्वाभ्यां विष्णुमुद्दिश्य जुहुयात् ॥ अथवावभृथदेशे सह विस्मृतं ध्रुवं अवभृथे प्र
प्लावयेत् ॥ अथवा बर्हिर्हृपोषणकाले बर्हिषा सहोपोषयेत् ॥ एषामन्यतमेन प्रायश्चित्तं कुर्यात् ॥ तेनैव क्रतुना पुनर्यजेत ॥ अथवावभृथात्पूर्वं

८३
83

स्मरणे होतुश्चमसमनून्नयपश्चमुन्नेतः सर्वश एव एजानमुन्नयमातिरिरिचदुत्स्युत्का ध्रुवस्याल्यात् श्चमसानुन्नीयक्रतुसमाप्तोपत् स्तोत्रशस्त्रं चतदे
वोपाकृत्यस्तुत्वा शस्त्वं प्रतिगीर्य हुत्वानुसवनं भक्षयित्वा समापयेत्॥ तदापि पुनर्यो गइति केचित्॥ पुनर्योगो न कर्तव्य इत्यनेन अहीने द्वर्गणे वाध्रुव
विस्मरणे अंत्यवर्जिते ग्रहः सुमार्जालीये कुंभ्यां कृत्वा मध्ये विस्मृते धौ वो वनि नयेत्॥ अंत्ये हि विस्मृते उत्क्रमकारणप्रायश्चित्तं कृत्वा त्यमहएवर्तेप
त्ववेति॥ अथ हुतसोमसंसर्गो अन्यहुतान्यहुतसोमसंसर्गो अन्यदेवत्यसोमग्रहणोपरि आन्यदेवत्यसोमग्रहणे च प्रायश्चि॰॥ तत्र बोधायनः॥ अ
भ्यपदिहुताहुतौ सोमौ ॰ संसृज्येयातामभिगृह्णीयादिति विधानात् हुतसोमाभिग्रहणे हुताहुतसोमसंसर्गे भिगृहीतं सोममाहवनीयादुदी
चीं गारान्निरूह्य तेषु जुहुयात्॥ यत्तस्य हि स्पृक्त्लिप्या विति मंत्रेण तस्य शेषं भक्षयेत्॥ तस्य नित्यभैक्षमुत्क्रमाय जमानं तमोविददिति मंत्रेण भ
क्षयेत्॥ अन्यहुताश्चमसा अन्यहुतैः संसृज्येरन् तदाप्येतदेव प्रायश्चित्तं॥ नित्यभक्षणे नैमित्तिकस्य समुच्चयः॥ अन्यदेवत्ये सोमे गृहीते तस्योपरि
परदेवत्यं गृह्णीयात तदाप्येतदेव प्रायश्चित्तं॥ एतेषु नंतरं पूर्वोक्तेषु प्रायश्चित्तेषु भिंदाहुतिरूपं प्रायश्चित्तमिति॥ अभिषुतसोमोपरि वर्षबिंदुपत
नेप्रा॰॥ तत्र बोधायनः॥ अथ यदि सुतः सोमोभिवर्षेन्नादित्यदंस्तस्यैपिपीषतद्रस्येनाभ्यां स्तुवाहुतीर्हुत्वा तस्य भक्षमनुवर्तयतीति॥ इंदुरिंद्रम
वागादिंदोरिंद्रोपात्तस्य त इंद्रविंद्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति॥ अत्र प्रदीपः॥ अभिषुतस्य सोमस्योपरि वर्षबिंदुपतने ग्र
हेषु गृहीतेषु चमसेषून्नीतेषु च वर्षबिंदुपतनेन दित्यदं नवि चिकेत विद्वान् यन्मतः पुनरप्येति जीवान्॥ त्रिवषस्तुवानस्य एथव ज्नीवोगभो
नमतः सजीवात्॥ प्रत्यस्मै पिपीषते इत्येताभ्यां द्वे स्रुवाहुती हुत्वाभिंदाहुतीं च हुत्वाभिषवस्य यंत्रहस्य च समस्यवा होमानंतरं नित्यभक्षमंत्रानंतर

मिंदुपवागादित्यनेनभक्षयेदिति ॥ अथ सवनीयानां पशूनां पुरोडाशानां सान्नाय्यानां च पूतिगंधोत्पत्तौ प्रा० ॥ तत्र बौधायनः ॥ अथ सवनीयानां पशूनां प्रा
यश्चित्तिरेषपादि पूतिगंधः स्यान्नदुत्सृज्य पुनरूत्वा यथा प्रचरेत् दधि वा घृतोदकेन प्रक्षाल्याज्येनावधाय पुनः श्रपयित्वा प्रचरेत्तत्रापि पूतिगंधो भवेत्तदुत्सृ
ज्य पुनरेवोत्वा यथा प्रचरेत् तथा सवनीयानां पुरोडाशानां तथा सान्नाय्यानामिति ॥ अत्र प्रदीपकारः ॥ अथ सवनीयस्य पशोः पूतिगंधोत्पत्तौ अवदाना
न्युष्णोदकैः प्रक्षाल्याज्यं सिक्त्वा पुनः श्रपयित्वा प्रचरेत् ॥ तत्रापि पूतिगंधोत्पत्तौ तदुत्सृज्य पश्चात्तरमुया कृत्स्न यजेत् । पुनरूह्यो कारणापशुप्रकारेणा क्त
प्रकारेणाकुर्यात् ॥ कतिपयानामंगानां पूतिगंधोत्पत्तौ आज्येनावधाय श्रपयित्वावदाय यजेत् ॥ बहुभिरवदानैरदुष्टत्वात् न पशुं तरालंभः ॥ सव
नीयानां पुरोडाशानां पूतिगंधोत्पत्तौ तानप्सु प्रक्षिप्य पुनरूत्वा यथा यजेत् ॥ सवनीयानां सान्नाय्यामिक्षाणां पूतिगंधोत्पत्तावप्सु प्रक्षिप्य पुनरूत्वा यथाय
जेत् ॥ हविर्दोषोक्तदोषैर्दुष्टानामप्येवमेव प्रायश्चित्तं कृत्वा सर्वत्र मिंदाहुती जुहुयात् ॥ ग्रहाणां स्थालीनां वा पूतिगंधोत्पत्तौ प्रा० ॥ तत्र प्रदीपकारः ॥ ग्रह
णानंतरं ग्रहेषु स्थालीषु वा पूतिगंधोत्पत्तौ गंधयुक्तं सोममप्सु प्रक्षिप्य मिंदाहुती हुत्वा पुनर्गृहीत्वा जुहुयात् ॥ अथ सर्वेषां सोमानां पूतिगंधोत्पत्तौ प्रा०
तत्र प्रदीपः ॥ सर्वेषु सोमेषु पूतिगंधोत्पत्तौ सोमोपदंसन्यायेन ऋजीषमभिषुत्य पुनर्गृहीत्वा मिंदाहुती जुहुयातदिति ॥ अथ सर्वेषु क्रतुषु सोमाप
चारे प्राय० ॥ तत्र बोधायनः ॥ सर्वेषु सोमेषु सोमापचारे कालातिक्रमं तथा तद्विपर्यासं वा ये सोमादिष्वेषु च दोषेषु प्राक्समिष्टयजुष आ
ज्यस्थाल्याः स्रुवेणोपघातं सर्वप्रायश्चित्तानि जुहुयादाज्यानित्येकेऽभ्यातानानित्येके राष्ट्रभृत इत्येके मान्यहोमानित्येके छंदांसीत्येके सौरी
रित्येके तनूरित्येके स[illegible]होतानित्येके दशात्मकमित्येके रूपोहषीरित्येके वैश्वदेवीरित्येके महाव्याहृतीरित्येके प्राजापत्यानित्येके व्याहृतीरित्येके वैश्व

८४ प्रणवमित्येके सर्वो नित्याचार्यः सर्वो नित्याचार्य इति ॥ अथ सर्वत्रानुक्तेषु प्रा० ॥ तत्र प्रदीपः ॥ अनुश्रुतप्रायश्चित्तेषु सर्वेष्वपि प्रायश्चित्तं मिंदाहुतीर्जुत्रमिंदा
हुती ॥ सर्वेष्वानेषु मिंदाहुतीयज्ञशरीर मित्याचार्यवचनात् सोमे सर्वप्रायश्चित्तं मिंदाहुतीर्जुहुयादिति ॥ ७ ॥ ❁ ॥ ७ ॥
॥ इति श्रीमद्दुविद्राम चंद्रदीक्षितप्रसादाद्देवानन्देनापरनामवंशपिक्षेत्रवासिथिठेरस्थपनामकमपूरे श्रमीणात्मजविश्वेश्वरदीक्षितग्रथितायां
श्रौतप्रायश्चित्तप्रयोगरत्नमालायां हविर्वैगुण्यप्रायश्चित्तानि ॥ ॥ ७ ॥ ॐ ॥ ❁ ॥ ॐ ॥ ७ ॥
श्रीमंगलमूर्तये नमः ॥ अथानशिष्टसाधनवैगुण्यप्रायश्चित्तानि ॥ तत्रादौ देशवैगुण्यानि ॥ तत्र येस्मिन्कर्मणि यो विहितदेशस्तस्यान्यथाकरणे ह्ये
अविहितदेशे निषिद्धदेशे च यदि कर्म कुर्यात्तदा प्रायश्चित्तपूर्वकं पुनरावर्तनीयं ॥ एवमेवाविहितकालकर्तद्रव्येषु निषिद्धकालकर्तद्रव्येषु चज्ञेयं ॥
अथ कालवैगुण्यानि ॥ तत्राग्निहोत्रकालवैगुण्यानि ॥ तत्रादावकाले ग्निहोत्रकरणे प्रा० ॥ तत्र बोधायनः ॥ ॥ आत्र प्रदीपकारः ॥ प्रयानस्तमि
ते स्तमितप्रात्याग्निहोत्रं जुहोति ॥ अकाले हुतस्याहुतसमत्वात्तस्मिन्नेवाहवनीये पुनः परिषेकादिसांगो होमः कर्तव्यः ॥ प्रणयनस्य कालेकृतत्वा
त्र पुनः प्रणयनं ॥ होमानंतरं यजमानः भवतन्नः समनसाविंत्याहवनीयगार्हपत्यावुपतिष्ठते ॥ यद्यप्रातरुदयात्पूर्वमुदितप्रात्याग्निहोत्रं जुहोति त
दाप्युदिते पुनः पूर्ववदग्निहोत्रं हुत्वोपतिष्ठत इति ॥ अत्र शतद्रूषीकारः ॥ अनागते प्रणयनकाले यद्यग्निः प्रणीयते तदा तमनुगमय्य पुनः स्वकाले प्र
णयनं कर्तव्यं ॥ केचित्सर्वप्रायश्चित्तं कृत्वा तमेव प्रणीतमग्निं होमार्थं धारयंति ॥ तथा संध्यादिहोमकालात्पूर्वमेव होमे कृते पुनः स्वकाले होमः कर्तव्यः
॥ यदि तु प्रणयनं स्वकाले कृतं तदा तस्मिन्नेव विहारे पुनर्होमः ॥ अन्यथा प्रणयनाद्यावर्त्तते ॥ पुनर्होमे समाप्ते भवतन्नः समनसाविंत्याहवनीयोप

स्यानं कर्त्तव्यं ॥ अथानुक्रमणिका ॥ तत्राश्वलायनः ॥ यथाहवनीयमप्रणीतमभ्युदियाद्बहुविद्ब्राह्मणोग्निं प्रणयेद्दर्भे हिरण्ये ऽग्रतो ह्रियमाणे ॥ अभ्युदि
ते चतुर्गृहीतमाज्यं रजतं च हिरण्यवदग्रतो हरेयुः ॥ अथैतदाज्यं जुहुयात्पुरस्तात्प्रत्यङ्मुखस्त्वउपविश्यैषाः केतुना जुषतां स्वाहेति ॥ कालात्ययेन शेषः ॥ न विहृ
ग्निरनुगम्यदिति पंच सूत्राणि ॥ यं यद्यस्तमियात्तदा तदानीमेवानेतुं शक्येषु ब्राह्मणेषु यो बहुवेति तमानीय तेनोद्धरणादि निधानांतमाहवनीयस्य
कुर्यात् ॥ अग्नेः प्रणीयमानस्य अग्रतो हिरण्यं दर्भे रेव नयेत् ॥ ब्राह्मणं ग्रहणं बहुविद्यत्नेपि ज्ञात्वं तत्र निवृत्यर्थमिति प्रथमसूत्रस्य वृत्तिः ॥ अनुद्धृतत
मभ्युदिते सति बहुविदग्निं प्रणयेत् ॥ तस्याग्रतश्चतुर्गृहीतमाज्यं नेतव्यं ॥ रजतं च यदि हिरण्यवद्वचनेन रजतस्याग्रतो हरणं प्राप्येततत्राद्दर्भे हरण
मपि प्राप्नुयादाज्यस्याग्रतो हरणं च न प्राप्नुयात् ॥ अतो दर्भि निवृत्त्यर्थमाज्यस्य प्रापणार्थं चाग्रत इति वचनं ॥ एवं चेद्धिरण्यवद्वचनं पूर्वोक्तस्य बहुवि
द्ब्राह्मणाभ्युद्धरणस्य प्रापणार्थमिति द्वितीयस्य ॥ हिरण्यरजतयोरग्रतो हरणमेव कार्यं आज्यस्य कार्यांतरमुच्यते ॥ निहिते त्वग्नावाहवनीयस्य पुरस्तात्प्र
त्यङ्मुख उपविश्य ऐषाः केतुनेति तदाज्यं जुहुयादिति तृतीयस्य ॥ उभयोः कालयोः अनुद्धृतप्रायश्चित्तशेषः कालात्ययप्रायश्चित्ताभ्यामेवोक्तः स्वेन स्वेन का
लात्ययप्रायश्चित्तेन अग्निहोत्रमुपसाद्य स्यादि वारुणीष्यं तस्मायं काले भवति ॥ प्रातः कालेपि तदाघवद्व्रातम तापसंते भवतीति चतुर्थस्य ॥ तेना
ग्निहोत्रार्थं येवाग्निरुपसायं होमांतं भवतीति पंचमस्य ॥ अत्र प्रयोगः ॥ तत्रादौ सायमनुद्धरणप्रयोगः ॥ अग्निहोत्रार्थं विधिनानुद्धृताहवनीये यद्यस्त
मियात् ॥ तदा यस्य यजमानस्तीर्थेन प्रविश्य सायमनुद्धरणप्रायश्चित्तं सहितं सायमग्निहोत्रं होष्यामीति संकल्प्याग्निप्रणयनार्थं बहुविदं ब्राह्मणं
वृत्वा दक्षिणाग्निं प्रणयेत् ॥ बहुविद्ब्राह्मणः देवं त्वा देवेभ्यः श्रिया उद्धरामीति गार्हपत्यादाहवनीयार्थमुद्धृत्य दर्भे हिरण्यं बध्वा तदादित्यलेन पीक

८५ ल्यामेव्यग्नेतौ क्रियमाणेऽक्रियमाणे इत्यादिनिधानांतं कुर्यात् ॥ होमाकर्तोपरिसमूहनादि वा हयो चित्पर्यंतं वक्ष्यमाणसायंहोमकालात्ययवत् कुर्यात्
85 ॥ इति सायमनुद्धरणप्रयोगः ॥ ॥ अथ प्रातरनुद्धरणप्रयोगः ॥ विधिनानुष्ठिता हवनीयं पश्चादभ्युदियात्तदा प्रातरनुद्धरणप्रायश्चित्तसहितं प्रात
रग्निहोत्रं होष्यामीति संकल्प्य बहुविदं वृत्वा दक्षिणाग्निप्रणीयणाहृपत्य आज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वा परिकर्मि हस्ते दत्वा एजतमन्य हृ
स्ते दद्यात् ॥ बहुविद्ब्रह्मणा आज्यं एजते चक्रियमाणे देवं त्वेत्यादि तद्द्रजातं चं द्रत्वे न परिकल्प्य निधानांतं कुर्यात् ॥ होमकर्ता आहवनीयस्य पुरस्तात्प्र
त्यङ्मुख उपविश्य तदाज्यं जुहुयात् ॥ उषाः केतुना जुषतां स्वाहा ॥ उषसे इदं० ॥ ततः परिसमूहनाद्याहवनीयानुगमनवर्जं तेष्वेवाग्निषु सायंहोमां
तं कृत्वाग्निद्वयं निष्काश्य प्रातरग्निद्वयं विहृत्याग्निहोत्रं हुत्वा ब्रातयानीक्षं तं वक्ष्यमाणप्रातःकालात्ययवत्कुर्यादिति प्रातरनुद्धरणप्रयोगः ॥ अ
विधिनोद्धृते व्याहवनीये सूर्येस्तमिते उदिते वा तस्याकृतसमत्वात्तं गार्हपत्ये समोप्याग्निं बहिष्यात प्रायश्चित्तं कृत्वाऽनुद्धरणप्रायश्चित्तसहितो
होमः कर्तव्य इति वृत्तिकृद्राशयः ॥ अत्र कालद्वयेप्यनुद्धृते न कल्प उच्यतामाते ॥ तत्र कर्मान्ते बौधायनः ॥ अथ यस्याग्निमनुद्धृतं सूर्योभ्य
स्तमियादभ्युदियाद्वा नाय थासूत्रे वाकुर्यादपि वा संततीं जुहुयात् ॥ मनो ज्योतिर्जुषतां त्रयस्त्रिंशत्तंतव इत्येते स्रुवाहुती हुत्वा व्याहृतिभि
रुपतिष्ठेतामथस्तमिते वा हरणीं स्रुवाहुतिं हुत्वा व्याहृतिभिरुपतिष्ठेतामभ्युदिते मैत्रीं स्रुवाहुतिं हुत्वा व्याहृतिभिरुपतिष्ठेत व्याहृतिभिर्वान्वाहा
र्यपचनमिति ॥ अत्र प्रकारः ॥ अनुद्धृते पूर्वाग्नौ एवावस्तमिते भ्युदिते च पूर्ववदग्निप्रणीयाग्निहोत्रं हुत्वा ज्यं संस्कृत्य मनोज्योतिस्त्रयस्त्रि
ंशदिति द्वे स्रुवाहुती हुत्वा भूर्भुवः सुवरित्याहवनीयमुपतिष्ठेतेति ॥ एवं स्वकाले दक्षिणाग्नौ प्रणीते सति ॥ अप्रणीते एवावस्तमिते भ्युदिते च

पूर्ववद्दक्षिणाग्निंप्रणीयव्याहृतिभिरुपस्थाप पूर्ववन्नीयं प्रणीयाग्निहोत्रं हुत्वान्यं संस्कृत्य मनो ज्योतिस्त्रयस्त्रिंशदिति द्वे स्रुवाहुती हुत्वा व्याहृतिभिरुप
तिष्ठेतेति ॥ पश्चादनुगते पूर्वाग्नौ एवावसन्नमिते पूर्ववदग्निं प्रणीयाग्निहोत्रं हुत्वा वरुणाय स्वाहेति स्रुवाहुतिं हुत्वा व्याहृतिभिरुपतिष्ठेत ॥ अभ्युदिते च
पूर्ववदग्निं प्रणीयाग्निहोत्रं हुत्वा मित्राय स्वाहेति स्रुवाहुतिं हुत्वा व्याहृतिभिरुपतिष्ठेत ॥ दक्षिणाग्नावनुगते एवावसन्नमिते अभ्युदिते एवावसन्नमिते अभ्यु
दिते च दक्षिणाग्निं प्रणीय व्याहृतिभिरुपस्थानमेव नान्यत् ॥ अथ बौधायनोक्तानुकल्प्य पक्षमाश्रित्याश्वलायनसूत्रानुसारी प्रयोगः ॥ अप्रणीते ए
वावसन्नमिते स्नात्वा दम्पती यथेन प्रविश्य प्राणानायम्य तिथ्यादि संकीर्त्य अनुद्धरणप्रायश्चित्तसहितं सायमग्निहोत्रं होष्यामीति संकल्प्य हिरण्यं पु
रस्कृत्य दक्षिणाग्निं प्रणीय भूर्भुवः सुवरित्युपस्थाप नित्यवदाहवनीयं प्रणीयाग्निहोत्रं हुत्वा गार्हपत्य आज्यं संस्कृत्याहवनीये मनो ज्योति
स्त्रयस्त्रिंशदिति बौधायनपाठेन द्वाभ्यां द्वे स्रुवाहुती हुत्वा भूर्भुवः सुवरित्याहवनीयमुपतिष्ठेत ॥ अप्रणीते एवावुदिते तु अनुद्धरणप्रायश्चि
त्तसहितं प्रातरग्निहोत्रं होष्यामीति संकल्प्य रजतं पुरस्कृत्य दक्षिणाग्निं प्रणीयेत्याद्याहवनीयोपस्थानान्तं पूर्ववत् ॥ अपि वानुगते पूर्वाग्नौ एवा
वसन्नमिते पूर्ववदग्निं प्रणीयाग्निहोत्रं हुत्वा वरुणाय स्वाहेति स्रुवाहुतिं हुत्वा व्याहृतिभिरुपतिष्ठेत अभ्युदिते च पूर्ववदग्निं प्रणीयाग्निहोत्रं
हुत्वा मित्राय स्वाहेति स्रुवाहुतिं हुत्वा व्याहृतिभिरुपतिष्ठेत ॥ दक्षिणाग्नावनुगते एवावसन्नमिते अभ्युदिते च दक्षिणाग्निं प्रणीय व्याहृतिभिरुप
स्थानमेव नान्यत् ॥ अत्र केशवी शतद्रूपी काः ॥ अग्निहोत्रहोमार्थमग्निप्रणयने तस्मिन्नग्नौ मनो ज्योतिः त्रयस्त्रिंशदिति द्वाभ्यां द्वे चतुर्गृहीते
हुत्वा होमः कर्तव्यः । केचित्तूष्णीमग्निं प्रणीय मनो ज्योतिस्त्रयस्त्रिंशदिति हुत्वा तमग्निं प्रणयन्तीति ॥ इत्यनुद्धरणप्रायश्चित्तम् ॥ अथाजस्रपक्षेपा

८६ 86 दुष्करणेणाभावेप्रा०॥ असोदयात्पूर्वं विहरणक्रमेण प्रादुष्करणं कर्तव्यं॥ तदकरणे तु यजमानः काले प्रादुष्करणाभावजन्यदोषपरिहारार्थं प्रायश्चि
त्तं करिष्ये इति संकल्प्य गार्हपत्ये स्मार्त्तवदाज्यं संस्कृत्य आहवनीये स्रुवाहुतिं जुहुयात्॥ भूर्भुवः स्वः स्वाहेति॥ इत्यजस्रपक्षे प्रादुष्करणाभावप्राय
श्चित्तं॥ उद्धरणपक्षे जस्रपक्षे च पक्षहोमादौ कृते सति उदयास्तमयेपाः प्राक् प्रादुष्करणाभावे पि न प्रायश्चित्तं॥ अत्र तस्या होमार्थत्वादिति॥ अथा
ग्निहोत्रकालात्यये तदकरणे च प्रा०॥ तत्राश्वलायनः॥ प्रदोषांतो होमकालः॥१॥ संगवांतः प्रातः॥२॥ तमतिनीय चतुर्गृहीतमाज्यं जुहुयात्॥३॥
पदि सायं दोषावस्तर्नमः स्वाहेति यदि प्रातः प्रातर्वस्तर्नमः स्वाहेति॥४॥ अग्निहोत्रमुपसाद्य भूर्भुवः स्वरिति जपित्वा वरं दत्वा जुहुयात्॥५॥ इष्टिश्च
वारुणी॥६॥ हुत्वा प्रातर्वरदानं॥७॥ अनुगमयित्वा चाहवनीयं पुनः प्रणयेदिहैव क्षेम्य एधि मा प्रहासीरमुमामुष्यायणमिति॥८॥ ततइष्टि
र्मित्रः सूर्यः ९ अभियो महिना दिवं प्रसमित्रमचो अस्तुप्रयस्वानिति संस्थितायां पत्न्या सह वाग्यतो यावज्ज्वलतो हरनश्नन्नुपासीत॥१०॥ दूयो दुग्धे
न वा सेग्निहोत्रे जुहुयात् ११ अधिश्रितेन्यस्मिन् द्वितीयमवनयेत् १२ प्रातरिष्टिः १३ अग्निर्व्रतमृत् १४ त्वमग्ने व्रतमछुचिरग्ने देवाँ इहावह॥ उपय
ज्ञ ह विश्वनः॥ व्रतानि बिभ्रद्व्रतपा अदब्धो यजानो देवाँ अजरः सुवीरः॥ दधद्रत्नानि सुमृळीको अग्ने गोपाय नो जीवसे जातवेदः १५ इति पंचदश
सूत्राणि॥ तथा॥ अग्निहोत्राहोमे च १ प्रतिहोममेके॥२॥ इति द्वितीयाध्यायस्यं सूत्रद्वयं॥ प्रदोषो नाम रात्रेः पूर्वश्चतुर्थो भागः प्रसिद्ध प्रदोषस्या
तः प्रदोषांतो नोपस्य सः प्रदोषांतः॥ प्रदोषांतांत इत्यर्थः॥ सायंहोमस्य कालः॥ केषांचित्पंचमी षष्ठो नाडिके प्रदोषशब्देनोच्यते॥ तदंतो वा
सायंहोमकाल इति प्रथमसूत्रस्य वृत्तिः॥ यस्मिन्काले गावो वत्सैः सह आसते स संगवः कालस्तावत्पर्यंतं प्रातर्होमकालः॥ केचिदह्नस्तृतीयो भागः संग

बर्हत्याहुः । तदंतः संगवांतः ॥ दर्शनादिकारस्यार्थः । अस्तमित उदिते च विहितो होमो एतावतिकालेऽक्रियमाणेऽतीतकालो न भवतीति पुनः कालविधिरितिद्वि
तीयस्याशाकतास्मिन्काले केन मंत्रेणेत्यत आह इति चतुर्थस्य ॥ उपसादनवचनं क्रमार्थं ॥ उपसाद्य जपं च वरदानं च कृत्वा समिदाधानादि पूर्ववत् ॥ वर
दानं प्राजमानं ॥ वर शब्देन गोजातिरुच्यते । तं वरं दत्वा जुहुयादिति पूर्वकालतामात्रं विवक्षितं ॥ नाभ्यवधानं कर्त्रैकार्येति यं च मस्य ॥ कर्तुर्यत्नमित्यर्थः ॥
समाप्तेग्निहोत्रे होमे तेषु वाग्निषु यमिष्टिः कार्या ॥ उत्तरत्रानुगमनविधानादिति षष्ठस्य ॥ प्रातःकालातिपत्तौ विशेषो वक्ष्यते ॥ होमोत्तरकालं वरस्य
ते वरदानं कर्तव्यमिति सप्तमस्य ॥ समाप्तेग्निहोमे आहवनीयस्यानुगमनं कृत्वा पुनस्तस्मै वोध्धरेत् ॥ इहैव क्षेम्य एधी ति मंत्रेण माप्रहासीर्मे मामा
प्यापणशब्दस्य स्थाने गोत्रनाम ॥ प्रहासी देवदत्तं भारद्वाजमिति ॥ पित्र्यादौ त्रीवति भारद्वाजापनमितिविरेत ॥ दक्षिणाग्निश्चाग्निहोत्रिक एव ॥
आहवनीयस्यैवानुगमनविधानात् ॥ इदमनुगमनं कस्याहवनीयस्येति न विद्यः ॥ आग्निहोत्रिकस्येति चेत् ॥ समाप्तेग्निहोत्रे वरस्य लौकिकत्वादना
हवनीयत्वं ॥ होमे कृते असमाप्ते च प्रयोगे अनुगमनमिति चेत्तथा सति पुनः प्रणयनमदृष्टार्थं स्यात् ॥ अथायमभिप्रायः दृष्टार्थं विहितस्येति । तदा
पुनः प्रणयेत तदृष्टिरिति समन्वयो नोपपद्यते ॥ अत्रायमभिप्रायः ॥ समाप्तेग्निहोत्रे लौकिकस्य सतोऽनुगमनमेव कर्तव्यं ॥ नायतनाद्धृहिस्याग
इति । तदा हवनीयशब्दो नोपपद्यते ॥ अत एवं वदतः सूत्रकारस्यायमभिप्राय इति वर्णनीयं ॥ यस्य कस्यचित्कर्मणोऽर्थायविहितेष्वग्निषु यत्
किंचिदग्निसाध्यं नैमित्तिकमुत्पद्यते तस्य नैमित्तिकस्याहितस्य तत एवाग्नयो भवेयुः ॥ न पुनः पुनर्विहर्तव्या इति अष्टमस्य ॥ एते देवते इति नवम
स्य ॥ समाप्तापामिष्टौ पत्नीयजमानौ पतवा चोभूत्वा तानेवाग्नीन्ज्वलयंता वनश्चं तावहुः शेषमुपासीयातां ॥ उपासीत यन्त्वा सहे देवं कुर्वे वेत्र

८७ 87

ग्नीनां समीपम्भासीतेत्यर्थ इति दशमस्य ॥ वासो एत्त्रेः पूर्वश्चतुर्थभागः द्वयोर्गर्वा दुग्धेन पयसा यमग्निहोत्रं स्वकाले जुहुयादित्यर्थ इति एकादशस्य ॥ अ
यमत्र विशेषः ॥ एकस्या गोर्दुग्धं पयो धिश्रितं तस्मिन्नेव पयसि द्वितीयं गोर्दुग्धमानयेत् तेन पयसा होमः ततोऽस्या एव वर्ग इति द्वादशस्य ॥ ततः श्वो मन्ते पू
र्वाह्णे इष्टिः कार्या इयमपि प्रातः कालातिपत्तिनिमित्ते वक्ष्यतीति कालविधानात्प्रयोगभेदः ततो विहरणभेदोऽपयाम्योऽपि भवतीति त्रयोदशस्य
॥ व्रतमध्ये दृणकोऽग्निर्देवतेति चतुर्दशस्य ॥ एतत्प्रायश्चित्तं स्वकाल एव प्रणीतेष्वग्निषु होमकालातिपत्तौ भवति ॥ अप्रणीतेषु तु कालातिपत्तावस्तं
तायदि अनस्तं तस्याः प्रायश्चित्तं कृत्वा होमं कुर्यात् ॥ अनायदि मनस्वती होमेन अनुस्थतस्याः प्रायश्चित्तेन च सहितो होमः कार्यः ॥ विहृतेष्वेवाग्निषु अहुतेषु
होमान्तः कालप्राप्तौ उपक्रान्तमेव होमं कालातिपत्तिसहितं कृत्वा वर्तमानकालीनमनुस्थतस्याः प्रायश्चित्तसहितं कुर्यात् ॥ अविहृतेषु कालातरप्राप्तौ
मनस्वती होमं अतिपन्नस्य प्रतिहोमं च कृत्वा नुस्थतयाः प्रायश्चित्तादि पूर्ववत् ॥ एवमनेककालातिपत्तावपि द्रष्टव्यं विहृतेष्वविहृतेषु वा अनेककाला
तिपत्तौ मनस्वती होमं प्रतिहोमं चावश्यं कुर्यात् विहृतेष्वेवाग्निषु ॥ अविहृते त्वन्या मनस्वत्यादि कृत्वा प्राप्तकालस्य विहरणादि क्रियते ॥ एवमत्र वि
चार्य यथायुक्तं तत्कर्तव्यं ॥ विस्तारभयात्स्वमात्रमत्र लिखितमिति मन्तव्यं ॥ इति कालात्ययप्रकरणस्य सूत्राणां वृत्तिः ॥ अथ द्वितीयाध्यायस्य प्रथमसू
त्रयोः ॥ अग्निहोत्रहोमविच्छेदे चैतामाहुतिं जुहुयात् नामात्वात् ॥ विशेषाभावादेकस्य द्वयोर्बहूनामपि विच्छेदे एषैव प्रायश्चित्तिः कार्या इति प्रथम
सूत्रस्य ॥ च शब्दो त्राध्याहार्यः ॥ एतामाहुतिं हुत्वा प्रतिहोमं च कुर्यादित्यर्थः ॥ प्रतिहोमो नाम यावन्तः काला होमेन विच्छिन्नास्तावन्तो मे केकं काले
प्रत्येकेको होमः कार्य इतीति द्वितीयस्येति ॥ अथ प्रयोगः ॥ तत्रादौ सायमग्निहोत्रकालात्ययप्रयोगः ॥ स्वकाले विहृतेष्वग्निषु सायंपूर्वप्रहरा

त्यपेनवनाडिकानां वात्ययेसायमग्निहोत्रकालात्ययजन्यदोषपरिहाराय कृच्छ्रं चरिष्ये इति संकल्पयेत्॥ कर्त्ता गार्हपत्ये स्मार्त्तवदाज्यं संस्कृत्य स्रुचि च० हीत्वाहवनी
ये जुहोति॥ दोषावस्तर्नमः स्वाहा॥ अग्नय इदं०॥ ततः परिसमूहनापर्युपस्थानांतं कृत्वा भूर्भुवः स्वरिति जपेत्॥ यजमानस्तस्मै गां वा दद्यात्॥ स्वयं कर्त्ते
के प्यस्मै॥ ततः कर्त्ता समिदाधानादि सर्वं समापयेत्॥ ततस्तेष्वग्निषु तदानीमेव वाऽऽप्रोषितं कुर्यात्॥ पूर्णाहुतिं वा॥ इष्टिपक्षे सायंहोमकालात्यया
पार्थं ब्राह्मणेन हविषा पक्षपता इत्यादि॥ ब्राह्मणश्चरुः॥ प्रधानमुपांशु॥ इमं मे वरुण तत्त्वा यामीति याज्यानुवाक्ये॥ ब्राह्मणस्याहं प्रप्रजया चेत्यनु
मन्त्रणं॥ हिरण्यं दक्षिणा॥ पार्वणहोमश्चतुर्थीकरणपूर्वकं मे वज्जन्सर्वं पौर्णमासवत्॥ पूर्णाहुतिपक्षे वरुणाय स्वाहा॥ वरुणायेदं०॥ अथ प्रा
तरग्निहोत्रकालात्ययप्रा०॥ प्रातः स्वकाले विहृतेष्वग्निषु प्रातः पूर्वप्रहरात्यये दशनाडिकानां वात्यये प्रातरग्निहोत्रकालात्ययजन्यदो० कृच्छ्रं चरिष्ये इति
संकल्प्य कर्त्ता गार्हपत्ये स्मार्त्तवदाज्यं संस्कृत्य स्रुचि च० त्वाहवनीये जुहोति॥ प्रातर्वस्तर्नमः स्वाहा॥ अग्नय इदं॥ ततः कर्त्ता परिसमूहनादि उपस्थानांतं
कृत्वा भूर्भुवः स्वरिति जपित्वा समिदाधानादि तच्छेषं कुर्यात्॥ यजमानस्तस्मै गां वा दद्यात्॥ कर्त्ता होमशेषं समाप्य तमाहवनीयमनुगमयेत्॥ ततः
कर्त्ता आयतनशुद्धिं कृत्वा गार्हपत्यात्पुनराहवनीयमुद्धरेत्॥ इहैव क्षेम्य एधि० प्रणो॥ अमुष्मिन्नस्य स्थाने द्वितीयांते यजमाननाम निर्दिशेत्॥ आमु
ष्यायणशब्दस्थाने गोत्रनाम॥ प्रहासीर्द्देवदत्तं मा रुद्राज्जयमिति॥ पित्रा दो जीवति मारुद्राज्जायनमिति वदेत्॥ दक्षिणाग्निस्त्वाग्निहोत्रिक एव॥ ततो
मित्रसूर्यदेवताकां द्विहविष्कामिष्टिं कुर्यात्॥ पूर्णाहुतीर्वा॥ इष्टिपक्षे प्रातरग्निहोत्रकालात्ययजन्यदो० द्विहविष्कं पक्षापक्षइत्यादि॥ मैत्रश्चरुः
॥ सौर्य एककपालः॥ प्रधानमुपांशु॥ अभियो महिनादिवं प्रप्रमित्र मर्त्तो अस्त्विति मित्रस्य याज्यानुवाक्ये॥ मित्रस्याहं प्रप्रजयेत्यनुमन्त्रणं॥ अनंतरस्य

८८
88

पूर्वेणेति परिभाषयातांणि विश्वदर्शतश्चित्रं देवानामिति सूर्यस्योपाज्यावाको। सूर्यस्याहं संदर्शीको भूयासमित्यनुमंत्रयेत्॥ हिरण्यं दक्षिणा॥ पार्वणहोमच
तुर्धाकारेण पुनरालंभवर्जं सर्वं पौर्णमासवत्॥ पूर्णाहुति पक्षे मित्राय स्वाहा॥ मित्रायेदं०॥ सूर्याय स्वाहा॥ सूर्यायेदं॥ ततः पत्नीयजमानावनश्नंतो वा
ग्यतौ तानेवाग्नीन् वा समीपमग्निसमीपमासातां॥ असमिते तेष्वेवाग्निषु दुग्धपात्रे वा दुग्धे न होमः॥ तत्र चैकवासापमग्निसमीपमासातां॥ असमिते तेष्वेवा
स्यादुग्धमधिश्रित्यतस्मिन्द्वितीयधेन्वाः पयआनयति॥ तेन पयसाग्निहोत्रं कृत्वा दक्षिणाग्न्याहवनीयोपरि सिंचेत्॥ ततः श्वोभूते प्रातरग्निहोत्रं नित्यवद्धु
त्वा दक्षिणाग्न्याहवनीयोपरि त्यज्य पुनराग्निद्वयं प्रणीय व्रतमदिति पूर्णाहुतिं वा कुर्यात्॥ इष्टिपक्षे व्रतमदिष्यापस्यदृत्यादि॥ अग्निर्व्रतमत्॥ अ
ष्टाकपालः॥ प्रधानमपाठः॥ त्वमग्ने व्रतमद्धांचिव्रतानि विश्वादितियाज्यानुवाक्ये॥ अग्नेव्रतमतोह मन्त्रादः॥ हिरण्यं दक्षिणा॥ पार्वणचतुर्धा
कारेण पुनरालंभवर्जं सर्वं पौर्णमासवत्॥ पूर्णाहुतिपक्षे॥ अग्नये व्रतमते स्वाहा॥ अग्नये व्रतमत इदं०॥ इति प्रातरग्निहोत्रकालात्ययप्रा०॥ इति सर्व
कालएव विहृतेष्वग्निषु होमकालातिपत्तिप्रा०॥ अथाविहृतेषु तत्र होमकालातिपत्तावसंतापादि अनुष्ठतप्रायश्चित्तं कृत्वा होमं कुर्यात्॥ नकालाति
पत्तिप्रायश्चित्तं॥ अनापद्यविहृतेषु होमकालातिपत्तौ त्वाहवनीयं प्रणीय गार्हपत्य आज्यं संस्कृत्य चतुर्गृहीतेन आ० हवनीये जुहोति॥ मनो ज्योतिर्जुष
तामाज्यं मेविच्छि०धातु॥ पादृष्टाउषसोपा अनिष्टास्ताः सं० तेन स्वाहा॥ मनसे ज्योतिष इदं०॥ तमाहवनीयं परित्यज्यानुद्धरणप्रायश्चित्तसहितो हो
मः कार्यः॥ नकालातिपत्तिप्रायश्चित्तं॥ इत्यविहृतेषु कालात्ययप्रा०॥ अथ विहृतेष्वग्निष्वहुतेषु होमांतरकालप्राप्तौ प्रा०॥ तत्र सायं समयेष्वहुते
षु प्रातःकाले प्राप्ते होमकालातिपत्तिसहितमुपक्रांतं सायंहोमं समाप्य वर्तमानकालिकमनुद्धरणप्रायश्चित्तसहितं प्रातर्होमं कुर्यात्॥ प्रातर्वि

हुतेषु हुतेषु वा सायंकालप्राप्तौ होमकालातिपाति प्रायश्चित्तसहितं तदुपक्रान्तं प्रातर्होमं समाप्यत त्रैवानुगमनपूर्वकं पुनःप्रणीताहवनीये पूर्वप्रणीतद
क्षिणाग्नौ च द्वयो इंधनेन सायंहोमं कुर्यादिति ॥ न तु तदर्थमनुद्धरणप्रायश्चित्तमुद्धरणं वा ॥ इति विहृतेष्वग्निषु हुतेषु होमांतरकालप्राप्तौ प्रा० ॥ अथावि हृ
तेष्वग्निषु होमांतरकालप्राप्तौ प्रा० ॥ तत्र सायंहोमस्य प्रातःकालपर्यंतमुत्कर्षे मनस्वतीं हुत्वा पक्षे अतिपन्नहोमं च कृत्वा अनुद्धरणप्रायश्चित्तसहितः
कालप्राप्तः प्रातर्होमः ॥ प्रातर्होमस्य सायंकालपर्यंतमुत्कर्षे मनस्वतीं हुत्वा पक्षे अतिपन्नहोमं च कृत्वा अनुद्धरणप्रायश्चित्तसहितः कालप्राप्तः सायं
होमः ॥ ~~हुत्वा पक्षे~~ अति इत्यविहृतेष्वग्निषु कालातिपत्तौ प्रा० ॥ अथ विहृतेष्वग्निष्वनेककालातिपत्तौ प्रा० ॥ तत्र सायं विहृतेष्वग्निषु अहुतेषु द्वि
तीयसायंकालपर्यंतमुत्कर्षे तेष्वेवाग्निषु मनस्वतीं हुत्वा पक्षे अतिपन्नहोमौ च कृत्वा अनुद्धरणप्रायश्चित्तसहितः कालप्राप्तः सायंहोमः ॥ प्रात
र्विहृतेष्वग्निषु हुतेषु द्वितीयप्रातःकालपर्यंतमुत्कर्षे तेष्वेवाग्निषु मनस्वतीं हुत्वा पक्षे अतिपन्नहोमौ च कृत्वा अनुद्धरणप्रायश्चित्तसहितः का
लप्राप्तः प्रातर्होमः ॥ इति विहृतेष्वग्निष्वनेकहोमकालातिपत्तौ प्रा० ॥ अथाविहृतेष्वग्निष्वनेकहोमकालातिपत्तौ प्रा० ॥ तत्र सायमविहृतेष्वग्निषु द्विती
यसायंकालपर्यंतमुत्कर्षे अग्नीन्विहृत्य मनस्वतीं हुत्वा पक्षे अतिपन्नहोमौ च कृत्वा अनुद्धरणप्रायश्चित्तसहितः कालप्राप्तो विहरणप्रभृति सायं
होमः ॥ प्रातरविहृतेष्वग्निषु द्वितीयप्रातःकालपर्यंतमुत्कर्षे अग्नीन्विहृत्य मनस्वतीं हुत्वा पक्षे अतिपन्नहोमौ च कृत्वा अनुद्धरणप्रायश्चित्तस
हितः कालप्राप्तः प्रातर्होमः ॥ इत्यविहृतेष्वग्निषु अनेककालात्यये प्रा० ॥ एवं विहृतेष्वविहृतेषु वा सायंहोमस्य द्वितीयप्रातःकालपर्यंतमुत्कर्षे प्रात
र्होमस्य द्वितीयसायंकालपर्यंतमुत्कर्षे प्यूह्यं ॥ अथातिक्रान्ताग्निहोत्रस्य अस्याग्निहोत्रीयोद्धरणकालात्पूर्वं करणासंभवे प्रायश्चित्तप्रयोगः ॥ अतिक्रान्ता

८८ ग्निहोत्रस्य अन्याग्निहोत्रीयोत्थरणकालात्पूर्वं करणासंभवे आहवनीयंप्रणीयमनस्वतीं हुत्वाकालमप्राप्तस्य विहरणाग्निं कुर्यात्॥ एवं द्वयोर्बहूनां विच्छेदे पित्ते
89 यं॥ आधानानंतरं ज्वरस्यादिनिमित्तेन मध्यकाले अनारंभे मनस्वतीं हुत्वा मुख्यकालात् एवारंभः॥ अथाज्वरपक्षे कालात्यये तु चतुर्गृहीतेन मनस्व
तीं जुहुयात् सोमयुक्तिं चिदिति भाति॥ नात्राहवनीयानुगमः इति। कालात्ययविषयेव प्रमाणो बौधायनीयः प्रयोगो वा ज्ञेयः॥ कालात्ययप्रायश्चित्तार्थं मनुकल्प्यते
न मनस्वती होमः अनुद्धरणप्रायश्चित्तार्थं मनुकल्प्यते न मनोज्योतिस्त्वय्यस्मिन् शरदिति एताभ्यां द्वे स्रुवाहुती चतुर्धारणात् पूर्वं होमारंभात् पूर्वं हविरासादनोत्तरं हो
मात्पूर्वं वा तत्रैणापि कुर्वंतीति केचित्॥ अथ प्रसंगादग्निहोत्रसमासप्रकारः॥ तत्र बौधायनः॥ अथापद्यग्निहोत्राणां समासस्तद्यथा एतद्विश्वमो आधयो व्यग
मनगृहकुलग्रामदेशकालद्रव्याणुपपत्तिरन्यैश्वापो गोपासु विघ्नतद्दृतितत्स्यकः कर्मण उपक्रमो भवतीति कामं पूर्वाह्णे परह्णे वाग्निहोत्रवेलायां वायथास्त
त्रं वा कुर्यान्मासि स्थे वा यजमानस्याप्रवसतः प्रसूतः प्रतिपद्दीक्षु चतुर्दश चतुर्गृहीतानि गृह्णाति सोपवसथपर्वणे येतस्मिन्नं चदशप्रासि स्थसर्वे समित्स्यम
ति कर्ममंत्राश्चैकवत्संस्थाप्यसायमग्निहोत्राणां हुत्वा प्रातरग्निहोत्राणां जुहुयात् सायमुपक्रमः प्रातरपवर्गः कालेपार्वणे नयजेत नोर्ध्वं याश्चिकास्त
मासोनमसंगेनाश्वद्धानेन वा श्रद्धा परमा पापमापापाश्च श्राजनमुच्यते॥ अज्ञानाल्लुप्यते धर्मो लुप्तधर्मो धर्मः स्मृतः॥ श्रद्धया शुध्यते बुद्धिः श्रद्धया श्रु
ध्यते मतिः॥ श्रद्धया पापापत्यते ब्रह्म श्रद्धा पापविमोचनी॥ तस्माच्छ्रद्धानेन प्रसंगेन कालं तंतु मन्यायज्ञते लोकिकर्मयोगए वु मह्ततए वंविध्ययएधे चाप्यु
दाहरंति न वथाग्नीनुहास्य पैनैवानापत्सु वीरहा वा एष देवानां यो ग्निमुद्वासयते इति तस्माच्छ्रद्धानस्याप्रसंगिकस्य चपेषे विशेषात् ल घवोय त्रुप न्नोपल
क्षितः॥ तेः कर्मसमुल्लेख पोन्न्यापोपेत पथार्थवेत्॥ स्वशास्त्रविषयमानेयः परशास्त्रेण वर्तते मृणहत्या समंतस्य स्वशास्त्रमवमन्यतः॥ आर्षपत्स्य

शाल्वस्य प्रदेशास्तद्गुणैः समाः॥ कर्मणां प्रविवाएर्थमापस्तम्बसमामुपादिति॥ अत्र प्रदीपकारः॥ एषु विप्रमेव्याधिपीडायां मध्वगमनप्रसंगेगृहकुलवासा
पेक्षायां मातृपितृकलत्रपुत्राद्यपेक्षत्वतानिएधादौ देशकालद्रव्यानुपपत्तौ वात्संतापस्तु अग्निहोत्राणां समासः॥ अतिपातनिमित्तेषु परार्करावासापमग्नि
होत्रहोमानां समस्यकृत्वात दानीमेव सर्वे शनेन वा निमीलनेन वा उपसमाधानेन वाप्यवधानं कृत्वा पुनर्विहृत्य प्रातरग्निहोत्रहोमानां समस्यन्नुहुयात्। अन
तिपातनिमित्तेषु मावास्येनेष्ट्वा प्रतिपदिसायंप्रातश्चतुर्गृहीतान्युपर्युपरिगृह्णाति चतुर्दशवा द्वितीयायां प्रातश्चातिथिवृद्धिक्रमवशात्॥ तत्प्र
योगः॥ अग्निहोत्रहोमानां समस्यहोष्यामीति संकल्प्य॥ विहरणादि कृत्वा पश्चात्तिथिसंख्यया वा अवशिष्टतिथिसंख्यया वा चतुर्गृहीतानि गृह्णाति स्रुचि
पूर्णायामन्यस्मिन्पात्रे गृह्णीयात्॥ एकासामित्यग्न्याहुतिरेका द्वितीयाहुतिश्च॥ तत्र दुपस्थानेन स रूपाणि मार्जनेन च एवमेवैकैकपक्षावधिसमासः॥ प
क्षातीतं न संक्रमयितव्यं॥ अमावास्यायातिथेर्वोक्तहरणपक्षे समासः॥ प्रतिपन्मात्तः पर्यंतं शुक्लपक्षे समासः॥ निमित्तसंशयात्समासे कृतेपि निमित्ता
भावे सति समासस्याकृतसमत्वेन पुनरपि काले काले होमः कार्यः॥ आपस्तम्बेपि पूर्वे पार्वणे ष्टोनैप्रतिकर्षः॥ पक्षमध्येपि निमित्तसंभवे शेषहोमान्स
मस्येत्। आलस्येन लोभेन अश्रद्धया वा पक्षहोमान्न समस्येत्॥ अनापदि पक्षहोमकरणे तं तु मतीषिः प्रायश्चित्तं॥ पक्षादौ पक्षमध्ये वास्त्रोमध्ये
दिनेपि वा॥ निमित्तसंभवे होमान्समस्येत्सहसैव तु॥ अनापद्यग्नीं त्सर्वथा नोत्सृजेत्॥ आपत्स्वग्नीनुत्सृजेन्नु स्वर्गेच्छ्या इष्ट्वा उत्सृजेत्। आपदि नि
वृत्तायां पुनराधाने कृत्वा तं तु मत्यापजेदिति॥ अत्र त्रिकांडमंडनकारः॥ एकपक्षगतो पाक्ष्वसोमसंयोतिपद्यते। पक्षहोमविधानातं हुत्वा तं तु मतींप
जेत्। स्वकालोत्कर्षतः कश्चिद्गौणकालो निरूपितः। अयकर्षोर्थान्योपि गौणकालो निरूप्यते॥ आमयाव्यतिमानापन्नो वाध्वगतोपि वा॥ एषु स्म

९०
90

शेधनाभावे गृहे गेहे वसन्नपि॥ अन्येष्वेवं प्रकारेषु निमित्तेष्वागतेषु च॥ समासप्रयोगे होत्राणां यथासंभवमाचरेत्॥ निमित्तानामिहैतेषां निर्देशैकं प्रदर्श्यते॥
तत्सर्वेषु निमित्तेषु ज्ञानीयात्स्मृतिपारितं॥ पक्षहोमानशेषान्वा शेषहोमानथापि वा॥ समस्य जुहुयात्तत्र प्रयोगोपि निरूप्यते॥ प्रतिपत्प्रभृत्यपेक्षायामाप
द्यमत्र वा दिने॥ पार्वणस्योपवसथ्याहात्प्राग्विनाशो भवति हि॥ तावंति परिगृह्णीयात्पात्राणि तु हुत्वापनानि च॥ पात्रीनस्य हायापानि त्यापांप्राकृतस्थानि। स्थू
लेष्वागतेष्वपि कृत्वा तत्र समस्यपेत्॥ एकाहमित्सकृद्धोमः सकृदेव निमार्जने॥ उपस्थाने समस्तेल्का पर्येशेषा प्रकृतिरिष्यते॥ एवमेवोत्तरत्रापि प्रातर्हो
मात्समस्य तु॥ जुहोत्योपवसथ्याहात् प्रातर्होमान्वधीन् समस्तत्॥ समारोपविधानेन समारोपपतेन नान्॥ पेयापीते पवाचाद्योनधारयेत्स्वेन पूर्ववत्॥
एवं प्रतिपदेस्य त्रपत्रापदुपजायते॥ तथैवोपवसथ्यात्प्राक् पत्रह्यापदिनश्यति। ततो पायाच्च तुर्थ्यां वा पञ्चम्यां वापरत्र वा। तदादीनां तदन्तानां होमानां
स्यात्समस्यता॥ आपदेवाविधिर्होमसमासस्याभ्युपेयते॥ तस्मात्कदाचिदप्यपावृतस्तावतोपि वा॥ आपत्काल समाने होमानसमस्ये दे कृप क्षणान्॥
अत एव हि दृष्टत्रापद्विरत्रायाधिकापवा॥ समस्य जुहुयात्सोमानित्येवं पक्षतेकठैः॥ प्रवासिनोग्निहोत्रस्य पंचाहस्य प्रवापनः॥ सायं प्रातः पृथग्घोमरेकं
स्मिन्नहमीति च॥ एवमेकत्र पक्षे पे होमात्स्रेषामशेषतः॥ न्यूनानां वा समासस्यान्नपक्षान्तरवर्तिभिः॥ पूर्वेद्योपवसथ्याहे सायंहोमः पृथग्भवेत्॥ तथै
वपजनीयाह्ने प्रातर्होमे भवेत्पृथक्॥ पर्वोयवासभून्यचे स्याप्रंकेनापि हेतुना॥ तदान्त सायं होमोपि पूर्वैः सह समस्यते॥ तावन्मानापगच्छेच्चेदापत्स्
स्यांतरेपि च॥ पुनस्तत्रापि कर्तव्यः समासः प्रयोगवर्ति॥ ननु पक्षांतरेस्यानां समासश्चोयतेमिथः॥ एवमापद्गते पक्षे पक्षे नैवं समाचरेत्॥ ततोपि
नेतरे पक्षे समासन्नसमाचरेत्॥ तावतानापगच्छेच्चेदापत्पक्षेतनीयके॥ कृच्छ्रेणापि विनिर्वर्त्यं तत्र होमं दिने दिने॥ पक्षांतरे पुनः कामं पक्षहोमादि

माचरेत्॥कठैः पक्षद्वये त्वेवं पक्षहोमे नियम्यते॥आपच्चेदनुवर्तेत दीर्घकालं कदाचन॥यावज्जीवमविच्छिन्नान् पक्षहोमान् समाचरेत्॥आपदेवावधिस्तत्र
न पक्षगणनावधिः॥अथापरः समासस्य प्रकारः प्रतिपाद्यते॥सायंप्रातस्तनौ होमावुभौ सायं समस्यतु॥आपन्नो जुहुयात्तत्र समिदेका यवाद्दयं॥साय हो
मस्य मुख्यत्वात्तदीयं तंत्रमिष्यते॥चातस्र आहुतीः कुर्यात्तत्र द्वे सायमाहुती॥द्वे प्रातर आहुती सायं होमे चैका समिद्यदि॥एवमिकृता द्वितीया चेत्सा भवेत्प्रात
राहुतौ॥द्विः सायं होमवन्मन्त्राद्विः प्रातर्होमवत्तूष्णीं॥भक्षमंत्रे भवेदूह आग्नेयं सौर्यमित्यपि॥उपस्थाने सकृत्कार्ये शेषं प्रकृतिवन्मतं॥केचिद्द्वे आ
हुती हुत्वा संविशेयुर्निमील्य वा॥विच्छिद्यैतावता होमौ कुर्याद्द्वे आहुती ततः॥कल्पभाष्ये पुनश्चान्यदापत्कल्पान्तरे स्मितं॥पक्षहोमादिकाः पूर्वमापत्कल्पा निरू
पिताः॥सायंप्रातः कालभेदं संपाद्याः सर्व एव ते॥आपद्युत्थमालोच्य कदाचित्सायमेव ते॥उभयेपि समस्येते सायंप्रातस्तना अपि॥इत्थं समस्तहोमानां
समासान्तरमापदि॥सायंतनात्समासात्तौ सर्वो प्रातस्तनानपि॥होमांस्तानुपर्यन्सायं समस्येदुत्क्रमागतः॥पक्षहोमेपि तत्रैक्रमुदाहृत्योच्यते मना
क्॥न गुरुत्वपूर्नान्यस्मिन्नष्टाविंशतिहूत्नपेत्॥चतुर्थीकृत्वा जुहुयात्स्वल्पं चाशतमाहुतीः॥पक्षेपास्तत्र चत्वारः प्रतिपक्षेयमाहुतीः॥तंत्रेण जुहुया
द्विद्वान् चतुर्दश चतुर्दश॥पक्षहोमसमंशेषं सायंप्रातः समाचरेत्॥एवंविधे त्रहोमादावप्यूह्य मितदमीदृशं॥कठा अप्येवमेवार्थं मंगीकुर्वन्ति केचन॥दी
र्घकालापदं सम्यक्त्वा पक्षहोमे हुते सति॥तत्रान्तराले पद्यापत्कदाचिदपगच्छति॥कालेकाले पुनर्होमान् जुहुयात्यागधुतानपि॥कठेष्वेवं विदुः केचित्त्रे
छन्त्यत्र पुनर्हुतिं॥यावन्तोत्र समासास्ते सर्वे सायमुपक्रमाः॥प्रातः कालापवर्गाश्च नत्वं प्रातरुपक्रमाः॥प्रातर्होमादिका पद्मसमासा इति भाषितमि
ति॥ ॥अथ पिण्डपितृयज्ञकालवैगुण्यप्रायश्चित्तं॥तत्र बौधायनः॥पिण्डपितृयज्ञलोपे सप्तहोतारमिति॥अत्र प्रयोगः॥रजस्वलादिनिमित्तेन प्रथमद

९१ शेऽनारम्भे पितृयज्ञस्यागौणकालाभावात् ॥ सपूर्णहोतारं हुत्वा कालान्तरे दर्शएवारंभः ॥ द्वितीयादिप्रयोगे तु अग्निमद्दर्शे सपूर्णहोतस्य प्रायश्चित्तमेवन कर्मेति ॥ ए
91 वमनेकपितृयज्ञलोपे सति तत्संख्यया सपूर्णहोतारं जुहुयात्सर्वार्थं सकृद्वेति ॥ अथ दर्शपूर्णमासादीनां कालातिक्रमे प्रायश्चित्तानि ॥ तत्रादावाधानानन्
तरं स्वस्वकाले दर्शपूर्णमासादीनामकरणे प्रा॰ तत्रापादौ दर्शपूर्णमासयोः प्रा॰ ॥ तत्राश्वलायनः ॥ यद्यमावास्यां पौर्णमासीं वातीयात् ॥ १ ॥ इष्टिः ॥ २
अग्निः पथिकृत ॥ ३ ॥ त्वत्याह्निवेधो अध्वन आदेवानाम पियं थामगन्मेत्यन्नद्वं दक्षिणेति समन्त्रकं नुपर्यं ॥ यद्यमावास्यां पौर्णमासीं वा स्वकालेऽकृ
त्वा ऽतीयादिति प्रथमसूत्रस्य वृत्तिः ॥ शेषत्रयसूत्रस्य पूर्वोक्तार्थः ॥ अत्र देवत्रातभाष्यकारः ॥ यदि यजमानः अमावास्यां पौर्णमासीं वा अस्यत्तएति
क्रमेएतदुक्तं ॥ उभयातिक्रमेप्येतदेव ॥ मनिष्ठ अतीयादिति गच्छेत् ॥ यजमानः ततः पाथिकृतीमिष्टिं वक्ष्यति तामस्मिन्निमित्ते कुर्यात् ॥ अन्यतरातिक्रमे
एतदुक्तं ॥ उभयाक्रमेप्येतदेव ॥ वाशब्दः समुच्चयार्थोपि भवति ॥ अमावास्यां पौर्णमासीं चेति ॥ दर्शपूर्णमासावेकमेकं कर्म ॥ द्वयोर्द्वयोरपि कर्मणोरतिक्र
मे चैतदेवमवृत्तिरिति ॥ तत्र पाथिकृतीं कृत्वा पातिपन्नां यजेत ॥ पाथिकृतीमेवकुर्यान्नातिपन्नां यजेतेत्यपरे ॥ अत्रैतरेयब्राह्मणं ॥ तदाहुर्यआहिताग्नि
रमावास्यां पौर्णमासीं वातीयात्का तत्र प्रायश्चित्तिरिति सोग्नये पथिकृते ष्टाकपालं पुरोडाशं निर्वपेत सयाज्यानुवाक्ये त्वाह्निवेधो अध्वन आदेवाना
मपि पंथामगन्मेत्याहुतिं वाहवनीये जुहुयादग्नये पथिकृते स्वाहेति सा तत्र प्रायश्चित्तिरिति ॥ अत्र तन्त्राप्यं ॥ आहिताग्निरमावास्येष्टिं पौर्णमासेष्टिं वा
यदि कदाचिदतिक्रामेत्तदा पथिकृद्गुणकोग्निःपुरोडाशदेवतेति ॥ आधानोत्तरं दर्शपूर्णमासारंभात्पूर्वं तदकरणे प्रायश्चित्तं वैकल्पिकं ॥ तथा च बौधाय
नेद्वैधसूत्रे ॥ अनारब्धदर्शपूर्णमासस्य प्रायश्चित्तकरणे कुर्यादिति बौधायनः ॥ न कुर्यादिति शालिकिरिति ॥ अथ प्रयोगः ॥ आधानानन्तरप्राप्तपौर्णे

मास्यां दर्शपूर्णमासयोः प्रथमारंभो दैवान्मानुषाद्वा यदा धान्यादिनं भवति तदा गौणकालेन कर्त्तव्यः॥ किंतु प्रतिबंधकनिवृत्तौ आगामिपौर्णमास्यामेवारंभः॥ प्र-
थमदर्शस्य तु पौर्णमासेनैवारब्धत्वात्तन्मुख्यकालातिपत्तौ गौणकालेप्यतिपत्तिप्रायश्चित्तं कृत्वा तदनुष्ठानं भवत्येव॥ आरंभपर्यंतं अंतरितानां दर्शपूर्णमा-
सानां बौधायनमतात्प्रायश्चित्तं वैकल्पिकं॥ कारणपक्षे तन्निरूढमते न रूढस्यानधिकारात्पि कृत्वाः पूर्णाहुतिरेव॥ आरंभोत्तरं मुख्यकाले दर्शपूर्णमासाक-
रणे गौणकाले पाथिकृतीं कृत्वा यागः कर्तव्यः॥ स यथा पौर्णमासकालातिपत्तिदोषपरिहारार्थं पाथिकृतेन हविषा स्वर्गकामः पौर्णमासेन हविषा च तंत्रे-
णायक्ष्ये॥ दर्शे तु दर्शकालातिपत्तिदोषपरिहारार्थं पाथिकृतेन हविषा स्वर्गकाम आमावास्येन हविषा च तंत्रेणायक्ष्य इति विशेषः निर्वापादिषु प्रथममग्निः
पथिकृत्॥ ततोन्यादयः॥ प्रकृतेर्मुख्यत्वात्पार्वणहोमादिसर्वं भवत्येव॥ उभयोर्दक्षिणासमुच्चयः॥ गौणकालातीतयागानंतरं प्रागामियागारंभात्पू-
र्वं तस्यातिक्रमे तु प्रदीपकारः॥ एकैकस्मिन्पर्वण्यतिक्रांते प्राप्तकालस्य दर्शस्य पूर्णमासस्य वा य आग्नेयोष्टाकपालस्तमेवाग्निं पथिकृतं कृत्वा यजेत
॥ पथिकृद्गुणविशिष्टमित्यर्थः॥ स यथा पौर्णमासलोपजनितप्रत्यवायपरिहारार्थं अग्नेः पथिकृद्गुणविशिष्टरूपं प्रायश्चित्तं कुर्वन्नामावास्येन हवि-
षा यक्ष्ये॥ दर्शे तु दर्शलोपजनितप्र० कुर्वन्पौर्णमासेन हविषा यक्ष्य इति संकल्पे विशेषः॥ निर्वापादिषु अग्निं पथिकृतं निगदेत्॥ पथिकृद्याज्यानुवाक्ये भ-
वतः॥ नातिपन्नयागः अथवा आज्यभागानंतरं अग्नये पथिकृते स्वाहेति पूर्णाहुतिं जुहुयादिति अनेकनिमित्तसंपाते तु सकृदेव पाथिकृती कार्या॥ दर्श-
पूर्णमासातिदिष्टेषु आग्रयणपशुचातुर्मास्येष्वप्येवमेवेति॥ अथातिपन्नेष्टिकालविशेषः॥ तत्र प्रागपरे जाते आश्वलायनः॥ नातीतेष्टिश्चतुर्दश्यां
चतुर्थ्यां मध्यपंचके॥ नवम्यां च द्वितीयायां कार्या आहुतपरतपरा इति॥ आहुतपःस्यानीयाकाहुतपदृत्यर्थः॥ अस्यार्थे दिवाकरः॥ मध्यपंचके मध्यप

९२ र्वमध्ये अष्टम्यां तेत्यर्थः ॥ पंचके पंचमदिवसे पंचम्यामित्यर्थ इति ॥ अत्र हिरण्यकेशिसंस्कारमालायां गोपीनाथः ॥ मध्यपंचके मध्ये पक्षमध्ये अष्टम्या
मित्यर्थः ॥ पंचके पंचमदिवसे पंचम्यामित्यर्थः ॥ नच मध्यं च तत् पंचकं चेति षष्ठ्यादिदशम्यंतानां निषेध इति वाच्यं तथा सति नवम्युपादानवैयर्थ्यापत्ते
रिति केचित् ॥ नवम्युपादानस्य दोषातिशयप्रतिपादनार्थत्वेन सार्थकत्वसंभवात् ॥ षष्ठीसप्तम्यष्टमीदशम्यस्तमनिथिष्वपि असंभवे क्रियापात्रदोषः
॥ नवम्यां तु सर्वथैव न क्रियेत इत्यन्ये इति ॥ अथ दर्शपूर्णमासयोः कर्माण्यतीतं कालातिपत्तौ प्रा० ॥ तत्रैकैकशवीशतद्व्यीकारः ॥ दर्शपूर्णमासयोः प्रक्रांत
योर्दैवान्मानुषाद्वा विरोधात्स्वकाले कर्तुमशक्तयोः शांते विरोधे अनंतरातीतस्य आग्नेयस्य स्थाने अग्नये पथिकृते जुष्टं निर्वपामीति पथिकृतं निरूप्य य
थाप्रकृति शिष्टानां निर्वपेत् ॥ निर्वापादूर्ध्वं परिविरोधात्कालातिपत्तौ तदा स्विष्टकृतो याज्यानुवाक्ये पथिकृतो वा कुर्यादिति ॥ अथाग्निहोत्रादिसोमां
तानां कर्मणां कालातिक्रमे बौधायनीयचंद्रिकानुसारी प्रायश्चित्तप्रयोगः ॥ तत्राग्निहोत्रादीनां मुख्यः कालः सूत्रभाष्यादिषु द्रष्टव्यः । गौणस्तु ॥ आप्रा
तराहुतिकालात्सर्वोपि रात्रिर्गौणः कालः ॥ आसायंहोमकालात् सर्वोपि दिवसो गौणः कालः ॥ आपदि गौणकाले कुर्वन् प्रायश्चित्तं न कुर्यात् ॥ अना
पदि तु गौणकाले कुर्वन् प्रायश्चित्तं कुर्यात् ॥ एवं सर्वत्र ॥ तत्र सायंगौणातिक्रमे सायंदोषावस्तोर्नमः स्वाहेति वा मनसा ध्यात्वा वा चतुर्गृहीतं सायंहोमकाले हु
त्वा सायंहोमं कुर्यात् ॥ प्रातर्गौणातिक्रमे प्रातर्दोषावस्तोर्नमः स्वाहेति वा मनसा ध्यात्वा वा चतुर्गृहीतं प्रातर्होमकाले हुत्वा प्रातर्होमं कुर्यात् ॥ एकाहादिष
ण्मासावधि होमातिपत्तौ वह्निषु दीप्यमानेषु सत्सु तंतुमतीष्टिः ॥ अस्याः प्रयोगः पूर्वमरणीनाशावसरे उक्तः ॥ अत्र अग्निहोत्रकालापत्तिजन्यदो
षपरिहारार्थं तंतुमत्येष्ट्या यक्ष्य इति संकल्पे विशेषः ॥ बौधायनरीत्या शेषं पूर्ववत् ॥ ततोतीतानां होमानां पुनरावृत्तिः ॥ प्राप्तम् अग्निहोत्रं च कर्त्त

यं ॥ दर्शपूर्णमासयोरन्यतरकालापत्तेरन्यतरस्य गौणः कालः ॥ आव्रीह्याग्रयणात् श्यामाकाग्रयणस्य गौणः कालः ॥ आ यवाग्रयणाद्व्रीह्याग्रयणस्य गौण
:कालः ॥ आश्यामाकाग्रयणाद्यवाग्रयणस्य गौणः कालः ॥ वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाणां क्रमेणैकैकस्य कालागमनपर्यन्तमेकैक
स्य गौणः कालः ॥ उत्तरायणदक्षिणायनपशोर्माघश्रावणयोः पूर्णमासीमुख्यः कालः ॥ अथवा तयोरेवामावास्ये मुख्यः कालः ॥ पर्यायागमनपर्यन्तः
कालो गौणः ॥ एतेषां चातुर्मास्यभिन्नानां गौणकालातिक्रमे पाथिकृती इष्टिः ॥ तस्याः प्रयोगः ॥ अमुककर्मकालातिपत्तिजन्यदोषप०र्थं पथिकृदिष्ट्या
यक्ष्य इत्यादि ॥ अग्निः पथिकृद्देवता ॥ अस्यामिष्टौ बौधायनोक्तत्वात्प्रधानमुच्चैः ॥ अष्टाकपालानि ॥ अग्ने नय सुपथा राये अस्मानादेवानामपि पंथा
मगन्म पञ्चक० प्रवोढ ॥ अग्निर्विद्वान्स० पातीति याज्यानुवाक्ये ॥ अग्नेः पथिकृतो हमन्नादः ॥ अनड्वान्दक्षिणा ॥ पार्वणहोमचतुर्धाकरणपुनराल
म्भवर्जं सर्वं पौर्णमासवत् ॥ इष्ट्यशक्तौ प्रधानयाज्यानुवाक्याभ्यां पूर्णाहुतिः ॥ अथवाग्नये पथिकृते स्वाहेति स्रुवाहुतिः ॥ उभयत्राप्यग्नये पथिकृत
इदं० ॥ चातुर्मास्येषु तु विशेषः ॥ तत्र बौधायनः ॥ यस्य वैश्वदेवस्य कालोऽतीयादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपति सा प्रसिद्धेष्टिः सं
तिष्ठते आमावास्यस्य कालादिति व्याख्याताः कालातिक्रमेष्वापदि यजेत् ॥ अत्र प्रदीपः ॥ वैश्वदेवादिपर्वणां स्वकालातिक्रमे अनापदि गौणकालाति
क्रमे अनापदि गौणकालातिक्रमे व्रतपतीष्टिः प्रायश्चित्तमिति ॥ वसन्ते ज्योतिष्टोमेन यजेतेति ज्योतिष्टोमस्य वसन्तो मुख्यः कालः ॥ पुनर्वसन्तावधि गौ
णः कालः ॥ तस्यातिक्रमे तंतुमतीष्टिं विधाय पातिपन्नयागं कृत्वा प्राकृतयागं कुर्यात् ॥ वैश्वानरी प्रतिनिधिरिति केचित् ॥ व्रीहियवन्यायेन विकल्पेनेति
केचित् ॥ अथ वैश्वानर्याः प्रयोगः ॥ अमुककर्मप्रत्याम्नायेन वैश्वानर्येष्ट्या यक्ष्य इत्यादि ॥ अग्निर्वैश्वानरो देवता ॥ अस्यामिष्टौ बौधायनोक्तत्वात्प्रधा

८३ नमस्त्रं:॥ द्वादशकपालानि॥ वैश्वानरोऽनर्ऊत्या पथो दिविपथो अग्निः पृथिव्यामिति याज्यानुवाक्ये॥ अग्ने वैश्वानरस्वाहमन्वाद्यः॥ हिरण्यं दक्षिणा॥ पार्वणहो
९३ मचतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत्॥ इध्मशकोऽप्रधानयाज्यानुवाक्याभ्यां पूर्णाहुतिः॥ अथवा अग्नये वैश्वानराय स्वाहेति स्रुवाहुतिः॥ अभ
पत्त्याप्यग्नये वैश्वानरायेदं०॥ अथ दीर्घप्रवत्स्यिषु षण्मासमसमुद्रते ग्निहोत्रेऽग्नये पथिकृतेऽग्नये तनुमतेऽग्नये वैश्वानरायाग्नये व्रतपतय इति चतुर्हविष्कामिष्टिं
कुर्यात्॥ तस्याः प्रयोगः॥ षण्मासाधिकमग्निहोत्रकालातिपत्तिजन्यदो०र्थं चतुर्हविष्कयेष्ट्यापस्य इत्यादि॥ अग्निः पथिकृत्॥ अग्निस्तनुमान्॥
अग्निर्वैश्वानरः॥ अग्निर्व्रतपतिरिति चतस्रो देवताः॥ अस्यामिष्टौ बौधायनोक्तत्वात्प्रधानमन्त्रं॥ अग्निर्वैश्वानरो द्वादशकपालः॥ इतरेषां कपालाः॥ प
थिकृदादितिसृणां देवतानां याज्यानुवाक्याः पूर्वोक्ता एव॥ त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीत्यग्ने व्रतपते याज्यानुवाक्ये॥ सर्वेषां मन्त्राद्यः॥
हिरण्यं दक्षिणा॥ पार्वणहोमचतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत्॥ इध्मशकौ ततद्देवतायै ततद्धविर्हिन याज्यानुवाक्याभ्यामेकैकां
पूर्णाहुतिं जुहुयात्॥ अथवा चतुर्थ्यन्तेन नाम्ना ततद्देवतायै एकैकां स्रुवाहुतिं जुहुयात्॥ ततोऽतियत्त्याभिहुत्वा प्रायश्चित्तं जुहुयात्॥ दर्शपूर्णमासानां षण्मा
सातिक्रमे यायमिष्टिः॥ अमुककर्मणः षण्मासाधिककालातिपत्तिजन्यदो०र्थं चतुर्हविष्कयेष्ट्यापस्य इति संकल्पे विशेषः॥ अतियत्त्र यागोपयाप्राय
यागश्च॥ अथ दीर्घप्रवत्स्यिषु संवत्सरमग्निहोत्रातिपत्तौ अग्नये पवमानायाग्नये पावकायाग्नये शुचयेऽग्नये पथिकृतेऽग्नये तनुमतेऽग्नये व्रतपतयेऽग्न
ये वैश्वानरायेति सप्तहविष्कामिष्टिं कुर्यात्॥ अस्याः प्रयोगः॥ संवत्सराधिकमग्निहोत्रकालातिपत्तिजन्यदो०र्थं सप्तहविष्कयेष्ट्यापस्य इत्यादि॥
अग्निः पवमानः॥ अग्निः पावकः॥ अग्निः शुचिः॥ अग्निः पथिकृत्॥ अग्निस्तनुमान्॥ अग्निर्व्रतपतिः॥ अग्निर्वैश्वानर इति सप्त देवताः॥ अस्यामिष्टौ बौधा

पनो कृत्वा त्वधानमुद्वे ॥ अग्निर्वैश्वानरो द्वादशकपालः ॥ इतरे ष्टाकपालाः ॥ अग्ने पावकरोचिषा मन्द्रः पावकेत्यग्नेः पावकस्य याज्यानुवाक्ये ॥ अवशिष्टानां वो
धापनरीत्या पूर्वोक्ता याज्यानुवाक्याः ॥ सर्वेषामन्वाहार्यः ॥ हिरण्यं दक्षिणा ॥ पार्वणहोमचतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत् ॥ इष्टिशब्दोऽत्र तत्तद्देवता
येतत्तद्धविहितयाज्यानुवाक्याभ्यां पूर्णाहुतिं जुहुयात् ॥ अथवा चतुर्थ्यन्तेन तत्तद्देवतानाम्ना तत्तद्देवतायै एकैकां स्रुवाहुतिं जुहुयात् ॥ एवं दर्शपूर्णमासादी
नां संवत्सरातिक्रमेऽपि यमेवेष्टिः ॥ अतिपन्नसंस्थापा अतिपन्नयागाः प्राप्तयागश्च ॥ अत्र चत्वारः पक्षाः ॥ प्रत्येकं संपन्नहविष्कामेतामिष्टिं विधाय पार्वणसो
ति पन्नास्ताः प्रत्येकं पश्चात् इत्येकः ॥ संपन्नहविष्केष्टिं कृत्वैव नातिपन्नयाग इत्येकः ॥ संपन्नहविर्भिः सह निर्वापेणातिपन्नयाग इत्येकः ॥ संपन्नहविष्कामेकां कृत्वा
पार्वणसोऽतिपन्नास्तासां सह निर्वापेण याग इत्येक इति ॥ अथ प्रोषिते यजमाने वह्निषु दीप्तेषु सत्सु होमात्यये मनस्वत्याच्चतुर्गृहीतं हुत्वा तेन समादिष्टिं कृ
त्वा अतिपन्नहोमाः कार्या इति ॥ अथ समारूढेषु होमात्यये भुव्याद पश्चात्तनस्य इष्टयः सांगाः पुनः पश्च कार्या इति ॥ संकल्पान्वाधानप्रभृतिब्राह्मणत
र्पणांताः प्रयोगाः चत्वार इत्यर्थः ॥ अत्र किंचिदुच्यते यद्यपि चंद्रिकाकारेण समारूढेषु होमात्यये भुव्याद पश्चात्तनस्य इष्टयः कार्या इत्येवोक्तं ॥ तथापि पर्वसा
ग्रयणेषु चेति प्रयस्त्वबोधायनसूत्रे तत्कौपालविवरणप्रदीपकानां दर्शनाद्दर्शपूर्णमासाग्रयणात्ययेऽपि ता एव भवंतीति प्रयोगः ॥ एतन्मूले बौधा
यनसूत्रमेयोक्तानप्रकरणे द्रष्टव्यं ॥ अथ सकालेन्वाधानाकरणे प्रा० ॥ तत्राश्वलायनः ॥ सान्नाय्येऽपुरोडाशे वा विहितकालेन्वाधाने अकृते विशेषप्रायश्चि
त्ताभावात् सर्वप्रायश्चित्तमिष्टिदिने कुर्यादिति ॥ मदनपारिजातकारमतेनुपाधिकृतादिष्टिरिति ॥ अथान्वाधानदिनात्पूर्वदिने प्रमादादन्वाधानकरणे
प्रा० ॥ तत्राश्वलायनः ॥ सान्नाय्ये पुरोडाशे वा दृष्टे समाप्ते दिनेऽग्निर्दीप्तेऽदः प्रदाता विष्णुः शिपिविष्टः ॥ अग्ने दा दाशुषे रयिं स्वपत्ना विप्र एषा दीर्घस्ते अस्ते

६४ कुश्शो भद्रा ते हस्तासु रूतो तपाणी वृषदूहृते विष्णवास आकूणो मिपतते॰ अद्य शिपिविष्टनामेति मन्त्रद्वयं ॥ सान्नाय्यशब्देन आमावास्यं कर्मोच्यते। तस्मि
९५ न्ना(रब्धे सति चेद्दमा पादि पुरस्तादभ्युदियात्तदा एतामिष्टिं कुर्यात् ॥ अस्या अमावास्याविकार(त्वात्मायश्चित्तेष्टीनां यो धर्मस्तु यो भूत्वं वात्रेद्धाज्यभागता चन्नभ
वति ॥ एकदेशविकृतमनन्यवद्भवतीति ॥ वृधन्वंता वित्पादपो॰ मावास्याधर्मा एव भवंति। एतदुक्तं भवति। अकाले अमावास्याकर्मण्यारब्धे सति ॥ अका
लोपमिति स्थाने तामेवामावास्यां देवताभिर्विकृतां समापयेत् ॥ अत्र कालेप्राप्ते पुनः प्रयोगोस्ति नास्तीति अत्राध्वर्युभिः सह निश्चयः कार्यः ॥ ताताताग्रेर्गणः
प्रदातेंद्रस्य ॥ शिपिविष्टो विष्णो(रि)ति प्रथमस्य वृत्तिः अत्र देवतातान्तुसारी प्रयोगः ॥ दर्शारंभदिने पुरस्ताच्चंद्रोदयनिमित्तं अभ्युदिते चेत्स्यादिति संक
ल्पः ॥ अग्निर्दाता ॥ इंद्रः प्रदाता ॥ विष्णुः शिपिविष्टः इति प्रधानदेवताः ॥ व्रीहीन्नवहत्यतंडुलांस्त्रेधा विभजेत् ॥ ये मध्यमास्तंडुलास्तानग्नये दात्रेनि रूप्याष्टा
कपालं पुरोडाशं कुर्यात् ये स्थविष्ठास्तानिंद्राय प्रदात्रे चरुं निर्वपेत् ॥ ये अणिष्ठास्तान्विष्णवे शिपिविष्टाय चरुं निर्वपेत् ॥ हविः श्रपणकाले चरुस्थाली
मधिश्रित्य तस्यां पयो दोहं दध्यानीय तंडुलानोप्य इंद्राय प्रदात्रे दधनि चरुं श्रपयेत् ॥ द्वितीय चरुस्थालीमधिश्रित्य प्रातर्दोहं शृतं तस्यामानीय तंडुलानोप्य वि
ष्णवे शिपिविष्टाय चरुं श्रपयेदिति विशेषः। वृधन्वंता वाज्यभागो ॥ अग्ने दाता॰तो ३ ये ३० हे अग्निं दातारं सपंता विप्र॰ मघा ३ वो ३०॥ अग्ने दातुर इंद्र नाद
॥ दीर्घस्त्ते अस्त्व॰न्वतो ३ ये ३० ह इंद्रं प्रदातारं भद्राते हस्तासु॰ दातवा ३ उ वौ ३०॥ इंद्रस्य प्रदातुरहं॰ द्रियावीमृया सं॥ वषट्ते विष्ण॰नो ३ ये ३० हे विष्णुं शिपिवि
ष्टं प्रतते अद्य॰ कार इवौ ३०॥ विष्णोः शिपिविष्टस्याहमन्नादः ॥ पुनरेत्वं भवर्जे संतिष्ठतइति ॥ अत्र परीपकारः ॥ ततस्तेषु वाग्निषु प्रक्रांतामिष्टिं समा
पयेत् ॥ पश्चाच्चतुर्दश्यां प्रक्रांतामिष्टिं समाप्य तदानीं पुनर्विहृत्य दर्शार्थमन्वाधाय सायं दुग्ध्वोपोष्य श्वः कालप्राप्तामिष्टिं कुर्यात्। पश्चाच्चतुर्दशीं पंचद

शीद्धपमुपवसथं कृत्वा चतुर्दश्यां पंचदश्यां वा सायंदोहं कृत्वाम्भो भूते प्रतिपदि प्रातर्दोहं कृत्वा पजेत ॥ असोमपाजिनः सान्नाय्याभावात् चरुद्रव्यमस्कृत्कार्यमस्
मानमस्मात् तदभ्युदितेष्टिः ॥ अत्रापस्तंबीयसुबोधिनीकारः ॥ तंदुलपेषणान्मा कृत्वा अकाले तंत्रमारब्धमिति ज्ञाने सति अभ्युदयेष्टिरेव कार्या इत्येकः पक्षः
व्रतचर्यामात्रं कार्यमिति द्वितीयः ॥ अभ्युदयेष्टिं कृत्वा पुनः स्वकाले दर्शश्च कर्तव्य इति तृतीयः ॥ पेषणानंतरं अकाले तंत्रमारब्धमिति ज्ञाने व्रतचर्यापक्ष एव
तंदुलाभावेन अभ्युदयेष्टसंभवात् प्रधानयागानंतरमकालप्रवृत्तज्ञाने सति प्रकृतं कर्म समाप्य सर्वप्रायश्चित्तपूर्वकं पुनश्च स्वकाले दर्शः कर्तव्यः ॥ इष्टौ
समाप्तायामकालप्रवृत्तज्ञाने पुनश्च सर्वप्रायश्चित्तपूर्वकं स्वकाले दर्शः कर्तव्यः ॥ एवमेव पौर्णमास्यां प्रधानयागात् पूर्वमकाले तंत्रमारब्धमिति ज्ञाने सत्यप
क्षाणविधिना अग्नीन् संसृज्य स्वकाले सर्वप्रायश्चित्तपूर्वकं पौर्णमासीं कुर्यादित्येके ॥ अग्नीननुगमय्य प्रयोगमुत्सृज्य स्वकाले प्रयोग इत्यन्ये ॥ नाग्निसंस
र्गः नवानुगमः ॥ किंतु व्रतचर्यापक्ष इत्यपरे ॥ प्रधानयागानंतरमकालप्रवृत्तिज्ञाने तु इष्टिशेषं समाप्य स्वकाले पौर्णमासीं कुर्यात् ॥ पशुबंधस्याकाल
प्रवृत्तावपि प्रयोगोत्सर्गो व्रतचर्या वेति केचिदाहुः ॥ व्रतचर्यास्वरूपमाह वाजपेयीशतदूषीकारः ॥ व्रताभ्यासपक्षे तानेव विहृतानग्नीन् यागार्थं रक्षेत् । सा
यंदोहात्पूर्वमभ्युदयस्नानेऽपाकृतान्वत्सान्मातृभिः संसृज्य पुनः स्वकाले वत्सापाकरणं कर्तव्यं ॥ उत्पन्नश्चेत्सायंदोह आतंचनार्थं दधि निदध्यात् ॥ नि
रुप्ताश्चेद्व्रीहयो रक्षणीयाः ॥ उत्पन्नश्चेत्प्रातर्दोहो दधिप्रक्षेप्तव्यः ॥ अथवा प्रातर्दोग्धात् ॥ निरुप्ताश्चेद्व्रीहयो रक्षणीयाः ॥ उत्पन्नश्चेन्मोहं तथैव संरक्षोत्त
रेधुरुत्पन्नेन मातर्दोहेन सह प्रचरेत् ॥ उत्पन्नेन पुरोडाशो घृतादिना संरक्षेत् ॥ अथवा तमन्कोत्सृज्य पुनः स्वकाले निर्वपेत् ॥ एवं ब्रह्मचर्यादिनियमयुक्तोय
जमानो यजमानीपदिवसे कृतान्तादाम्भ्यपूर्वं यजेतेत्यादि द्रष्टव्यं ॥ अथाधानादिरहितविषये तेषु सर्पणाविर्भावे सर्पाचंद्रमसोर्ग्रहणे च प्रा० तत्र बौधायनः ॥ स

८५ वैत्रवितते यत्तकर्मणि सूर्योनाविर्भवत्यन्यत्रादेशात् उद्वयं तमसस्परि उदुत्यं चित्रमित्येताभिः स्नुवाहुतीर्जुहुयात् सूर्याचंद्रमसोर्ग्रहणं विद्यत एतद्देवेति ॥ अत्र गोपाल
95 विवरणं ॥ सर्वत्र वितते यत्तकर्मणि ॥ प्रारब्धे अपरिसमाप्ते सति सूर्योनाविर्भवति ॥ अन्यत्रादेशात् ॥ यानि कर्माणि अनाविर्भावएव विहितानि तानि वर्जयित्वे
त्यर्थः ॥ अथवानुदिते विहितं वर्जयित्वा ॥ अथवा अन्यत्रादेशात् ॥ आदिष्टप्रायश्चित्तं वर्जयित्वा ॥ यथा यस्याग्निनेशस्समानेसूर्ये इत्यादि यदि सूर्याचंद्रमसो
र्ग्रहणं विद्यत एतद्देवहविर्यज्ञेषु ॥ सोमे वक्ष्यति नवोनवोभवति ॥ यमादित्या अंशुमिति ॥ अत्र प्रदीपानुसारी प्रयोगः ॥ आधानादिहविर्यज्ञेषु प्रारब्धेष्व
समाप्तेषु मेघादिभिः सूर्योनाविर्भवति चेत् ॥ उद्वयमुदुत्यं चित्रमिति त्रिभिः स्नुवाहुतीर्जुहुयात् ॥ यानि कर्माणि सूर्यादर्शने विहितानि तानि वर्जयित्वेत्य
र्थः ॥ अथवानुदिते यानि कर्माणि विहितानि तानि वर्जयित्वा ॥ अथ वा यत्र प्रायश्चित्तोक्तिरस्ति यस्याग्निनेशस्समाने सूर्योनाविर्भवति सोऽपि बहुरूपमाल
भेतेत्यादौ नेतस्य प्रायश्चित्तं भवति ॥ सूर्याचंद्रमसोर्ग्रहणेऽप्येतद्देव ॥ अथ सोमविषये प्रा० तत्र बौधायनः ॥ अथ यदि प्रातरनुवाकमनुपाकृतमादित्योऽभ्युदि
यात् रूपं तत्र प्रायश्चित्तं भवत्युषाः केतुना जुषतां यज्ञं देवेभिरन्वितं देवेभ्यो मधुमत्तमं स्वाहेति मिंदाहुतीश्चाहुतीश्च हुत्वोपाकुर्यादथ यदि प्रातरनु
वाके शस्यमान आदित्योऽभ्युदियादुद्वयं तमसस्परि उदुत्यं चित्रमित्येताभिः स्नुवाहुतीर्जुहुयादथ सोमोनाविः स्यान्नवोनवो भवति जायमानो यमादित्या अंशु
मा प्यायपंतीति सूर्याचंद्रमसोर्ग्रहणं विद्यत एतद्देवेति ॥ अत्र गोपालविवरणं ॥ यदि सोमोनाविः स्यात् यदि चन्द्रोमेघच्छन्नो न प्रकाशेत तदा हविर्दोषो क
दोषः ॥ नीलमास्तिकेत्यादीनामन्यतमेनोपहतं तथोपहते दुष्टहविर्योऽभ्युवहरंतीत्यादि ॥ अत्र प्रदीपकारः ॥ यदि प्रातरनुवाकमनुपाकृतं सूर्योऽभ्युदिया
दुषाः केतुना जुषतामिति स्नुवाहुतिः मिंदाहुती व्याहृतिभिश्च हुत्वा ततः प्रातरनुवाकमुपाकुर्यात् ॥ प्रातरनुवाके शस्यमाने सूर्योदये सति उद्वयमुदुत्यं चित्र

मिति स्रुवाहुतयः ॥ अथ पर्द्विकर्ममध्ये सोमो नाविःस्यात् नवो नवो य मादित्या इति द्वे स्रुवाहुती जुहुयात् ॥ ऋतुमध्ये सर्पो चंद्रमसो ग्रहणे नवो नवो य मादित्या इति द्वे स्रु
वाहुती ॥ अतिरात्राप्तोर्यामयोराश्विने शस्यमाने सर्पो मेघादिभिः छन्नो नाविर्भवति चेत् तदनुपाजात्पूर्वे वा उद्वसानीयानंतरं वा सौर्यं बहुरूपमालभेत् ॥ अथवा अ
नूबंध्ययस्थ होपालंभं कुर्यात् ॥ सर्पो देवीति षडुपाज्यानुवाक्याः । आह्नीने हर्गणे वा मासपणीयातिरात्रे आश्विने शस्यमाने सर्पो नाविर्भवति चेत् तदा नंतस्या न्हः सवनी
येन पशुनाहस्सौर्यो यालंभं कुर्यात् ॥ अहीनांतर्गतातिरात्रे चेत्सर्पो नाविर्भवति तदानुपाजात्पूर्वे वोद्वसानीयादुत्तरं वा सौर्यं बहुरूपमालभते ॥ अथवा पाव
त्कालपर्यंतं सर्पे आविर्भवति तावत्कालपर्यंतं सोमस्य पूर्वेलत्र आवर्तयेत् ॥ उदिते सौर्याणि प्रतिपद्येत स्यपरं मतामिति ॥ अत्र शतदूषीकाराः । आश्विने शस्त्रे श
स्यमाने परिमेघादिना छन्नः सर्पो न प्रकाशते तदा सर्पदेवत्यो वा बहुरूपः पशुराल्भ्यः ॥ दशमंडलान्यनवयवान्यस्यादिति दशतयी ऋग्वेदसंहिता तत्र भवा
ऋचो दाशतय्यः । आदित आरभ्य यावत्सर्पमंडलादर्शनं क्रमेण होत्रा वाच्या ॥ दृष्टे सर्पमंडले समाप्य परिधानीया कर्तव्या । अत्र मंथिचमसेषु हुत्वाभ
क्षितेषु पशुस्तयनादि पाश्विनांतं पाशुकं कर्म कर्तव्यं ॥ अत्र सवनीयप्रयाजादिकर्मांगजातं प्रसंगेनोपकरोति ॥ अतो न पृथक् कर्तव्यं । गृदहोम भूत्वोद्वास
नादिकं तु तदीयानुष्ठानकाले ऽहेन कर्तव्यं । केचित्वाहुः सर्वा अपि दाशतयीरनुब्रूयादित्यत्र अपिशब्दो वा शब्दार्थः । तेन सौर्यः पशुर्वालभ्यः । पूर्ववद्दा
शतयीस्त्वप्य एव वा न स्यादिति । अथ प्रसंगात्सोमसर्पपरागयोर्विद्यमानाग्नेः सोमपाजिनः कर्तव्यमाह ॥ तत्र प्रायश्चित्ते हेमाद्रौ देवलः । सर्पे सोमापरा
गे तु सोमपान्याग्निहोत्रवान् ॥ गार्हपत्ये समिद्धेऽग्नौ स्रुवाहुत्या विधानतः । मार्कंडेयः । सर्पसोमोपरागेषु स्नात्वा प्राजापत्यं ततः । मोक्षस्नाने पुनः कृत्वा मो
नमाप्यायस्व च ऋ । गार्हपत्यं समिंधि श्रमय्य व्याहृत्यंस्तु चोद्दहन् । सर्पोपरागे जुहुयादुदुत्यं चित्रमित्यृचा । उपस्थाय ततः पश्चात्स्नात्वा स्नातानाविसर्जयेत् ।

९८ एवं कृत्वा तदा याजी सूर्यस्य लोकमवाप्नुते ॥ सोमे यागे जुहुयादाप्यायस्वेति मंत्रतः ॥ संते पयांसि च पुनर्हुत्वा वाज्याहुती द्वयं ॥ ततः शुचिमवाप्नोति सोमयाजी महानि
96 र्ह ॥ एवं कृत्वा तदा याजी सोमलोकमवाप्नुयात् ॥ जाबालिः ॥ ग्रहणे चोभयोरेनन् अग्नेवीर्यं क्षयं गते ॥ एतु स्पर्शे तयोः पीडा स्यात्सो संक्रम्यति तिष्ठति ॥ सोमया
ज्यष्टमूर्तित्वात्पुष्पवंतौ तथा नय ॥ अतो होमः प्रकर्तव्यो पञ्चभिर्यत्नतो नय ॥ आत्मनश्चाग्निहोत्रस्य पुनर्वीर्यबलाप्तये ॥ सोमयाजिनस्त्वष्टमूर्तित्वमस्ती
त्युक्तं तदेवाह महाविष्णो नरपुराणे ॥ पृथिवी सलिलं तेजो वायुराकाशमेव च ॥ सूर्याचंद्रमसौ सोमयाजिनस्त्वष्टमूर्तय इति प्रायश्चित्तहेमाद्रौ ॥ अथ वस
तीवरीग्रहणात्पूर्वे अस्तमिते प्रा० ॥ तत्र प्रदीपकारः ॥ वसतीवरीग्रहणात्पूर्वे अस्तमिते वसतीवरीः कलशमादाय कवेदीपमादापायत आपो दीप्नकं दी
पमुपदिधाय पन्कुंभस्य बिले स्रुवर्णं निधाय वसतीवरीर्गृह्णीयात् ॥ अथ यज्ञसोमसवनकालातिक्रमप्रा० ॥ तत्र बौधायनः ॥ अथ यदि सवनकालोतिक्रमे
दग्निर्मूर्धा दिव इत्येतस्यानुवाकस्य प्रथमेन गायत्रेण प्रातःसवने जुहुयात्त्रैष्टुभेन माध्यंदिने तथा जागतेन तृतीयसवने त ऊर्ध्वमतिएच्चादूर्ध्व
महर्नोधिगच्छेयधाधिगच्छेद्यज्ञस्य प्रेष आगच्छेत्तत्र सर्वप्रायश्चित्तं सर्वान् होतॄन् जुहुयाच्चित्तिः स्रुक्पते ब्रह्मणे च चतुर्होतार इति तस्माच्चतुर्होतॄन् जुहुयादत
ऊर्ध्वमहः संस्थानाधिगच्छेदेकाहेषु ॥ सर्वे चेत्सुत्यमहरतिक्रामेदिति ॥ अत्र प्रदीपकारः ॥ महारात्रादूर्ध्वं उदयान्तं अष्टौ घटिका दश घटिका वा
प्रातःसवनस्य कालः ॥ ततो दश षड्वा माध्यंदिनस्य सवनस्य कालः ॥ ततो ष्यष्टौ दश वा तृतीयसवनस्य कालः ॥ छंदोगमते षड्वा षड्वेव सवनानां का
लः प्रातःसवनकालातिक्रमे अग्निर्मूर्धा दिव इति गायत्रेण प्रातःसवने हुत्वा मिंदाहुती च ॥ माध्यंदिनसवनकालातिक्रमे भुवो यज्ञस्येति त्रिष्टुभा हुत्वा मिं
दाहुती च ॥ तृतीयसवनकालातिक्रमे जनस्य गोपेति जगत्या हुत्वा मिंदाहुती च ॥ उक्तकाले नुपक्रमे उक्तकाले समापने चैतत्प्रायश्चित्तं कुर्यात् ॥ सवन

कालातिक्रमप्रायश्चित्तमप्तोर्यामातिरात्राभ्यामन्यत्र द्रष्टव्यं॥ अप्तोर्यामातिरात्रव्यतिरिक्तेष्विष्टोमादिक्रतौ स्तोत्रशस्त्रसहितः शस्त्रसहितो वा सुत्याशेषोप
रेषु रात्रिपर्यायेषु गतेष्वस्तम्येषो भवेत्तत्र प्रायश्चित्तं सर्वान्होतॄन् जुहुयात्। अतिरात्राप्तोर्यामयोर्न। अत ऊर्ध्वमहः संस्थानातिगच्छेदकाहे षु परस्त्वित्यस्तमये सोऽत्यमहु
स्त्वदती त्योतात् एमान्ह उदपादूर्ध्वं सुत्यातो यदि भवेत्तत्रापि प्रायश्चित्तं सर्वान्नहोतॄन् जुहुयात्। छंदोगाः पुनर्यत्तं कुर्वीरन्त्वित्याहुः॥ तथा छांदोग्ये एकाहे पा
मत्याहारि त्वत्रे विशेषो द्रष्टव्यः॥ अथ षोडशिस्तोत्रोपाकरणं विना आदित्येऽस्तमिते प्रा०॥ तत्र प्रदीपः। षोडशिस्तोत्रे नुपाकृते आदित्योपघस्तमेति व्याहृ
तिमिति स्तः स्तवा हुतीर्हुत्वोपाकुर्वीत॥ अथातिरात्रे रात्रिपर्यायपर्याप्तरात्रिशेषाभावे प्रा०॥ तत्राश्वलायनः। यदि पर्यायानभिव्युच्छेत्सर्वैस्त्र एक
तं भरेयुः॥१॥ प्रथमात्स्तोता द्वितीयान्मैत्रावरुणो ब्राह्मणाच्छंसी चोत्तमादच्छावाकः॥२॥ द्वे चेद्द्वे प्रथमाद्धोतोत्तमात्॥३॥ अपि वा सर्वे स्युस्तामनि ड्रन्ताः॥४॥ ऊर्ध्वं
स्तोत्रियानुरूपेभ्यः प्रथमोत्तमास्तवांछंसेयुः॥५॥ निष्क्रमस्ये वैकस्मिन्॥६॥ होतर्वर्जमित्येके॥७॥ आश्विनाय्यैकस्तोत्रियोऽग्ने विवस्वदुषस इति॥८॥ तं पुरस्ता
दनुरूपैव तं स्वस्य छंदसोपयास्कंतशंसेत्॥९॥ त्रीणि षष्टिशतान्याश्विन १० मिति दशसूत्राणि। एवं तावच्चतुर्विधः सोमयागो ज्योतिष्टोमाख्ये उक्तः॥ तस्यैव वि
शेषमुपरिष्टाद्वक्ष्यति अत्रातरात्रे पर्यायाश्विनप्रसंगेन तेषां नैमित्तिकमपि वक्तुमारभते। यदि पर्यायानभिव्युच्छेदिति। अस्यायमर्थः। यदा सर्वे पर्यायाः प्र
युक्तानभवंति यद्येवमादिशंका स्यादतिक्रांतप्रायरात्रिः सा पर्यायाणां आश्विनस्य चापर्याप्तेति तदा सर्वेभ्यः पर्यायेभ्यः एकं पर्यायं संभक्त्य कुर्युरित्यर्थः। उ
तिप्रथमसूत्रस्य वृत्तिः॥ एतमेवार्थं विवृणोति प्रथमास्य पर्यायस्य होता स्वे शस्त्रमारदीत मैत्रावरुण ब्राह्मणाच्छंसिनौ द्वितीयात्स्वे शस्त्रे। उत्तमादितस्स्वे
मेव शस्त्रमितीतीति द्वितीयस्य॥ प्रथमः पर्यायः प्रयुक्तः मध्यमोत्तमावप्रयुक्तौ तयोराश्विनस्य चापर्याप्ता रात्रिरित्याशंका स्यात्तदेवं कुर्युः। द्वौ होतमैत्रा

८७ ९७ वरुणो प्रथमाद्ब्राह्मणाच्छंस्यच्छावाकावुत्तमादिति॥ अत्रप्रथमादितिवचनमप्रयुक्तयोरेवप्रथमान्मध्यमादित्यर्थः। अत्रद्वयोरधिकृतत्वात्तस्याद्वितीयस्तो
त्तमशब्दप्रयोगादन्यत्रापिद्वयोरुत्तमस्योत्तमत्वंसाधितंभवति। तेनान्यत्राक्तउत्तमादित्यत्रविधिर्द्वितीयत्रेप्यंत्योभवतीति तृतीयस्य॥ अपि वा सर्वे स्तोमानिर्ह्रसा
भवेयुः नसंभरणमिति॥ सर्वे च न पूर्वोक्तयोर्द्वयोरभिप्लुष्योःसंभरणनिवृत्त्यर्थे॥ अपं स्तोमानेह्रीसो होत्रकाणामेव भवति॥ नहोतुरित्युक्तेः। उक्तःशस्त्रो
पायत्रस्तत्रउक्तग्रहणेन॥ स्तोमनिर्ह्रसात्इत्यनेनैतद्विधीयते पूर्वपंचदशस्तोमाः संतः पंचस्तोमाभवेयुरिति॥ होतुस्तु पंचदशस्तोमाएवसर्वत्र॥ स्तोम
निर्ह्रासे सप्तदशस्य निर्ह्रासइत्याहेतिचतुर्थस्य॥ स्तोत्रियानुरूपास्तु यथापूर्वंभवति॥ तेभ्य ऊर्ध्वं पञ्चदशस्यमस्ति तस्यादितस्तुचान्तरं ह्रासपुंरततश्च
एवंचत्वारिंशत्त्रामभवेयुः॥ एतत्प्रमाणानिहोत्रकशस्त्राण्यपिभवेयुःहोतुस्तुपूर्ववदेवेतिपंचमस्य॥ पूर्वयोरभिप्लुष्योः संभरणनिर्ह्रासयोर्विकल्पउक्तः॥ अ
त्रसंभरणस्यासंभवे निर्ह्रासएवैकोविधीयते॥ अवधारणवचनेन अस्मिन्पक्षेनिर्ह्रासएवास्याधारणोधर्मइतिज्ञापयितुं॥ तेनोत्तरस्य चोदितेहोत
वर्जनंसर्वासामभिप्लुष्टिषुसाधारणोप्यभवतिनानेतरापामेवाभिप्लुष्वावितिषष्ठस्य। एके शाखिनः होतृवर्जमेवनिर्ह्रासंकुर्वन्तीति सप्तमस्य॥ इदं चाभिप्लु
ष्टिनिमित्तमेवेत्यष्टमस्य॥ तंस्तोत्रियमाग्नेयक्रतौ बृहतीछंदः प्रस्तात्सरूपंसेत। अनुदेशतमितिनात्रबीसाविवक्षितायथासंख्यम् तमितिपूर्ववदेवेतिन
वमस्य। आश्विनोद्देशेनास्याः संख्यायाः विधानात्प्रतियत्नमागत्यस्तोपादानित्वतस्मामेवसंख्यापामंतर्भवतीत्यवगंतव्यमितिदशमस्य। अत्रप्रयो
गः। च्युतिरत्राप्तोर्यामादौयज्ञेपृषुत्रिपर्यायेषुनेषुवाशस्यमानेषुयः काल आगच्छेत्तदावक्ष्यमाणंकर्मकर्तव्यं॥ तत्रागतप्रापणार्थं त्रिः पर्याया
णामाश्विनस्य च पर्यायेषु नमवतिततदासर्वेभ्यःपर्यायेभ्यएकंपर्यायंसंभरत्यकुर्युः। तत्रसंभरणंनामद्वादशशस्त्राणांस्थाने चत्वारिशस्त्राणिकृत्वाश

स्येषु॥ तत्र प्रथमपर्यायात् प्रथमशस्त्रं गृहीत्वा तस्य होतुर्भवति। द्वितीयपर्यायात् द्वितीयं ततीयं च गृहीत्वा ते मैत्रावरुणब्राह्मणाच्छंसिनोर्भवतः॥ तती
यपर्यायात्तु तुर्यं शस्त्रं गृहीत्वा तदच्छावाकस्य भवति॥ एवमेकः पर्यायः कर्तव्यः। यदि प्रथमः पर्यायः प्रयुक्तो मध्यमोत्तमावप्रयुक्तौ तयोराश्विनस्य
च पर्यायाप्राप्तौ। त्रिणो ग्लितदापि संभाः कर्तव्यः॥ तत्रोर्वरितान्यष्टौ शस्त्राणि तेभ्यः प्रथमं द्वितीयं च गृहीत्वा ते शस्त्रे होतमैत्रावरुणयोर्भवतः
सप्तममष्टमं च गृहीत्वा ते ब्राह्मणाच्छंस्यच्छावाकयोर्भवतः॥ यदि द्वौ प्रयुक्तौ उत्तमस्त्वप्रयुक्तस्तदा शस्त्रनिष्क्रीस एव कर्तव्यः। आश्विनस्य शस्त्रो
त्रियानुष्टुपेभ्य उर्ध्वं पञ्चस्यं तस्यादितस्त्वत्वारि तत्स्त्वांश्च समवेगलिङ्गौ पुः॥ एवमेकस्य चत्वारि स्तत्वामं भवति। अथ यदा त्रिष्वपि पर्यायेषु निष्क्रीस एव
कर्तव्यो न समभ्यास इति॥ स्तोमनिष्क्रीस्तो नाम पूर्वं यच्चतुर्दश स्तोमाः स ततः पंचस्तोमो मा भवेयुरिति तत्र शस्त्रनिष्क्रीस्तोपि कर्तव्य इति तत्रैव॥ सर्वत्र
निष्क्रीस्तो होतुर्न भवतीति त्रेयं निष्क्रीसस्य पक्षेपि होतुः शस्त्राण्यविकृतान्येव भवंति। निष्क्रीसपक्षस्यैवं दोगानुरोधेन भवतीति त्रेयं। अत्रया
दाभ्यासादिस्तर्वं सर्वेषां पूर्ववत्। आनुष्टुभी वै रात्रिरिति ब्राह्मणवचनात्। अभ्यासस्यानुष्टुप्संपादनत्वात्। एवं पर्यायाणां संभरणं निष्क्रीसं वा
कृत्वा आश्विनशस्त्रे ऋचां षष्ट्याधिकत्रीणि शतानि भवंति॥ अत्र प्रतिपन्मांगल्यसौर्यादीनि चतस्रो मेवसंख्यायामंतर्भवंति। आश्विनोद्देशेन संख्या
विधानात्॥ अत्रैवं संख्यापूर्तिः। अग्निर्होतेति प्रतिपदेका। उप प्रयंत इत्यारभ्येमे विप्रस्येति दूर्योमेएकसूक्तपर्यंतमाग्नेयस्यादितो दश
सूक्तानि तेषां चतुर्दशाधिकशतमृक्संख्या। ततस्त्वमग्ने व्रतपा इत्यारभ्य त्रिष्वपि ऋतुषु सर्वेषां छंदसामादिनएकैकसूक्तेते षाषष्ट्यधिकश
तमृक्संख्या॥ यथास्थानं त्रीणि मांगल्यसूक्तानि तेषां त्रयस्त्रिंशदृचः॥ उदितेस्यं पूर्ववत्सौर्यादीनि तेषां द्विचत्वारिंशदृचः॥ आग्नेयबार्हतस्य

९८ ९८ दो अग्ने विवस्वदुषसः इत्येकए एवं प्रगाथः स्तोत्रियः ॥ एवं सर्वा संख्या द्विपंचाशदधिकत्रीणि शतानि । सामिधेनीन्याये नाग्नेत्तमपोऽभ्यासेन च तस्रोऽधिकाः
। अग्ने विवस्वदिति स्तोत्रियप्रगाथस्य ककुभत्वात् शंसनेनाधिकेका ॥ अभ्यासेन सप्तपंचाशदधिकत्रीणि शतानि सपंन्नानि ॥ अथ षष्टिसंख्यापर्या
प्सर्थं तत्रोपेक्षितः ॥ तत्र प्रतिस्तोमं विहरेषसमिति तत्रोग्रास्य इति भाष्यकारः ॥ पूर्वत्वात्राम्वो च इति तत्रोग्राह्य इति मंत्र नः । अत्र पत्संख्यापूर्त्यर्थं
अधिकतत्रस्य शंसनमुक्तं ततस्तस्याने स्वछंदोन्यायेन भवतीति ज्ञेयं ॥ अन्यः सर्वोपि होमादिशंसनविधिः पूर्ववदेव एवं त्रीणि षष्टिशतान्याश्विन
मुक्तं ॥ एवमेवं संख्यापूर्तिर्भाष्यकारादयोप्याहुः एवमस्य एत्रिनिमित्तं नैमित्तिकमुक्तं ॥ अथ प्रसंगात्किंचिदुच्यते ॥ कदाचित्स्वर्पापसमापनं न तदा आश्वि
नस्यैवपर्याप्तात्रिर्नास्तीति चेत् तदा त्रीणि षष्टिशतान्याश्विनमेव कर्तव्यं ॥ तत्र स्वल्पात्रिभ्रमेणाश्विनस्य ह्रासे कृते पदिव हुए त्रिश्चेत्तदा सूर्योदयादी
र्घ्यावीपुरस्तावतिः कर्तव्या ॥ एवं कदाचित्स्वर्पापाणां संभरणादिकृत्वाश्विनस्य पर्याप्ता एत्रिर्भवतीति चेत्तदा त्वविकृतमेवाश्विनं भवति ॥ तत्राश्वि
नस्य पर्याप्ता एत्रि एतिभ्रमेणाश्विनमाभ्यं शस्यमाने गतप्राया एत्रिश्चेत्तदाश्विनस्य मापनं न तं कालातिक्रमप्रायश्चित्तमेव भवतीत्यन्यदितिपा
पीपाणां संभरणाद्यकृत्वाप्याश्विने शस्यमाने गतप्राया एत्रिश्चेत्तदाप्येवमेवेतीति ॥ अत्र सामप्रयोगविशेषः सामप्रायश्चित्तावसरे वक्ष्यते ॥ इ
तिकालवैगुण्यानि ॥ अथ कर्तृवैगुण्यप्रायश्चित्तानि ॥ तत्रादावग्नित्यागप्रायश्चित्तानि ॥ तत्राप्यादौ कुतूहलकारः ॥ आहिताग्नेश्चजनेकं ग्रामान्तर्य
पि सहो दरे ॥ आदधीत स्वयं ज्ञापाम वाप्य दशमेहनि । तदतिक्रमणे दोषः सह दानीन्निहूयते ॥ तत्र विष्णुपादत्र स्कौ ॥ गोवधोब्राह्मणाता तस्ते यमणा
नीचानयाक्रिया ॥ अनाहिताग्नितापण्यविक्रयः ययसोपि वा ॥ मासेन पएकेणा यस्याप्त न एति इदं चाकामतः ॥ कामतस्तत्र मासिकमितिह्य

धवरूति ॥ अथश्रोताग्नित्यागप्रा० ॥ तत्र प्रायश्चित्तमपूर्वेमनुः ॥ अग्निहोत्रमपविध्याग्नीन् ब्राह्मणः कामकारतः ॥ चांद्रायणं चरेन्मासं वीरहत्यासमं
हितत् । अपविध्यत्यक्त्वा ॥ वीरोयजमानः ॥ मासमपविध्येत्यन्वयः ॥ इदं च कामतः ॥ पनुर्हारीतः ॥ संवत्सरोत्सन्नेग्निहोत्रे चांद्रायणं कृत्वा पुनरादध्या
त् । द्विवर्षोत्सन्ने सोमायनं चांद्रायणे कुर्यात् ॥ त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रमभ्यस्य पुनरादध्यादिति तदकामतो ज्ञेयं ॥ शंखस्तु त्रिवर्षोत्सादे गोदानमप्य
धिकमाह ॥ अग्न्युत्सादी संवत्सरं प्राजापत्यं चरेद्गां च दद्यादिति ॥ अत्रैव पाराशिकः ॥ केचनालस्याद्दिनामासं परित्यागे प्रथममासे कृच्छ्रत्रयं । ततो मा
सद्वये त्रयो कृच्छ्रसंख्येति ॥ एवमादयो गुरुलघुकल्पाः शक्त्यपेक्षया व्यवस्थापनीयाः ॥ एवं प्रायश्चित्तानंतरं प्राप्तस्थले पुनराधानं कृत्वा नित्यकर्म कुर्यात्
॥ प्रायश्चित्तं च होमद्रव्यं दत्त्वा कार्यं ॥ तथा भरद्वाजगृह्ये ॥ यावत्कालमहोमी स्यात्तावद्द्रव्यमशेषतः ॥ तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव तदिति ॥ संध्या
मिष्टिं च हहोमं यावज्जीवं समाचरेत् ॥ नत्यजेत्सूतके वापि त्यजन्गच्छेदधो द्विजः ॥ कुर्यात्स्वं च महापत्स्वां नित्यशः सूतकं विना ॥ नित्यं नैमित्तिकं चान्यत्स
कर्मापि न हापयेत् ॥ स्वकर्महानौ यतनमबद्नेनैव शुद्धिस्तस्य तु नान्यथा ॥ तं निरीक्ष्यार्कमीक्षेत स्पर्शेत्स्नात्वा पात्रं चैलकं ॥ तेन संभाषणं हास्यं कुर्वन्न वदेन
तस्तमः ॥ तदन्नमुक्तौ सद्यस्तु सह शय्यासनेषु चेति ॥ अथाहिताग्निधर्माः ॥ तत्र कुतूहलकारः ॥ आधानाद्दशरात्रमाहिताग्निर्व्रतचारी स्यात् ॥ त
दुक्तं ॥ नानृतं वदेत् ॥ न मांसमश्नीयात् ॥ न स्त्रियमुपेयात् ॥ न वासः प्रक्षालयेत् ॥ न मन्मयेन पिबेत् ॥ न शूद्रायोच्छिष्टं दद्यात् ॥ न पादौ प्रक्षालयी
त ॥ कास्यपात्रेभोजनं लवणमश्नीयात् ॥ न कोशीधान्यमश्नीयात् ॥ अन्यव्रतिलेभ्यः ॥ नासंघांशपीत ॥ कालयोर्भोजनं कुर्यात् ॥ आज्यपूर्वं हविष्य
मश्नीयात् ॥ नान्यस्यार्त्विज्यं कुर्यात् ॥ नांजीत नाभ्यंजीत ॥ न दंतधावनं कुर्यात् । एतान्निव्रतानि ॥ एतत्लोपेव्रातपतीय्याने अग्नये व्रतपतये स्वाहेति

९९ पूर्णाहुतिं कुर्यात् शूद्रस्यानधिकारात्॥ अजातपुत्रस्य कृतो भार्यागमने न दोषः॥ वासःप्रक्षालननिषेधस्तु षष्ठ्यादिनानात्वंतिकः॥ स्वयंपादप्रक्षालने न दोषः
99 पूर्णादिना दंतधावनं चेत्याहिताग्निव्रतानि॥ अथाहिताग्निधर्मातिक्रमे प्रायश्चित्तानि॥ तत्र कुतूहलोक्तः कश्चित्कश्चित्संग्रहः॥ आहिताग्नेर्दयाकृसए
दिमस्तपो लिखित आह॥ कपालस्तरसंपादनपात्रपूपशष्कुलीः॥ आहिताग्निर्द्विजो भुक्त्वा प्राजापत्यं समाचरेदिति॥ आहिताग्नेः शुनादंशे एक
रात्रं सोपं पयःपानं नाभेरूर्ध्वे द्विरात्रं वल्के त्रिरात्रं मस्तके चतूरात्रमित्यंगिराः॥ इदं च सम्यक्कृदष्टविषयं॥ ईषद्दष्टे नाभेरधः आपोहिष्ठीयादिभिः।
स्नानं प्राणायामत्रयं च नाभेरूर्ध्वे द्विगुणं वल्के त्रिगुणं मस्तके चतुर्गुणमिति सम्यक्त्पर्थसारके॥ इदं च शृगालयूथलीवानरखरोष्ट्रनरवराहसगम
हिष्यश्वाविनकुलमार्जारकुक्कुटकाकमूषकाद्युपलक्षणमिति॥ पात्रवल्कः॥ आग्निहीनस्य शूद्रस्यान्नमद्यादनापदीति॥ एतदन्यतरान्नभोज
ने प्रायश्चित्तमाह मनुः॥ भुंजानोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहं॥ मत्या भुक्त्वा चरेत्कृच्छ्रमिति॥ आपदि तु सकृद्भुक्त्वा एकोपवासः सहृयो ब्रह्मकूर्चः॥ अज्ञा
नादनापद्यपि स एव ज्ञात्वा नापद्यपि सकृद्भोजने प्राजापत्यं॥ बहुकृत्स्य ब्रह्मकूर्चस्य त्र्यहेण विकल्पः॥ शक्ताशक्तविषयः॥ अन्नभोजने न नासान्नसंयोगमात्रे
।किंत्वा घ्राणाद्यपीति पराशरः। घ्रात्वा चैवोष्मणा चैव स्पृष्ट्वा च प्रतिगृह्य च। प्रशस्यस्य त्रिचेत्युक्त्वा भोक्तैव तु न संशय इति स एव॥ अनुग्रहं प्रवक्ष्या
मि मनुनाचोदितं पुरा॥ आमं वा यदि वा पक्वं शूद्रान्नमुपसाधयेत्॥ किल्बिषं भजते भोक्ता यश्च विप्रः पुरोहितः॥ गृहार्थं मतिधीनो च भक्तानां च विशेष
तः॥ प्रतिग्रहः प्रदातव्यं न तु तत्र स्वयं ततः शूद्रान्नात्स युक्तस्य अधीयानस्य नित्यशः॥ जपतो जुह्वतो वापि गतिरूर्ध्वं न विद्यते॥ षण्मासमपि यो भुंक्ते
शूद्रान्नं च निरंतरं॥ जीवन्नेव भवेच्छूद्रो मृतः श्वा चापि जायते॥ अरुलैव निरंतियः शूद्रान्नं यो भयपते द्विजः॥ आहिताग्निर्विशेषेण सशूद्रगातिभाग्

भवेदिति ॥ व्यासः ॥ शूद्रान्नरसपुष्टस्य दिन्सोऽपि च नित्यशः ॥ जपतो जुह्वतो वापि गतिरूर्ध्वं न विद्यते ॥ मतस्तत्कपृष्ठंगो द्विजः शूद्रान्नभोजनात् ॥ अहमेव
न जानामि कां कां योनिं गमिष्यति ॥ गृध्रो द्वादश जन्मानि दश जन्मानि सूकरः ॥ श्वा चैव सप्त जन्मानीत्येवं मनुरुवाच ह ॥ शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः
स भवेत्सूकरो ग्राम्यस्तस्य वा जायते कुले इति ॥ आपस्तंबः ॥ यस्तु भुंजीत शूद्रान्नं मासमेकं निरंतरं ॥ इह जन्मनि शूद्रत्वं मृतः श्वा चाभिजायते ॥ शूद्रान्नं शूद्रसं
स्पर्शः शूद्रेण च सहासनं ॥ शूद्रात् ज्ञानागमश्चैव ज्वलंतमपि पातयेत् ॥ आहिताग्निस्तु यो विप्रः शूद्रान्ने न प्रवर्तयेत् ॥ पंच तस्य प्रणश्यंति आत्मा ब्रह्म त्रयोऽग्नयः
इति ॥ सुमंतुः ॥ राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसं ॥ आयुः सुवर्णकारान्नं यशश्चर्मावकृंतिनः ॥ कारुकान्नं प्रजा हंति बलं निर्णेजकस्य च ॥ गणान्नं गणिकान्नं च
लोकेभ्यः परिकृंतति ॥ हृत्यं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिंद्रियं ॥ विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलं ॥ एतेभ्योऽन्ये त्वभोज्यान्नाः क्रमशः प
रिकीर्तिताः ॥ तेषां त्वगस्थिरोमाणि वदंत्यन्ने मनीषिणः ॥ तथा ॥ यो हि हित्वा विवाहाग्निं गृहस्थ इति मन्यते ॥ अन्नं तस्य न भोक्तव्यं वृथापाकः स उच्यते ॥ वृ
थापाकस्य भुंजानः प्रायश्चित्तं चरेद्द्विजः ॥ प्राणायामं त्रिरभ्यस्य घृतं प्राश्य विशुध्यतीति ॥ आपदि शूद्रात्सकृदामप्रतिग्रहे दिनांतभोजनेन दोषः ॥ अना
पदि त्वाममप्रतिग्रहेऽपि सकृत्त्रिरात्रं ॥ अभ्यासे तु मासं कृच्छ्रं ॥ अत ऊर्ध्वमावृत्तिः ॥ श्रोत्रियागारे शूद्रादिभिः स्वद्रव्यं दत्त्वा कारितस्य पर्यायान्नं तद्भोजने
चांद्रायणमिति माधवः ॥ स्मृतिचंद्रिकायां मनुः ॥ ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ॥ ऋत्विजस्तेऽपि शूद्राणां ब्रह्मवादिषु गर्हिता इति ॥ उपादाय ध
नं शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ॥ ऋत्विजस्तेऽपि शूद्राणां ब्रह्मवादिषु गर्हिता इति ॥ उपादाय धनं शूद्राद्धोमाभिक्षेन धर्मवित् ॥ यजमानस्याभिक्षि
त्वाग्नं दात्तः प्रेत्य जायते इति ॥ यात्रवल्क्यः ॥ चांडालो जायते यस्तु करणात् शूद्रभिक्षिता इति ॥ मनुः ॥ यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति ॥ स या

१०० तिमासत्तां विप्रः क्रतुकृतां वा शतं समाः ॥ यमः । यज्ञार्थमभिक्षितं द्रव्यमन्यत्र विनियोजयेत् ॥ श्वयाकयोनौ जायेत तद्भक्षात्तु दुर्मतिः । तथा । यज्ञार्थं भिक्षितं ॥ श्रा
100 द्धार्थे स्यात् वृथा तेषु यो भासयोनिं स गच्छतीति ॥ यानि तु त्रिप्रकाराणि मेरुनेव चनानि । निर्धनो धनसाध्येषु नित्येष्वधिकृतो यदि ॥ चौर्यादन्यैः कुमार्गैरपीष्टमर्थधन
मर्जयेत् ॥ स्पर्द्धयेदेकुरुक्षेत्रे मेषी कृष्णाजिनादिकं ॥ यं राज्ञा नप्रतिग्राह्यापि यजेद्दावश्यकैर्मखैरिति ॥ तानि न दुष्प्रतिग्रहानुग्रहकारणि ॥ किं तु नित्यकर्म
णामावश्यकत्वद्योतकानि ॥ यदा पक्वान्तो यज्ञो मध्ये कुर्यान्नित्यमतिबध्यतस्तदा तु शूद्राद्देशदाहृत्यार्थं कर्म समापनीयमेवेत्याह ॥ मनुः । यज्ञश्चेत्प्रतिबद्धः स्या
देकेनाङ्गेन यज्वनः । ब्राह्मणस्य विशेषेण धार्मिके सति राजनि । यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः । कुटुम्बात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ॥ आहरे
त्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः । योनाहिताग्निः शतगुरयज्वा च सहस्रगुः ॥ तयोरपि कुटुम्बाभ्यामाहरेदविचारयन्निति विशेषेणेति क्षत्रियादेरपि
प्राग्व्येव प्रतिबद्धे क्रतौ चिरं दपि समापनं विधीयते ॥ एवमपि द्रव्यलाभे त्रिप्रकारमं तुं न स्यवृत्तसाम्प्रवृत्तिः । यदा तु तत्र दुष्प्रतिग्रहेण न तत्त्साप श्चितमवश्यमेव
तदाह मनुः ॥ जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः ॥ मासं गोष्ठे पयः पीत्वा मुच्यतेसत्प्रतिग्रहादिति समाहितः ब्रह्मचारी मासं गोष्ठे वसन् अ
न्वहं त्रिसहस्रं जपेत् पयश्चापि वेदित्यर्थः । अभ्यासेतु हारीतः ॥ पवित्रेष्ट्या विशुद्ध्यंति सर्वे घोरप्रतिग्रहात् । ऐन्द्रेण मरुतां गोष्टा केचित्तु मित्रविंदया ॥ ष
ष्ठे काले पयोभक्षः पूर्णमासे प्रमुच्यते ॥ तर्पयित्वा द्विजान्कामैः सततं नियतव्रत इति । प्रतिग्रहे सत्वे देशतः कालतो जातितः स्वरूपतश्च । अभ्यास
एस त्वेष कृच्छ्रत्रिशन्मते पवित्रेष्ट्या मित्रविंदया च श्वविकल्पेन विधानात् यवित्रेष्ट्यादयो वक्ष्यंते ॥ यज्ञपार्थ्वे एजप्रतिग्रहे घोरे मध्यसाधारणे विशेषम
य त्रमासवाम्भोकृ नतु एजप्रतिग्रह इति ॥ तथा न कुर्यात् कृषिवाणिज्ये स्वेवाव जितथैव च ॥ ब्राह्मण्या स्थापनेते न तस्मात्तं च विवर्जयेत् ॥ ग्रामम

धेगतो पावकछ्वस्ति षष्ठति कस्यचित्। ग्रामास्थितस्य चाशौचं निर्गते श्रुचिताभिपात्॥ मनुः॥ विहितस्याशौचात्सापवादमाह पराशरः। ब्रह्मचारी गृहे येषां
मिष्यते च हुताशनः॥ संपर्कं न च कुर्वन्ति न तेषां सूतकं भवेदिति॥ तथा पराशरोक्तदाता पितरणाचार्यलिंकपुरोहिताः। एतेषां प्रातिकूल्येन प्रमत्ता येव विभृत्य
तीति॥ तथा ~~स्तोत्रसमापिनसमा~~ चान्नदो भयत्रश्चैव तपाक्रलिकपुरोहिताः॥ एते गुरुसमाज्ञेयानेषु प्रतिमुख्यश्चोत्॥ पपायावकृहब्रूपान् नलका
यमविशंकया॥ निग्रहे तु ग्रहे वापि गुरुः सर्वत्र कारणमिति॥ तथा उपास्य पश्चिमां संध्यां हुत्वाग्निं समुपास्य च॥ भृत्यैः परिवृतो भुक्त्वा नातितृप्तोथ
संविशेदिति द्वितीयभोजनस्यावश्यकत्वं। अतो भार्यामुपेयादित्यत्र नियमविधिस्साध्यतामिताक्षरकारेण सायंप्रातर्द्विजातीनां अशनं श्रुतिचो
दितं॥ नांतरा भोजनं कुर्यादग्निहोत्रसमो विधिरित्यत्र नियमार्थत्वेन साधितं तेन द्वितीयभोजने समर्थेन तदकुर्वता प्राणायामशतं कार्यं तु सर्वपापापनुत्तये
॥ उपपातकजातानामनादिष्टस्य चैव हीति॥ प्रायश्चित्तं आचार्य(णी)यं इदमेवस्य सर्वत्र सम्यक्तेनादिष्टप्रायश्चित्तं॥ तथा मनुः॥ वेदोदितानां नित्यानां कर्मणां
समतिक्रमे॥ स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति॥ एतदपवादमाह माधवीये श्रीनागमः॥ अशक्तरोगयुक्तेगेणज चौरभयादिषु॥ गर्वाग्निदेवकृत्ये
षु नित्यहानौ न पापभाग्भवेति॥ पर्वणि स्त्रीगमनेप्यभोजनमेवेति शूलपाणिः॥ यदा कदाचिद्दिवा मैथुने गोपतिनिंदाभ्यासे स्नात्वा प्राणायामेन शुद्धिः॥
अभ्यासे तु शतं प्राणायामा इति मनुः॥ नयापाल्लिपं दष्ट्वा दिनमेकमभोजनमिति शूलपाणिः। एतस्य च प्रतिपदोक्तप्रायश्चित्तैः समुच्चयः॥ ब
हुभार्यस्याग्निहोत्रादिशुश्रूषायां विशेषमाह माधवीये कात्यायनः॥ अग्निहोत्रादिशुश्रूषां बहुभार्यः सवर्णया। कारयेत्तद्बहुत्वे च ज्येष्ठया गर्हिता न
चेत्॥ तथा च वीरमित्रोदये ओज्ञासंपादिनी च या॥ दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत्॥ अनुक्रमेण वाकर्मयथाज्येष्ठमशक्तितः॥ विभज्य सह वा

१०२ 101

कुर्युर्यथाज्ञानमशक्तिनश्चेत्प्रजापतिः। दर्शे च पौर्णमासे च लुप्ते ह्युभयमेव वा ॥ एकस्मिन्कृच्छ्रुयादेनद्वयोर्धेनुश्चेद्धनं ॥ हविर्यज्ञेष्वशक्तस्य लुप्तमप्येकमादि॰
॥ प्राजापत्येन शुध्यंति पाकसंस्थास्वेव हि ॥ संध्योपासनहानौ तु नित्यस्नानं विलुप्य च ॥ होमं नैमित्तिकं भुध्येगायत्र्यष्टसहस्रकं ॥ समांते सोमपस्तानां हा
नौ चांद्रायणं चरेत् ॥ अकृत्वान्यतमं यज्ञं पत्नीनामधिकारतः ॥ उपवासेन शुध्येत याकसंस्थास्वेव हि ॥ विकछोनुत्तरीयश्च नग्नश्चावस्त्र एव च ॥ श्रौ
तं स्मार्तं तथा कर्म न नग्नश्चिंतयेदपि ॥ नग्नो मलिनवस्त्रः स्यान्नग्नश्चार्धपटः स्मृतः ॥ नग्नस्तु दग्धवस्त्रः स्यान्नग्नश्छिन्नपटस्तथेति ॥ वस्त्राभावे या
ज्ञवल्क्यः ॥ अलाभे धौतवस्त्रस्य शाणक्षौमाविकानि च ॥ कुतपं योगपट्टं च द्विवासास्तु न वै भवेदिति ॥ कुशधारणमाह शातातपः ॥ जपे होमे च दा
ने च स्वाध्याये पितृतर्पणे ॥ अभून्यं तु कांकुर्यात्सुवर्णरजतैः कुशैरिति ॥ अस्नातस्य होमे निषेधमाह दक्षः ॥ अस्नात्वा नाचरेत्कर्म जपहोमादि किंचनेति
॥ प्रातःस्नानसंक्षेपमाह स एव ॥ अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्मणः ॥ प्रातः संक्षेपतः स्नानं होमलोपो विगर्हित इति ऊर्ध्वपुण्ड्रस्याव
श्यकतोक्ता ब्रह्मांडपुराणे ॥ पूजाकाले च होमे च सायंप्रातः समाहितः ॥ नामान्यूर्ध्वपुंड्रविधिना धारयेदूर्ध्वपुण्ड्रकमिति ॥ कर्मकाले अधरांगस्य स्पर्श
निषेधं बाहु· नियमं त्वाह बौधायनः ॥ नाभेरधःस्पर्शकर्मसु संप्रक्तोऽपि वर्जयेदिति जपकाले न माषेत व्रतहोमादिके षु चेति ॥ जोपे योगयाज्ञव
ल्क्यः ॥ यदि वाग्यमलोपः स्यात् जपादिषु कदाचन ॥ व्याहरेद्वैष्णवं मंत्रं जपेद्वा विष्णुमव्ययमिति ॥ जुहूतश्चाभिवादननिषेधमाहापस्तंबः ॥ ज
पं होमं च कुर्वाणो नाभिवादयेत्पादद्विज इति ॥ संध्यानुष्ठानस्य बहिर्देशमाशास्त्येपि ॥ उभे संध्ये तु कर्तव्ये ब्राह्मणेन गृहेष्वपीति विधानं आहिताग्नि
पर ॥ तस्य उत्तरणोत्तरं आहोमसमाप्तेर्बहिर्गमननिषेधात् ॥ अन एवकेशाव: अध्वर्योऽपि विहारणोत्तरं विहारमध्ये एव संध्यानुष्ठानमाह ॥ न

च संध्याहोमयोः समानकालतायां प्रारब्धतंत्रत्वात्सोमस्य प्राबल्येन संध्योत्कर्षः शंकाः ॥ संध्याहीनोऽशुचिर्विर्विप्रो ह्यनर्हः सर्वकर्मसु ॥ यदन्यत्कुरुते कर्म न तस्य फ
लभाग्भवेदिति दक्षवचनमानुत्कर्षविधानात् ॥ त्रिधा विभक्तस्याह्नो द्वितीयभागः समित्कुशाद्याहरणकालः समित्पुष्पकुशादीनां सकालः समुदा
हृत इति दक्षोक्तेः ॥ आहिताग्नेर्वा प्रवासनिषेधो मार्कंडेयपुराणे ॥ प्रशस्यो न प्रवासो ब्राह्मणानां कथंचन ॥ सतो गृहे द्विजाग्र्यस्य निष्पत्तिः सर्वकर्मणां ॥
नित्यनैमित्तिकानां तु हानिर्वै प्रवासिनां ॥ नित्यनैमित्तिकानां हि हान्या हानिर्द्विजन्मनां ॥ सायं प्रातर्हुतं हव्यं लोकान्गच्छति शाश्वतान् ॥ त्रैलोक्यमेतदखिलं हु
तएव प्रतिष्ठितं ॥ अभीष्टा बर्हिषः शय्या सततं च त्रयोग्नयः ॥ रम्यं चैवाग्निशरणं वेदिर्विष्टरिणी तथा ॥ न भोगार्थाय विप्राणां शस्यते हि वरूथिनी ॥ इह
क्लेशाय विप्राणां चेष्टा प्रेत्य फलाय च ॥ यस्तेण कर्मणो हान्या यपात्यस्य शतां नरः ॥ द्वियेकं दंकरीयेवाणान्ति चान्याप्यवृत्तिनि ॥ पापकृत्स च विप्रेषु ने
यतां जंतुरेक इति ॥ नित्यकर्मपर्याप्तद्रव्यस्य प्रवासं विनाऽलाभे तु द्रव्यार्जनार्थं प्रवसेन्न तु तीर्थाद्यर्थं ॥ अपरिमितं प्राप्य न उपवसथसमीपे त्रयो
दश्यां चतुर्दश्यां स्नानमस्त्वेत्सोधःशायी प्रवसेत् ॥ आमिषवर्जं भुंजीत ॥ बहुपत्नीक एकया सह गच्छेत्स्त्रीभिर्मैथुनं न कुर्यादिति केशवः ॥ एकया सह गमन
मपि कर्मोढाश्रद्धाविषयमिति चंद्रिकायां ॥ ब्रह्मांडपुराणे ॥ अनापद्यपि धर्मेण पाज्यतः ॥ शिष्यतस्तथा ॥ गृह्णन्प्रतिग्रहं विप्रो न धर्मैः परिही
यत इति ॥ तथा ॥ आहिताग्निरनड्वांश्च ब्रह्मचारी तथैव च ॥ अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतामिति ॥ बृहस्पतिः ॥ सर्वाधान्यथवाप्यर्धाधानी वा
ह्यावसथ्यकः ॥ परस्यान्नमश्नीयाद्विकृत्याप्येयमता इति वृद्धशौनकः ॥ गृहीताग्निसमारोप्ययः पुनरन्नं निषेवते ॥ अभोज्यान्नो गृहस्थोसौ वेदवादि
षु गर्हितः ॥ पुनरन्नेनोदरस्थेन मार्यां समधिगच्छति ॥ यस्यान्नं तस्य ते पुत्रा अन्नाद्रेतः प्रवर्तते ॥ वरं कंदफलाहारो वा वा पोश्रमक्षणं ॥ पुत्रमांसंव

१०२ 102

ंता तनानग्निरहभोजनमित्याहिताग्निधर्माः॥ अथदुःस्वप्नदर्शनप्रा०॥ तत्राश्वलायनः॥ स्वप्नममनोज्ञं दृष्ट्वा॥ १॥ यानोदेवसवितरिति द्वाभ्यां पञ्चगोषडु
पस्थमिति यं चभिरादित्यमुपतिष्ठेत॥ यो मेराजन्युज्योवासखा वेति सत्तृदयं॥ अशुभं स्वप्नं दृष्ट्वा द्वाभ्यां पंचाभिश्चोपतिष्ठेतेतिप्रथमसूत्रस्यवृत्तिः
अनपेववायुर्वाभिर्वासप्तभिरिति विकल्पइति द्वितीयस्य॥ अत्र शतरूपीकाः॥ आहिताग्निर्दुःस्वप्नं पश्येदन्यकृतो वार्त्विजं कुर्वन्कृत्वा क्रतुं समाप्यानं
तरं स्व आहवनीये आभिर्गीर्भिरित्याहुतिं जुहुयान्न्नायेद्वा दुःस्वप्नादिनिमित्ते नभयोत्पत्तावपि यतइद्दमया महे स्वस्ति दाविशस्पतिरिति द्वाभ्यां जुहुयाज्ज
पेद्वेति॥ अथकर्मकाले भयजनने प्रा०॥ तत्र बोधायनः॥ सर्वेत्र वितते यज्ञकर्मणि यदि नन्यं भयमागच्छेद्यत इंद्रभयामहे महे स्वस्तिदाविशस्पतिरिति द्वाभ्यां जुहुयाज्ज
स्कवाहुती जुहुयाद्भये वापनर्यजेत॥ अत्र प्रदीपः॥ सर्वत्र विततेयज्ञकर्मणि जन्यभयंयदागच्छेद्यत इंद्रभयामहे स्वस्तिदाविशस्पतिरिति द्वाभ्यां
वा हुतीप्रजापतिर्विश्वकर्मेति चस्रुवाहुतिं हुत्वाभयापगमे पुनर्यजेत॥ अथकर्मकाले अकर्मकाले वाभयोत्पत्तौ प्रा०॥ अत्र प्रदीपः॥ यदि यजमानः
यत्तादिप्रयोगे न्वाग्निन्वाकाले उत्पातान् दृष्ट्वा कारणं तरणं वा बिभेति तं त्रमध्ये चेत्साग्निर्वाहवनीये प्रजापतिर्विश्वकर्मा॥ तस्य मनोदेवं यज्ञेनराध्या
सं॥ अर्थेगाअस्यजहिताः॥ अवसानपते वसानंमे विदं स्वाहेति जुहुयात्॥ अकर्ममध्ये चेदिदं स्वच्चजुहुयात्॥ एवं कृतेभयं विनश्यति॥ अथस्फुरितेनं भिते
मनोज्ञदर्शने पापं गधाघ्राणे त्रिस्पंदने कर्णध्वनने चप्रा०॥ तत्राश्वलायनः॥ स्तुत्वा नं मिलाऽमनोज्ञं दृष्ट्वा पापकं गंधमाघ्राय त्रिस्पंदने कर्णध्वन
नेचसुचक्षा अहम क्षीभ्यां भूयासमुवर्चा मुखेन सुश्रुत्कर्णाभ्यामम पिदस्य क्रतुरिति जपेदिति॥ अमनोज्ञं अप्रियं प्रत्यक्षं दृष्ट्वेत्यर्थः॥ षट्सु निमित्तेष्वेत
ज्जपेदिति वृत्तिः॥ अथागमनीयागमने ऽयाजनेऽभोज्यभोजने प्रतिग्राह्यप्रतिग्रहे चैत्यययूपस्पर्शने चप्रा०॥ तत्राश्वलायनः॥ आगमनीयागलाया

ज्यं पाजपिलाभो ज्यं भुक्त्वाप्रतिग्राह्यं प्रतिग्रहाच्चैतत्पूर्वं चोपहत्य पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः। पुनर्द्रविणमैतु मां पुनर्ब्राह्मणमैतु मां स्वाहा। इ
मे ये धिष्ण्यासो अग्नयो यथास्थानमिह कल्पतां॥ वैश्वानरो वावृधानोन्तर्यच्छतु मेमनो हृद्यं तत् ममतस्य केतुः स्वाहेत्याज्याहुतीर्जुहुयात्॥१॥ समिधौ
वा॥२॥ जपेदिति॥३॥ सूत्रत्रयं॥ अगामनीयांगलेति स्वभार्यां रजस्वलां गत्वा षष्ठ्यादिषु वा प्रतिषिद्धेष्वेत्रिषु गत्वा अपान्नेपान्यस्त्रमालिं ज्यामिति निषिद्धः॥ अ
भोज्यं लशुनादिगणिकान्नादि च॥ अप्रतिग्राह्यं शस्त्रविषमित्यादि॥ अप्रतिग्राह्यस्य प्रहृष्टद्रव्यं च अग्निचयनस्य यूपस्य च॥ एतेषु पंचसु निमित्तेषु एता
भ्यां जुहुयात्॥ आज्याहुतिवचनं तंत्रनिवृत्त्यर्थमिष्यते इति प्रथमसूत्रस्य वृत्तिः॥ आदध्यादिति शेष इति द्वितीयस्य॥ जययस्ते स्वाहाकारांत्यजेत्प्रदानाभ्या।
गावेति तृतीयस्य॥ अपमर्यीस्तो दृपेसमये अव्याधितस्य स्वापे प्रा०॥ तत्राश्वलायनगृह्ये॥ अव्याधितं चेत्स्वपंतमादित्योऽभ्यस्तमियाद्वाग्यतोनुपविशन्
रात्रिशेषं भूत्वा येनसूर्यज्योतिषा बाधसे तम इति पंचभिरादित्यमुपतिष्ठेतेति॥१॥ अभ्युदियाच्चेदकर्मश्रांतमनभिरूपेण कर्मणा वाग्यत इति समान
मृत्युमिश्रतस्य मिहपस्थानमिति सूत्रद्वयं॥२॥ अव्याधितं स्वपंतं संतं यद्यस्तमियात्ततो वाग्यतोनुपविशंश्च रात्रिशेषं स्थित्वा ततउदिते पंचभिरुप
तिष्ठेतेति प्रथमसूत्रस्य वृत्तिः॥ अव्याधितं स्वपंतं संतं विहितकर्मणा अश्रांतं अकर्मश्रांतं यदि अभ्युदियाच्चेद्विहितकर्मणा श्रांते तु न भवति प्रायश्चित्तं॥
अनभिरूपेण अविहितेन कर्मणा नित्यादिना कर्मणा श्रांतमभ्युदियाच्चेद्वाग्यतोनुपविशं श्वाहः शेषं स्थित्वा अपो अग्न हृदिते पस्पते विश्वेति च तस्याभि
रूपतिष्ठेतेति द्वितीयस्य॥ अत्र प्रयोगः॥ व्याधिं विना स्वापे आदित्यास्तमये स्वाहे यज्ञ्यदोषप०ध्ये इति संकल्प्य वाग्यतो रात्रिशेषं तिष्ठन् उदि
ते कृतसंध्यावंदनः॥ येनसूर्यज्योतिषा बाधसे तम इति पंचभिर्मंत्रैरादित्यमुपतिष्ठते॥ व्याधिं विनान्यादिरूपेणाविहितकर्मणा स्वापे तु आदित्योद

१०३ 103 पेस्मा पजन्यदोषप॰व्य इति संकल्प्य वाग्यत इत्यादि अहः शेषं स्थित्वा अपरेद्युरुदिते कृतसंध्यावंदनः पश्चात्तेविश्वेत्यादिभिश्चतसृभिरादित्यमुपतिष्ठेतेति । अ
त्र बौधायनः ॥ अभ्युदितेभिनिम्रुक्ते चेति ॥ अत्र प्रदीपकारः ॥ यस्य स्वपतः सूर्योऽभिनिम्लोचति सोऽभिनिम्रुक्तः ॥ यस्य सुप्तस्य सतः सूर्य उदेति सोऽभ्यु
दितः ॥ एतयोर्मनस्वतीहोमः प्रायश्चित्तमिति ॥ अत्र शतद्रुपीकाः ॥ अभिनिम्रुक्तादीनां पन्न आत्मनोमिं दामृत्युनरग्निश्चक्षुरदादिति होमो जपो वेति
अथागारे यदि कपोतो यतेत पततेन्वा माप॰ ॥ तत्राश्वलायनः ॥ कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाः कपोत इति प्रत्यचं जुहुयाज्जपेद्वेति ॥
कपोतो रक्तपादः धूम्रवर्णः अरण्यवासी पद्यगारमुपहन्यात्तिष्ठेत ॥ अभिमिन्वदंकुर्यादित्यर्थः । अगारसमीपं वा गच्छेत्ततोनेन जुहुयाज्जपेद्वा इदं सूक्तं
॥ प्रत्यृचमिति प्राग्व्याख्यातमिति यो वृत्तिः ॥ अपां पञ्चपर्वाचरणादौ विशेषः ॥ तत्राश्वलायनः ॥ वयमु त्वा पथस्पत इत्यध्वपर्वचर्याचरिष्यन् ॥ १ ॥ संपू
षन्विदुषेति नष्टमधिजिगमिषन्मूढो वा ॥ २ ॥ संपूषन्नध्वन इति महांतमध्वानमेष्यन् प्रतिभयं वे ॥ ३ ॥ तिसृत्वत्रयं । अप्यर्थं गच्छन्नेन प्रत्यृचं जुहु
याज्जपेद्वा इदं ॥ अत्र पादग्रहणेपि सामर्थ्यात्सूक्तग्रहणमिति प्रथमसूत्रस्य वृत्तिः ॥ नष्टं लब्धुमिच्छन्प्रस्ताहीनो वा जुहुयाज्जपेद्वा इदमिति द्वि
तीयस्य ॥ महांतमध्वानं गमिष्यन् अल्पमपि प्रतिभयं भयानकमध्वानमेष्यन्ननेन जुहुयाज्जपेद्वा इदमिति तृतीयस्य ॥ अथ परिवेत्रादिदो
षप्रा॰ ॥ तत्र बौधायनः ॥ एतत्पारिवित्तस्य तत्पारिविन्नस्येतत्पारिदानस्ये तत्पारिविविदानस्येतत्सोमवामिने सोमातिपवितस्येतत्म्रस्तरिहितस्ये
तत्पारिघस्यैतत्परिपष्ठारिति ॥ अत्र प्रदीपकारः सोदरे ज्येष्ठे विवाहार्हे विद्यमाने यः कनिष्ठोऽग्निपरिग्रहपूर्वं स परिवेता तस्य ज्येष्ठः परिवित्तिः ॥
॥ तस्मै यः कन्यां प्रयच्छति स परिविदानः ॥ ज्येष्ठे स्थिते विवाहार्थं यः कन्यां निश्चिनोति स प्रागुद्वाहनकर्मणः परिविदान उच्यते ॥ यो ज्येष्ठे स्थिते

अग्न्याधानं करोति सपर्याधानः । ज्येष्ठस्त्वपर्याहितः ॥ ज्येष्ठे स्थिते यः सोमेन यजते स पर्यप्रेष्ठः ॥ ज्येष्ठः परीष्टः । एतेषां स्मृत्युक्तप्रायश्चित्तानन्तरं सरस्वती
होमश्च प्रायश्चित्तं ॥ यः सोमं वमति स सोमवामी ॥ यश्च सोमं विरेचयति स सोमातिपवितः ॥ भक्षणक्रमेण यः सोमेन भक्षयति । स भक्षाहितः । ते सर्वे सा
ग्नौ मन सरस्वती होमं जुहुयादिति । अत्र परीष्टृत्वत्रयपञ्जनादि नित्यानां दर्शपूर्णमासादीनामपि ग्रहणमिति केचित् । सोमस्यैवेत्यपरे इति शतद्रूपीका
रः ॥ अथ सोमवमने प्रा० । तत्र मरीचिः । यः सोमं पीत्वा छर्दिं करोति स सोमवामी । यः सोमं पीत्वा अपानेन विरेचयति स सोमातिपवितः ॥ तयोरपि म
न सरस्वती । सोमवामी तु कृत्वनं तदमाहिताग्निरनाहिताग्निर्वा स्वाग्नौ सोमेन्द्रदेवत्यामिष्टिं चरुणा कुर्यात् ॥ इष्टापत्स्य रुति संकल्पः ॥ सोमेन्द्रदेवत्याभि
ष्टान्यां जुष्टं निर्वपामीत्यादि क्रूरेण सत्योमस० । एमिमप्पच्छ ॥ आप्यायतमन्युस्त्वपलप्रभ० देमृतिति याज्यानुवाक्ये । सोमेन्द्रयोरहं मप्रजपाचेति । पुनरालभ
वेज्जैसंतिष्ठते । विरिक्तसोमोप्येतामिष्टिं कुर्यात् ॥ प्र सुवानः सोमऋतयुश्चिकेते द्रापब्रह्मजन्मरश्मिर्वेन ॥ इषापन्तासि थावस स्कारेणातये छगणते
धत्ते द्रविणं ह । सवाधत्ते मं द्रविणं पुष्पं पं च ब्रह्मनए ब्रह्मकृतः सपर्यन् । अकों वापतुरेतुं सोमं च स्वात्त्रेन्द्रियं वीर्यं दधते य स्मृत्तुर्पामीति याज्यानुवाक्ये एका
हाहा नाहगरण सवनीयपशुपुरोडाशेन सहयप्रचरेत् । अपि वा त्वाष्ट्रदेवत्यं चरुं प्राश्य ब्रह्मसोदनं मृपपित्वा त्वष्ट्रे स्वाहेति हुत्वा च त्वा आर्षेयाम हूर्लि
जः प्राश्नाति । नायमकारशवाशनांतेकृत्वा शाखोच्छित्वा हवनीयेनुप्रहरेत् ॥ अपि वा त्वष्ट्रे स्वाहेति स्रुवाहुतिं हुत्वा शाखांच्छिंद्यात् ॥ अपि वा त्वष्ट्रे स्वाहेति स
व ब्रूयात् । शाखांच्छिद्यात् । अपि वा त्वष्ट्रे नमः रत्नुत्का शाखांच्छिद्यादिति ॥ अथ पर्वणि पशोरालिङ्ग्यकरणे प्रा० ॥ तत्रात्रिकांडमंडनकारः । पयाहिताग्नि
रालिंग्यं यशोः कुर्वन्ति पर्वणि ॥ तत्रे ऊमभक्ष्णं कृत्वा कुर्याद्व्रतपतीमयेति ॥ अथानत्रृता वालिंग्यकरणे प्रा० ॥ तत्रादौ आलिंग्यकरणे कर्तव्यविशेष

१०४ 104 माहाश्वलायनः ॥नमांसम श्नीयुर्नस्त्रियमुपेयुराक्रतोरपवर्गात ॥१॥ एतेनाग्नेब्रह्मणावाबधस्वेति दक्षिणाग्नावाज्याहुतिं हुत्वा यथार्थंप्रव्रजेत् ॥ २॥ ए
वमनाहिताग्निर्गृह्य इमाममग्ने शरणिंमीमृषो न इत्येतयर्चा इति सूत्रत्रयं ॥ क्रत्वादि प्रभृति आ अपवर्गादेते नियमा भवन्ति ॥ वरणप्रभृतीति केच्यमा
पदिमप्यमापामुपसदि वरणं भवति तदा प्राग नियमः प्रसज्येत । तस्मात् क्रत्वादिप्रभृतीत्युक्तं ॥ मध्यमोपसदि च शाल्लां तरेवरणं दृष्टमितिप्रथमस
त्रस्य वृत्तिः । क्रत्वंते स्वस्य दक्षिणाग्नावेतयाज्याहुतिं जुहोति ॥ नैमित्तिकत्वात ॥ शाल्लांतरदर्शनाच्च ॥ मंत्रालिंगाच्च । चक्रमेति हि भूतप्रत्ययः । तेन क्रत्वंत इ
ति सिद्धं ॥ यथार्थं प्रव्रजेदिति यथार्थमाचोदाति यमो भवतीत्यर्थः । हुत्वा अनियमो भवतीति ब्रुवते । समाप्तेपि क्रतौ होमपर्यंते नियमा भवंतीति ज्ञापय
ति ॥ आज्याहुतिवचनं तंत्रनिवृत्त्यर्थमिष्यते नयाऽस्तरणविकल्पार्थं इति द्वितीयस्य ॥ एतयेति वचनं एतया जुहुयाद्देवत्येवमर्थं ॥ तेनात्रापितंत्रेन
भवति ॥ ऋचैति वचनं अकृतविवाहोप्यालिंग्यरूनवानेतयालौकिकाग्नौ जुहुयादित्येवमर्थमिति तृतीयस्य ॥ अत्रप्रदीपः । असोमपाज्याहिताग्निरन्य
स्य क्रतावार्लिज्यं कुर्यात्स्व आहवनीये आग्निग्निर्मि[illegible]त्या हुतिंहुत्वा अन्यपत्ने सोमयानुनिमित्त अयांयुष्यमसीत्येतदादि अनंतरेनाः पितरइत्यंतं कुर्यात्सं त
था । आहिताग्निरसोमपाजीयं सोमेन यान्नयतितस्य नैमित्तिकं पारिभ्रष्टकर्म ॥ सोमपाज्जिनो पिपाजयितुर्नैमित्तिकमिति शांडिल्यः ॥ पत्नं समाप्य
पारिभ्रष्टकर्मेमाप श्चितं करिष्ये इति संकल्प्य स्वकीयाग्नीन्विहृत्याज्यं संस्कृत्यापां पुष्यमित्यादि त्रिभिर्मंत्रैराहवनीये जुहोति ॥ अयांपुष्पमस्योष
धीनां रसः ॥ सोमस्य प्रियं धाम ॥ अग्नेः प्रियतमं हविः स्वाहा । अपां पु० धाम स्योषधीनां रसः । सोमस्य इंद्रस्य प्रियतमं हविः स्वाहा ॥ अयांपु० धाम
॥ विश्वेषां देवानां प्रियतमं हविः स्वाहा ॥ अग्नय इदं ० ॥ इंद्रायेदं ० ॥ विश्वेभ्यो देवेभ्य इदमिति यथाक्रमेण हुत्वाज्यस्य शेषमन्यत्र निनीय वपं सोम

व्रतेन च ॥ मनस्त्वं तृप्यत पितरः ॥ प्रजावन्तो अशीमहीति शेषं भक्षयति ॥ अथ दक्षिणाग्नौ देवेभ्यः स्वाहेत्यादिभिर्मन्त्रैः प्राचीनावीती जुहोति । देवेभ्यः स्वा-
हा । सोमेभ्यः पितृभ्यः स्वाहा । कव्येभ्यः पितृभ्यः स्वाहा ॥ यथालिङ्गं त्यागः । दक्षिणाग्नेः पश्चाद्दक्षिणाग्रेषु दर्भेषु ददाति ॥ देवास इह मादयध्वमितिभिर्म-
न्त्रैर्दक्षिणाग्रेषु दर्भेषु निनयनं ॥ देवास इह मादयध्वं ॥ सोम्यास इह मादयध्वं ॥ कव्यास इह मादयध्वं ॥ अनन्तरिताः पितरः सोम्याः सोमपीथा इ-
ति पितृणामेवोपस्थानं येषां दधि दत्तमिति ॥ अथ प्रवर्ग्ये ऋत्विक्करणे प्रवृज्यमानस्याभिषवादिश्रवणे च प्रा० ॥ तत्र शतदूषीकारः ॥ यदि प्रवर्ग्यक-
र्मण्यृत्विक्त्वं क्रियते प्रवृज्यमानस्य वादिश्रवणे च प्रा० ॥ तत्र शतदूषीकारः ॥ यदि प्रवर्ग्यकर्मण्यृत्विक्त्वं क्रियते प्रवृज्यमानस्य वा अभिषवादिश्रव-
णे तदा स्वाग्निं विहृत्य आभिर्गीर्भिरिति जुहुयाज्जपेद्वेति ॥ अथ यजमानस्य ऋत्विजां चोरतः पाते प्रा० ॥ तत्र बौधायनः । अथ यदि यजमानस्यर्त्विजो वास्व-
प्रेतो विसर्गः स्यादिमं मे वरुण तत्त्वा यामीत्येताभ्यां स्रुवाहुती जुहुयादिति ॥ अत्र गोपालविवरणे ॥ अथ यदि यजमानस्येत्यादि सर्वत्र वितते यज्ञे पत्त-
कर्मणि यजमानस्यर्त्विजः प्रयत्नेनोत्सर्गं दारयति क्रमे स्वदारगमने च व्रातपतीत्याम्नाता ॥ अग्रये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेद्य आ-
हिताग्निः सन्नव्रत्यमिव चरेदिति ॥ अथ वा सर्वप्रायश्चित्तिरेव ऋत्विजामपीति ॥ अत्र प्रयोगः ॥ यजमानस्य स्वप्ने रेतस उत्सर्गे सति ॥ इमं मे वरुण
तत्त्वा यामीति द्वे स्रुवाहुती जुहुयात् ॥ प्रयत्नेन रेतस उत्सर्गे तु व्रातपतीष्टिः ॥ ऋत्विजां उभयत्राप्युत्सर्गे पूर्वोक्ते द्वे स्रुवाहुती एव ॥ अथ वा सर्व-
प्रायश्चित्तिरेव ॥ अत्र विशेषकुतूहले ॥ कर्मसाद्गुण्यापयुरुषसंस्कारार्थं तु पुनर्मामैत्विन्द्रियमित्यनुवाकजपः ॥ पुनर्मामैत्विन्द्रियं पुनरायुः
पुनर्भगः ॥ पुनर्ब्राह्मणमैतु मां ॥ पुनर्द्रविणमैतु मां ॥ यन्मेऽद्य रेतः पृथिवीमस्कान् ॥ यदोषधीरप्यसरद्यदापः ॥ इदं तत्पुनराददे ॥ दीर्घायुत्वा

१०५ पवर्चसे॥ यन्मेऽतः प्रसिच्येत यन्म आ जायते पुनः॥ तेन माममृतं कुरु॥ तेन सुप्रजसं कुर्विति॥ माधवी ये प्रजापतिः॥ मयेऽगेतथा स्वप्ने सिक्त्वा शुक्रमकामतः

105 ॥ आदित्यमर्चेपित्वा तु पुनर्मामैत्विन्द्रियं जपेदिति॥ अथ दीक्षितप्रायश्चित्तानि॥ तत्रौपानुवाक्ये बौधायनः॥ अथ यद्वै भवति यद्दीक्षितो प्रायश्चित्तानि॥ अवो

मेध्यं प० ऽयेतीति सोमेध्यं दृष्ट्वा जपत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हासीरित्याह नास्माद्दीक्षापक्रामति नास्य नीलं नरो

हव्येतीति ब्राह्मणमथ यद्वै भवति यद्दीक्षितमभि० निम्रोचतीति सोभिवर्ष्यमाणो जपत्युन्दती बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्या

हैतदेव सं० निम्रोचतीति ब्राह्मणमिति॥ अथ प्रायश्चित्तस्तत्रैव बौधायनः। अथातो ध्वरदीक्षाप्रायश्चित्तानि व्याख्यास्यामो दीक्षितश्चेदनृतं वदेदिमं मे व

रुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयास्यति वारुणीर्जपेत् कृष्णाजिनमपवाधिन्नो दंदशूको दंवां जनमगन्निति तस्य माशीरवनुवर्धता॥ भूति र्दध्याघृते

नमुंच तु पत्नीयज्ञपति मं हूस इति जपेदसंस्कृतपयः पाने द्वित्रिस्तनाघृति क्रमेव्रतपित्वा प आचमय्य जपति शिवाः पीता भवथ यूयमापो अस्माकं

पोनाकुदरे सुशेवाः॥ इरावती रनमीवा अनागसः शिवा नो भवथ जीवस इति छर्दयित्वा निष्ठ्यूय वा जपति यदत्रापि रसस्य मे निरष्ठि विषमस्मनः

अग्निषुत्तोमः पृथिवी यन एतं मंदधातु मरुत इति रेतस्कन्नमनुमंत्रयते यन्मे रेतः पृथिवीमस्कान्त्सीद्यदोषधीरप्यसरद्यदपः। अग्निर्होत्रमिन्द्रः सोमेन नन्दतु हं पुनः एद ददत्य मेध्य

मनिषं वा दृष्ट्वा जपतीत्युक्तमेतदभिवर्षेऽभिवर्ष्यमाणो वा जपतीत्युक्तमेतन्मूत्रे कारिष्यन्पुरीषं वा पृथिव्या लोष्टमादत्ते इदं ते पज्ञिया तनूरि

तिकारत्वयो मुंचामि न प्रजामंहोमुचः स्वाहाकृताः पृथिवीमाविशन्तेति लोष्टं प्रतिनिदधाति यथा पृथिव्याः संभवेति बीभत्सानामाप स्पस्वाहाकृताः

पृथिवीमाविशन्तेति लोष्टं प्रतिनिदधाति यथा पृथिव्याः संभवेति रूपे निगतेककस्यानामाप० शतेति तयस्यानामाप० शतेति स्वदेदुःस्वप्नेन्त्वमन्त्का जप

तिपदन्नमघतेनकं नतस्मात्ः स्कधोवतिसर्वं तदस्मान्माहिंॐ स्तीर्नेहितहृद्दृशेदिवेति दुःस्वप्नं दृष्ट्वा जपति अभिपर्यावर्तते दुःस्वप्नपापस्वप्नोपमुकेर्ब्रह्माह
मंतंकएवैनहिंस्वप्रमुपयग्रपतेति त्वोहितमन्यति तंदृष्ट्वा कंदुपवाजपति नमोरुद्रियाम्पोभ्यः स्वाहेतिन वर्षति धावेद्यदि धावेन्नमोरुद्रापवास्तोष्पत
नेविद्रवणउद्यानेयत्सएपणे। आवर्तनेविवर्तनेयोगोपायतितॐ हृवइत्येताम‍ृचं जपेन्याम्येन दीक्षितेन समेपाद्यदि समेपाल्कपानश्चित्र आभुवदित्येता
मृचंजपेतदेवपजनादन्य त्राम्पुदितोभिनिम्रुक्तो वास्यमादेवोदेवेभ्यःपालित्येताम‍ृचंजपेदिती मानिसवोस्वेवाध्याएरीपक्षाप्तुमापाधिताविभवंती
तिवोधापनआवांतएदीक्षापेविसर्गादितिशालीकिः॥ अत्रप्रदीपकारः। दीक्षितश्चेदनतंप्रमादाद्यदिवदेत्॥ इममेवरुणतत्वापामित्वंनोअग्नेस
त्वंनोअग्नइतिच तस्तोवारुणीर्जपेत्॥ अनन्तलक्षणंपएणेषुकं।पथासमयकृत्वानेवचः मत्पपएपीडादिवर्जितंसत्वंलक्षणामित्यकं पुराणेष्वम
पानंतमिति॥ दंडस्यकृष्णाजिनस्यचत्यागेदेवाजनमगन्महइतिमंत्रंजपेत्॥ ऐतोमूत्रपुरीषएकेचेडालशवादीनांदर्शनेबस्वमनइत्यादिमंत्रेप्रति
निमितमावर्तयेत्॥ दीक्षितस्यापिविषविंदुनापतनेउदतीवेलमितिमंत्रंजपेत्॥ परीषाघापकथावर्जयेत्॥ क्रोधएरदनादित्यजेत्॥ प्रमादाद
तानिकृत्वाव्याहृतीर्वदेत॥ असंस्कृतयपःपानेस्तनसंख्योतिक्रमेचशिवाःपीतामवथपूपमापइतिमंत्रंजपेत॥ व्रतपिन्वापआचम्पशिवाःपीता
भवपेतिमंत्रंजपेत्॥ छर्दपित्वानिष्ठीव्यवाजपतियदन्नापिएसस्यमइति।एतःसिक्तेचेत्स्कंनरेतोनमंत्रयतेपन्मेरेतःपीतोषादितिऋतं जपित्वे
मंमेवरुणातत्वायामीतिद्वेस्नुवाहुतीजुहुयात्॥ मंत्रेकीष्पन्ख्रुहृम्प्रदेशाखुद्धोषमादतेरेपंतेपज्ञियातनूरितिअयोमुंचामिनप्रजामहंहो
मुचइतिमंत्रमुक्तामूत्रंपुरीषंचोत्सृजेत॥ शौचंकृत्वाचम्पएहीतंचौषंसक्ष्पानेक्षिपतियपिव्यासंमवेतिमंत्रेणनेत्राम्पामश्रुपातेवीमत्सानामा

१०६ 106

पेति मंत्रं जपेत्॥ स्वन्ने गात्रे तपस्या नामाप इति मंत्रं जपेत्॥ दुःस्वप्नदर्शने शयनादुत्थाय पाहवनीयाभिमुखो भूत्वा दुःस्वप्न पापस्वप्न इत्यादिमंत्रं जपेत्
॥ स्वप्ने त्वमोजने पदन्नमद्यते नकुमिति मंत्रं जपेत्॥ हस्तेनकं दूपनेकृत्वा वाजयति नमो हद्रियाम्पो म्धः स्वाहेति जपेत्॥ नवर्षति धावेत् यदि धावे
न्नमो रुद्राय वास्तोष्पतय इति जपेत्॥ दीक्षितो ताः संसर्गे कुपान इति मंत्रं जपेत्॥ देवयजनादन्यत्र गते दीक्षिते सर्पोऽस्त मप उद पेवा सतिसर्पोमारे
वो देवेभ्यः पात्विति मंत्रं जपेत्॥ हविर्षिते षोपवसथ्येप द्रुतं विहितं तस्याति क्रमे व्रात पत्यादि कुर्यात्॥ अनादिष्ट प्रायश्चित्तेषु व्रतेषु माहृती र्जुहुया
त्॥ मनस्वती जयश्च॥ गृहेषु व्रतभंगेषु स्त्रीषु रेत उत्सर्गे च व्रात पतीमिष्टिं कुर्यात्॥ चक्षुषु व्रतभंगेषु व्याहृती र्जपेत्॥ सर्वप्रायश्चित्तमिंद्राहुतीश्च जु
हुयात्॥ इमानि प्रायश्चित्तानि दीक्षाप्रमत्तावमथात् प्रत्यहं प्रतिनिमित्तमावर्तनीयानि॥ यद्यु वांतर दीक्षाव्रतविसर्गात् प्रत्यहं प्रतिनिमित्तमाव
र्तनीयानीति॥ अथ ऋतुमध्ये न्यत्र वा यजमानस्य महापातकादिसंभवे प्राय०॥ तत्र शतद्रुपीकारः॥ यदि ऋतुमध्ये यजमानस्य दैवान्महापातकसंभवस्त
दा क्रतुरेव न कर्तव्यः॥ केचित्तु प्रक्रांतस्य यागस्यागायागातं समाप्य प्रायश्चित्तं कर्तव्यमित्याहुरिति॥ अथ सोमे ऋत्विग्व्रतलोपे प्रा०॥ तत्र प्रदीपकारः
॥ ऋत्विजां चरण्यप्रमत्तकदपनीयां तमिमानि वक्ष्यमाणव्रतानि भवंति। नमांसमश्नीयुः॥ न स्त्रियमुपेयुः॥ नासंघांशयीरन्॥ स्नानादिना वासोनस्नावेय
युः॥ पादौ प्रक्षालयेयुः॥ नांजीयुः॥ नात्मस्याल्लिंजंकुर्युः॥ नानृतं वदेयुः॥ प्रस्त्रं न भक्षयेयुः॥ शूद्राणोच्छिष्टं न्नदेयुः॥ सर्पिर्मिश्रं वाभ्यवहरेयुः॥ अ
नुक्त प्रायश्चित्तेष्ववतेषु व्याहृतिर्जपति॥ अन्यव्रत ऋत्विजोन्यव्रतसंसर्गे दीक्षितसंसर्गे च प्रा०॥ तत्र बौधायनः॥ अथ यद्यन्यव्रता ऋत्विजोन्य
व्रतैः संसृजेरन् दीक्षितादीक्षितैर्वान्यत्र व्रात्यस्तोमात् सत्राद्वे दित्येतदेवेति॥ अत्र प्रदीपकारः॥ अन्यव्रता ऋत्विजोन्यव्रतैः संसृज्येरन्नन्यत्र व्रात्य।

स्ता मांसं दीक्षिते वा संस्थ्योत मिंदाहुती हुत्वा सर्वप्रायश्चित्तं जुहुयात्॥ दीक्षितसंसर्गे कपालं कृत्वा चं जपेदिति॥ अथाधाने दक्षिणार्थम् अश्वदाने प्रा०॥ तत्रे द्वै
धं॥ यावतोश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदेकातिरिक्तानिति सह स्मा ह बौधायनो वैश्वानरं पैकः प्रतिगृह्णीयादेवं द्वैगुण्यं तु प्रतिगृह्य
कुर्वीत बहुषु वारुणानेकातिरिक्तानिति सह स्मा ह शालीकि वैश्वानरं पैकं प्रतिगृह्णीयान्न तु द्वैगुण्यं तु प्रतिगृह्य कुर्वीत नद्धपो बहुषु वारुणानेकातिरिक्तानि
ति॥ अत्र प्रदीपकारः॥ आधाने दक्षिणार्थम् अश्वं दद्यात्॥ अश्वं दत्त्वा दाताश्वप्रतिग्रहेष्टिं कुर्यादिति केषांचिन्मतं॥ प्रतिग्रहीतुरिष्टिरित्यन्येषां मतं॥ प्रयो
गः॥ अश्वप्रतिग्रहे प्रायश्चित्तमिति संकल्पः॥ वरुणाय चतुष्कपालं पुरोडाशं निर्वपेत्॥ इमं मे वरुण तत्त्वा यामीति च याज्यानुवाक्ये॥ वरुणस्याहं॰ धर्म
मा गमं पाशं॥ पुनरालंभवर्जं संतिष्ठते॥ एकाश्वप्रतिग्रहे प्रतिग्रहीतु वैश्वानरीष्टिः प्रायश्चित्तं उभयादत्प्रतिगृह्णीत्यश्वं वा पुरुषं वेति वचनात्॥ पद्यपार
मश्वं प्रतिगृह्णीयात् सौर्यमेककपालमनु निर्वपेदिति॥ अपरोश्वप्रतिग्रहार्थेष्टि प्रायश्चित्तमिति संकल्पः॥ वरुणाय चतुःकपालं पुरोडाशं निरुप्य सौर्यमेक
कपालमनु निर्वपेत्॥ उदुत्यं चित्रमिति याज्यानुवाक्ये॥ सूर्यस्याहं॰ सुदृशीकः॥ अतः परं यावतोश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुःकपालां
निरुप्यैकमतिरिक्तं निर्वपेत्॥ एवमश्वप्रतिग्रहेष्टिं समाप्यावभृथेष्टिं कुर्यात्॥ मुष्टिं वेदं च कृत्वा वरुणायैककपालं पुरोडाशं कृत्वावभृथेष्टिं कृत्वा
पुनरापो नप्त्रीयं चरुं निर्वपेत्॥ इष्टाप्रायश्चित्तमिति संकल्पः॥ अपां नप्त्रे जुष्टं निर्वपामीति चरुं निर्वपेत्॥ अपान्नपादाह्यस्थादुपस्थं समन्या यंतीति
याज्यानुवाक्ये॥ अपान्नप्त्रहं प्रजया चेति॥ पुनरालंभवर्जं संतिष्ठते इति॥ अत्र कुतूहलकारः॥ आधानादिदक्षिणासु मूल्यकल्पनायां तु नैतं
नैमित्तिकमिति॥ अथाहिताग्निर्विहरणोत्तरमाहोमसमासे व्रतलोपे प्रा०॥ अत्र कुतूहलकारः॥ आहिताग्निर्विहरणोत्तरमाहोमसमाप्ते व्रतचार्य

२०१ 107 भवेत् ॥ तदाहाचार्यः ॥ अत ऊर्ध्वमाहिताग्निर्व्रतचार्या होमादिति ॥ पत्न्यप्येवंभूता गार्हपत्यस्य दक्षिण आस्त आहोमसमाप्तेः ॥ अत्र सत्रिधर्मा श्वानु
मीस्यव्रतानि च व्रतशब्देनोच्यंत इति वृत्तिकृत् ॥ तान्यपि आह आश्वलायनः ॥ दीक्षणादि पित्र्याणां देवानां च धर्माणां प्राकृतानां च निवृत्तिः सर्वशास्त्र
वर्जयेयुर्ग्रामचर्यामरण्यं विवृतस्वपनं स्नानाभिरोहणमनापोऽभिभाषणमनृतं क्रोधमपां प्रगाहणमभिवर्षणमारोहणं च वृक्षस्य नावो वा । पयस्येत्या
दि चातुर्मास्यव्रतानि च ॥ केशान्निवर्तयीत अधःशयीत मधु मांस लवण स्त्री वर्जलेखनानि वर्जयेत् । ऋतौ भार्यामुपेयात् इत्यादीनि ॥ अवलेखनं नाम
केशप्रसाधनं ॥ एतद्व्रतातिपत्तौ ज्ञातयतीष्टिः पूर्णाहुतिर्वा प्रायश्चित्तं ॥ अथाग्निविहरणात् आ होमसमाप्तेर्भक्षणे प्राशने च प्रा० ॥ तत्र कुतूहल
कारः ॥ अथ यद्याहिताग्निर्विहरणादूर्ध्वमा होमसमाप्तेर्भक्षणे प्राशने च प्रा० ॥ तत्र कुतूहलकारः ॥ अथ यद्याहिताग्निर्विहरणादूर्ध्वमाहोमस
माप्तेर्यद्यश्नीयात् भक्षयेद्वा तदा तस्मिन्नेवाग्नौ ॥ व्रतं वपं पुरुष० अग्ने स्वाहा ॥ यथाहतद्वं० आयुः स्वाहेति स्रुवाहुती जुहुयात् ॥ समिधौ वा दध्या
त् ॥ ऋचौ जपेद्वा ॥ अत्राग्निर्देवता इदमेवाह कात्यायनोपि ॥ उपसमिंधनादूर्ध्वं सायं हुतेग्निहोत्रे नाश्नीयादहुतेग्निहोत्रे नाश्नीयादिति । अ
शनं भक्षणं पानोपलक्षणार्थं इदमध्यर्यापि भवति ॥ उपसमिंधन संबंधादिति ॥ अत्र किंचिदुच्यते ॥ तत्र कुतूहलकारः ॥ नित्यहोमे यजमाना
स्येवमस्यं कर्तव्यं ॥ ऋत्विजां देवपितृमनुष्यभूतानां तु गौणमेव ॥ तत्राप्यनापदि ऋत्विक् द्वादके होमे सर्वप्रायश्चित्तं कर्तव्यं ॥ अत एव स्वयं यदि वेणि
जुहुयात् ऋत्विजा मे कर्तव्यं कालं इत्यनेन पर्वकालादन्यत्र न यजमानस्य कर्तव्यता हस्मते नेतर ऋत्विजां नियमने ऽक्षिप्यते ॥ किंतु पर्वकालादन्य
न्यत्र गौणकर्तव्यविधाने ॥ किंचनापं भगवत आश्वलायनस्याभिमतो र्थः परस्याभिमतः स्यात्स्वैकर्तृत्वकं स्यात् ॥ अत एवोक्तं स्मृतिचंद्रिकायां ॥ संध्या

कर्मावसाने तु स्वयं होमो विधीयते। स्वयं होमे फलं यत् स्यात् तदन्येन न हि लभ्यते॥ होमे यत्फलमुद्दिष्टं जुह्वतः स्वयमेव तु॥ हूयमाने तदन्येन फलमर्धं प्रप
द्यत इति॥ ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः॥ एतैरपि हुतं यत्स्यात् तद्धुतं स्वयमेव तु॥ कर्तृनाशे त्वमप्याहात्रिः॥ अन्येन शक्त्या स्वो
माद्यधिकाप्यात्मनः क्रियेति॥ न च प्रतिनिध्युपादाने प्रायश्चित्तेनास्तीति परिभाषिकं विहस्यैते तिवाच्यं॥ तस्य मुख्याभावे विधानेन मुख्यसने
गौणांगीकारे प्रायश्चित्तस्य केनापि दुर्निवारत्वात्। न च पर्वहोमेषु यजमानासांनिध्ये नकर्तृत्वदाने नियमभंगः॥ नियमस्य क्रतौ भार्योपागमन
स्य वसांनिध्ये शक्तिमत्वे च प्रवृत्तेः॥ तस्मादनापदि अस्तोदयकालमनादृत्य प्रदोषसंगवकाले जुह्वतो स्वस्य सांनिध्ये शक्तो च सत्यामृत्विगा
दिद्वारा जुह्वतो चमस्व द्रव्येस्तति प्रतिनिधिद्रव्येण जुह्वतामि वृसर्वप्रायश्चित्तं सिद्धं॥ पर्वणि तु स्वयमजुह्वतो विशेषप्रायश्चित्तं बृहस्पतिराह
॥ आहिताग्निरुपस्थानं न कुर्यात् यस्तु पर्वणि। ऋतौ न गच्छेद्भार्यां वा सोऽपि कृच्छ्रार्धमाचरेत्॥ श्रौते कर्मणि तत्कालस्नातः शुद्धिमवाप्नुयादिति स्मृ
तेः न स्वत्रसूतकिनः कर्मनिमित्ते स्नानं विधीयते॥ तस्याग्निहोत्रहोमे स्नानं त्रिषवणकुर्युर्यत्वादेवाग्निहोत्रिण इति आश्वलायनोक्ताशौचत्वात्
॥ दूष्यगत्वेनस्नानादिपञ्चकविधानात्॥ किंतु स्नातस्य यजमानस्य कर्मकाले॥ कर्मकालं यावच्छुद्धिर्विधीयते॥ सा च स्नानमात्रेन तु कर्मणी॥
ति विज्ञानेश्वरः॥ तन्निर्णयं॥ कर्म वैतानिकं कार्यं स्नानोपस्पर्शनात्स्वयमिति हारीतोक्तेः॥ दर्शे च पूर्णमासे च कर्म वैतानिकं च यत्॥ सूतके पित्यजेन्मोहा
त्प्रायश्चित्ती यते द्विज इति॥ मरीचिना कर्मपरित्यागे दोषाभिधानाच्च॥ जन्महान्योर्वितानस्य कर्मत्यागो न विद्यते॥ शालाग्नौ केवलो होमः कार्य एवा
न्यगोत्रजैरिति॥ जाबालिना व्यवस्थापनाच्च॥ श्रौते कर्मणि तत्कालं॥ होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वेति॥ त्रिकांडमंडनः॥ एजो दोषे समस्तत्र

१०८ 108 सूतके मृतके पि वा ॥ नित्यं नैमित्तिकं कुर्यात्काम्यं कर्म न किंचनेति ॥ अत एव जातेष्टिमपि सूतिसूतकेऽकेचिदाहुः ॥ होमार्थमल्लिकाकुशलो ग्राह्यः ॥ तदा
ह कात्यायनः प्राहुर्नाल्पविद्यो न बालिशः ॥ होतास्याद्ग्निहोत्रस्य नार्तो नास्नातकस्तथा ॥ नाकेहिपतंत्येतेन तु कृतः स च पपतेत् ॥ तस्मादेतानकुशलो
होतास्यादद्वृद्ध्याऽगदइतिगोपालः ॥ अल्पविद्योऽल्पवेदविदो बालो हुते पत्न्या हुते पि वा । जुहुयाद्ग्निहोत्रं च लौकिकाग्नाव नापदि । विहृतस्तान्याहुतिभिः कार्यपू
र्णाहुतीष्टिकेति ॥ पूर्णाहुत्यंतिश्चतुर्गृहीतेन मनस्वतीहोम इति विवरणकारः ॥ इष्टिस्तु मतीतिबोधायनः ॥ पूर्णाहुत्यातेनुमतीष्टिसमुच्चयइ य
इत्यर्थः इदं चानापद्विषयं ॥ आपदि तु ब्राह्मणमात्रस्यार्त्विज्यार्थं वरणे अनादिष्टप्रायश्चित्तेषु आज्यस्थाल्याः स्रुवेणोपहत्य जुहोति ॥ प्रजाप
तये स्वाहेति प्राजापत्यगणस्यानुष्ठानं ॥ कुशलेनापि कृत्विजो मयासीन्निषेधेन होतव्यं ॥ असममस्त्वं तु दंपत्योर्होतव्यं नर्त्विगादिना ॥ दंपत्योरप्य
समक्षं तु हुतमप्यहुतं भवेदिति कात्यायनवचनात् ॥ यदि तु तत्पुनः प्रयोगं तदस्मन्नरसांन्निधे न कुर्यादिति ॥ अथ स्नानं विनाग्निहोत्रकरणे प्रा०
॥ तत्रैतरेयब्राह्मणं ॥ तदाहुर्यस्याहिताग्निर्यदि स्नातस्यान्यतोग्निहोत्रं जुहुयात्तत्र का प्रायश्चित्तिरिति सोग्नये वरुणाय पावकाय पुरोडाशं निर्वपेत्तस्य
याज्यानुवाक्ये त्वं नो अग्ने वरुणस्य विद्वान् स त्वं नो अग्नेऽवमो भवोती त्याहुतिं वा हवनीये जुहुयाद्ग्नये वरुणाय स्वाहेति सा तत्र प्रायश्चित्तिरिति । अ
त्र तन्द्राष्यं । आहिताग्नेः स्नानमंतरेणाग्निहोत्रहोमे वरुणगुणयुक्तोग्निः पुरोडाशदेवतेति ॥ अत्र कुतूहलकारः । आहिताग्निरितिकर्तृरूपलक्ष
णं ॥ ब्राह्मणे प्रातर्यग्रहणात्प्रातःस्नानस्यैवेदं प्रायश्चित्तं । यत्तु स्नानं त्रिषवणं कुर्युः पैल्लादेवोग्निहोत्रिणः ॥ अन्नानुपयुक्तवान्नश्च शक्तितारिवत्सिद्धिता
इति विहितं शक्तमाहिताग्निप्रति सायंकालिकस्नाननतस्यानाचरणे तु सर्वं प्रायश्चित्तं ॥ यः सायं होमकर्त्ता स एव प्रातः पत्नी यो दृष्टं तदेव प्रातः ॥

पत्नापं द्रव्यं तदेव प्रातः ॥ कपालनाशने चैवमलिज्ञां च विपर्यये ॥ पवित्रनाशे वेदे च पालिकं चिन्मात्रमेदने ॥ आज्याहुतिश्च होतव्या व्याहृत्या प्रणवेन वेति पत्न्या
र्मैस्मृते: इदं ब्रह्मस्याप्युपलक्षणं ॥ यजमाने कर्तरि नायं नियमः । अत्र किंचिदुच्यते ॥ ब्राह्मणोक्तानामिष्टीनां तंत्रस्यानाम्नातत्वात् बोधायनोक्तं तत्र उक्तं
रूपां श्रुत्वादि च ग्राह्यं ॥ आश्वलायनोक्तं तत्तत्र समाम्नातास्त्वेव ॥ एवं ब्राह्मणोक्तास्त्विष्टिष्विति प्रतिभाति । अथेष्टिप्रयोगः ॥ स्नानं विनाग्निहोत्रहोम
करणजन्यदोषपरिहारार्थं वारुणेष्ट्या यक्ष्य इत्यादि ॥ वरुणः प्रधानदेवता ॥ द्रव्यं: ॥ अष्टौ कपालानि ॥ त्वंनो अग्ने वरुणस्य विद्वान् सत्वंनो अग्ने वमो
भवोतीति याज्यानुवाक्ये ॥ वरुणस्याहं धर्मम्माभ्यूयासं ॥ हिरण्यं दक्षिणा ॥ पार्वणहोमवत्तु धोकारणपुनराधानं भवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे
॥ अग्नये वरुणाय स्वाहा ॥ अग्नये वरुणायेदं० ॥ अपाकृताग्रयणनवान्नप्राशने प्रा० ॥ तत्रैतरेयब्राह्मणं ॥ तदाहुर्य आहिताग्निराग्रयणेनानिष्ट्वा न
वान्नं प्राश्नीयात्कातत्र प्रायश्चित्तिरिति सोग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये वैश्वानरो अजीजनत्पृष्टो दिवि पृष्टो अ
ग्निः पृथिव्यामित्याहुतिं वाहवनीये जुहुयादग्नये वैश्वानराय स्वाहेति सा तत्र प्रायश्चित्तिरिति । अत्र तन्द्राष्यां गृहेषु नवधान्ये समागते सत्याग्रयणेष्टिं कृ
त्वा यश्चान्नं भोक्तव्यं तस्यादृष्टकारणे वैश्वानरगुणयुक्तोग्निः पुरोडाशदेवतेति । अत्र प्रयोगः ॥ अकृताग्रयणनवान्नप्राशनजन्यदोषप० र्थं वैश्वान
रेष्ट्या यक्ष्य इत्यादि । अग्निर्वैश्वानरः प्रधानदेवता । द्रव्यं: । द्वादशकपालानि । वैश्वानरो अजीजनत् पृष्टो दिवि पृष्टो अग्निः पृथिव्यामिति याज्यानुवा
क्ये ॥ अग्नेर्वैश्वानरस्याहमन्नादः ॥ हिरण्यं दक्षिणा । पार्वणहोमवत्तु धोकारणपुनराधानं भवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे । अग्नये वैश्वा
नराय स्वाहा । अग्नये वैश्वानरायेदं० ॥ यागयोग्ययवश्यामाकव्रीहियवानां आग्रयणं विना भक्षणे दोषः ॥ नहीतयवादीनां भक्षणे इति गोपालवि

१०९ वरणं ॥ अथ स्वकीयाग्रयणमकृत्वान्यस्याग्रयणे कृते प्रा० ॥ तत्र त्रिकाण्डमण्डनकारः अकृताग्रयणोऽप्येवमन्यस्याग्रयणे स्वपमिति ॥ एवमित्यनेन नवान्नपतीकर्तव्ये
109 ति ॥ अथ सूतकान्नप्राशने प्रा० ॥ तत्रैतरेयब्राह्मणं । तदाहुर्य आहिताग्निर्यदि सूतकान्नं प्राश्नीयात्का तत्र प्रायश्चित्तिरिति सोऽग्नये तंतुमतेऽष्टाकपालं पुरोडाशं निर्व
पेत एपायाज्यानुवाक्ये तंतुं तन्वन्रजसो भानुमन्विह्यस्तानहोनस्यतनोतसोम्याद्रया हुतिं वाहवनीये जुहुयादग्नये तंतुमते स्वाहेति सा तत्र प्रायश्चित्तिरिति ॥ अ
त्र तन्माष्यं ॥ आहिताग्नेः सूतकान्नप्राशने तंतुमद्गुणकोऽग्निर्देवतेति ॥ सूतकस्वामिकान्नभोजने सूतकिस्पृष्टान्नभोजने च भवति ॥ न सपिंडान्नप्राशने
इति भाति ॥ अथ प्रयोगः ॥ इषिपक्षे सूतकान्नप्राशनजन्यदोषप० र्थं तंतुमतेष्टापक्ष्य इत्यादि ॥ अग्निस्तंतुमान्प्रधानदेवता ॥ उच्चैः ॥ अष्टौ कपालानि ॥ तं
तुं तन्वन्रजसो भानुमन्विह्यस्तानहोनस्यतनोतसो इति याज्यानुवाक्ये । अग्नेस्तंतुमतोऽहमन्नादः । अत्र बौधायनमतात् एवं दक्षिणा । पार्वणहोमचतुर्धा
करणपुनरालंभवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे ॥ अग्नये तंतुमते स्वाहा ॥ अग्नये तंतुमत इदं० ॥ अथ शत्रूणामन्नप्राशने प्रा० ॥ तत्राश्वलायनः ॥ वै
श्वानरः पविमतानामन्नभोजन इति सूत्रं ॥ विमता विमनस्काः शत्रव इत्यर्थः ॥ द्विषदन्नं यद्याहिताग्निर्भुंजीत तदा वैश्वानरायेष्टिः कार्येति वृत्तिः ॥ अत्र प्रयोगः
इषिपक्षे विमतान्नभोजनजन्यदोषप० र्थं वैश्वानरेष्ट्या यक्ष्ये इत्यादि । अग्निर्वैश्वानरः प्रधानदेवता ॥ उपांशु । द्वादशकपालानि । वैश्वानरो अजीजन
त्पृष्टो दिवि पृष्टो अग्निः पृथिव्यामिति याज्यानुवाक्ये ॥ अग्नेर्वैश्वानरस्याहं शुचिः पूतः ॥ हिरण्यं दक्षिणा । पार्वणहोमचतुर्धाकरणपुनरालंभवर्जं
सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे । अग्नये वैश्वानराय स्वाहा ॥ अग्नये वैश्वानरायेदं० ॥ अथ यमलजननप्रा० ॥ तत्राश्वलायनः ॥ यस्य भार्या गौर्वा
यमौ जनयेदिषिर्महत इति सूत्रं ॥ महतो स्वामिष्टो देवतेति वृत्तिः ॥ अत्र प्रयोगः ॥ इषिपक्षे भार्यायां गवि वा यमलजननजन्यदोषप० र्थं मारुत्येष्ट्या य

स्यइत्यादि॥ महतः प्रधानदेवता उपांशु॥ सप्तकपालानि॥ महतोयस्य हि क्षये एइ वेदचरमा अर्हेवेति याज्यानुवाक्ये॥ महतामहं प्राणे चर्द्धामं॥ हिरण्यं दक्षि
णा॥ पार्वणहोमचतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत्॥ अत्रदीपकारः॥ यदि यमयोरेकस्य द्वयोर्वा पुंस्त्वं भवति तदा वैश्वानरमिष्टिं कृत्वा माहती
मिष्टिं निर्वपेत्॥ यद्युभयोरपि स्त्रीत्वं तदा माहत्येव न वैश्वानरी॥ यदि यमौ नी वैवस्त्रियेयातां तदापी यं जन्मनिमित्ता माहती षि: कर्तव्या न त्वानेष्टिरिति। यदि
यमौ जातौ म्रियेतां तदापि जननिमित्ता माहती षि: कर्तव्येति॥ अत्र विशेषो वाजपेयीकारेण॥ यमजातयोरेकस्योभयस्य वा हमरणं भवति तदापी षि
र्भवतीत्याहुरिति॥ अथ यन्त्रेण पशुमरणे प्रा०॥ तत्र कुतूहलकारः॥ यस्याहिताग्नेः पशून्व्याघ्रो मारयति तत्र शान्त्यर्थं रौद्रं वास्तुमयं चरुं निर्वपेत्॥ वास्तुः शा
कः॥ चाकवत बीजानि निर्वपेदित्यर्थः॥ रौद्र आग्नेयविकारः॥ त्वमग्ने रुद्रो असुर आवो राजानमिति याज्यानुवाक्ये इति॥ अत्र प्रयोगः॥ यन्त्रेण पशुमरणे ज
न्यदो० र्थं रौद्रे स्थापयस्य इत्यादि॥ रुद्रः प्रधानदेवता॥ उपांशु॥ पात्रप्रयोगकाले चरुस्थालीमासादयेत्॥ त्वमग्ने रुद्रो असुर आवो राजानमिति याज्यानु
वाक्ये॥ रुद्रस्याहं प्रजपावेत्यनुमंत्रणं॥ हिरण्यं दक्षिणा॥ पार्वणहोमचतुर्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत्॥ पूर्णाहुतिपक्षे रुद्रायस्वाहा।
रुद्रायेदं०॥ अथ पूर्वेव पक्षपित्रादीनां ज्ञातीनां वा मरणे नृप्रा०॥ तत्र कुतूहले शतदूपीकारः॥ यस्य यजमानस्य पूर्वेव पक्षे वर्द्धः पित्रादयो ज्ञातयो वाप
रवपक्षः पुत्रादयो वा क्षांतत्येनष्श्रियंते तदा क्षामवती कार्येति॥ तस्याः प्रयोगः॥ क्षामवते स्थापयस्य इत्यादि॥ अग्निः क्षामवान्प्रधानदेवता। अष्टौकपा
लानि। अक्रंददग्निस्तनयन्निव द्यौस्त्वं वसनि वैष्णवी कहोतरिति याज्यानुवाक्ये॥ अग्नेः क्षामवतो हमन्नादः॥ आन्वाहार्यो दक्षिणा। पार्वणहोमचतु
र्धाकरणपुनरालंभवर्जं सर्वं पौर्णमासवत्॥ अत्र प्रदीपकारः॥ पित्रादिषु वक्षेषु सत्सु पुत्रादयो यदि म्रियंते तदैतन्नापश्चितमिति॥ पूर्णाहुतिपक्षे।

११० 110 अग्नये क्षामवते स्वाहा ॥ अग्नये क्षामवत इदं० ॥ अथ व्रतलोपप्रा० ॥ तत्राश्वलायनः ॥ व्रतातिपत्तौ व्रतपतये ॥ त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानी
ति सूत्रद्वयं ॥ यस्मिन्कर्मणि यानि चोद्यन्ते व्रतशब्देन धर्मशब्देन वा तत्र तेषाम प्रतिपत्तौ एषेष्टिः कार्येति वृत्तिः ॥ अथ प्रयोगः ॥ यस्मिन्कस्मिंश्चित्कर्मणि
यानि व्रतशब्दे धर्मशब्दे श्च विहितानि तेषां लोपे व्रातपती पूर्णाहुतिं वा कुर्यात् ॥ इष्टिपक्षे प्रयोगः ॥ व्रतलोपजन्यदोष० व्रातपतेष्ट्याय क्ष्ये इत्यादि ॥ अ
ग्निर्व्रतपतिः प्रधानदेवता । उपांशु ॥ अष्टौ कपालानि ॥ त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीति याज्यानुवाक्ये । अग्ने व्रतपते इह मन्त्रादः ॥ हिरण्यं द
क्षिणा ॥ पार्वणहोमचतुर्धाकरणप्रस्तरप्रहरणवर्जं सर्वं पौर्णमासवत् ॥ पूर्णाहुतिपक्षे ॥ अग्नये व्रतपतये स्वाहा ॥ अग्नये व्रतपतय इदं० ॥ अन्वाधा
नोत्तरं यजमानो ग्रामं गत्वा तत्र वसेत् तत्रापि व्रातपती ॥ प्रधानयागात्पूर्वं समागतश्चेत् प्रायश्चित्तरूपेण दाशवतदेवतं त्रयमुपजीव्य निर्वापादि कुर्यादिति । पा
गका ले व्रातपतिमिष्ट्वा प्रयाजादि याग इति केशवीकारः ॥ अथाश्रुपतनप्रा० ॥ तत्राश्वलायनः ॥ एषैवाश्रुपात इति सूत्रं ॥ त्वमग्ने व्रतभृच्छुचिरग्ने दे
वान्तवे दैति अनुवर्तिसूत्रे । अत्र आत्मीयाश्रुपाते । दुःखेनाश्रुपाते ॥ न धूमादिनेत्यर्थः ॥ एतद्दर्शपूर्णमासयोस्तत्र कृत्येषु न भवति ॥ ब्राह्मणे उपवे
सथे श्रु कुर्वीतेति दर्शनादिति प्रयमस्य वर्तिः ॥ अनुवर्तिसूत्रस्य तु पूर्वोक्ता तेया ॥ हर्षाश्रुपाते इदं न भवतीति देवत्रातभाष्यकारः । अथ प्रयोगः ॥
दर्शपूर्णमासयोस्तद्विकारेषु तन्त्रप्रक्रान्ते दुःखेनाश्रुपतने व्रातमतेष्टिः पूर्णाहुतिर्वा ॥ इष्टिपक्षे दुःखेनाश्रुपतनजन्यदोष० व्रतभृतेष्ट्याय क्ष्ये इत्या
दि । अग्निर्व्रतभृत्प्रधानदेवता ॥ उपांशु ॥ अष्टौ कपालानि ॥ त्वमग्ने व्रतभृच्छुचिर्व्रतानि बिभ्रद्व्रतपा इति याज्यानुवाक्ये ॥ अग्ने व्रतभृतो इह मन्त्रादः ॥ ११०
हिरण्यं दक्षिणा । पार्वणहोमचतुर्धाकरणप्रस्तरप्रहरणवर्जं सर्वं पौर्णमासवत् । पूर्णाहुतिपक्षे अग्नये व्रतभृते स्वाहा । अग्नये व्रतभृत इदं० ॥ अ

पपवित्रनाशप्रा०॥ तत्रैतरेयं ब्राह्मणं॥ तदाहुर्य आहिताग्निर्यदि पवित्रं नश्येत्का तत्र प्रायश्चित्तिरिति सोग्नये पवित्रवते ष्टाकपालं पुरोडाशं निर्वपेत्तस्यया
ज्यानुवाक्ये पवित्रं ते विततं ब्रह्मणस्पते तपोष्पवित्रं विततं दिवस्पद इत्याहुतिं वा हवनीये जुहुयादग्नये पवित्रवते स्वाहेति सा तत्र प्रायश्चित्तिरिति॥ अत्र त
न्त्राष्यं॥ आहिताग्नेः पवित्रनाशे पवित्रवद्गुणयुक्तोग्निः पुरोडाशदेवतेति॥ अथ प्रयोगः॥ पवित्रनाशजन्यदो०र्थं पवित्रवदिष्ट्यापक्ष्य इत्यादि॥ अग्निः
पवित्रवान्प्रधानदेवता। उक्तैः। अष्टौ कपालानि। पवित्रं ते विततं ब्रह्मणस्पते तपोष्पवित्रं विततं दिवस्पद इति याज्यानुवाक्ये॥ अग्नेः पवित्रवतो हमन्वादः।
हिरण्यं दक्षिणा॥ पार्वणहोमचतुर्थीकरणपुनरालम्भवर्ज्जं सर्वं पौर्णमासवत्॥ पूर्णाहुतिपक्षे॥ अग्नये पवित्रवते स्वाहा॥ अग्नये पवित्रवत इदं०॥
अथ हिरण्यनाशप्रा०॥ तत्रैतरेयं ब्राह्मणं॥ तदाहुर्य आहिताग्निर्यदि हिरण्यं नश्येत्का तत्र प्रायश्चित्तिरिति सोग्नये हिरण्यवते ष्टाकपालं पुरोडाशं नि
र्वपेत्तस्य याज्यानुवाक्ये हिरण्यकेशो रजसो विसार आ ते सुपर्णा अमिनन्तं एवैरित्याहुतिं वा हवनीये जुहुयादग्नये हिरण्यवते ष्टा स्वाहेति सा तत्र प्राय
श्चित्तिरिति॥ अत्र तन्त्राष्यं॥ आहिताग्नेर्हिरण्यनाशे हिरण्यवद्गुणयुक्तोग्निः पुरोडाशदेवतेति॥ अत्र शतमानप्रमिते हिरण्यमिति प्रतिभाति॥ अ
थ प्रयोगः॥ हिरण्यनाशजन्यदो०र्थं हिरण्यवदिष्ट्यापक्षे इत्यादि॥ अग्निर्हिरण्यवान्प्रधानदेवता॥ उक्तैः॥ अष्टौ कपालानि॥ हिरण्यकेशो रजसो
विसार आ ते सुपर्णा अमिनन्तं एवैरिति याज्यानुवाक्ये॥ अग्नेर्हिरण्यवतो हमन्वादः॥ पार्वणहोमचतुर्थीकरणपुनरालम्भवर्ज्जं सर्वं पौर्णमास
वत्॥ पूर्णाहुतिपक्षे॥ अग्नये हिरण्यवते स्वाहा॥ अग्नये हिरण्यवत इदं०॥ अन्वाधानानन्तरमस्मिन्नाकाले प्रपाणप्राप्नौ मा०॥ तत्राश्वलाय
नः॥ अन्वाहिताग्नेः प्रयाणोपपत्तौ पयगाग्नीन्त्रपेयुः॥१॥ नमस्तं ना अंगिरस्त्वमेतिवाज्याहुतिं हुत्वा समारोपयेत्॥२॥ अथ यं तेयोनिर्ऋत्विय इत्य

१११ रणी गार्हपत्ये प्रतितपेत् ॥३॥ पाणी वा या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा वसूनि कृण्वन्नर्यो पुरूणि यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव
आजायमान इति ।४। एवमनन्वाहिताग्निरुक्ता ।५। यदि पाण्योररणी संस्पृश्य मंथयेत्प्रत्यवरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् ॥ प्रजां पु
ष्टिं रयिमस्मासु धेह्यभव यजमानाय शंयोरिति षट् सूत्राणि ।६। अन्वाहिताः अग्नयो यस्य सोऽयमन्वाहिताग्निः ॥ इष्टिमध्य इत्यर्थः ॥ तस्य प्रयाणो
पत्तौ अग्नीन्यथाकृतं नयेयुः प्रत्यक्षं च ॥ यथागृहणमस्य स्वर्गार्थे ॥ उपपत्ति वचनमनात्माधीनगमनसूचनार्थं ॥ चौरव्याघ्रादिभयात् क्षेममप्यत्र वक्तुम
शक्यमिति यदि गमनमापद्येत तदेष्टिमध्येऽप्यनेन प्रकारेणाग्नीन् गृहीत्वा गंतव्यं ॥ अन्यथा कर्ममध्ये न गंतव्यमित्येवमर्थमुपपत्तिवचनमिति प्रथमसूत्रस्य
वृत्तिः ॥ एतामाहुतिं हुत्वा समारोप्य गंतव्यमित्यर्थः ॥ प्रत्यक्षनयने आहुतिहोमो नास्तीति द्वितीयस्य ॥ समारोपणस्वरूपमाह ॥ पूर्वेण वृद्धे अरणी गार्हपत्ये
प्रतितपेत् ॥ नाग्न्यंतरे ॥ यदि दक्षिणाग्निर्भिन्नयोनिस्तदा तस्यारण्यंतरे तेनैव मंत्रेण समारोपणं भवतीति तृतीयस्य ॥ द्वे पाणी गार्हपत्ये सकृदेव प्रतितपेत्
॥ द्वयोरपि समारोपणं यजमान एव कुर्यात् ॥ पूर्वमंत्रस्य प्रत्यगाशीष्ट्वात् ॥ उत्तरस्य चात्मानमिति लिंगात् कर्त्रंतरविधानाभावाच्चेति चतुर्थस्य ॥ समारोप्य
गमनयात्रां गच्छेदिति शेषः ॥ अतोऽनन्वाहिताग्नेः प्रत्यक्षनयनं नास्ति प्रयाणकाले विरहार्ददेशेऽपि पत्न्यादिभिः संचारयितव्येऽनुखूमतासंचारयितव्यः ॥ अ
विहृतस्य गार्हपत्यस्यैव नियमः ॥ विहृतानामपि सर्वेषां युगपन्नयनेऽपि भवति ॥ नैकैकस्य नयने ॥ अनसा नयने क्वचिदपि उल्मुकनियमो नास्ति ॥ अ
नेनैव प्रकारेणाग्नीन् समारोपयेत् ॥ अन्यथा नयनेऽग्नीनां लौकिकत्वाशंका स्यादिति पंचमस्य ॥ अरण्योर्हस्तयोर्वा समारोपणमुक्तं तत्रावरोहणकाले य
जमानः प्रत्यवरोह जातवेदः इत्येतं मंत्रमुक्त्वा मंत्रान्ते तयोररण्योरग्निं मंथयेत् ॥ हस्तयोर्वा मंथयेत् ॥ एवमरण्योः समारोपणे ॥ यदि हस्तयोः समारोपणं स्या

तदाएतेन मंत्रेण पाणी संस्पृश्य संमृषेत् ॥ यजमानो मंथनकालेऽपावरणेनेन्मतावदरणी संस्पृशन्नेवास्ते ॥ मथ्यमानेऽग्नौ यद्युत्पादनसमर्थः प्रयत्नो निष्फल
:स्यात् तदा पुनरएं भावयत्सं समंत्र आवर्तयेदित्यर्थः ॥ एवं सर्वथा पुनःपुनरावर्तयेत् ॥ अग्न्यर्थे हणार्थं मरणीं मंथयेदित्येकोऽर्थः ॥ परिपाण्योः समारोपयेत
दैवमवरोहयेत् ॥ पाणिभ्यामरणी अनेन मंत्रेण संस्पृश्य संमृषेदित्यपरोऽर्थ इति षष्ठस्यवृत्तिः ॥ यः पगस्त्रहणं एकस्यानेकाग्निनयनं मा भूदिति त्वेवम
र्थमिति दिवत्रातः ॥ नयेयुरिति बहुवचनं पुरुषांतरमापूर्यर्थं ॥ पुरुषांतरे नीयमानेष्वग्निषु पत्नी यजमानौ न्वारभेयातां ॥ अन्वारंभप्रकारो नेधा दि
लक्षपान्व युत एधेयपनरधान प्रकारणोक्ते प : अथ प्रयोगः ॥ अन्वाधानानंतरमिष्टिसमापनात् पूर्वं प्रयाणोपपत्तौ व्रीह्यादिपकृपयकृपात्रे स्था
पयित्वा सपत्नीकेन यजमानेनान्वारब्धक्रत्विजो अग्नीन्नयेयुः ॥ यदूणाहपत्ये आज्यं संस्कृत्य जान्वाच्याहवनीये स्रुवेणाज्यं जुहोति ॥ एषिकाच्य सत्वेतेन
वतुम्यंता ० येमिस्वाहा । अग्निर्देवता ततो दाक्षिणेनोत्तरारणिस्थेनोधरारणिमारोपयाहूयत्यै प्रतितपति । यजमानः अयं ते ० गिरिति नाज्यं तरोयदि
दाक्षिणाग्निर्भिन्नयोनिस्तदा तस्याप्यरण्यं तरेतेनैव मंत्रेणेति । अन्वाहितानामजस्राणां वा गार्हपत्ये प्रतितपनमात्रेणैव त्रयाणां समारोपणं कृतं भवती
ति मिद्धांतभाष्यकाराः ॥ देवत्रातस्तु अन्वाहितेषु जस्रेषु वाध्वर्युर्यजमानो वा त्रिष्वग्निषु क्रमेण समंत्रं प्रकृतारणी समारोपयेत् ॥ आज्याहुतिं ब्रह्मे
वजुहुयात् ॥ तस्मा तेपि में पनस्यानारदतिः ॥ अनुकल्लादिति ॥ आज्याहुतिं यजमानो जुहुयादिति मिद्धांतभाष्यकाराः ॥ अत्रापि पूर्ववदन्वारंभः ॥ आहुतिं
हुत्वा पाणी वा प्रतितपेत् ॥ या ते अग्ने यज्ञियेति एवमेव होमार्थं विहृतेष्वग्निषु प्रयाण प्राप्ते समारोप्य व गतेत्यं तत्र प्रत्यग्नि प्रतितपनं नेति केचित् ॥ भ
वतीत्यस्येत नो निहपदत्र देशं गत्वा विहृताः कल्पयित्वाग्नीन् स्थापयेन्मंथनयक्षे मंथयेत् प्रत्यवरोह जातवेदः पुनस्त्वं ० प्रजां पुष्टिं ० शयो रिति जातमग्निमा

११२ र्हपत्यापतनेनिधायाग्निद्वयं प्रणीय गार्हपत्यआज्यं संस्कृत्याहवनीये सर्वप्रायश्चित्तं हुत्वा कृतां नात्मन्यरोत।। पाणिप्रतपनपक्षेतु मंथनमारभ्य यावदग्निजन्म ताव
दरणीस्पर्शनेनवास्ते समानमन्यत्पूर्वेण।। अन्यदागमनेप्ययमेव विधिरिति देवत्रातः।। अनन्वाहितानेश्च सभार्यस्याग्निभिः सह गमनप्रसक्तौ नाग्नीनां प्रत्य
क्षनयनमितिसिद्धान्तमाप्यवृत्तिकृतौ समारोप्य जिगमिषायामपि न तुष्यं तादित्याहुरिति:।। सर्वप्रायश्चित्तान्तं पूर्ववत्।। पाणिसमारोपो यजमानएवनान्यस्येतिस
र्वसंमतं।। अरणीसमारोपोपि यजमानस्यएवेतिवृत्तिकृत्।। अत्र केशवीकाः।। अपरहितदेशंगत्वा मथित्वाग्नीन् हुत्वा कृतांतादारभ्येष्टिं समापयेत्।। अ
परहितदेशप्रापणात्पूर्वं यदीष्टिकालो तिपन्नस्तत्र निर्वापात्पूर्वं गमनं चेन्निर्वापकाले अग्नये पथिकृते जुष्टं निर्वपामीत्याग्नेयं निरुप्य यथापूर्वमितराणि
हवींषि निर्वपति।। निर्वापादूर्ध्वं गमनं चेत्स्विष्टकृतो प्राग्न्यानुवाके पाथिकृती कुर्यात्।। अथानन्वाहिताग्नेः पत्न्या सह प्रवासस्य प्रसक्तौ प्रयोगः यजमानं
पक्षहोमाद्यन्यतमविधिना समग्निहोत्राणि समस्य हुत्वा अनलोक्षरणायक्षपारप्यरण्योर्गार्हपत्यमेव समारोपविधिना समारोप्यपूर्वोक्तमवेक्ष्य नद्यैः
संवेक्ष्य पत्न्या सह प्रवसेत।। अन्वारंभपक्षेगमनागमनकाले वास्तुसीमातिक्रमणे ग्रामसीमातिक्रमणे च सभार्यो न्यतरो वान्वारभ्य प्रवसेत्।। पूर्वं
प्राप्तो प्रत्यवरोह विधिना प्रत्यवरुह्य सायंप्रातरग्निहोत्रं हुत्वा कालमप्राप्तामिष्टिं कुर्यात्।। एवमेव यावत्समापनं भवति इति।। अथाज्ञानादन्यादिषु यज
ने अस्याग्निषु अन्येन यजनेन च प्रा०।। तत्राश्वलायनः।। यदि वान्यस्याग्निषु यजेत यदि वास्यान्योग्निषु यजेतेति सूत्रं।। अन्यस्याग्निषु यागं कुर्यात्।। अस्या
ग्निषु अन्यो वा यजेतेति वृत्तिः।। अत्र प्रयोगः।। अन्यस्याग्निषु यागे कृते अन्येनास्याग्निषु यागे कृते वा तदानिमित्तं मुहूर्तं पथिकृतीं कुर्यात्।। तस्याः प्रयो
ग आश्वलायनरीत्या पूर्वोक्तो ज्ञेयः।। एवं नैमित्तिकं कृत्वा मयोः स्वाग्निषु दर्शपूर्णमासादियागः कर्तव्य इति केशवीशतद्वयीकाराः अथात्मसमारोपण

विधिः ॥ तत्र बोधायनः ॥ जीर्णस्याशक्तस्याग्निहोत्रे चेष्टायामात्मसमारोपणं विद्यते इत्यात्मनि समारूढेष्वग्निषु न खादेन्न पिबेन्नोपरि शय्यायां शयीत नाश्रु
निमन्त्यान्न मैथुनं व्रजेत्कामं खादेत्कामं पिबेत्कामं तेनोपरि शय्यायां शयीत न त्वेवाश्रु निमन्त्यान्न मैथुनं व्रजेदिति प्रक्षालितपाणिपाद अप आचम्य प्रा
ङ्मुख उपविश्याग्निहोत्रयजुषा पावमानत्रतपिता तूष्णीं भूयो व्रतपे प्रजापतिं मनसा ध्यायन्निति त्वेवमेवोपासीनाशनमोक्षणादिति । अत्र प्रदीपकारः ॥
अग्निहोत्रस्य यावज्जीवविधानाज्ज्वरायाद्याधिना दरिद्रत्वेन वाग्निहोत्रकृतेमशक्नुवन्यजमानो याते अग्नेः सन्निपातनूरीत्यात्मसमारोपणं कुर्यात् ॥ प्रणय
नयक्षेगार्हपत्यमेव त्रिर्जिघ्रेत् ॥ अजस्रपक्षे त्र्यमपि त्रिस्त्रिरेकैकं समाजिघ्रेत् ॥ एवमात्मनि समारूढेषु न खादेन्न पिबेन्नोपरि शय्यायां शयीत नाश्रु नि
मन्त्येत न मैथुनं व्रजेत् इत्येतदनापद्विषयं ॥ आपदि मैथुनमन्त्रने निषेधः ॥ नियमातिक्रमे मनस्वती मन्त्रजपः प्रायश्चित्तं ॥ अग्निहोत्रहोमकाले तु यः प्रक्षा
लितपाणिपादो यजमानो य आचम्य प्राङ्मुख उपविश्याग्निहोत्रद्रव्यं होममन्त्रेण प्रथममस्त्वं भक्षयित्वा प्रजापतिं मनसा ध्यायेत् तूष्णीं भूयो भक्षयति ॥ अग्नि
होत्रविषयेऽतिजीर्ण आशरणयानादेवं कुर्यात् ॥ व्याधिपीडितादरिद्रश्च व्याधिदरिद्रत्वापगमे यीन्यावरोह जातवेदः इत्युपावरोहयन्नः काले काजेऽग्निहो
त्रं जुहुयात् ॥ अयं प्रसंगादात्मसमारोपणोक्तं तद्विहितधर्मलोपप्रा० ॥ तत्र बौधायनः ॥ अथ यद्यात्मनि समारूढेषु व्रत्यं चरेद्रणि विनाशो न दोषो वाभ
वेदग्न्याधेयमिति ॥ अत्र प्रदीपः ॥ आत्मनि समारूढेष्वग्निषु नाश्रु निमन्त्येन्न मैथुनं व्रजेदमेध्य शूद्रादिस्पर्शे अव्रत्यचरणे चाप्ययोनश्यन्तीति अग्न्या
धेयं कर्तव्यं ॥ अयं प्रसंगात्समारूढेष्वग्नौ द्विविधाशौचपाते किं चेदुच्यते ॥ समारूढेऽग्नौ द्विविधाशौचपाते प्रत्यवरोहपूर्वको होमो न कार्य इति केषांचिन्मु
तं ॥ किं तु पुनराधानमेव ॥ समारोपप्रत्यवरोहयोराशौचेऽप्यवादाभावात् ॥ अनन्यकर्तृकत्वाच्च मम व्यैव होम आशौचेऽपीत्यन्येषां मतं ॥ होमविधिबले

११३ नैव प्रत्यवरोहसिद्धेः ॥ तेन समारोपोऽपि कर्तव्य इति च ॥ होमविधिस्तु छंदोगपरिशिष्टे उक्तः ॥ आशौचे च प्रकृत्य ॥ होमः श्रौतो हि कर्तव्यः ॥ शुष्कान्नेन फलेन वेति ॥ त
113 था हारीतेनोक्तं ॥ दर्शे च पौर्णमासे च कर्म वैतानिकं च यत् ॥ सूतके तु न्यजेन्मोहात् प्रायश्चित्ती भवेद्द्विज इति ॥ मरीचिनाप्युक्तं ॥ जन्महान्योर्वितानस्य कर्मत्यागो न
विद्यते ॥ अन्यत्रापि ॥ स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके ॥ श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् ॥ श्रौतेति ॥ अग्निहोत्रपसाध्यावश्यकानां नित्य
नैमित्तिकाग्निहोत्रादीनां न पर्युदासस्त्वपि ग्रंथांतरे ॥ अन्यत्रापि ॥ जातो दोषे समुत्पन्ने सूतके मृतकेऽपि वा ॥ नित्यं नैमित्तिकं कुर्यात् काम्यं कर्म न किंचनेति
॥ अनेनैवागतिकप्रवासगमनागमनेऽपि न दोषः ॥ पत्नुर जातो दोषे समुत्पन्ने सूतके मृतके पि वा ॥ प्रवसन्नग्निमान्विप्रः पुनराधानमर्हतीति वचनं ॥ तदग्नि
सहितस्य गमननिषेधकं ॥ अन्यथाग्निमत्यद्दैवेष्प प्यात् ॥ पानिसूतकादौ प्रवासविधानादिनिषेधकानि कुत्रचित्केश्चित्पठ्यंते वचनानि तानि निस्मार्तविष
पाणीति बोध्यमिति ॥ रुद्रदत्तभाष्यकारोऽप्येवमेवेति ॥ अपपत्न्याज्जनस्वत्वापांस्समारोपप्रत्यवरोहौ निमित्तप्राप्तौ कर्तव्यावेव ॥ समारोपप्रत्यवरोहयोः प
त्नीसहत्वाभावात् ॥ स देशादेशान्तरेऽग्निनयनेनात्मे एव संबंधः ॥ सोऽपि पाक्षिकः ॥ शिष्टाचारोऽप्येवमेवेति ॥ अथ पर्वणि समाहुतेऽग्नावाधानप्रायश्चित्तं क
र्तव्यमिति बौधायनप्रायश्चित्तचंद्रिकायामुक्तं तदनुसारेणेदानीं तनग्रंथकारैरपि लिखितं तस्य मूलमन्वेषणीयं ॥ पर्वणि प्रत्यवरोहस्त्वार्षिक एव ॥ कदा
चिद्दैवान्मानुषाद्वा पराधात्तन्न कृतः तदा कालातीते प्रत्यवरोहं कृत्वाभ्लापनरीत्या बौधायनरीत्यानांतरितानि होत्रप्रायश्चित्तं कृत्वा तीतेन योगमासादि
कं कर्तव्यं ॥ तत्र बौधायनकरणे भ्रस्यादपश्च तस्य दृष्यपः कर्तव्या इति भाति ॥ अथाग्निहितस्य धनार्जनार्थे सोपपणाचार्योत्तमा विद्याकार्यार्थे वा प्रवा
स उच्यते ॥ तत्र कुतूहलकोपः ॥ धनार्जनार्थे विद्यार्थे वा प्रवासविधिकीर्ष्ये इति संकल्प्योक्तविधिनोपस्थानं कृत्वा प्रवसेत् ॥ यदि दैवान्मानुषाद्वानिमि

नातःप्रवासो यस्यानमकृत्वागच्छेत्तदा यत्र स्थितस्तत्रैव उत्पत्तिक्रमेणाग्नीध्यालाभ्यभिमुख उपतिष्ठेत॥ इहैव सन्तत्र सन्तं त्वाग्ने॰ बिभर्मि॥ तिरोमा सन्तं॰
नरोणोपतिष्ठेत इति ततो यथार्थं गच्छेदिति॥ अथ पसमाह ऐरग्नौ प्रवासप्राप्ते त्रिक्रांडुमं ऽनकारः॥ अरण्यारोपितोप्यग्निरूपं क्रमं त्रतः॥ उपस्थेयो ममणे
यत्वा भूयस्मसंछत्रवत्क्लिबदिति॥ अयपयन्नायुयस्या अग्निविषये पक्षान्तरमप्युक्तं तेनैव। यद्वारणि गते वह्नौ प्रवसेदा व्रजेत वा॥ उपपन्नाप्युपस्थानं ना
स्ति कोषीतकीश्रुतिरिति॥ प्रवसितस्य पर्वप्राप्तो वपनं॥ अमांसमनामिषमित्यादि नियमाश्चमन्तिब्रह्मचर्यं च॥ अग्निसमीपस्थापत्नीनियतास
ती अग्नीन्पारिरक्षमाणा कृत्विगादिनाग्निहोत्रपिंडपितृयज्ञे दर्शपूर्णमासौ आग्रयणं च कालप्राप्तं कारयेत्॥ नाग्रयणमित्येके॥ अथप्रसंगात् श्रीम
द्विद्वरामचन्द्रदीक्षितकृतप्रवसद्याजमानविचारः॥ प्रवसद्याजमानविषये द्वैधं॥ प्रवसतो यजमानस्येति सह स्माह बौधायनः॥ सह यजमानः खल्व
यं यजमानः प्रवसति स यत्र स्यात्तद्देशं ध्यायेत् स यद्यसगं स्थित आगच्छेत्कृतमनुमंत्रयन्क्रमौ तेन प्रक्रामेदित्यत्रो ह स्माह शालीकिर्यस्य घ युत्रो नेवा सो
वालं कर्मणे स्यात्तत्र प्रेक्षयेत्स यदि विसंस्थित आगच्छेत्कृता द्वायक्रामेन्नेवादियेतो मौल्वे वयजमानभागं प्राश्नीयानामिति॥ अस्यार्थः॥ प्रवसतोग्नि
पृकृ ग्रामात्ग्रामान्तरं गच्छतो यजमानस्य विषये विचारः॥ तत्र बौधायनमतं॥ प्रवसन्यजमानः स्वीयेन याजमानेन सह नैव गच्छति स्वामिनः प्रतिनिधेरभावात्
॥ तथा च यस्मिन्देशे यजमानस्तिष्ठति तत्रैव कर्मकाले सर्वं याजमानं जपेत्॥ अध्वर्युस्तु तत्तद्याजमानकाले प्रवासस्थितं यजमानं ध्यायेत्॥ तावतैव कर्मसा
ङ्गं भवतीति॥ तथा चापस्तंबः॥ प्रवसन्काले विहाराभिमुखो याजमानं जपति॥ प्राचो विष्णुक्रमानुक्रामति प्राङ् इदं त्यगोमतीं जपतीति॥ सत्याषाढस्त्व
यं विशेषमाह॥ एवं विहितं प्रवसतोपि याजमानं यस्मामस्य दिश्यग्नयो भवंति तां दिशमभिमुखो मंत्रान्जपति॥ अध्वर्युः कर्माणि करोत्यन्यान्यभिम

११४ र्शनात् यजमानो मंत्रं जपत्यन्यान्यान्यादेशनादिति ॥ अग्न्युपस्थानांते भाष्यकारश्चाह ॥ एवं विहितमेवास्य प्रवसतोप्यग्न्युपस्थानं भवति ॥ एतावंत्या नापानि
114 संस्थस्य कर्माण्यध्वर्युस्तानि कार्माण्यध्वर्युस्तानि कार्यो यजमानः कालेतांदिशमभिमुखो मंत्रान् जपेदिति ॥ हंस्यश्च कर्माणि विहाय संयुक्तानि कल्पयानी
त्यर्थः ॥ एतेन स्वाम्यर्थानां यथायथ त्याचमनादीनां यजमानकर्तृत्वतायोतिना ॥ यानि तु समंत्रकाणि ब्रह्मवरण चतुर्धाकरणव्यादेशनान्वाहार्यदानादीनि
तानि समंत्रकाण्येवाध्वर्युः कुर्यात् ॥ अयमत्र निष्कर्षः ॥ याजमानं त्रिविधं ॥ किंचिद्दृष्टार्थं केवलं यागमात्रनिर्वर्तकं ॥ तच्च द्विविधं ॥ समंत्रकं अमंत्रकं
च ॥ यथा ब्रह्मवरणं चतुर्धाकरणदानं दक्षिणादानं ब्राह्मणतर्पणप्रैषइतिएवं रूपाणि समंत्रकाणि दृष्टार्थानि ॥ अध्वर्य्वादिवरणं अग्न्यलंकरणप्रस्त
धारणं इडान्वारंभ इत्यादि अमंत्रकाणि दृष्टार्थानि ॥ ॥ किंचिद् दृष्टार्थं तस्मिन्नुक्तोत्पत्त्यर्थं यजमानेन कर्तव्यं यथा विष्णुक्रमादि समंत्रकं ॥ आंजना
द्यमंत्रकं ॥ किंचिदुभयार्थं यथाज्यावेक्षणयाज्ञ्यनुमंत्रणादि तत्र आज्यादिद्रव्यमंत्राणां शेषिते नानुसंधाय मंत्रोच्चारणानंतरं तदर्थं द्रव्येषु प्रोक्षणादिवत् का
र्यत्वं स्कारो जायते ॥ ततश्च संनिपातित्वाद् दृष्टार्थं ॥ अनुमंत्रणादिमंत्राणां प्रत्यगाशीष्ट्वात् स्वरूपतश्च जपमंत्रवत् मंत्रप्राधान्येन कारणमंत्रवत् क्रिया
प्राधान्याभावात् मंत्रोच्चारणाद् दृष्टार्थत्वं तदिदमुभयार्थमित्युच्यते ॥ तत्र दृष्टार्थान्यध्वर्युरेव करोति ॥ अदृष्टार्थानि तु यजमान एव ॥ उभयार्थानि तु तूष्णीम
ध्वर्युः कर्माणि करोति केवलं मंत्रानेव यजमानो जपतीति व्यवस्था ॥ अध्वर्योश्चानविधानं चैतदभिप्रायमेव ॥ यदि विसंस्थिते आरब्धे अपरिसमाप्ते च क
र्मणि प्रवासाद् यजमान आगच्छेत् कृतमनुमंत्र्य ततो विकृतं याजमानं कुर्यात् ॥ शालिकिः प्रवसन् यजमानः पत्रमंते वासि ने वा स्वकर्मणि नियुज्य प्रवसेत् ॥
न च स्वामिनः प्रतिनिधिर्नास्तीति शंक्यं सत्रे दीक्षिते प्रमीते तत्स्थाने नेदिष्ठ्यादिदीक्षादर्शनात् ॥ अस्मिन् पक्षे प्रवसतो न किंचिद् यजमानकर्म ॥ यदि विसंस्थि

त आगच्छेत्कृतांतादग्रेस्वयंवा कुर्यात ॥ निर्दिष्टो वा समापयेत ॥ प्रवृत्तत्वात ॥ अस्मिन्पक्षे उभयोऽपि यजमानभागप्राशनं ॥ एतदग्निप्रायेणैव प्रदीपकारोऽपि प्रयो
गमुक्तवान ॥ त्रिकांडीवचनानामपि तात्पर्यमस्मिन्नेवार्थेन्यायस्यानतिक्रमात ॥ ॥ अथ प्रयोगक्रमेण यजमानस्य कर्तव्यं प्रदर्श्यते ॥ कालेकृतशौचो विहारादभि
मुख आसीनः । यजमानजपं करिष्ये ॥ तदंगत्वेन स्नानपवनादि पुरुषय० हृति ॥ पाः पु० । मे ॥ रेवाणा० निविवं ॥ इति पुरुषप्पानं श्रद्धानमाकृत्यावेदनं च जपेत ॥
एतेषां क्रियमाणत्वं कर्मांगत्वेन संकल्पांगत्वाभावात ॥ आमावास्यहविर्भिर्यक्ष्य इत्येवं रूपसंकल्पमात्रं यत्याकर्तव्यं ॥ तदभावे क्रियमाणपदार्थानां कर्मंग
त्वमिति निर्णयो न स्यात ॥ आत्मनेपदमपि स्वामित्वाविशेषादुपपन्नं ॥ एतच्च यजमानेनैवकर्तव्यं यत्याकृतत्वात ॥ प्रतिनिधिपर्याशक्तिप्रयोगानुरो
धेन द्रव्यसंकल्पोपि पत्न्या एव ॥ एवमन्विक्वरणमपि दैवमंत्रेषु ॥ संनिपातित्वेन क्रत्वर्थत्वाद् ध्वर्योश्चाप्रवृत्तत्वात ॥ पयस्वतीरिति तिरः पवित्रमप आ
चामति ॥ फलिसंस्कारत्वात संभवाच्च ॥ अग्नेव्रतपत इत्यादीनां जप एव ॥ अभिमंत्रणानुमंत्रणोपस्थानादीनामपि जप एव ॥ शेषिणोऽसंनिधानात
॥ अग्निं होतारं ॥ वाद्विपमश्वोत्त्यदर्थांगत्वात्कार्यः ॥ यज्ञयोगकपालयोगयोर्जपः ॥ आज्यमसीत्यादि वाचनमंत्राणां वाचयितुः संनिधानेनप्रे
ष्यांशाभावेपि प्रधानभूतमंत्रत्यागानुपपत्त्या जप एव कार्यः ॥ आज्यग्रहणमंत्राः ॥ ध्रुवोसि २ पुनर्जित्वा ॥ इध्मा ॥ यम्ने अग्ने अग्ने ॥ उरुष्ण० अ
मर्त्यस्य० ॥ मनोसि० ॥ वागसि० ॥ वसंतमृतूनां० ५ ॥ अग्नीषोमयो० ॥ व्रतलोपसंकल्पः पत्न्या एव ॥ अन्वेप्राप्यश्विनसंकल्पा अपि ॥ देवतोद्देशेनद्रव्य
त्यागाश्च ॥ अग्ने इहमित्यादिस्विष्टकृदनुमंत्रणांतं ॥ अग्निर्मा दु० ॥ यो मेति ॥ सुर० पवर्ष० ॥ उपहूतः पं० नि ॥ जुषि० ॥ एतेषां जप एव ॥ मनोज्योतिरि
ति जपः ॥ भक्षापितृशुध्यर्थत्वान्मार्जनस्य ॥ अत्रभक्षणाभावात्तमार्जनलोपः ॥ इडाभक्षणं त्वध्वर्युणाकार्यं समाख्याबलात ॥ ब्रह्मपि० सत ॥ प्रजाप

११५ ते० लोके ॥ बर्हिषो ०गमेयं ॥ अग्ने(र)हम् ०॥ यूहनस्यादृष्टार्थत्वात् ॥ अदृष्टार्था नित्यप्यं ते इति वचनाज्जप एव ॥ एमा अगमन् ०॥ ऐहि तेन त्वा ०॥ वि ते मुंचा ०॥ विष्णो
115 : शंयो ०॥ सोमस्याहं ० प्रमुयासं ॥ वेदोसि ०॥ आप्यायतां ०॥ प्रजापतेर्विभान्नित्यस्य लोपः ॥ सदसीत्यादिमन्त्रपद इत्यंतं जप एव ॥ उत्थाय प्राङ्मुखो भूत्वा विष्णु
क्रमान्क्रामति ॥ अगन्म स्वरित्यादि समयाय एष स्तोष इत्यंतं यथाप्रकृति ॥ दक्षिणो दृ पर्यावर्तने अपि ॥ विष्णुक्रमवचनस्य संभवाभिप्रायत्वात् ॥ समिद्धो
अग्ने ०॥ वसुमान्यज्ञः ०। एतयोर्लोपः ॥ अग्न आयूंषि अग्ने गृहपते ॥ कल्याणु ०॥ पयस्व ०॥ अग्ने व्रतपत इति पूर्ववत् ॥ यज्ञो बभूवेति जपति ॥ प्रारु. न्कस्य ॥
गोमाँ अग्ने न ब्राह्मणतर्पणप्रैषः ॥ प्रैष्यस्याभावात् ॥ अध्वर्युणानुवक्तव्यः समाख्याबलात् ॥ अथाध्वर्युकर्तव्यमुच्यते ॥ कालेतन्म ऋध्यतां ०कामइतिव
देत् ॥ समाख्याबलात् ॥ अग्निपरिसमूहनं ॥ आहवनीये तूष्णीं समिद्वनुषष्याधानं ॥ त्यागस्तु यथाप्रकृति ॥ ब्रह्मवरणं ॥ अग्ने हविर्निर्वेक्ष्यामि ॥ यजमान
वाचनमंत्राणां लोपः ॥ इडायां यजमानभागमक्षणं स्वभागमक्षणमपि ॥ नमंत्रेण मार्जनं ॥ तूष्णीमेव मार्जयते ॥ पुरोडाशं चतुर्धा कृत्वा इदं ब्रह्मण इ
त्यादि व्यादिशति ॥ अन्वाहार्यमासाद्य ब्राह्मणा अयं व ओदनो ०ध्वं ॥ स्वयमपि प्रतिगृह्णीयात् ॥ यजमानभागस्य भक्षणकाले ध्रौवाज्यादुपस्तीर्य
यजमानभागमवधायाभिघार्य ॥ प्रजापतेर्विभा० नस्वाहेति जुहुयात् ॥ प्रजापतय इदं० ॥ प्रणीता अंतर्वेद्यासाद्य तूष्णीं दिशो व्युन्नीय तूष्णीं निनये
त् ॥ समिद्धो अग्न इत्यस्य काले तूष्णीं समिधमादधाति ॥ परिचेदुपवेषस्तं तूष्णीमुदस्येत् ॥ अग्ने व्रतपत इत्येतत्काले पूर्ववत्समिच्चनुषष्यं तूष्णीमाद
धात् ॥ ब्राह्मणाँ स्तर्पयित वा इति यदि कर्मिणं संप्रेष्यति ॥ इतरत्सर्वं प्रकृतिवत् ॥ अथ पत्नीकर्तव्यमुच्यते ॥ संकल्पः ॥ ऋत्विग्वरणं त्यागाः प्रायश्चि
त्तसंकल्पाश्च ॥ त्यागास्तामध्ये अध्वर्युस्तथानुज्ञातः त्यजेत् ॥ प्रवसद्दीक्षो आरंभप्रभृति समाप्तिपर्यंतं पत्नी संन्निहिता आस्त इति प्रवसद्यजमान

विचारइति ॥ अथसौकर्यार्थं बौधायनमतानुसारेणयजमानसहितप्रवासयस्यपजमानंविनादर्शपूर्णमासप्रयोगक्रमोपिलिख्यते ॥ पत्नीऋत्विक्सहि
तापवनादिकृत्वायोर्णमासेनहविषायक्ष्यइतिसंकल्पः ॥ सर्वत्रव्रतलोपप्रायश्चित्तादिसंकल्प्या अपि ॥ पत्नीतन्मऋध्यतां ॥ ऋत्विजस्तत्तऋध्यतां ॥ पत्नीओं
तपेत्यादिश्वः सद्योवायक्ष्यइत्यंतंऋत्विग्वरणं ॥ अध्वर्युरग्नीन्विहृत्येत्याद्यन्वाधानपरिसमूहनाद्यलंकारणांतं ॥ पत्नीसर्वत्रस्थागान्कुर्यात् ॥ अध्वर्युस्तूष्णीं
चतस्रः समिध आधाय असिदादानादिपात्रासादनांतंततोभूपतइतिब्रह्मवरणंपश्चात्स्तरणादिपवित्रकरणांतं ॥ वेषायत्वेत्यादिअग्नेहविर्निर्वप्स्यामी
तिविशेषस्ततोयथादैवतंनिर्वपति ॥ इदंदेवानामित्यादिदेवोवःसवितेतितंडुलप्रस्कंदनांतं ॥ त्रिष्फलीकर्तवाइत्यादिमगृष्णामंगीरसादनादिअग्निस्तेते
जोमाविनैदित्यंतं ॥ अध्वर्युरग्नेर्जिह्वासीत्यादियजमानवर्जंप्रस्तरेपवित्रंगृहनांतंब्रह्मणेप्रस्तरदानं ॥ बर्हिस्तरणादियजमानंवर्जयित्वापानिघृ
मेति ॥ ततःस्रुवमभिपूर्येत्यादिहविरासादनांतंकृत्वाप्याइतिजपः ॥ ततःस्योनोमइत्यादिइडाभक्षणेस्वभागादतिरिक्तयजमानभागभक्षणंतूष्णीं
मार्जनं ॥ इदंब्रह्मणइत्यादिप्रादेशनअन्वाहार्यमासादयति ॥ ब्राह्मणा अयंव ओदनोयथाभागंप्रतिगृह्णीध्वमित्युक्त्वास्वयमपिप्रतिगृह्णीयादित्यादि
भनूयाजो ततः स्रुग्व्यूहनं ॥ परिधंजनादिपत्नीकारणहोमांतं ॥ होत्रेवेदंप्रदायेत्यादिश्रवाप्यायनांतं ॥ श्रवान्यास्तुच्युपस्तीर्ययजमानभागमवधा
यामिघार्यप्रजापतेर्विभान्नामेतिस्वाहांतेनजुहुयात् ॥ पत्नीप्रजापतयइदं० ॥ अध्वर्युरश्राविनमित्यादिसमिष्टयजुर्होमांतं ॥ प्रणीता अंतर्वेद्यासाद्य
तूष्णीं दिशोव्युन्नीयतूष्णींनिनयेत् ॥ कालेकालेतूष्णींसमिदाधानं उपवेषश्चेतूष्णीमुद्वस्येत् ॥ ब्राह्मणाः स्तर्पयितव्याइतिप्रैषश्च ॥ पत्नीअग्निपूजना
दिकर्मेश्वरार्पणंकुर्यादितिप्रयोगक्रमः ॥ अथशालीकिमतानुसारेणयजमानरहितप्रवासयपक्षेप्रयोगक्रमः ॥ यजमानःप्रवासप्रसक्तोपुत्रंशिष्यंवा

२२६ स्वकर्मणि नियुज्य प्रवासोपस्थानं कृत्वा प्रवसेत्॥ पर्वण्यप्रोष्य वपनं॥ होमेष्टिकाल्पोस्त तद्विहितव्रताचरणमेव कर्तव्यं नान्यत्किंचिद्यजमानकर्म। अग्निसमीप
116 त्नी अग्नीन्परीक्षमाणा ऋत्विगादिनाग्निहोत्रेष्टिं रुपितपज्ञं दर्शपूर्णमासौ वाग्रयणं च कालप्राप्तं कारयेत्॥ तत्र संकल्पऋत्विग्वरणत्यागान् स्वयमेव कुर्यात्
॥ अशक्तस्य पत्नी मानं चेत्पत्नीकर्म च लुप्यते॥ ननु तावता ऋतुर्येषस्या दध्यर्वण स्त्रतः॥ त्यागं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः॥ उभावप्यसमर्थौ चेन्त्रिपुत्रः
कश्चनत्यजेदिति त्रिकाण्डमण्डनवचनात्॥ त्यागासामर्थ्ये नियुक्तपुत्रेण नियुक्तशिष्येण वा कारयेत्॥ कर्माभिमध्यमाति समाप्तिपर्यन्तं सान्निध्येन भवितव्यं
॥ परीषि मध्ये यजमानो ग्रामांतरं दारगृहीत्वा कृता तादृशश्च स्समापयेत्॥ आरब्धत्वात्पुत्रः शिष्यो वा समापयेत्॥ अस्मिन्पक्षे उभयोरपि यजमानभागप्रा
शनं भवतीति याज्ञमानाः विहितप्रवासपक्षे प्रयोगः॥ अथ शालीकिम तदा पर्याप्तिरिति त्रिकाण्डीवचनानि॥ अथवा प्रवसन्काले स्वामी कुर्यान्न किंचन॥ इति लौ
गाक्षिः एरदेमहर्ष्ट्वा जोपि न्वाब्रवीत्॥ यथाश्वलायने नापि नेष्ट्या प्रवसतः क्रिया॥ अन्यथा हि निबध्नीयाद्यास्यदागतयोरिव॥ सर्वेष्वपक्षमे देषु द्रव्यत्यागोस्ति सर्व
था॥ कर्मान्यदस्तु मावापि जयो वा स्यान्नसो पिवा॥ प्रवसद्यजमान स्वकर्थ नावसरेस्मुरमिति॥ अथ दशरात्रादूर्ध्वं प्रवासे प्रा॰॥ तत्राश्वलायनः॥ प्रोष्यध्य
पोदशरात्राच्चतुर्गृहीतमाज्यं जुहुयान्मनो ज्योति॰ ज्यं मे विं॰ धातु॥ यारूष्टा॰ पा अनिष्टा स्ता॰ सं॰ तेन स्वाहेति॥ दशरात्रादूर्ध्वं प्रवासं कृत्वा जुहोच्च चतुर्गृहीतं
गृहीत्वा न पात्र होति॥ मनो ज्योतिरित्यनयर्चा॥ चतुर्गृहीतशब्दाद्देवाज्य द्रव्यास्ति स्त्रौ सत्यामाज्यग्रहणं तु स्त्रीमुत्यवनलोमार्थमिति वृत्तिः॥ अथ प्रयोगः
॥ दशरात्राधिकप्रवासजन्यदोषपरिहारार्थं प्रायश्चित्तं करिष्ये इति संकल्प्याज्यं संस्कृत्य मनस्वतीं जुहुयादिति॥ अथ यजमानेऽसंनिहिते पत्न्याः प्रवा
सप्रसक्तौ प्रा॰॥ तत्र बौधायनः॥ अथ यदि प्रवसति यजमाने पत्न्याः प्रवासनिमित्तं स्यात्तदा वात्सोष्यतीपर्वं हुत्वाध्वर्युः समारोपयेदयं ते योनिरृत्विय इति

पत्रगच्छेत्तत्राऽनोहोतत्राग्निंमथित्वाविहृत्यैकस्यपित्वागार्हपत्यआज्यंविलाप्योत्पूयस्रुचिचतुर्गृहीतंगृहीतंगृहीत्वाहवनीयेसंततंनिनयन्होति॥मनोज्योतिर्जु॰घ
तेनस्वाहेत्यथाग्नयेतंतुमतेपुरोडाशमष्टाकपालंनिर्वपतिशएवंदक्षिणांददातिसामसिस्येष्टिःसंतिष्ठते॥अत्राश्वलायनानुसारिप्रयोगकारणपक्षेयजमा
नेऽसंनिहितेमहोपप्लववशात्पत्न्याअपिप्रवासप्राप्तौपूर्वोक्तोविधिर्भवति॥पाणीप्रतापनारणीसमारोपंविना।नतुबौधायनोक्तः॥कदाचिदत्यापदिभाष्यस्व
एसादारणीसमारोपोपिभवेदितिकुतूहलवृत्तिकारः।अत्राश्वलायनेनानुक्तत्वात्॥बौधायनकारणपक्षेप्रदीपकारः॥प्रोषितेयजमानेरणेष्टविभ्रमादिप्र
वासनिमित्तोत्पत्तौपत्नीअग्निभिःसहप्रवसेत्॥तत्रक्रमः॥अध्वर्युःपञ्चहोमविधानेनाग्निहोत्रहोमान्समस्यहुत्वाअग्निष्ठऽनस्पऽग्निहोत्रोपकर
णंपात्रादिकंसर्वंसमारोप्यदक्षिणमनड्वाहंयुक्त्वाज्यंसंस्कृत्यतावन्मात्रोपयोगिन्यापर्णमय्यास्रुचाचतुर्गृहीतमाज्यमाहवनीयेजुहोति॥वास्तोष्पतेप्र
तिजानीह्यस्मान्॰शंनएधिद्विपदेशंचतुष्पदेवास्तोष्पतेशग्मयासंसदातेऽ॰स्वस्तिभिःसदानःस्वाहेतिजुहुयात्॥ऋत्वोर्नेप्रयाणवसंधानेस्रुचमाहवनी
येप्रक्षिप्यसव्यंयुक्त्वापंतद्रत्यचारयपोऽग्नीन्समारोपयेत्॥अजस्रपक्षेत्रयाणांसमारोपणंप्रणयनपक्षेगार्हपत्यस्यैवसमारोपणं॥एवंसमारोप्यार
णीशकटेनिधायपत्नीयीशकटमारुह्यअग्निभिःसहाभिलषितदेशंगत्वातत्रविहारंप्रतिकल्प्यपित्वामथित्वाग्नी।विहृत्याज्यंसंस्कृत्यमनस्वत्याचतुर्गृही
तमाज्यंहुत्वातंतुमतेष्टिंकुर्यादितिपत्न्यामसान्निहितायांयजमानोपिनप्रवसेदिति।केचनाशीशानद्वयीकाणादिभिरुक्तत्वान्नदैवाद्यजमानस्यप्रवासप्रसक्ता
वप्येवमेवेतिभाति॥अथयजमानस्यपत्न्याश्चसंवत्सरंतिप्रवासेभिध्यात्वादिदोषेचयाविचित्रेष्टिःप्रा॰॥तत्रबौधायनः॥अथैतत्सायंप्रमितंप्र
वसतिनसंवत्सरमतिप्रवसतीत्येवेदमुक्तंभवतिसउच्चैर्दृतिप्रवसेस्वविचित्रेष्ट्याचयजेतैतंपापयस्यमानउपकल्पयतेहिरण्यंतस्याःप्रस्तातउपवस

११७ योपप्रातर्हुतेऽग्निहोत्रे पुरोडाशं प्रणयनात् गार्हपत्य आज्यं विलाप्योत्पूय स्रुक्षु चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्नाद्यायागजमानेयेन देवाः ० पुनन्तु मा स्वाहेत्यप
117 स्रुचतुर्गृहीतं गृहीत्वाहवनीयए व जुहोति प्राजापत्यंप ० महे स्वाहेत्यपो ० तीङ्ः सुनीती ० तु स्वाहेत्यथ पृष्ठ्याः ॐ स्तीर्णी पः प्रणीतायामग्नये पवमानाय पुरोडाशमष्टा
कपालं निर्वपति सत्यस्त्वे प्रियापा उपांशु लीलोम: भु आज्यमाज्यहविषां तु सर्वं पुरोडाशाधिश्रयणानन्तरं मेकाज्यनिर्वापः सर्वेषांस्त्व यज्ञाय नापाग्नये पावकाय पु
रोडाशमष्टाकपालं निर्वपति सवित्रे सत्यप्रसवाय पांशु आज्यमग्नये शुचये पुरोडाशमष्टाकपालं निर्वपति वायवे नियुत्वते उपांशु आज्यमग्नये व्रतपतये
पुरोडाशमष्टाकपालं निर्वपति विष्णवे शिपिविष्टाय पांशु आज्यमग्नये वैश्वानराय पुरोडाशं द्वादशकपालं निर्वपति दधिक्राव्णे उपांशु आज्यमिति अग्नये पि
त्वा सादयति तस्याः सप्तदश सामिधेन्यः समिध्यमानो वसमिद्धान्तो यापावककवत्यो धाय्ये दधात्य पामिदं न्यपनेनमस्तु इति द्वे पावककवंता वेवाज्यभागा
वग्नी एस्राॐ ० ईअ इति पुरोनुवाक्यामनूच्य पते पवित्रमहइति यजति योधायापा ० रूति यइति पुरोनुवाक्यामनूच्या रूत्वशेषं ० नइति यजति अथ हवि
षामग्न आयूंॐ षि पवस इत्यग्नेपवस्वत्यग्नेः पवमानस्योतनः प्रियेमा जनूनापुष्मादिति सत्यस्तत्पाः प्रियापा अग्ने पावकस्तनः पावके त्यग्नेः पावकस्य आ
विश्वदेवमा सत्येनेति सवितुः सत्यप्रसवस्याग्निः शुचिव्रततम उदग्ने शुचयस्तवेत्यग्नेः शुचेर्वायो शुक्रो अयामि तइति वायोर्नियुत्वतस्त्व
मग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीत्यग्ने र्व्रतपतेः प्रतते अद्य किंमित्ते विष्णो यदीच वक्ष्यं भूदिति विष्णोः शिपिविष्टस्य वैश्वानरो न ऊत्याप्रष्ठो दिवीत्य
ग्ने वैश्वानरस्य दधिक्राव्णो अकारिषमा दधिक्रा इति दधिक्राव्णो थ द्दूतानुमंत्रेणमग्नेः पवमानस्याहं देवयज्यया शुचिः पूतो मेध्यो विपाप्मा ब्रह्मवर्चसी स्या
न्नादो भूयासमग्नेः पावकस्याग्नेः शुचेरग्नेर्व्रतपतेरग्नेर्वैश्वानरस्याहं देवयज्यया शुचिः पूतो मेध्यो विपाप्मा ब्रह्मवर्चस्यन्नादो भूयासमिति उपांशु या जा

नुपाणं भूपाजवदित्यथपुरस्तात्स्विष्टकृतः स्रुवाहुतीर्हपजुहोति पवमानः स्कवर्जनः इत्येतेनानुवाकेन प्रत्यृचमति थिवन्यो सपाज्येजुष्टोदम्ना॰ भो जननि
मार्जो स्योमरुज्यते॰ आप्यन्यानिति प्रसिद्धः याज्ञाहोपमासाघ हिरण्यं ददातिसमानं कर्मापत्नीसंयाजेभ्योथपुरस्तादृहपतेः स्रुवाहुतीर्हपजुहोति परे वादे
व हेदनमित्येतेनानुवाकेन प्रत्यृचं संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमाविसर्जनेव्रतमेतयैववपजेताभिशस्तो भिशस्यमानो वैतयैववपजेत संवत्सर
मब्दपादमेकविंशति एतेत्रवातिर्यग्योनिगतान् ज्ञातीनजानंतो वर्तमानानडुष्कृते एपहस्वादशपूर्वान्दशापरान्पुनात्यात्मानं चैकविंशं पंक्तिं चपु
नएवर्त्तनेन चपुनए वर्तनदृत्यथाप्युदाहरंति वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च ॥ ऋतावनौ प्रयुंजानः पुनाति दशपूरुषमिति ॥ सउच्चैर्दित्यत्र पुलिं
गनिर्देशः ॥ अविवक्षित इति प्रायश्चित्तविवरणे अथो एतदित्येतस्य करणे गोपालः ॥ अथ गोपालविवरणं ॥ अथो एतदु के मे तत्प्रवासोपस्थानेसोऽप
रिमितं प्रवसति न संवत्सरमति प्रवसतीति संवत्सरादूर्ध्वं न प्रवसेदित्यादि प्रवसेत् पवित्रेष्ट्यापजेत ॥ अत्रकौ दिन्यः ॥ नसमाहृत्याग्निं यजमानः प्रोष्य
प्रेयादिति एतयेष्ट्यायक्ष्यमाण इत्यादि प्रत्तातत उपवसथः सोपवसथो वासद्यस्कालो वा ॥ अग्नये पवमानाये त्यादि ॥ इहौषधानामेव निर्वापः ॥ आज्य
हविषां तु सर्वपुरोडाशाधिश्रयणानंतरमेव दृहपाठः सर्वेषां सह स्यज्ञापनाय प्रोक्षणे अग्नये पवमानाय वो जुष्टं प्रोक्षाम्यग्नये पावकायाग्नये शुचये
अग्नये व्रतपतये अग्नये वैश्वानराये त्यादि एवं सर्वत्र देवता निर्देशेषु ॥ अपपिब्राह्मणा इत्यतीत्यादि प्रसिद्धः एतयैववपजेताभिशस्तः पातकादिभिरुक्
तैर्दूषितः महापातकादिभिरभिशापे संवत्सरं पातके द्वौ मासौ उपपातके एकविंशतिरात्रं ॥ ॥ तिर्यग्योनिगतान् ज्ञातीनित्यादिरर्थवादः ऋतावनौ प्रयुं
जीतेत्यस्य विधेः शेषः ॥ जन्मांतरकृतेष्वपि पातकेषु वैश्वानरीमित्यादि ॥ अत्रप्रदीपकारः ॥ इह प्रायश्चित्तप्रकरणे पवित्रेष्टिकं पत्नं यजमानयत्नोः

११८ संवत्सरातिप्रवासे प्रायश्चित्तार्थं ॥ यथाह गोपालः ॥ वत्सरातिप्रवासे तु पवित्रेष्टिस्तयोर्भवेदिति ॥ अभिशस्ताभिशस्यमानो वा पापयक्ष्मकामो वा पवित्रेष्ट्याय
॥४ जेत एनं पेक्षायक्ष्यमाणो दक्षिणार्थं शतमानं संपादयेत् ॥ मगारेक्ष्या उक्तकालएवास्या अपि कालः प्रवसतोः पत्नीयजमानयोः प्रवासानंतरं कर्तव्या
॥ तस्याः प्रयोगः ॥ पूर्वेद्युर्नांदीमुखादियोद्युः केशादिवापयित्वा स्नानादि पंचकं कृत्वा रमणीयां कृत्वा तदानीमेव याः पुरस्तादित्यादि संवत्सरातिप्रवा
सप्रायश्चित्तार्थं पवित्रेष्ट्या यक्ष्ये ॥ पापयक्ष्मकामस्य पापक्षयार्थं पवित्रेष्ट्या यक्ष्य इति संकल्प्य अग्नीन्विहृत्यान्वाधानादि इध्मसन्नहनेत्र योविंश
तिधेध्मः ॥ सोपवसथः सद्यस्को वा पाणिसंमर्शनादि पात्रासादनकाले चतुश्चत्वारिंशत्कपालानि ॥ ब्रह्मोपवेशनांते गार्हपत्ये आज्यं विलाप्योत्पूय
चतुर्गृहीतान्याहवनीये जुहोति ॥ अन्वारब्धे यजमाने ॥ येन देवाः पवित्रेण ॥ प्राजापत्यं पवित्रं ॥ इंद्रः सुनीती सह मा पुनात्विति त्रिभिः ॥ पश्चादिनिर्वापा
काले ॥ अग्नये पवमानायाग्नये पावकायाग्नये शुचयेऽग्नये व्रतपतयेऽग्नये वैश्वानरायेति पंच पुरोडाशान्निरुप्य प्रोक्षणादि ॥ कपालोपधाने चतुर्णामष्टाक
पालानि वैश्वानराय द्वादशकपालान्युपदध्यात् ॥ संवापादि पवमानपुरोडाशप्रथनानंतरमाज्यं निरुप्य पावकादीन्प्रथयेत् ॥ नव्याहादिवेधामासत्रा
भिमर्शनांतं कुर्यात् ॥ अग्नये समिध्यमानायानुब्रूहीत्यादि ॥ होता सामिधेनीषु शोचिष्केशस्तमीमहे ३ मयामिदं न्ययनं सं० अस्मभ्यं शिवो अन्य
मस्तु हा० वो ३४ समिध्यो अग्न इत्यादि ॥ आवाहनकाले ॥ अग्निं पावकवंतमा ३ वह ॥ सोमं पावकवंतमा ३ वह ॥ अग्निं पवमानमा ३० ॥ आज्यहविषां पंचदे
वतानामावाहनादि यपांश्च त्वं सा ३ स्तीं प्रियामित्यपांश्च आवह इत्यूहैः ॥ देवाँ आज्यपा इत्यादि समानमोत्तमप्रयाजात् ॥ उत्तमप्रयाजे स्वाहाग्निं पावक
वंतं स्वाहा सोमं पावकवंतं स्वाहाग्निं पवमानं स्वाहा सरस्वतीं प्रियामित्यादि प्रयाजशेषेणाभिघारणे पुरोडाशमभिघार्य पुनर्ध्रुवामभिघारयेत् ॥ एव

मेवप्रतिपुरोडाशाभिघारणानंतरं ध्रुवाममिघारयेत॥ अग्नये पावकवतेनुब्रूहि॥ अग्निं पावकवंतं यजेति॥ अग्नीरक्षांꣳसि॰ षेधो ३॥ इत्यनुवाक्या॥ यत्तेपवि
त्र॰ पुनीमहा इवौ॰ इति याज्या॥ प्रथमाज्यभागस्य॥ सोमायपावकवतेन॰॥ सोमंपावकवंतंयज॥ योधारया॰ कृत्विया॥ ३॥ इत्यनुवाक्या॥ आकलशेषु
धावतीति याज्या द्वितीयस्य॥ प्रथमपुरोडाशमवद्यन्नाह॥ अग्नये पवमानायानु॰॥ अग्निं पवमानं यजेति॥ अग्न आयूꣳषि पवस इत्यनुवाक्या॥ अग्ने
पवस्व॰ इधत्यो षꣳरयिं मयीति याज्या॥ अग्नेः पवमानस्या॰ शुचिः पूतोमे॰ सं॥ चतुरन्यस्यग. स्कान आह॥ सरस्वत्यै प्रियपाया इत्युपांशु अनुब्रूहीत्युच्चैः॥
सरस्वतीं प्रियपामित्युपांशु यजेत्युच्चैः॥ उतनः प्रियाप्रिया इत्यनुवाक्या॥ इमाजुह्वाना युष्मदानमोभिरिति याज्या॥ यजमानपांशुपंचकस्य इडाभ्यसीत्यनुमंत्र
णं॥ द्वितीयपुरोडाशादवद्यन्नाह॥ अग्नये पावकायानुब्रूहि॥ अग्निं पावकवंतं यजेति। अग्नेपावकसनः पावकेति याज्यानुवाक्ये॥ अग्नेः पावकस्याहं शुचिः पू
त इत्यादि॥ चतुरन्यस्यग. स्कान आह॥ सवित्रे सत्यप्रसवायेत्युपांशु अनुब्रूहीत्युच्चैः॥ सवितारं सत्यप्रसवमित्युपांशु॥ यजेत्युच्चैः॥ आविश्वदेवमित्य
नुवाक्या॥ आसत्येनेति याज्या॥ इडाभ्यसीति॥ तृतीयपुरोडाशादवद्यन्नाह॥ अग्नये शुचयेनुब्रूहि॥ अग्निं शुचिं यजेति॥ अग्निः शुचिव्रततम इदग्ने शुचयस्त
वेति याज्यानुवाक्ये॥ अग्नेः शुचेरहं शुचिः पूत इत्यादि॥ चतुरन्यस्यग. स्कान आह॥ वायवे नियुत्वते इत्युपांश्वनुब्रूहीत्युच्चैः॥ वायुं नियुत्वंतमित्युपांशु यजे
त्युच्चैः॥ वायुरग्रेगा इत्यनुवाक्या॥ वायो शुक्रो अयामि त इति याज्या॥ इडाभ्यसीत्यादि॥ चतुर्थपुरोडाशादवद्यन्नाह॥ अग्नये व्रतपतयेनुब्रूहि॥ अग्निं
व्रतपतिं यजेति॥ त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनामेति याज्यानुवाक्ये॥ अग्नेर्व्रतपतेरहं शुचिः पूत इति॥ चतुरन्यस्यग. स्कान आह॥ विष्णवे शि
पिविष्टायेत्युपांशु॥ अनुब्रूहीत्युच्चैः॥ विष्णुं शिपिविष्टमित्युपांशु यजेत्युच्चैः॥ प्रतत्ते अद्य॰ द्वान॥ तंत्वागृ॰ समतवीयानीत्यनुवाक्या॥ किमित्ते विष्णो

११८ इति याज्या॥ दक्षिणास्वीत्यनुमंत्रणं॥ पंचमपुरोडाशस्यावद्यंनाह॥ अग्नये वैश्वानरायानुब्रूहि॥ अग्निं वैश्वानरं यजेति॥ वैश्वानरो न ऊत्याप्रष्टो दिवीति याज्या
119 नुवाक्ये॥ अग्ने वैश्वानरस्याहं शुचिः पूत इति॥ चतुरवत्तस्य गृह्णानमाह॥ दधिक्राव्णोहमित्यनुब्रूहीत्यत्रैवैः॥ दधिक्राव्णमिन्द्रं यजेत्यत्रैवैः दधिक्राव्णो अकारि
षमित्यनुवाक्या॥ आदधिक्रा इति याज्या॥ दक्षिणास्वीत्यादि॥ सौविष्टकृतमवद्यंनाह॥ अग्नये स्विष्टकृतेनुब्रूहि॥ अग्निं स्विष्टकृतं यजेति॥ स्विष्टकृत्सर्वे प्रति
पुरोडाशावदानानंतरं सकृत्सकृदाज्यात्यं चकृत्वो वद्यति॥ द्विरभिघारयति॥ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति॥ पवमानः सुवर्जनइत्येतेनानुवाकेन प्रत्य
चं हुत्वा होता॥ जुषाणो अप्तुरा अस्यविद्वान्॥ विश्वा अग्ने अभियुजो विहत्य शत्रूयतामित्यनुवाक्या॥ पिट्र यजामहे अग्निं स्विष्टकृतमापायाग्नेः पावकवतः प्रिया धा
मान्ययाट् सोमस्य पावकवतः प्रिया धामान्ययाट् अग्नेः पवमानस्य प्रिया धामानीत्यादि जुषतां हविर्मार्जो अन्यो मज्यते स्वदमूनाः कविप्रशस्तो अतिथिः शिवो
नः॥ सहस्रशृङ्गो वृषभस्तदोजा विश्वां अग्ने सहसा प्रास्यन्या इत्नोषरिति॥ अग्नेः स्विष्टकृतो अहं देवयज्यया०॥ प्राशित्रावदाने॥ इडावदाने यप्रतिपु
रोडाशावदानानंतरं द्विर्द्विर्ध्रुवाज्यावदानं प्रसिद्धेडान्वाहार्यमासाद्य शतमानं हिरण्यं ददातीति समानं कर्म सूक्तवाकात्सूक्तवाकनिगदे अग्निः पावकवा
नितदं हविःसोम पावक गानिदं हविरजूषतअग्निः पवमान इदं हविरजुषतेत्यादि॥ समानं कर्म यत्नीसंयाजेभ्यः पुरस्ताद्गृहपतेः स्रुवाहुतीरुपजुहोति॥
पदेवा देवहेडनमित्यृष्छिद्रिकेणानुवाकेन प्रत्यूचं॥ गृहपतियागादि ब्राह्मणतर्पणांतासंतिष्ठते॥ ॥ अत्र प्रदीपकारेणप्रथमपुरोडाशाधिश्रयणानं
तरमाज्यनिर्वपणमुक्तं तथापि सत्रभाष्यपोः सर्वपुरोडाशाधिश्रयणानंतरमाज्यनिर्वापस्य स्पष्टमुक्तत्वादंते एव कर्तव्यमिति अस्यामिष्टौ आज्यभाग
योः सत्रकारेण पावकवंताविवाज्यभागाविति अवधारणपुरोनुवाक्यायां प्रदीपकारेणाभ्यागृहनप्रमतिनिगमेषु आज्यभागयाज्ययोश्च सगुणाज्यभागकी

र्तेनमुक्तमिति भाति॥ अथ प्रवासविषये किंचिदुच्यते॥ तत्रात्रैबोधायनः॥ अथो एतत्सोऽपूर्वमितं प्रवसति न संवत्सरमेति प्रवसतीत्यविशेषाज्ज्ञायायत्नोए
हिताग्न्योर्विज्ञापतेः र्यी वा एषा आत्मनो पत्नीति॥ अत्र प्रदीपकारः॥ प्रवसन्यजमानोऽग्नीनुपस्थाय प्रवसेत्॥ यजमानोऽग्निसमीपस्थे सति पत्न्यपि
प्रवसेत्॥ यजमानः पत्न्या सह न प्रवसेत्॥ बहुपत्नीकोप्येकया सह न प्रवसेत्॥ अस्याप्यापी प्रवसतीति योपं प्रोषितपत्नीनिषेधः स क्रमोठ भृद्रात्स्त्रीवि
षयः यदि पत्नी सीमांत आदित्यो भिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तत्र प्रायश्चित्तिरिति भाष्ट्(?) जवचनं च प्रोषितभर्तृकाविषयं॥ यजमानः पत्नी
चोभौ ग्रामातः सीमाबहिः सीमांतं वातिक्रम्य परिप्रवसतस्तदाग्न्यपो लौकिको भवति॥ तदाग्न्याधेयं प्रायश्चित्तं॥ यजमानस्य पत्न्या वा संवत्सरमति
क्रम्य प्रवासे पवित्रेष्टिः प्रायश्चित्तमिति॥ प्रायश्चित्तसत्रीयगोपालविवरणे गोपालकारिका आपस्तंबीयप्रायश्चित्तशतद्वयी बोधायनीयप्रायश्चित्त
कादिष्वप्येवमेवाभिहितं॥ तस्माद्यजमानेऽग्निसमीपस्थे कृताग्निसंसर्गा अकृताग्निसंसर्गा ज्येष्ठकनिष्ठा वा सर्वा अपि वा पत्न्यः प्रवसेयुः॥ तासां॥
नकुर्युरेवमुपस्थानमित्यादि त्रिकांडमंडनोक्तविधिः पूर्वमुक्तः॥ पत्नी सीमामतिक्रामेद्यजमानो गृहे यदि॥ आहोमाद्यदि नागच्छेत्पुनराधानमर्हती
ति यज्ञपार्श्वीकवचने अगृहे इति पदच्छेदः तिनकोपि विरोधः॥ यजमानस्तु अग्नीन्हित्वा पत्यकपाचिदेकयापि पत्न्या सह न प्रवसेत्॥ यदि प्रवसेत्पुन
राधानं तत्र प्रायश्चित्तं॥ यजमाने असंनिहिते एकापि पत्नी होमकाले बहिर्न गच्छेत्॥ अग्निसहितापि न प्रवसेत्॥ यदि प्रवसेद्गच्छेत् च पुनराधानं प्राय
श्चित्तं॥ एकस्यामपि पत्न्यामसंनिहितायां यजमानो होमकाले बहिर्न गच्छेत्॥ अग्निसहितोपि न प्रवसेत्॥ होमकाले गमने प्रवासे च पुनराधानं प्राय
श्चित्तमिति॥ अथ कलिंगादिनिषिद्धदेशगमने प्रायश्चित्तं॥ तत्र धर्मसूत्रे बोधायन॥ अवंतयोंगमगधाः सुराष्ट्रा दक्षिणापथाः॥ उपवृत्सिंधुसौवीरा एते

१२० 120 संकीर्णयोनयः। आरट्टान्कारस्करान्पुंड्रान्सौवीरान्वंगकलिंगान्प्रानूनानिति च गत्वा पुनस्तोमेन यजेत सर्वपृष्ठया वा। अथाप्युदाहरन्ति। पद्भ्यां स कुरुते पापं यः कलिंगान्प्र
पद्यते। ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविरिति इदं प्रायश्चित्तं बौधायनवचनात्प्रवासकरणे। तीर्थयात्रोद्देशागमनेन भवति। तत्र त्रिस्थलीसेतुकार आह - अंगवंगकलिं
गेषु सौराष्ट्रमगधेषु च। तीर्थयात्रां विना यातः पुनः संस्कारमर्हतीति स्मृतेः। अथ पापयक्ष्मादिगृहीतेऽभिशस्ते उपपातकमहापातकादिसंयुक्ते च मरणोऽपि प्रा
यश्चित्तं॥ तत्र बौधायनः॥ अथ वै भवति यः पापयक्ष्मगृहीतस्याघोनावहत्येतद्दैवेभ्य ऋषिभ्यः पितृभ्यो गोवभ्यो ब्राह्मणेभ्यः स्तेनोऽभिशस्तोऽभिशस्यमा
नो वाऽऽहरस्येष्टायजेतेत्येतयेष्ट्या यष्टमाया उपकल्पयते हिरण्यं तस्याः प्रज्ञातउपवसथोऽथ प्रातर्हुतेऽग्निहोत्रे पुरापौर्णपनात् गार्हपत्य आज्यं विला
प्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने॥ येन देवाः पवित्रेणात्मानं पुनते सदा॥ तेन सहस्रधारेण पावमान्यः पुनंतु मा
स्वाहेत्यथापरं चतुर्गृहीतं गृहीत्वाहवनीय एव जुहोति॥ प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयं॥ तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे स्वाहेत्यथापरं चतु
र्गृहीतं गृहीत्वाहवनीय एव जुहोतींद्रः सुनीती सह मा पुनातु सोमः स्वस्त्या वरुणः समीच्या॥ यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मोर्जयंत्या पुना
तु स्वाहेत्यथपयष्ट्याऽं स्तीर्त्वाथ प्रणीयाग्रयेंऽहोमुचेऽष्टाकपालमित्येतद्दशहविषमिष्टिं निर्वपति अथ श्रपयित्वासादयति तस्याः सप्तदश सामिधेन्यः समिध्यमानं
च समिध्वांतौ णपावककवत्यौ धाय्ये पोद्धात्य यामिद्रं यय नेनं नमसस्त इति द्वे पावकवंतावेवाज्यभागावग्नीरक्षांसि सेधति शुक्रशोचिरमर्त्यः॥ शुचिः पा
वक ईड्य इति पुरोनुवाक्यामनूच्याग्ने पवित्रमर्चिष्यग्ने विततमंतरा॥ ब्रह्म तेन पुनीमहे इति यजति यो धारया पावकया परिप्रस्यंदते सुतः॥ इंदुरश्वो
न कृत्व्य इति पुरोनुवाक्यामनूच्याकल्पेशेषु धावति पवित्रे परिषिच्यते॥ उक्थैर्यज्ञेषु वर्द्धत इति यजत्यथ हविषामग्नेर्मन्ये प्रथमस्य प्रचेतस इत्येत

स्यानुवाकस्य याज्यापुरोनुवाक्याः सह हस्तेपाज्याम वंत्यपयुरस्तात्स्विष्टकृतः स्रुवाहुती हृपजुहोति ॥ पवमानः सुवर्जन इत्येतेनानुवाकेन प्रत्यृचं प्रसिस्वेदपान्वा
हार्यमासाद्यग्निरण्यं दद्यात् समानं कर्मी पत्नी संयाजेभ्योऽथ पुरस्ताद् द्विहुपनेतः स्रुवाहुती हृपजुहोति परे वादेव हेडनमित्येतेनानुवाकेन प्रत्यृचं षट् सतिष्ठते एषिष्टिः स
पूर्णमात्र विभुक्रमादि विसृजते व्रतमेतयैव यजेत तु व्यतिक्रमे दारव्यतिक्रमे योनौ वा रेतः सिक्ते तयैव यजेत पातकोपपातकसंयुक्तो द्वादशाहं महापातकसंयु
क्तो मासमेकं पुण्यमिच्छन् संवत्सरमतुं वा नामेतां महायवित्रेष्टिं त्याच्यस्तते मगारेषिरिति वा रहस्येष्टिरिति बौधायनो रहस्येष्टिरिति बौधायन इति ॥ अत्र गोपा
लविवरणं ॥ अथ यवेमवतियः पापयक्ष्मगृहीत आहिताग्निः सपुत्रो गृहीतः रहस्येष्टा यजेतेति संबंधः ॥ पोवापहध्येत देवकर्मभ्योऽग्निष्टोमादिभ्यो निर
स्तो दाराश्च महायज्ञादिभिः गोभ्यो बहिष्कृतो ग्रामभावो यच्च योवाश्चीरादिहीनः अमावो वा ब्राह्मणेभ्यो बहिष्कृतः शिष्टमर्यादातिक्रमादिभिः स्तेनः सुव
र्णादीनां मोषकः पौरविदितः रहस्येष्टेति समाख्याता ॥ अभिशस्तः पातकादिभिर्कृतैर्दूषितः प्रज्ञात उपरतस्थः पूर्वेद्युः सायंत्समपर एवाभिष्टा विधानात् ॥
स्वतंत्रत्वादन्वारंभणीयां कृत्वान्वाधानादि तत्र यदीयं नैमित्तिकी तदा निमित्तानंतरं यदा पुण्यमिच्छन् करोति तदा पूर्वपक्षे देवनक्षत्रे स्वात्मानुकूलनक्षत्रे प्रात
रिष्टीनामन्यतमे कर्तव्या ॥ अथ यजमानं हुतेऽग्निहोत्रे यजमानमित्यादि धानाप्रयोगो महापितृयज्ञस्सवनीययोः अस्माभिः श्लोकैः प्रपंचितत्वान्नेह विस्तार्यते ॥ एतयै
व यजेत तु व्यतिक्रमे ऋतुगमनातिक्रमे ॥ तत्र दोषं वक्ष्यति ॥ ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति ॥ तुल्यमाहुस्तयोर्दोषमयोनौ यश्च सिंचति ॥ दारव्यतिक्र
मे स्वदारेभ्योऽन्यस्त्रीगमने योनौ वा रेतः सिक्त्वा अयोनौ योनिव्यतिरिक्तेषु शरीरप्रदेशेषु रेतः प्रारब्धे कर्मणि दारव्यतिक्रमे ज्ञातपतितेषि एतन्माता अग्नये व्रतपतये पुरो
कपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदिति ॥ एतदन्वाधानप्रभृति कर्मेमध्येऽपि भवति ॥ पातकोपपातकमहापातकानां रहस्यकृतानां रहस्येष्टिरि

१२१ ऽरिति समाख्यानात्॥ पुण्यमिष्टुत्वग्निष्टोमादीन् प्राप्तुकाम इति॥ अत्र प्रदीपकारः॥ प्रायश्चित्तप्रकरणे मृगारेष्टिकथनं पापयक्ष्मादिरोगगृहीतस्याहिताग्नेः प्राय
१५१ श्चित्तार्थं॥ यः पापयक्ष्मादिरोगगृहीतो देवेभ्यो देवकर्मभ्यो यज्ञादिभ्यः॥ ऋषिकर्मभ्यः अध्ययनादिभ्यः पितृभ्यः पितृकर्मभ्यः अपत्यादिभ्यः गोभ्यो गोः सका
शादुत्पन्नक्षीरादिभ्यो ब्राह्मणेभ्यः ब्राह्मणकृतमर्पादिभ्यः परित्यक्तस्तेनाभिशस्तो भिशस्यमानो वा सः। रुद्रस्येष्टिसंज्ञया मृगारेष्टिवत्त्रेष्टिसंज्ञया मृगारे
ष्ट्या यजेत॥ एतया यक्ष्यमाणो दक्षिणार्थं शतमानं हिरण्यं संपादयेत॥ तस्याः कालः॥ उत्तरायणे शुक्लपक्षे देवनक्षत्राणि समुदितानि सर्वेषां कालः॥ शुद्धि
कामस्य पर्वद्वये शुक्लप्रतिपदादिपुण्यदेवनक्षत्राणि वा कालः॥ रोगयुक्तस्य त्वापमेव कालः॥ तस्याः प्रयोगः॥ पूर्वेद्युर्नान्दीमुखादि परेद्युः केशादिवापयित्वा
स्नानादि पंचकं कृत्वा अन्वारंभणीयेष्ट्या यजेत॥ मृगारेष्ट्या यक्ष्यमाणोन्वारंभणीयेष्ट्या यक्ष्य इति संकल्प्य॥ अन्वाधानादि० तर्पणांतां संतिष्ठते॥ तदानी
मेव पापः पुनरस्तादित्यादि यायक्ष्य पकामो मृगारेष्ट्या यक्ष्य इति संकल्प्य॥ रोगादिपुक्तस्यारोग्यार्थं मृगारेष्ट्या यक्ष्य इति संकल्प्य॥ अग्नीन्विहृत्य॥ अन्वा
धानादि शाखाछेदनं बर्हिराहरणं इध्मसन्नहनकाले त्रयोविंशति धेत्तू हः॥ सायंदोहे॥ मित्रावरुणा वा गोमुखेनोरमपतंगा वः॥ मित्रावरुणाभ्यामा
गोमुग्भ्यां हविरिंद्रियम्॥ बहूदुग्धि मित्रावरुणाभ्यामागोमुग्भ्यां देवेभ्यो हव्ये॥ सोमेन त्वा तनच्मि मित्रावरुणाभ्यामागोमुग्भ्यां दधि॥ एवं दोहयित्वोपे
ष्य श्वोभूते प्रातरग्निहोत्रं हुत्वा पात्रासादनकाले शूर्पद्वयं द्विपंचाशत्कपालानि मर्जनकपालमेकं तिस्रः स्थाल्यः वाजिनपात्रं॥ वाजिनपात्रार्थकुंभं चा
सादयति॥ ब्रह्मोपवेशनांतं कृत्वा॥ गार्हपत्य आज्यं विलीभ्योत्पूय पत्नी चित्वनुर्गृहीतं गृहीत्वा हवनीये जुहोत्यन्वाध्वे यजमाने॥ येन देवाः पवित्रेण०
पुनंतु मा स्वाहेति॥ अपरं चतुर्गृहीतं जुहोति॥ प्राजापत्यं पवित्रं० पुनीमहे स्वाहेति॥ अपरं चतुर्गृहीतं जुहोति॥ इंद्रः सुनीती० मापुनातु स्वाहेति॥ यद्वा

स्तरणादिनिर्वापकाले वेषाय त्वामिति शूर्पेद्दुपमादाय धान्यसीत्यादि बीजावेस्र णं तन्त्रे पाकिंशाहनिरसनं निर्वापादि च तुषपं प्रतिबीजमावर्तते ॥ अग्नये ॐ होमुचे
जुष्टं निर्वपामि ॥ इन्द्राय ॐ होमुचे जुष्टमिति द्वीहीं त्रिर्निरुप्य ॥ वायुसवितृभ्यामागोमुग्भ्यामिति च चर्वर्थं तण्डुलान्निरुप्याश्विभ्यामागोमुग्भ्यां जुष्टमिति प वां
निरुप्य ॥ मरुद्भ्य एनोमुग्भ्यो जुष्टमिति । विश्वेभ्यो देवेभ्य एनोमुग्भ्य इति पिष्टं त्रिरुप्यानुमत्यै जुष्टमिति तण्डुलान्निरुप्याग्नये वैश्वानराय जुष्टं द्यावापृथिवी
भ्यामंहोमुग्भ्यां जुष्टमिति पिष्टं त्रिरुप्य प्रोक्षणादि तण्डुलाप्रस्कन्दनान्तं समानं ॥ सांपेदोहवत्यातदीहः ॥ तण्डुलान्विभज्याभिमर्शपेषणादि कुर्यात् ।कु
पालोपधानकालेऽग्नये ॐ होमुचे ष्टौ कपालानि इन्द्राय ॐ होमुचे एकादशकपालान्युपधाय पयस्यालीं चरुस्थालीं चाधिश्रित्य तदुत्तरतो ध्रुवमसीति मजे
नकपालमधिश्रित्य मामहन्नार्थं सप्तकपालानि वैश्वदेवाय द्वादशकपालान्युपधायोत्तरतोऽनुमत्यै चरुस्थालीमधिश्रित्य वैश्वानराय द्वादशकपालानि द्यावापृ
थिव्याय द्विकपालमुपदध्यात् ॥ पिष्टश्रपणादि ऐन्द्रपुरोडाशप्रथनान्तं कृत्वा तस्मिन्पयसि दध्यानीयामिक्षां श्रपयति ॥ तण्डुलप्रक्षेपादि चरुं श्रपयेत् ॥ कृष्णाजि
नावधूननादि यवानुलूखले पाशुद्यमर्जनकपाले यवान्प्रक्षिप्य मर्जयेत् ॥ मारुतवैश्वदेवपुरोडाशावधिश्रित्यानुमत्यै तण्डुलान्प्रक्षिप्य वैश्वानरद्यावापृ
थिव्योरधिपित्वाज्यनिर्वापाद्यप्यनिनयनान्तं कुर्यात् ॥ आमिक्षां विभक्तवाजिनां कृत्वा प्रतापे निधापयेत् षन्यवानवतार्य पात्रान्तरे तिरः पवित्रं च नमा ।
नीय यवान्प्राक्षिप्य मस्मोगारैष्वधिश्रपेत् ॥ वेदाद्यानादि हविरुद्वासनान्तं कुर्यात् ॥ हविष्युद्वास्यान्तर्वेद्यासादयन् वाजिनमभिघार्यालंकृत्य विशये निधाया
सन्नाभिमर्शनं कुर्यात् ॥ अग्नये समिध्यमानायानुब्रूहीत्यादि ॥ होता शोचिष्केशस्तमीमहे इमं यामिदं न्यपन॰ पावको अस्मभ्यं शिवो भवो इत्त्वमस्तिह
सरोचिषे॰ पावको अस्मभ्यं ॐ शिवो भवो इ समिधौ अग्न इत्यादि ॥ आवाहनकाले ॥ अग्निं पावकवन्तं सोमं यावकवन्तमग्निमंहोमुचे इत्यादि समानमोन्त

१२२
122

मप्रयाजात्॥ स्वाहाग्निं पावकवंतं स्वाहा सोमं पावकवंतं स्वाहाग्निमंहोमुचं इत्यादि। पावकवंतावाज्यभागौ॥ अग्नये पावकवतेनुब्रूहि॥ अग्निं पावकवंतं
यजेति॥ अग्ने पावक रोचिषेत्यनुवाक्या॥ पुनेपवित्रमिति प्रथमाज्यभागस्य याज्या॥ सोमाय पावकवतेनुब्रूहि॥ सोमं पावकवंतं यजेति॥ सो धारया पावक
ये सनुवाक्या॥ आकुल्वशेषु धावतीति याज्या॥ अग्नयेंहोमुचेनुब्रूहि॥ अग्निमंहोमुचं यजेति॥ अग्नेर्मन्वे प्रथमस्येत्यनुवाक्या॥ यस्येदं प्राणं निमिषदिति
याज्या॥ अग्नेरंहोमुचोरमन्त्राद:॥ इंद्रायांहोमुचेनुब्रूहि॥ ~~अग्निमंहोमुचं~~ इंद्रमंहोमुचं यजेति॥ इंद्रस्य मन्वे प्रथमस्येत्यनुवाक्या॥ यः संग्राममिति
याज्या॥ इंद्रस्यांहोमुचोरुमिंद्रिपावी॥ आमिक्षामवद्यंनाह॥ मित्रावरुणाभ्यामागोमुग्भ्यामनुब्रूहि॥ मित्रावरुणावागोमुचौ यजेति॥ मन्वे वां मित्राव
रुणा~~भ्यामा~~त्यनुवाक्या॥ यो वांरथ ऋजुरश्मिः सत्यधर्मेति याज्या॥ मित्रावरुणयोरागोमुचोरुमिंद्रिपावी॥ अथ चरोरवद्यं नाह॥ वायुसवितृभ्यामागोमु
ग्भ्यामनुब्रूहि॥ वायुसवितारावागोमुचौ यजेति॥ वायोः सवितुर्विदथानीत्यनुवाक्या॥ उप श्रेष्ठान आशिष इति याज्या॥ वायुसवित्रोरागोमुचोरहं प्रजया चे
ति॥ धाना अवद्यंनाह॥ अश्विभ्यामागोमुग्भ्यामनुब्रूहि॥ अश्विनावागोमुचौ यजेति॥ रथीतमौ रथीनामित्यनुवाक्या॥ परपातं रुहन्मिति याज्या॥ अश्वि
नोरागोमुचोरहमिंद्रियावंनाद:॥ धाना नामवदाने मंत्राणां बहुवचने नोहः कार्यः॥ मरुद्भ्य एनोमुग्भ्योनुब्रूहि॥ मरुत एनोमुचो यजेति॥ मरुतां मन्व इत्यनु
वाक्या॥ निगमयायुधामिति याज्या॥ मरुतामेनोमुचामहं प्राणैरभ्यासं॥ विश्वेभ्यो देवेभ्य एनोमुग्भ्योनुब्रूहि॥ विश्वान्देवानेनोमुचो यजेति॥ देवानां मन्व इत्य
नुवाक्या॥ यदिदं माभि शोचतीति याज्या॥ विश्वेषां देवानामेनोमुचामहं प्राणैः सायुज्यं गमेयं॥ अनुमत्या अनुब्रूहि॥ अनुमतिं यजेति॥ अनु नो द्यानुम
तिर्यज्ञमित्यनुवाक्या॥ अन्विदनुमत इति याज्या॥ अनुमत्या अहं प्रप्रजया चेति॥ अग्नये वैश्वानरायानुब्रूहि। अग्निं वैश्वानरं यजेति॥ वैश्वानरो न ऊत्ये

त्यनुवाक्या ॥ यक्षो दिविपक्ष इति याज्या ॥ अग्ने वैश्वानर स्वाहं शुचिः पूत इत्यादि ॥ द्यावापृथिवीभ्यामहं होमुग्भ्यामनुब्रूहि ॥ द्यावापृथिवी अहं होमुचौ यजेति ॥ ये
अप्रथेतामित्यनुवाक्या ॥ उर्वी रोदसी इति याज्या ॥ द्यावापृथिव्योरहं होमुचोरहं उभयोर्लोकयोर्ऋध्यासं ॥ स्विष्टकृते त्वयन्नाह ॥ अग्नये स्विष्टकृतेनुब्रूहि ॥ अग्नि
ं स्विष्टकृतं यजेति ॥ सर्वेषामुत्तरार्धात् सकृत्सकृदवदाय द्विरभिघारयति ॥ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति ॥ पवमानः सुवर्जन इत्यनुवाकेन प्रत्यृचं
हुत्वा स्विष्टकृता यजति ॥ यत्तेव यं पुरुषत्रे त्यनुवाक्या ॥ अग्निं स्विष्टकृतमयाडग्निरग्नेः पावकवतः प्रिया धामान्ययाट् सोमस्य पावकवतः प्रिया धामान्ययाडु
ग्रेरहं होमुचः प्रिया धामान्ययाट् सोमस्य पावकवतः प्रिया धामान्ययाडग्नेरिंद्रस्याहं होमुचः प्रिया धामानीत्यादि जातवेदो जुषस्व तो हविरिष्याह तद्वस्रकोगे
र्वे चिदिति अग्नेः स्विष्टकृतोहमायुष्मान् ॥ प्राशित्रादि ॥ अन्वाहार्यमासाद्य ॥ शतमानं हिरण्यं ददाति ॥ हविःशेषानुद्वास्य वाजिनमुद्वास्य वाजिनं वेद्यामासा
द्य ॥ यन्मे अग्न इति यजमानेनाभिमंत्रणे कृते ब्रह्मन्प्रस्थास्याम इत्यादि होतुः सकृद्वाके अग्निः पावकवानिदं हविः ॥ सोमः पावकवानिदं हविः ॥ अग्निरहं होमु
॥ गिदं हविः ॥ इंद्रो होमुगिदं हविरित्यादि ॥ जुषतां जुषेतां जूषंतामित्यादि ॥ स्रुग्विमोकांतं समानं ॥ वाजिनयागार्थं कंसमादाय जुहूं वत्से मज्य वेद्यामासाद्य
वाजिनमानयन्नाह ॥ वाजिभ्योनुब्रूहि ॥ वाजिनो यजेति ॥ शंनो भवंतु वाजिन इत्यनुवाक्या ॥ वाजेवाजे इति याज्या ॥ होमकाले वाजिभ्यः स्वाहेति हुत्वानु
वषट्कृते च हुत्वा ॥ होत्रे प्रदायोपहवमिष्ट्वा यजमानः प्रत्यक्षं भक्षयति ॥ यन्मे रेतः प्रसिच्यत इति ॥ समानमागृहपतियागात् ॥ पुरस्ताद्गृहपतेः स्रुवाहुती
रुपजुहोति ॥ यद्देवा देवहेडनमित्यष्टानुवाकेन प्रत्यृचं हुत्वा गृहपतियागादि यूनरलंमवर्जं तर्पणं तासंतिष्ठते ॥ एतेनैव यजेत तेव्यतिक्रमेदाव्यतिक्रमे ॥
अपो मे वा रेतः सिक्त्वा एतेनैव यजेत पातकी उपपातकसंयुक्तो द्वादशाहं ॥ महापातकसंयुक्तो मासमेकं ॥ पुण्यमिच्छन् संवत्सरमृतुं वा यजेतेति ॥ असामपी

१२३ षोपवित्रेष्विव दान्यभागयोः सत्रकारस्य विशेषो ब्राह्मणात्सगुणाज्यभागकीर्तनमिति प्रदीपकारेणोक्तमिति भाति॥ अथ पवित्रारोपणादीनां कालविशेषः॥ तत्रापस्तं
123 बीयधर्मसूत्रे॥ श्रावण्यां पौर्णमास्यां तिलभक्ष उपोष्य वा श्वो भूते महानदमुदकमुपस्पृश्य सावित्र्या समित्सहस्रमादध्याज्जपेद्वेषिपङ्क्तकृत्वा पवित्रार्था
नाहरेदिति॥ अत्रोज्ज्वलाकारः॥ गिरिप्रभवा समुद्रगा महानदी तत्र भवं महानदं। सहस्रसंपत्तिपक्षस्य। आदध्यादिति वचनात्सहोमाधर्मः स्वाहाकारः। पवित्रार्थाः
शुध्यर्थाः। मृगारेष्टयाद्युष्टयः। पङ्क्तिक्रतवः सोमयागाः। अग्निष्टोमादय इति। अथानेकदोषप्रायश्चित्तं। तत्र धर्मसूत्रे बौधायनः। बहूनामपि दोषाणां कृतानां दोषनिर्णि
ये। पवित्रेष्टिं प्रशंसन्ति सा हि पावनमुत्तममिति। अथाप्युदाहरन्ति। वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च। ऋतावृतौ प्रयुञ्जानः पापेभ्यो विप्रमुच्यत तदृषापेभ्यो विप्र
मुच्यत इति। अथ सर्वपापनाशप्रायश्चित्तं। तत्र धर्मसूत्रे बौधायनः। मृगारेष्टिः पवित्रेष्टिस्त्रिहविः पावमान्यपि। इष्टयः पापनाशिन्यो वैश्वानर्या समन्विताः। इदं
चैवापरं गुह्यम् उच्यमानं विबोधत। मुच्यते सर्वपापेभ्यः सर्वेभ्यः पातकादेव ता॥ उपांशु॥ अष्टौ कपालानि॥ अग्निर्होतान्यसीदद्यजीयान्त्साध्वीमकुर्दैववीतिं नो
अद्येति याज्यानुवाक्ये॥ अग्नेः सुरभिरहमन्नादः॥ हिरण्यं दक्षिणा॥ पार्वणहोमचतुर्थीकारेण पुनरालंभवर्जं सर्वं पौर्णमासवत्॥ पूर्णाहुतिपक्षे॥ अग्नये सुरभिम
ते स्वाहा॥ अग्नये सुरभिमत इदं न॥ अत्र किंचिद्विशेषः। तत्र केशवीज्ञातदूपीकारः। अस्मिन्नवसरे यद्यनुगतान्यपस्तदाग्न्याधेयं कृत्वेष्टिः कार्येति। अत्र वाजपेयीशत
दूपीकारः। अथ यदि ग्रामांतरगतस्याहिताग्नेर्मृतवार्ताश्रवणादेवपत्न्यादिभिराहिताग्नेः शरीरदाहमावेन पलाशवृन्तैः पुरुषाकृतिं कृत्वा पितृमेधः कृतः।
अनंतरं जीवतीति निश्चयो विज्ञायते जीवन्वा समागच्छेत्॥ तदा तं यजमानं घृतकुंभे मज्जयित्वा जातकर्मादिसंस्कारान्कृत्वा ब्रह्मौ तेनामेव पत्नीं पुनर्विवा
ह्यानंतरं वसंतादिकाले वाग्नीनाधाय संसर्गेष्टिं कृत्वा सोमेष्टिं कुर्यात्॥ अथ यदि पितृमेधे वर्तमानेऽग्निसंसर्गात्पूर्वं समागतो यजमानश्चेत्सोमेष्टिरेव॥ अथाग्नि

विपुतक्यामां तेऽमृतेमा०॥ तत्राश्वत्थापनः॥ यदि वाध्वे प्रमीयेतेषि:॥ अग्निः पथिकृत्॥ वेत्याहि ०दक्षिणा॥ अध्वे प्रमीतस्याभिवान्यवत्सायाः पयसाग्निहोत्रं तद्धवी
सर्वहुतं जुहुयुः एसमवायादिति च त्वाणि सूत्राणि॥ यदि वा यजमानो ध्वनि प्रमीयेत॥ यस्मिन् ग्रामे अग्नय आसते तस्माद्ग्रामाद्ग्रामांतरे म्रियेतेत्यर्थ इति प्र
थमसूत्रस्य वृत्तिः॥ द्वितीयतृतीययोः पूर्वोक्तेऽर्थे॥ पाथिकृतीं कृत्वा तस्मिन्नेव विहारे तद्धवीर्धर्मकं अग्निहोत्रं नाम कर्मांतरमनेन विधीयते तत्सर्वमग्निहो
त्रवत्कर्तव्यं॥ सर्वहुतत्वं तु विशेषः॥ अतो नात्र भक्षोऽस्ति॥ कालश्च सायंप्रातरेव सांगप्रधानं तद्धवीं॥ प्रधाने प्रजापतिर्ध्याने कर्तव्यं॥ अभिवान्यवत्सानामान्यव
त्सेमदोहनीया॥ अभिवान्यो वत्सोऽपस्याः सा अभिवान्यवत्सा॥ अभिवान्योभियाचनीय इत्यर्थः॥ आ समवायादिति॥ आ शरीरस्याग्निसंबंधादित्यर्थ इति चतुर्थ
स्य॥ अथ प्रयोगः॥ यदि यजमानो ग्रामांतरे मृतस्तदा तद्वार्ताश्रवणानंतरं पत्नी कृत्विग्वा पाथिकृतीं कृत्वा तेष्वेवाग्निष्वाशरीरसंबंधावधि यामनवत्सा गोरस्
या वत्सेन दुह्यते तस्याः पयसा तद्धवीमग्निहोत्रं सर्वहुतं कारयेत्॥ प्रधानद्वयेऽपि प्रजापतिर्देवता तूष्णीं होमः स्यात्॥ भक्षणं नुप्यते॥ सर्वहुतत्वान्नायमग्निहो
मः॥ अथ द्रव्ये कर्माणि वपसांतरं॥ तत्रादौ द्रव्यविषये॥ अपि वा पतत एव कुतश्च पयसा जुहुयुरित्यैतरेयं ब्राह्मणं॥ अभिवान्यवत्साया इति नियमो नास्ति॥ किंतु य
तः कुतः॥ यस्याः कस्याश्चिद्गोः पयसा युत्रादयो जुहुयुरिति तन्माष्यं॥ अथ क्रमविषये॥ अथाप्याहुरेवमेवैनानजस्रान् जुहुतरं धीरेनाशरीराणामाहर्तो
रिती त्यैतरेयं ब्राह्मणं॥ अपि चामे याज्ञिकाः पक्षांतरमाहुः॥ देशांतरे मृतस्य प्रेतस्य शरीराणां अस्थ्यादिमेतावपवानां आहर्तोः आहरणपर्यंतं एनानाहवनी
यादींस्त्रीनग्नीन्नजस्रानुपशमरहितान् कृत्वा होमरहितानेवमेव आ समाप्तेरनेनैव प्रकारेण इंधीरन् प्रज्वालयेयुरिति॥ होमाभावेऽपि त्रयोऽप्यग्नयो नोपशा
म्यंति॥ तथा प्रेतास्थिसमानयनपर्यंतं प्रज्वालयेदित्यर्थ इति॥ अथ प्रयोगः॥ यस्याः कस्याश्चित्पयसा पूर्ववदग्निहोत्रं जुहुयाद्यथावा देशांतरेऽस्थि तावपवानामा

१२४ हरणपर्यंतमाहवनीयादीनग्नीनुपशमरहितान् होमरहितांश्च धारयेयुरिति ।। एवं क्रियमाणे सति ग्रामांतरे मृतं यजमानं तैलद्रोण्यामवधाय शकटेनाहृत्याथ
124 वा तत्र लौकिकेनाग्निना दग्ध्वास्थीन्याहृत्य ग्राममर्यादायां प्रतिष्ठापयन्ति ।। प्रतिष्ठापिते शरीरे स्त्रियः पुत्रा वा पत्नी पितृमेधीयान् संभारानग्नींश्च नयन्ति ।। ब्राह्मणेभ्यो
यज्ञायुधानि ददाति ।। न यात्र वपनं ।। अथवा आपस्तम्बमतानि सर्वसंदंशादीन्येव पात्राणि ददाति ।। मन्त्रयाज्यपोभ्यां च हृत्य दृषत्पुत्रार्थं निधीयते ।। अन्यैः पात्रवप
नं कर्तव्यं ।। अस्थिदहने पुरुषसर्वयज्ञपात्राणां दानं नियतमिति केशवीकारः ।। ततः पैतृमेधिकेन विधिना दहेत् ।। शरीराद्यभावे तु पलाशवृन्तैः पुरुषाकृतिं कृत्वापि
तृमेधः कर्तव्यः ।। अग्निहोत्रसकाशे मृतस्याप्यसंस्कारात् पूर्ववत् तस्याग्निहोत्रं सर्वं हुतं कार्यमिति केशवीकारः ।। अथाहिताग्नेः कृष्णपक्षे मरणशंकायां प्रा०।। त
त्राश्वलायनः ।। यद्याहिताग्निरपरपक्षे म्रियेताहुतिभिरेनं पूर्वपक्षं हारयेयुरिति सूत्रं ।। यद्याहिताग्नेरपरपक्षे मरणशंका स्यात्तदा तस्य पक्षस्य अवशिष्टा आ
हुतीः पक्षहोमन्यायेन हुत्वा अमावास्यां च कृत्वा कर्मभिरेवमेनं पूर्वपक्षं नयेयुः ।। आहिताग्निग्रहणमन्या अप्याहिताग्नेरपरपक्षाग्निताः पाः नित्याहुतयः ताः
सर्वा होतव्या इत्येवमर्थं ।। एषः पूर्वाधिकृतानां कालापकर्षो विधीयते ।। तेन जीवत एव मरणशंकायामेतदिति गम्यते ।। मृतस्यानधिकारात् ।। अतएव पूर्वसू
त्रे अग्निहोत्रनामकं कर्मान्तामित्युक्तमिति वृत्तिः ।। अत्र त्रिकाण्डमण्डनः । यदि त्वपरपक्षे स्यान्मृतिशंकाग्निहोत्रिणः ।। हुतावशिष्टाः पक्षेऽस्मिन्नजुहुयात्सक
लाहुतीः ।। अत्र प्रयोगः ।। कृष्णपक्षे संभावितमरणस्य पितुर्मातुर्वा यजमानस्य वा शुक्लपक्षमरणप्राप्त्यर्थं पर्यन्तं होमस्याहितावशिष्टस्य सायंप्रातर्होमान्तप्रयआ
दिना अपकृष्य होष्यामीति संकल्प्य उद्धरणपक्षे अभ्युद्धरणपूर्वकं पक्षहोमन्यायेन समस्य होमन्यायेन वा कुर्यात् ।। अथ शुक्लपक्षेऽपि रात्रौ मरणशं
कायामा०।। तत्र त्रिकाण्डमण्डनः ।। पूर्वपक्षे तु रात्रौ चेन्मृतिशंकाग्निहोत्रिणः ।। सायं हुत्वा तदैवायं जुहुयात्प्रातराहुती ।। अत्र प्रयोगः ।। शुक्लपक्षे रात्रौ मरण

शंकायां॥ एत्रौ संभावितमरणेऽस्य मम पितुः स्त्रीमरणप्राप्त्यर्थं यातरग्निहोत्रहोत्रहोमं अमुकद्रव्येणापकृष्य होष्यामीति संकल्प्य पूर्वकं यातहोमं कुर्यात्॥ अ
प दर्शपूर्णमासादिषु मरणाशंकायां प्रा०॥ तत्र त्रिकांडमंडनः॥ दर्शेष्टिं च तदा कुर्याद्दिष्टिपदिने संभवेत्॥ देवतानां प्रधानानामेकैकस्य पृथक् पृथक्॥ पुरो
नुवाक्यायाज्याभ्यां चतुर्गृहीताहुतीः॥ जुहुयाद्देवमन्यत्र सर्वत्रैव दिहूयते॥ अयीष्टयनमध्ये स्यात्पत्नीमरणसंशये॥ अवशिष्टेष्टिदेवेभ्यस्तत्संख्यानि घृ
तानि तु॥ चतुर्गृहीतान्येकत्र गृहीत्वा च समस्तहः॥ पुरोनुवाक्यायाज्याभिः पूर्ववन्नुहुणात्पृथक्॥ चातुर्मास्यांतराले चेत्स्यामिनोमत्रिशंकने॥ तत्रात्यपर्वप
र्वंतमग्निहोत्राणपशेषतः॥ तदेव कुहुते दर्शपूर्णमासान्बहूनपि॥ चातुर्मास्यावशिष्टानि पर्वण्यत्र समापयेत्॥ पशुलाभे पुरोडाशं निर्वपेत्पशुदेवतं॥ आ
मिक्षामपवा कुर्यात्पूर्णाहुतिमथापि वेति॥ तत्र दर्शपूर्णमासयोः स्नानादि चतुष्पपूर्वकमविकृतं दर्शयागं कुर्यात्॥ तत्र संकल्पे कृष्णपक्षे संभावितमर
णस्येत्यादि० णप्राप्त्यर्थं अपकृष्य आमावास्येन हविषा यक्ष्ये इति॥ दृष्टसंभवे आचम्य विहारं प्रविश्येत्यादि कृष्णपक्षे संभावि० स्यपि दर्शेष्टिस्थाने पू
र्णाहुतीर्होष्यामीति संकल्प्य उत्तरेण पक्षे आहवनीयं विहृत्य स्मार्तवदाज्यं संस्कृत्य चतुर्गृहीतं गृहीत्वाहवनीयमुपसमिध्य परिसमुह्य सपर्युक्ष्य परिस्ती
र्यालंकृत्य समिधमाधाय यजमानान्वारब्धः सन् जुहोति॥ अग्नये स्वाहा॥ अग्नय इदं०॥ पुनश्चतुर्गृ०त्वा॥ विष्णवे स्वाहा॥ विष्णव इदं०॥ पुनश्चतुर्गृ०त्वा॥
इंद्राग्निभ्यां स्वाहा॥ इंद्राग्निभ्यामिदं॥० सन्नयतस्तु॥ इंद्राग्न्योस्थाने इंद्रायमहेंद्राय वा॥ उत्तरेण पक्षे आहवनीयं पर्युक्ष्येत्यादि॥ अग्निविच्छेदे दर्शाद्यायाम
रणसंशये सेष्टिकमाधानं कार्यं नात्र कालनियमः॥ आहकालासंभवे सद्यस्कालमपि कर्तव्यं॥ एवमाने(ष्ट)संभवे पूर्णाहुत्यंतं वाप्याधेयं विधेयं॥ शा
खांतरे पूर्णाहुत्यंतपक्षविधानादिति॥ अपकृष्णपक्षे मृते या०॥ तत्र त्रिकांडमंडनः॥ आहिताग्निः कदाचिच्चेदुपक्षे मनोपदि॥ तदा शेषाहुतीः सर्वा

१२५ 125
जुहोतीत्याश्वलायनः ॥ अमेतद्देवदर्शेष्टिं कुर्युः कृस्रेमतस्य तु ॥ शुक्लपक्षे निशि प्रेतस्येष्टं तिप्रातराहुतिमिति ॥ अथ प्रयोगः ॥ मरणशंकायां कृष्णासंभ
वे मरणोत्तरमपि होमादिकर्तव्यं ॥ तत्र सर्वं हुतं ॥ संकल्पे कृष्णपक्षे मृतस्य शुक्लपक्षप्राप्त्यर्थमिति ॥ भक्षणस्य लोपः ॥ सर्वं हुतत्वात् ॥ दुग्धप्राशनवर्जं दर्श
शेष्टिं तत्स्थाने पूर्णाहुतीर्वा ॥ अथाधिश्रयणोत्तरं यजमानमरणे प्रा० ॥ तत्रैतोयं ब्राह्मणं ॥ तदाहुर्य आहिताग्निरधिश्रितेग्निहोत्रे साम्नाय्ये वा हविष्षु वा म्रिये
त का तत्र प्रायश्चित्तिरिति ॥ तेनैवैनाननुपर्यादध्याद्यथा सर्वाणि संदह्येरन्सा तत्र प्रायश्चित्तिरिति ॥ अग्निहोत्रे तत्साधनभूते पयसि पाकार्थं वह्नावधिश्रिते स
ति तथा साम्नाय्ये दर्शपूर्णमासार्थे क्षीरे अधिश्रिते सति तथा हविष्षु पुरोडाशादिषु अधिश्रितेषु यजमानस्य मरणे किं प्रायश्चित्तमिति प्रश्नः ॥ प्रायो विनाश
स्त्रस्य विहितं समाधानं ॥ अत्रैव यजमानदहनदेशाय वैमानिक्षीरादीनि अनुपर्यादध्यात् ॥ यजमानमनुयानि तैः प्रक्षिपेत् ॥ येन प्रकारेण सर्वाणि तानि यजमा
नेन संभूय दह्येरन् तथा प्रक्षिपेत् ॥ स्मार्ते दर्शादिक्रियायां तत्र दोषे प्रायश्चित्तिर्भवतीति तन्माष्यं ॥ अत्र प्रदीपकारः ॥ अग्निहोत्रे प्रक्रान्ते पूर्वाहुतेः पूर्वं यदि यज
मानो म्रियेत तदा पूर्वाहुतेः प्रभृति मन्त्राग्निहोत्रविधानेनाग्निहोत्रं समाप्यापि तमेध कुर्यात् ॥ अग्निहोत्रस्य पूर्वाहुतौ हुतायां यजमानो म्रियेत तदाहवनी
यस्य दक्षिणार्धे शीतभस्मन्युत्तराहुतिमग्नये कव्यवाहनाय स्वाहेति सर्वं निनयेत् ॥ यत्राग्नीनां भस्मराशिर्निहितस्तत्रैवोत्तराहुतिहोमः ॥ प्रदानादि वर्जमग्नि
होत्रं समाप्यापि तमेधः कर्तव्यः ॥ अथासन्नेषु हविःषु मरणे प्रा० ॥ तत्रैतोयं ब्राह्मणं ॥ तदाहुर्य आहिताग्निरासन्नेषु हविःषु म्रियेत का तत्र प्रायश्चित्ति
रिति यास्य एव तानि देवताभ्यो हवींषि गृहीतानि भवंति ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वहुति जुहुयात् सा तत्र प्रायश्चित्तिरिति ॥ हविःषु पुरोडाशादिषु
वेद्यामासन्नेषु यजमानमरणे याभ्यो देवताभ्यः पूर्वं तानि हवींषि उपक्रान्तानि देवताभ्यः तद्देवतानामानि चतुर्थ्यंतानि उच्चार्य स्वाहेत्यनेनैव मंत्रेण ॥ एता

निरुवींषि सर्वं हुतिनिःशेषेण यथा सर्वाणि हुतानि भवंतित था आहवनीयेन्नु हुयादिति तद्भाष्यं ॥ अथाग्नीषोमीये हविषि यजमान मरणे प्रा० ॥ तत्रैतदेयं ब्राह्मणं
॥ तदाहुर्य आहिताग्निरुपवसथे म्रियेत कथमस्य यज्ञस्यादिति नेनं याजयेदित्याहुरनभिप्राप्तो हि यज्ञं भवतीति ॥ तत्र यज्ञे वै कल्पविषये केचित् ब्रह्मवादि
नः प्रश्नं प्रच्छंति यः पुमानाहिताग्निः सन् उपवसथाख्ये सुत्यादिनात्पूर्वदिने म्रियेत ॥ अस्य यज्ञः कथं प्रवर्त्तत इति प्रश्नः ॥ तस्येदमुत्तरं एनं मृतं न याजयेदित्य
भिज्ञा आहुः ॥ तत्रोपपत्तिः ॥ सुत्यायां अनुपक्रांतत्वादयं यज्ञमनभिप्राप्तं एव भवतित स्माद्यागो न प्रकर्त्तव्य इति तद्भाष्यं ॥ अथ प्रवृत्ते सोमयागे यजमानमरणेभ
य प्राप्तौ च प्रा० ॥ तत्र बोधायनः ॥ अथ यदि सुते सोमे यजमानो म्रियेत मध्यं वा गच्छेत्सर्वाणि हवींषि पात्राण्येवमवधाय द्रोणकलशे सोमं गृह्य माज्यं प्रगृह्य मन्य
स्यामित्येकामाहुतिं जुहुयाद्ये देवा येषामिदं भागधेयं बभूव येषां प्रयाजा उतानुयाजा इंद्रज्येष्ठेभ्यो वरुणराजभ्योग्निहोतृभ्यो देवेभ्यः स्वाहेति हुत्वा तदूर्ध्वं यत्
मेधिकं कर्म प्रतिपद्येतामयेवा पुनर्यजेतेति ॥ अत्र प्रदीपः ॥ प्रवृत्ते सोमयागे यजमानो म्रियेत दारुणं मध्यं वा गच्छेत तदा दर्शपात्राणि पुरोडाशादीनि हवींषि नि
धाय द्रोणकलशे सर्वं सोममवनीय जुह्वां सर्वमाज्यमानीय वक्ष्यमाणहोममंत्रेण हवन्याय स्ववदानानि धाय ध्रुवं द्रोणकलशं गृह्णीयात् ॥ प्रतिप्रस्थातादय
य इतराणि गृह्णीयुः ॥ सर्वे ध्रुवपुरुषास्सहैवैकामाहुतिं जुहुयुः ॥ होममंत्रस्वरूपे देवा येषामिदं भागधेयं बभूव येषां प्रयाजा उतानूयाजा इंद्र
ज्येष्ठेभ्यो वरुणराजभ्योग्निहोतृभ्यो देवेभ्यः स्वाहेति ॥ एवं सर्वाणि हवींषि हुत्वानंतरं यैतन्मेधिकं कर्म प्रतिपद्यते ॥ मध्यायगमे प्रक्रांतं समाप्य
समाप्यते नैव क्रतुना यजेत ॥ मध्यायगमे निंदाहुतीर्हुत्वा प्रक्रांतेन समापयेदिति ॥ अथ सत्रे दीक्षितस्याधिसंभवे प्रा० ॥ तत्राश्व
लायनः ॥ दीक्षितानामुपतापे परिहितेषु प्रातरनुवाके नुयाकृते वा पुद्धिपन्नेषु क्षिप्र ब्रुषेव क्षः प्राणायप्राणेस्त्वनेत्सानेवाचेवाच

१२६ 128 वाचमस्मे पुनर्धेहि स्वाहेति ब्रह्मा हुतिं हुत्वा शीतोष्णा अपः समानीय एकविंशतिमात्सुप्रवान् कुशपिंजूलांश्चाव धायता भिरद्भिरवेर्थं कुर्वीत
ताभिरेनमाप्लावयेज्जीवानाम स्थता ३ इममग्मुं जीवयत जीविकानामस्थता २ इममग्मुं जीवयत संजीवानामस्थता २ इममग्मुं संजी
वयत संजीविकानामस्थता २ इममग्मुं संजीवयतेत्योषधि सूक्तेन च ॥ १॥ आरब्धे व्यान्तमज्जेत ॥ उपांश्वन्तर्यामौ ते प्राणापानौ पा
तामसौ उपांशु सवनस्ते व्यानं पातु असौ वै दुवाप वसुरेवा चं पातु असौ मित्रावरुणस्ते च क्षु पीपातु असौ चा श्विनस्ते श्रोत्रं पातु असौ वायुपसवणस्ते
द क्षक्रतू पातु असौ उ[illegible] क्थ्यस्ते ग्ना नियातु असौ ध्रुवस्त आयुः पातु असाविति ॥ ३॥ यथासनमनुपरिक्रमणं ॥ ४॥ त्रातारमिंद्र
मिंद्रमिति तिस्रः पादि ॥ ५॥ यदयदन्य दैका दे श्वदेवं स्वास्या वेये निर्विदं दध्यात ॥ ६॥ प्ररू त्यागदे ॥ ७॥ इति सप्तसत्त्राणि ॥ दीक्षि
ता । नामधेयः काश्चद्दीक्षित उपजपेद्व्याधि पीडित इत्यर्थः पतत्र नैमित्तिकमुच्यते ॥ पूर्वहिते यातरनुवाकेप्राणे वायोनक्षी पारमा
देतस्मिन्काले अनुयाक्रते वा प्रातरनुवाकेऽनपोरन्यतरस्मिन्काले पृष्ठिते इत्येनेन ब्रह्मा हुतिं हुत्वा शीतोष्णा अयो मिश्र यित्वा ता
स्व स्वक विंशति पुवार प्राशि य्य एकविं शति पिंजूलां श्चा धायताभिरस्यन संदीक्षितमाप्लावयेत स्नापयेत ॥ जीवानामस्थते त्ये
वमादिभिश्चतुर्भिर्मंत्रैर्या ओषधीः पूर्वाजाता इत्येतेन सूक्तेन च सर्वेषां मंत्राणां मंते सकृदेव स्नानं कर्तव्यं लप्रति
मंत्रं ॥ एतत्सर्वं ब्रह्मणा कर्तव्यं ॥ अस्य सत्त्रस्य मध्ये ताभिरद्भिरवर्थं कुर्वीतेत्युक्तं तदोषधि सूक्तेन चेत्य स्मादपरिष्टाद्दृष्ट
व्यं ॥ तत्र ब्रह्मणः कर्तृत्वा भावात् ॥ असापमर्षः ताभिरेवाद्भिरवोपततस्या चमनवर्जमुदककार्यं शौचादिकर्तव्यमिति ॥ त

स्य कर्तॄर्णां स्वयमेवाशक्तावन्योयः कश्चनपरिचारकः ॥ अतोनात्र ब्रूमानियमपात इत्युक्तं कर्मोपुत्र एवेति प्रथमस्त्र स्यवर्त्तिः ॥ आध्या
वनेप्रकृतेआ ध्याव्येतिवचनमात्राचनानुमार्जनयोः समानकर्तृकत्वसिध्यर्थं ॥ तेनैतदपिब्रूतेसेवकरोतीपरस्य ॥ उपांश्वेनर्यामावित्यादि मि
रमृमिर्मन्त्रैरनुमन्त्रजेत ॥ द्वितीयेन सर्वेशरीरे ॥ सर्वशरीरव्यापित्वात् व्यानस्य ॥ प्रथमंत्रस्य स्थानविशेषो लिंगेनावगतस्तेन तदेवानु
मन्त्रेत ॥ अन्येन सर्वेशरीरमिति तृतीयस्य ॥ उपततस्यैतस्मिन्कर्मणि वृत्तेननः सर्वेदीक्षितायथास्वमासनमुपरिकर्मेपुर्णछेउरित्य
र्थः । अतोवगम्यते पूर्वस्मिन्कर्मणि त्रिप्रमाणे सर्वे दीक्षिता ब्राह्मणा सहतत्रैवासत इति चतुर्थस्य ॥ इयमकर्तार्थस्वाधा भवति ॥ अ
नयासहन्तस्सकमास्मिंनिमित्ते ताप्यकार्यं करोतीति पंचमस्य ॥ पथ्यानामष्टिवादे का हिकारन्यतस्मिन्नहनिवैश्वदेवस्य
र्तं भवतिनिविधानीयं ॥ नदानन्दुहस्तस्यस्वस्त्यात्रेयेत चेति विदद्ध्यात ॥ स्वस्त्यात्रेयशब्देन तच्चरएवात्र गृह्यते ॥ तच्चस्वे
